॥श्रीगणेशाय नमः॥ श्रीसरस्वत्यै नमः॥ गुरुभ्यो नमः॥ ॥यद्ब्रह्माद्यमरैर्मुनीश्वरगणैर्ध्यानेन वेदार्थतः किंचिन्निर्गुणमस्ति नि
त्यसुखधीरूपं महो निश्चितं। तद्ब्रह्माखिलसृष्टिकारणमथाज्ञाना त्ममायावशात्सद्वाक्यैकविचारगम्यमनिशं बोधं व्यनक्तु स्फु
टं॥१॥ यश्चोदयांगीकरतोषं श्रीरंगनाथं कमलाधिनाथं। मुनीश्वरध्यातपदद्वयाब्जं रामानुजं तातमिवानतोस्मि॥२॥ रविलोव
लिसंविरामराजावसंतशानसन्नद्धराजराजा॥ हद्नदंडदयोत्कतीशः संगीतज्ञस्वरगुणाब्धपलोबुधेंदुः ३ श्रीसार्वभौ हँगीरसु
नंदनो यै श्रीशाहजाहँधरणीपुरहूतएतैं॥ निकंटकांसुमतीं प्रविधावतस्याः संरक्षणार्थमथसैहगतास नेस्मिन्नः ३ माणिक्य
सुक्तमाफलनीलवज्रसुरत्नवृंदैरिते निरम्ये॥ चामीकरीयेशशिदर्शनादिमासस्यजन्मादिलसानिकस्य॥४॥ मैगल्लप्रमितनारिखा
दिनेवासरेऽचिनयनोद्भवस्य च॥ समवद्दिवियदिंदुसंमिते १०३७ पारसीकशशिमानसनाब्दे ५ बहमनमासिशराक्षिनारिखा
यांदिनकरमानवशाशुभेदिनेस्मिन्। दिनकरभूमिजमर्त्ये क्यकालाङ्गणकनिवेदितयातरामनाम्नी॥ ६॥ मीने विलग्नेशशिभू
मिपुत्रौत्तनीयगौयंचमसंस्थुराहुः॥ वक्रीशनिः सप्तमभावसंस्थो बृहस्पतिः खेमकरेज्ञकेतू॥ ७॥ दत्यर्थौध्ययगौपरंतुभावप्रमाणेन
कविर्विलग्नेः एवंपदानत्समयेतिभवोमूर्तुर्वत्सातुरकः दीर्घायुषस्तस्यसुहाशयःसूर्यसमप्रतापः ८ उपविशत्साधुजनैकया
लुः संगीतचातुर्यकलानुरक्तः॥ दीर्घायुषस्तस्यसुराज्यकाले श्रीसार्वभौमोरचितोमयायं॥ सप्तःस्वरगुणांशो १०३७ नः
शेषसिद्ध २४ हतं हृतं॥ सप्तांगेध ० र्थमलब्धाधिमासो नकं समाः १०१ १

राम०
१

सिद्धांतारिसार्वभौमं मेनं रामं गुरुं भजन्। विवृणोमि निजग्रंथं ग्रंथं परबुद्धाज्ञतुष्टये ११ ग्रंथारंभाय वहिनपूर्वक्षणो विशिष्टशि
ष्टाचारानुमितयास्वसमाप्तिकामो मंगलमाचरेदिति श्रुत्या बोधितकर्तव्यतकं मंगलमाशीर्नमस्क्रियावस्तुनिर्देशात्मकं स
तं शिष्यशिक्षार्थं ग्रंथादौ निबध्नाति। विघ्नं व्याप्य स्थितो यः सकलसुरनरैर्वंदितश्रीनिवासस्तेजोमूर्तिः कृपालुर्मुनिवरनि
करैर्ज्ञानदृष्ट्यैवगम्यः। ध्यानं हृत्वा सबोधं सुखकरममितं सच्चिदानंदरूपः स्वांते तद्भक्तियुक्ते मयगतदुरितेसर्वदामेव्यनस्ति
ति। सः० बुद्धिस्तत्वेन प्रमिदुः मे स्वांते ध्वेतसि। धामज्ञानांधकारं मालिन्य-हृच्चा विनाश्य-बोधमात्मज्ञानं सर्वदाऽनवरतं व्य
नक्तु प्रकाशयतु व्यविवक्षितो ऽर्थः अज्ञानस्य ज्ञानविनाश्यत्वात् तेनात्मज्ञानमज्ञानं नाशं च करोत्वित्यर्थः ईश्वरविषयक
भक्त्यभावसे ईश्वरे मुख्यभाजि मनसि प्रकाशासंभवो न प्राहतदिति तस्येश्वरस्य षष्ठ्यर्थो विषयत्वं घटस्य धीरितिवत् याभक्ति
राराध्यत्वेन ज्ञानं तद्धक्ते तेनेश्वरे भक्तिरित्यविधानादयुक्ते समासे सप्तमी शौंडैरित्यनयोगविभागाश्रयणसमाधिलक्षणप्र
संग० एतेनेश्वराभिमुख्यं दर्शितं नन्वज्ञाननिरासश्चित्तेन युक्तः तस्य दृढनरहेतुभूतदुरितसहकारादतः पूर्वविशेषण
कलितं शेषणापाहव्यपगतेति व्यपगतं निरासतं दुरितमज्ञानमोहादिमालिन्यं यस्मात्तस्मिन्नित्यर्थः भक्तिरूपतमः शोधिक

यैवदुरितापगमे दुरितरूपकारणनाशेकार्यज्ञानमलापगमे सति बोधप्रतिबिंबश्चेतसि भवेदेवेति भावः अत्र यद्यपीश्वरप्र
काशो नाशंसे विषयः निर्मलाभिमुखे चेतो मुकुरे तस्यार्थसिद्धत्वात् तथाप्यर्थसिद्धेऽपि प्रकाशो सर्वदा चस्य नित्यकालसंबं
धस्यैवाशंसा स्वं व्रीहिभिर्यजेतेत्यत्राग्नेयादिवाक्यविहितयागानुवादेन द्रव्यस्य विधेयत्वमिव दध्ना द्रियकामस्य जुहुयाद्दि
त्यत्राग्निहोत्रं जुहोतीत्येतद्वाक्यासिद्धहोमाद्यनुवादेन गुणफलसंबंधस्य विधेयत्वमिव वाबोध्यं ननु बोधो नर्थकः इष्टाहे
तुत्वादित्यत्र हेत्वसिद्धिमाह सुखकरमिति सुखपदेन सर्वदुःखध्वंसो भारापगमे सुखीति वत् अनवच्छिन्नप्रवाहरूपं वा सुखं मोक्षस्य
कारणभूतं भिद्यते हृदयग्रंथिः छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इत्यादिश्रुत्या ज्ञानस्यैव मोक्षहेतुत्वो
क्तेरिति भावः एतदुपपादकमे वविशेषयुक्तिः अमिनमिति यत एव बोधो धारावहरूपो ननु कोमलकंटकायमानो तत एव सुखं
करकरइत्यर्थः नहि कोमलकंटकवदीश्वरबोधो मोक्षरूपफलाय कल्पते आशंसायाश्चपीष्टसाधननिमित्तत्वेन सफलत्वो
क्तेः क्रियमाणत्वात् इष्टं च मोक्षएवाखंडानंदप्राप्तिरूपो दुःखध्वंसरूपो वा सर्वसांसारिकाप्यमानो विश्वजिन्न्यायाच्छ्रूयते न
हि निःफलकस्य चित्प्रवृत्तिर्दृश्यते तथा च मुक्त्यर्थमेव भगवतो खंडबोधसमाशंसनमुचितमिति अत्र यद्यपि ग्रंथारंभप

राम०
२

दत्तस्य समाप्तौ काम्यांतरे सति मोक्षस्य काम्यत्वोक्तिरर्थांतरमस्ता तथापि कामिनी सुखार्थं प्रवृत्तस्य पुत्रो सति रिवतस्यानुषंगि
कतया वश्यंभावेन परमफलस्यैव परंपरया काम्यत्वं यद्वा बोधस्य मोक्षहेतुत्वे पीश्वरगोचरबोधाशंसायामंगलतया मं
थादौ समाप्तिहेतुत्वे नोचितं बुद्धिस्थत्वं विस्तरएवं स्तुत्वा पेक्षितमाह विश्वमिति यः विश्वं विशंति भूतानि यत्रेति विशंति
कर्मवशात्संसारे स्वयमेवेति वा विश्वं० स्थावरजंगमात्मकं व्याप्य धारणात्मकप्रयत्नवत्तया ऽभितः संयुज्यांतर्यामितया
स्वकार्ये नियुज्य च स्थितः सन्नावान् वृत्तिनियामकसंयोगस्य तत्रायोगात् अत्र स्वार्थः पूर्वकालत्वमुत्तरकालत्ववान
विवक्षितः ईश्वरसत्तायाः पूर्वोत्तरकालासंभवेनेश्वरासर्वविश्वाप्तसिद्धेः एतेन जगद्व्यापकत्वं सूचितं नन्वेतेनाप्याका
शसिद्ध्यार्थांतरमत आह सकलेति कलाश्चांद्र्यश्चतुःषष्टिकलाश्च सुक्ष्मात्माकाशादौ तु नसर्वदेवनु रवंद्यत्वमिति न
द्यावृत्तिः एतेन नमस्काररूपं मंगलं कृतमिति सूचितं ननु देवानराश्च किमर्थमेनं सेवंते प्रयोजनाद्वादित्यतः प्रयोजन
सूचकमेतद्विशेषणं वस्तुनिर्देशात्मकत्वेनाह श्रीनिवासइति श्रीर्लक्ष्मीतदाश्रयः लक्ष्मीपतिरित्यर्थः तथा च भागधेया
धिदेवता लक्ष्मीर्यदधीनात्तस्मै वयाते षां मनोरथसिद्धिर्भवत्येवेति सफलैव सेवेति भावः ननु नाहशोपि मूर्खैर्नरावच्छिन्नो

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नाज्ञाननिवर्त्तनसमर्थस्यतस्तेजोमूर्त्तिः ब्रह्मरूपज्योतिः स्वरूपरसर्थः नचैवमसौप्रभुवा सेवासुपेक्षतेइति ताभ्यां
कथंनमस्क्रियतेइसतआहनपालुरितिः नयामयइत्यर्थः तेनभक्तानुग्रहसामर्थ्यसूचितं नतुसर्वमेतन्नदास्यान्स्या
द्यदिताहशपुरुषविशेषमानमतआहमुनिवरेतिः मननशीलासुनयोसुक्तासुजानाश्चयोगिनस्तेषुवराःसुक्ताः
ईश्वरमात्रविषयकबोधशालिनोत्तेषांनिकरैःसमूहैरित्यनेनभ्रांतनशंकायाला ज्ञानरूपयेबहुधानान्यया
गम्यइत्यनेनाविवादियोगिप्रत्यक्षमेवप्रमाणत्वेनोपन्यस्तं रूपाद्यभावाच्चनचाक्षुषाद्यध्यक्षगम्यत्वमनोज्ञानपदे
नयोगजसंनिकर्षउक्तः असंनिहृष्टस्यप्रत्यक्षायोगात् नचसुक्ष्मेतत्सर्वेरात्मगुणानांपरायोग्यत्वादित्यनेनयोगिप्रत्य
क्षस्यास्मदाद्यविषयत्वेनसंदिग्धशापयदिनिर्णयत्वादतः श्रुतिमेवाविवादांप्रमाणत्वेनोपन्यस्तुंविशेषएति सदिति स
देवसौम्येदमग्रआसीन्नित्यंज्ञानमानंदंब्रह्मसत्यानंदमयः पुरुषः द्यावाभूमाजनयन्देवएकइत्यादिश्रुतेर्मानत्वान्नसि
द्धिरितिभावः एतत्त्वेवरांनमतेनेत्यापिकमतेत्रुसमुत्तावित्वेनज्ञानंआनंदःसुखरूपंतेवर्त्तनेयस्मिन्नित्यर्थः अत्र
चयद्यपिधर्मादयोभात्रसुखंनत्रेतिप्राचांमतंतथापिनिसमुखाभिधायकश्रुत्यभ्यपगंतनवीनमतेनोक्तं याहिश्रुति

रानंदधिष्ठिहस्यनित्यत्वंप्रतिपादयतिसाविशेषणस्यानंदस्यापिधर्मादिवत्सनावच्छेदकंतुनन्यसुखत्वमेव नसुखत्वं कार्याका
र्यवृत्तिवारितिः अथपूर्वग्रंथोक्तस्यग्रंथनिर्मितिकामःएवंग्रंथाधिकारीज्ञानाशंसारूपमंगलंवानिबध्नात्रा विघ्नमिति
सईश्वरोममनसिबोधंपूर्वसिद्धांताधिकज्ञानंसदाप्रकाशयतु नतुज्ञानहानिविरोध्यज्ञानमालिन्यहीनोधःकथंस्यादत
आहध्यानमितिः अज्ञानमालिन्यं हत्वा दूरीकृत्येत्यर्थः नाकुग्रंथपदार्थतत्त्वचिंताहेतुरूपबोधस्यदुःखहेतुत्वेनपर्यवसा
नाच्छिष्टहेयत्वमित्यतआहसुखकरामिति विचारेणपदार्थतत्त्वज्ञानलाभादनिर्वचनीयंसुखंभवतीत्यनुभवैकवेद्यंग्रंथ
द्वाराकीर्त्तयतिज्ञायश्रवणाच्चसुखमनसहेतोरभ्यासनंयुक्तमितिभावः नतुबुद्धिबोधेनस्वलविशेषेसुखसंभवात्तत्सर्वेतिसा
धारणसिद्धांतोपजीव्यबोधसंपादनमपुरुषार्थइत्यतआहभ्रमितमिति भ्रमपरिमितंपूर्वसिद्धांतकर्त्तृकविचारोपजी
व्यमितियावत् तेनहृत्वसिद्धांताधिकसिद्धांतोपजीव्यबोधसंपादनंपुरुषार्थइतितदाशंसनंयुक्तमितिभावः नचीश्वरःकि
मर्थंनबाह्यांशाशिष्यति संबंधविशेषाभावादित्यतः स्वांतविशेषणमाहनभ्रमिसुक्ते इतिः तथाचासाधारणसंबंधो
स्त्येवेतिभावः अतएवोपगतइतिइतिस्पष्टं नचीश्वरसद्भावेकिंमानमित्यतः प्रसिद्धत्वंविवृणोतिविघ्नमिति तथाच

योविश्वाधारोव्यापकत्वात्स एव ईश्वरः अग्निमविशेषणाद्दयंपूर्ववत्· नच ज्ञानांधकारनाशे शास्त्रेन कथं कर्तुं शक्यस्तन्नाशकस्वरूपा
भावादित्यत आह तेजोमय्रिरिति· तेजोंधकारयोर्नाशकनाश्यभावः प्रसिद्ध इति भावः· ननु प्रभुत्वादनीशं न करिष्यतीत्यत आह
क्षपालुरिति· अग्निमविशेषणं पूर्ववत्· सच्चिदानंदरूप इत्यपि पूर्ववत्· यद्वा· नजुसुखकरबोधईश्वरेणानदेयस्तद्दानयोग्य
स्वरूपाभावादित्यत आह सच्चिदानंदरूप इति· ज्ञानानंदस्वरूपो ज्ञानंसुखं यज्जीवं ददातीति किंचित्रमिति भावः ॥९॥ ॥ न
नुमंगलस्यसमाप्तिं प्रतियदि हेतुतास्यात्तदा न कुरुते प्रवृत्तिर्युज्येत· नचैवं· अन्वयव्यतिरेकाभ्यां व्यभिचारात्· सत्यपिमंगले
कादंबर्यादावसमाप्तेरसत्यपिमंगलेनास्तिकग्रंथसमाप्तेश्च सतोगणेशनमस्कारस्वरूपमंगलांतरनिबंधनछलेनोत्तरं सूचय
न्नाह ब्रह्माद्या विबुधगणाः स्वकार्यसिद्धौ यं विघ्नद्रुमदलनोद्धुरं प्राणाम्य· जायंते सपदि हृतारिवलार्थसंघा संदंतारवलवदनं
नमामि नित्यमिति· तं बुद्धिस्थं· दंताचलोगजस्तस्यवदनंमुखमिवमुखंयस्यैतादृशं गणेशमहं नमामि· नमस्करोमि· ननु गणे
शनमस्कारः किमर्थमीश्वरमंगलेनैवेनैवाभीष्टसिद्धेरिस्तो बुद्धिस्थं विघ्नएवमस्तु ह्यापेक्षिनमारब्धस्याद्याइति· यंगणेशब्रह्मा
द्योदेवसमूहाः अत्रबहुवचनंगणस्याप्यनेकत्वसूचनार्थं· निजकार्यनिष्पत्त्यर्थं प्रणाम्य भक्तिश्रद्धाभ्यां नत्वा· कर्त्रव्यापेक्ष

राम०
४

त्वा

पानमस्कारस्य पूर्वकालेच्छोक्तिः सपदि· न कालाव्यवहितानाग्रिमक्षणे· सतारिवलार्थसंघाः· निष्पादितः समग्रसंपूर्णकार्याणां समू
हो यैरेवंरूपाः नित्यमनवरतं· जायंते· नतु नित्यमिति दंतावलविशेषणं· व्यर्थविशेषणं ज्ञापनेः नचाणिमंणमहत्त्वमणंगरईणमोह
णाइमिति वत्सेनिहितं ज्ञात्वा तत्रनिशाय द्योतनार्थं नमामीत्यत्र नित्यमित्यस्य युक्तेर्व्ययइतिवाच्यं· यंथारंभे नित्यनमस्कारोक्तेर्बा
धितत्वात्सत्यपामेननित्यतादृशकार्यसिद्धिकथनस्य देवनोकर्षत्वंजवत्वेनदूरान्वयस्यादोषात्· तथाचजेतुंयस्त्रिपुरंहरेणाहरि
णाव्याप्तादृष्टिंबध्नतास्त्रुंबारिभवोद्भवेनभुवनंशेषेणाधर्तुंधरां· पार्वत्यामहिषासुरमथनेसिद्धादिभिर्मुक्तये ध्यातः पंच
शरेण विश्वजितये पायात्सनागानमत्स्यकच्छागणेशनमस्कारं विनादेवानामपिकार्यसिद्धिर्नभवतीतिनत्रमस्कारस्या
वश्यकइतिभावः अत्रहेतुगर्भविशेषणमाह विघ्नद्रुमदलनोद्धुरमिति· विशेषेण घ्नंतिकार्याणीति विघ्नाः कार्यनिष्पत्त्यंतरा
यभूताः तएवद्रुमाः वृक्षाः भूमिगूढदृढतरमूलास्तेषां दलनेउन्मूलनेउद्धुरमतिसमर्थं· अत्रविघ्नानांद्रुमोपमोक्त्यागणे
शस्यद्रुमोन्मूलनशीलमहागजोपमत्वंव्यज्यते· तथाचास्यविघ्नाधिदैवत्वेनस्वानुकूलयतिकूलजनकार्ययोः क्रमेणांत
रायनाशांतरायकर्तृत्वान्निर्विघ्नताकालिककार्यसिद्ध्यर्थं गणेशमंगलमावश्यकमितिभावः· एतेनावतारिकोक्तंदूषणं नि

निरस्तं· तथाहि· सर्वशिष्टाचारविषयत्वेन मंगलस्यैहैतेसफलत्वे सिद्धेनस्यचफलजिज्ञासायां दृष्टफलेसंभवत्यदृष्टकल्पनानौचि-
त्यादुपस्थितासमाप्तिरेवफलं· विघ्नप्राबुर्याद्दूलवत्तरविघ्नाद्वाजन्मांतरीयमंगलस्तूनेश्चक्रमेणानाद्वयव्यतिरेकव्यभिचारःनिर्वि-
घ्नमेसमाप्यतामित्याचारानुमितश्चस्याविघ्नध्वंसद्वारामंगलस्यसमाप्तिहेतुत्वावगमात्· द्वारंप्रतिचसमसंख्याकस्यैवतस्य
हेतुत्वं· अतएवमहाग्रंथारंभे बहुविघ्नसंभावनयाश्रेयांसिबहुविघ्नानीत्यत्रेश्वरबहूनांमंगलानांनिबंधनेशिष्टसंमतंसु-
त्रमिसुरयनाचार्याः· न्यायविदस्तुविघ्नध्वंसएवफलसन्निकृष्टत्वात्· समाप्तिस्तुबुद्ध्यादिसामग्रीसमाजात्· विघ्न-
मेणाप्तनमंगलस्यस्वतः सिद्धविघ्नाभावत्वेनोमंगलंनिःफलमेव· पापभ्रमेणाप्तनप्रायश्चित्तस्यप्रायश्चित्तमिवविघ्न
वतएवाचारानुमितयाविघ्नध्वंसकामोमंगलमाचरेदितिश्चस्याधिकारबोधात्· पापवतःप्रायश्चित्तत्वः· अतएवनि
र्णीतविघ्नाभावस्यत्रनप्रवर्तनेः यावनिर्विघ्नस्यकस्यचिन्मंगलेप्रवृत्तिः सापनिबंधकसंदेहात्· अतएवानुपस्थितपरिय
न्तिभिः पार्थिवैर्दूरदृष्टयपनयआदिष्टनेरनि ॥ २ ॥ ॥ अथारब्धग्रंथस्यप्रतिपाद्याभिधायकत्वंभवत्विति कामः सरस्व
तीविषयकमंगलांतरंनिबध्नाति· यस्याःप्रसादमासाद्यकाव्यंलक्षणलक्षितं· कुर्वंतिसुबुद्धयस्तमसारंवसचिस्यर्थः तस्याः

राम०
५

सरस्वती· वागधिष्ठात्रीदेवताः ममसुखस्यकमलेः· अस्तु· अत्र पूर्वश्लोकांतिमपदस्यसांनिध्यादन्वयेनसदासारंवसचिस्यर्थः तस्याः
पद्मासनत्वोक्तेः· वसतेः किंफलमित्यतोबुद्धिस्तांविहएवभुवनत्रयनियस्यादिति· उताः पूर्वकुंठितधियः· काव्यानधिकारिणः· अपिशा
ह· आश्चर्ययोतनार्थे· यस्याः वाग्देव्याः प्रसादंप्रपाकराहविषयत्वमासाद्यप्राप्य· काव्यं कविनिर्मितिशाह्यार्थोभयरूपं· लक्षणलक्षितं·
तद्दोषोशाह्यार्थौसालंकारौगुणान्वितौ· काव्यमित्यत्रलक्षणाकांतं कुर्वंति· सुबुद्धयस्तमप्रसादंप्राप्यनाहशांकाव्यंकुर्वंतीत्यत्रचित्रमाश्च
र्यं· तथाचप्रसादयत्नाश्रितवसतिफलस्यावश्यमधिकत्वाचाहुचितोक्तिभिः प्रतिपाद्याभिधानंतयैवनिःशेषजाड्यापहयामस्ति
द्वाग्रस्तुपाकर्तव्यमितिस्वतःसिद्धंफलमितिभावः ३ अथसर्वांशसाप्राप्तिंविनाग्रंथासंभवस्यतःस्वगुरुस्तुतिमंगलांतरंनिबंध
नयाजेनस्वस्यतत्प्राप्तिंसूचयति· मंदोप्यहंयच्चरणाब्जसेवासंप्राप्तबोधांशवशात्सुधीभिः सिद्धांतनद्याधिगमैःस्वपक्षबुद्धौत्त
तस्तेगुरवोजयंतीति· प्रसिद्धाःगुरवः ज्ञानोपदेशकाः बहुवचनाद्गुरुतमगुरुतरगुरवोलभ्यंते· नानागुरवोवा· जयंति सर्वोत्कर्षेणवर्त
ते· तेनतान्प्रणतोस्मीतिनमस्कारःआक्षिप्यते· प्रसिद्धंविवरणानि· मंदइति· अहं ग्रंथकर्ता· मंदः सर्वकुंठितबुद्धिः· अपिशाह्या
न्मात्सदृशान्यसंदस्यजगत्यप्रासिद्धिः· आश्चर्ये द्योतकोवापिशाह्यः येषांचरणकमलसेवयासंप्राप्तज्ञानलवत्वशात्· सुधीभिः पंडि

नैः सिद्धांतशास्त्रतत्त्वानि भिः निजसमाजमध्ये गणितः तथा चेश्वरेणगुरुद्वारा मत्यंतानंदत्वमनएवगुरुदेवतयोरभेदइतिभावः ४
अथारभणीयग्रंथस्यसमूलत्वद्योतनार्थं सिद्धांतप्रवर्त्तकं सूर्यस्तौति गूढं स्थूलं स्वसिद्धांतं मत्वा यस्तच्छिरोमणिं सत्तवान् मनुजव्याजादसौ
तपनिभास्करइति असौ प्रत्यक्षविंबाधिष्ठाता सूर्यः तपनीत्यनेनैमस्कारभ्याह्रियते सर्वोत्कृष्टत्वं निरूपयति गूढमिति यः सूर्यः
स्वरचितं सिद्धांतं लोकप्रसिद्धं सूर्यसिद्धांतं गूढं उपपत्त्यार्थेनचक्रविनं स्थूलं सूक्ष्मासाधकं चोत्रानुसंधेयः मत्वा मनसिनिश्चि
त्य यद्यपि लोकप्रसिद्धसूर्यसिद्धांतः। सूर्यऋतोनभवति तस्यसूर्यांशपुरुषमयासुरसंवादनिबंधनात्मकस्पर्धिप्रणीतत्वा
त्तथापि श्रृणुष्वैकमनाः पूर्वं यद्दुर्ज्ञानमुत्तमं युगेयुगेमहर्षीणांस्वयमेवविवस्वतेनिलोकप्रसिद्धसूर्यसिद्धांतवचनेनसू
र्यस्तनसिद्धांतात्तुसारिमुनिप्रणीतसिद्धांतोयार्थकाशसूर्यस्तनएकएतत्सिद्धांतेसाक्षात्सूर्योक्तग्रंथस्यप्रसिद्धत्वोक्तेश्चतुर्थेसू
र्यसिद्धांतेपिनक्तानिः तच्छिरोमणिं तेषु सिद्धांतेषु शिरोमणिसंज्ञकं सिद्धांतशिरोमणिप्रसिद्धं मनुजव्याजात् मनुष्यावतार
छलात् मनुष्यावतारंगृहीत्वेत्यर्थः ऋतवानकरोत् अतएवसिद्धांतशिरोमणिकर्तुर्भास्करत्वंसंगछते एतेनसूर्यसिद्धांतायेत्त
यासिद्धांतशिरोमणिरुत्कृष्टइतिसूचितं तत्रजोपिसूर्यरूपत्वेनस्तुतः नतुस्यादेवं यदिसूर्यसिद्धांतशिरोमणिसिद्धांतयोः

भवभेदः सतुभगणादिविरोधाद्दसिद्धइतिकथमुक्तं युक्तमितिचेत् शास्त्रमाद्यंतदेवेदंयत्सर्वंप्राहभास्करः युगानांपरिवर्त्तेनकालभेदो
नकेवलइतिलोकप्रसिद्धसूर्यसिद्धांतवचनेनकालभेदाद्भगणादिभेदोत्रावश्यकत्वादुक्तं युक्तमेव यद्वा सूर्यस्तनसिद्धांतलोकप्रसि
द्धसूर्यसिद्धांतयोः कालभेदाद्भगणादिभेदोवश्यमंगीकार्यत्वेनसूर्यस्तनसिद्धांतोक्तभगणादिनामेवाशिरोमणएपुक्तत्वकल्पनेनप
स्तसूर्यसिद्धांतोक्तविरोधेपिनक्षतिः ५ अथप्रकृतसंगतसंबंधचतुष्टयंसूचयन्स्वकीर्त्तनुवृत्तयेस्वनामग्रहणपूर्वकं
चिकीर्षितंशिष्यावधानार्थंप्रतिजानीते देवज्ञवर्यगणसंततसेव्यपार्श्वश्रीरंगनाथतनयोथमुनीश्वरोहं ग्रंथान्विभाव्यसकला
नपिसार्वभौमसिद्धांतपूर्वमपरंस्वधियाकरोमीति अहं अपिशब्दाद्दूषणनिर्माणानधिकारीतिविनयनम्रत्वसूचनार्थं मुनीश्वरोपि
प्रत्यूषापरनामकः अथ सिद्धांतशिरोमणिमरीचिनिर्माणानंतरं सिद्धांतपूर्वं सिद्धांतशास्त्रं पूर्वं यस्यैतादृशं सार्वभौमं ग्रंथं सि
द्धांतसार्वभौमसंज्ञकं सिद्धांतपदार्थनियंत्रणात् स्वधिया निजबुद्धिकल्पनया करोमि स्वचकपोलकल्पितत्वेनप्रेक्षावदनाद
रणीयत्वतः सकलान् सर्वान् कलावातुर्यं तत्समेतान्वा ग्रंथान् विभाव्य अध्ययनभावनाभ्यांविचार्यति सिद्धांतशिरो
मणिमहत्यादिसत्वेएतत्पदिकार्यमतोविशेषयति अपरमिति नविद्यतेपदउत्कृष्टः अर्थेनोपपत्त्याविचारेणच यस्मात्

यद्वा भास्करेणालस्योक्तं यथा स्थलेस्थले हृषिनंतथैनमपि केचिद्दूषयिष्यंतीत्यतोपरमिति नविद्यते परः शत्रुर्दूषकइतियावत् य
स्य विचारपूर्वकं निर्मितत्वात्। स्वस्य प्रसिद्धत्वस्य वं विशेषयति दैवज्ञेति दैवमदृष्टं ज्ञानं तिये अदृष्टज्ञाने दृष्टज्ञाः स्वतो भवंत्येवे
ति होरासंहितागणितरूपज्योतिःशास्त्रतत्त्वज्ञास्तेषां मध्ये वर्यास्तेषां समूहेन निरंतरं सेव्यः पार्श्वभागो यस्येत्यादृशो तादृशोरंगना
थ शर्मा तस्य सुतः अत्र सिद्धांतेत्यनेन सिद्धांतपदार्थो विषयः करोमीत्यनेन प्रतिपद्य प्रतिपादकभावः संबंधः प्रयोजनं तु
जगतः शुभाशुभनिरूपणमिति नारदवचनाद्ग्रहगणितस्य फलादेशोपजीव्यत्वात्त्रिस्कंधज्योतिःशास्त्रस्य फलादेशोपजीव्यत्वेन
तदेव फलं मुख्यं तु सिद्धांतसंहिताहोरारूपस्कंधत्रयात्मकं वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषमित्यत्रापि श्रुतिप्रति
पादितकर्मकालप्रतिपादकत्वाज्ज्योतिःशास्त्रं वेदांगं वेदांगत्वाद्वेदफलवत्स्वयं फलं मोक्षः ज्योतिःशास्त्रवित्तासुरधिका
री सत्वष्टमेवर्षे ब्राह्मणमुपनयेदित्यादिना गुरुसमीपानीतो माणवकः किमर्थमहमानीतोस्मीति प्रयोजनमपेक्षते सांगो
वेदोध्येयो ज्ञेयश्चेत्यध्ययनविधिरध्येतारमपेक्षते अतउपनीतमाणवकाध्ययनविधोः साकांक्षयोरन्वयेन हि जएव
न मृद्वादिरूपनयनाभावात्॥ ६॥ ॥अथ प्रतिपाद्यमाह अस्वादिधान्नाशानकालरवेश्चस्वारयोः भूतग्रहस्थितेर्य

त्रप्रश्नानामुक्तिरुक्तेति अत्र सिद्धांतसार्वभौमे प्राणादिब्रह्मनाशपर्यंतयेवांतरखंडकालाः ग्रहवाराः अनयोर्निरूपणं भूमि
नक्षत्रग्रहाणामाकाशावस्थानस्य निरूपणं यद्यपि ग्रहचारे यथाप्रसंगे भूम्यादीनामवस्थानं निरूपितमतः पृथगुद्देशो न
युक्तस्तथापि करणेषु ग्रहवारेवचनं निरूपणाभावादत्र तत्प्रसक्तं किंतु ग्रहचारे यथास्थाने निरूपितमिति द्योतनार्थं यंत्र प्र
श्नयोरनेकत्वाद्बहुवचनं ७ प्रथमोद्दिष्टं कालं निरूपयिष्यन्वर्षावधिकालपरिभाषां प्रसंगादेकोक्तिलाघवेन क्षेत्रपरिभा
षां च श्लोकाभ्यामह स्वस्थोच्चरितवर्णानां गुरूणां दशकोत्थसुः तत्र द्वे पलमेतेषां षष्ट्यानाडत्र नाडिकाः ८ तत्षष्ट्यादिवस
स्तेषां त्रिंशतामासइष्टिनः तैरर्कप्रमितैर्वर्षमेवं क्षेत्रे विभागकाइति सम धातुः समायि श्रमसमरोषमलक्रियः प्रसन्नात्मेंद्रिये
यमनाः स्वस्थ इत्यभिधीयते इति स्वस्थस्य मुखे निर्गतक्रमाक्षराणां संयुक्ताद्यंदीर्घसानुस्वारं विसर्गसंमिश्रं विज्ञेयमक्ष
रं गुरुपादांतस्थं विकल्पेनेत्यक्षरगुरूणां दशकः दशककालः प्राणः श्वासोच्छ्वासांतर्वर्त्तीकालः विशेषाश्रयं विनासामान्य
स्य यावद्विशेषातिरिक्तत्वेन वर्णक्रमशक्यत्वाद्दशकत्वप्राप्तिकनक्षत्रगतेरेकरूपत्वेनान्यमानानामनियतानां निरासा
र्थं नाडत्र घटिकेति अथ प्रवहाभिनचक्रस्य विभागानां खंडकालानां ज्ञानार्थं सूत्रमतिदिशति एवमिति क्षेत्रे प्रवहाभि

नेभ्यहवाराश्रयीभूतनक्षत्रचक्रे एवमुक्तरीत्या विभागकाः अवयवाः ज्ञेयाः यथा पूर्वपरिभाषया वर्षस्य द्वादशांशो मा
सः मासस्य त्रिंशदंशो दिनं दिनस्य षष्ट्यंशो घटिका घटिकायाः षष्ट्यंशाः पलं तथा चक्रस्य द्वादशांशो राशिः राशेस्त्रिंशदंशो
भागः भागस्य षष्ट्यंशाः कला कलाया षष्ट्यंशो विकलेति क्षेत्रे समाद्येन समा विभागाः स्युश्चक्रराश्यंशाकलाविलिप्ताद्यभिधानाः
मणावप्युक्तः ९ एतदेव सूर्यसिद्धांतवचनानुवादेन स्पष्टयति विकलानां कलायाः षष्ट्यातस्य षष्ट्या भागमुच्यते तत्त्रिंश
ता भवेद्राशिर्भगणो द्वादशैव तेइति चक्रस्याक्षत्रभगणसंज्ञेत्यर्थः १० अथ सामान्यतः कालपरिभाषामुक्त्वा नेक्ष
नाश्रयेण परिभाषामाह सूर्यो द्वादशराशिभोगसमयः सौरं तु वर्षं तथा चंद्रोर्कं प्रविमुच्य येन समयेन सोऽसौ सुनक्षि स्वयं
तं मासं प्रवदंति चांद्रमिति रैनैबोध्यं इयं यत्रैवोदयास्तमयमध्यसमयस्तत्रावनाहः कहइति सूर्यस्य स्वशक्तिपूर्वदिगभि
मुखसंचरणेन द्वादशराश्यात्मकचक्रभोगकालः सौरं वर्षं तु कारणानां नानाभूतेन नेकवर्षाण्यपि प्रयोजनाभावा
दुपेक्षितानि सौरवर्षाणामेव वर्षपदेनाभिधानार्थं सौरं मानं वर्षपुरस्कारेणोक्तं एतेनैकराशिभोगकालः सौरमासएकां
शभोगकालः सौरदिनमेककलाविकलयोर्भोगकालौ सौरघटीपलेइति पूर्वसामान्यपरिभाषया सुज्ञेयं तथेति य

रवेटे-

राम।

८

यासौरं मानं तथा मानांतरमप्यस्ति तत्र चांद्रमाह चंद्रइति चंद्रः सूर्यचंद्रयोराश्यादिभोगाभेदे योगस्तदनंतरं तयोर्भोगयोर्भेदसं
भवादर्कस्य जनकालश्चंद्रस्येति येनकालेनासौ चंद्रः स्वयं स्वतोगमनेन सूर्याच्चंद्रस्याधिकत्वात्तं कालं सुनक्षि सूर्येणाके
गराश्यादिभोगाभेदरूपं प्राप्नोति तं कालं चांद्रमासं बुधाः प्रवदंति चंद्रः सूर्ययोगं प्राप्यानंतरं विमुक्तश्चंद्रस्य कचक्रपरिवर्ता
नंतरं विनासूर्येन सुनक्षीति चक्रांतरेण चांद्रो मासः तेनैवराश्यादिभोगाभेदसिद्धिः अतएव सूर्यसिद्धांते भवंति राशिनो मासाः
सूर्येंदुभगणांतरमिस्कलं भास्करेणापि रवींदू यैर्युतैः संयुतिर्यावदस्याविधो मासइति अत्र चांद्रमासौ मयासाधारणयो
गानयेक्षतया चंद्रस्यासाधारणहेतुत्वं मंतितं भास्करांचार्येणापि मध्यमगतिवासनायां कालेनयैनैति सुनः शशीनं क्रामश्च
क्रं विवरेण गस्योः मासः स चांद्रोऽयमाः कुरामाः पूर्णे षवस्त चुरिनप्रमाणमिस्येतन्नैगयेवोक्तं दर्शांतावधिकश्चांद्रोपासइ
तिस्यंतुमंरावबोधार्थं अत्र चांद्रमासानामेव मासपदवाच्यत्वसिध्यर्थं चांद्रमानं मासपुरस्कारेणोक्तं दिनवर्षादिकं परिभा
षया नापि सुज्ञेयं ननु सूर्यो यलक्षणाच्चंद्रभौमादीनामपि चक्रपरिवर्तकालश्चंद्रभौमादीनामपि वर्षं भवतु एवं सूर्यविमुक्त
महः सूर्येयेन सुनक्षि कालस्तस्य यहस्य मासोस्तु चंद्रस्योपलक्षणद्वारिसत आह इतरो रिति दूयं वर्षमासाविस्यर्थः अ

नैर्ग्रहैः अंशादिभौमादिक्रमेणाशेयंन॰ आर्षसिद्धांतेतदनुक्तेः गणितादिव्यवहारेतस्ययोजनाभावाच्च॰ सावनमाहयदिति यस्य ग्र
हस्योदयास्तयोः द्विनिजप्राग्भागासक्तबहुदयः तयोरव्यवहितयोर्मध्यवर्तीकालस्तस्य ग्रहस्य सावनदिवसः अस्य प्रतिदेशभि
न्नत्वेनानेकत्वंस्यादतः क्रोडीकरणार्थं संज्ञांतरमाह ब्रह्महृदिति॰ उदयानांभूप्रदेशभेदेनानेकत्वमपितेषांभूसंबंधनेकत्वमि
त्यभिप्रायिकंभूदिनमितिसंज्ञांतरं॰ सावनदिनस्यैवदिनपदवाच्यत्वसिद्ध्यर्थं सावनंदिनपुरस्कारेणोक्तं॰ मासवर्षादिकमत्रा
पिपरिभाषयाज्ञेयं ११ अथसर्वेषांसावनानांमध्येसूर्यसावनमेवमुख्यमितिनाक्षत्रंचाहयद्यपि॰ सूर्यसावनंबहुस्थलेषु
साधकं॰ प्रधानमन्यसावनाद्दवासरस्तत्रभ्रमइति॰ साधकं॰ उपयुक्तं॰ अतःकारणादन्यग्रहसावनेभ्यः सूर्यसावनंमुख्यं॰
तेनकेवलसावनशब्देनसूर्यसावनंग्रहनामपूर्वकसावनशब्देननहुग्रहसावनमत्रबोध्यं॰ नक्षत्रभ्रमणं॰ वासुक्तंतन्नक्षत्रचक्र
परिवर्तनमेकमेकोनाक्षत्रदिवसः यद्यपिपूर्वोक्तानक्षत्रोदययोरव्यवहितयोरंतरकालोनाक्षत्रंदिनमिसिद्धं॰ पुनरुक्तमि
दंतथापिब्रह्महृत्वनिरासार्थं पृथगुक्तिः॰ अन्यथाब्रह्मशब्देसूर्यसावनंनाक्षत्रग्रहणेनसर्वत्रसंशयापत्तिरितिभावः १२
अथसावननाक्षत्रयोर्ग्रहगतिक्षणोभेदोन्यथानयोरेकापत्तिरितिसिद्धवानक्षत्राणामपिगतिसद्भावादुक्ताहर्वासरश्चा

राम॰
९

द्धांतमनसि १

र्द्धसावनाहएवेतिब्रह्महृत्वंनस्यापिमुक्तं॰ सावनस्यहुदिनाभिधेयत्वात्॰ ननचिद्वृत्तिर्मुक्ता॰ मुहूर्तानक्षत्रदिनाद्वा भावादिस्याभिप्रा
येणाशंकते॰ यद्यपिकांतिवृत्तस्यस्वतोगत्वाद्दवासरउक्तार्द्धषष्टिघटिकात्मकत्वाभावतोनसंभवतिवक्ष्यमाणकांतिवृत्तस्य
नक्षत्राश्रयस्यस्वतोगत्वात्॰ स्वतोगछतीतिस्वतोगं॰ तस्यभावः स्वतोगत्वंतस्मादिसर्थः अग्रेतिजशक्त्यागमनप्रतिपादनाक्ष
त्राणामपिनहृतिसंभवेनोक्तोभ्रमकालोनाक्षत्रसावनाहः षष्ट्यानक्षत्रनाडिका॰ तस्यद्वादिवसइसुक्तार्द्धषष्टिघटिकात्मकमु
हूनाक्षत्रदिवसत्वाभावाच्चाक्षत्रदिवसोनस्यादिसंज्ञिसर्थः १३ उत्तरयतिः तथापिकालेप्राणादावविशेषाभावतश्चिंतिभवाउ
कानिलस्यापिपरिवर्तोयभ्रमइति॰ अंगीकृतप्राणादिकालेनक्षत्रसावनमुहूर्ताक्षत्रयोर्भेदात्॰ भवासरेभ्रमरूपेकाले
मुहूर्ताक्षत्रत्वनाशोनभवति॰ प्राणावयवादावलक्षेमुक्तेतदंतरसद्भावात्॰ अनुतथापिवस्तुस्वरूपकथनेंतरमात्रंदोष
एवेसस्वरसात्समाधानांतरमाहभवालकेति॰ अथपक्षांतरेः नक्षत्रपश्चिमभ्रमहेतुप्रवहवायोर्वांशरूपस्य॰ अपि
रेवार्थे॰ तेननक्षत्रानिरासः परिभ्रमणंभ्रमउच्यते॰ तथाचभवासरस्तुभ्रमइति पूर्वोक्तभपदेनतद्गतिहे
तुस्तवार्थशोलक्ष्यते॰ तेनपूर्वैः सुष्ठूक्तमितिभावः १४ अथसूर्यद्वादशोत्पाद्यक्तिव्यक्तिंश्लोकाभ्यांस्पष्टयति॰ वर्षा

MEMORIAL
DR BHAU DAJI

कौ शौर्कमासः स्याच्चांद्राद्दः सूर्यमासकः मासस्त्रिंशदंशाश्चांद्रहस्तिथिसंज्ञकः १५ सूर्यवद्दत्रिंशतानुसावनो मासइष्यते भ
दिनत्रिंशतातेवंमासोगणितागमादिति वर्षस्यसौरत्वेनन द्वादशांशाः सौरमासो नतुनिरुपपदो मासः एतेनैवं सूर्यमासात्रि
शांशाः सौरं दिनंनकेवलं दिनं घटीपलयोरपिसोपपदत्वमितिसूचितं मासस्यचांद्रत्वाद्द्वादशमासाश्चांद्रंवर्षं नतुनिरुपपदं
मासत्रिंशांशास्तिथ्याख्यश्चांद्रदिनं नानिरुपपदं घटीपलयोरप्येवं सूर्यसावनदिनत्रिंशतासावनोमासः ननिरुपपदः
द्वयत्रसर्वेषांद्वाहस्त्रिंशतेतियुक्तं तथापिप्रायुक्तसूर्यसावनप्रधानत्वस्यदर्शनार्थंसूर्यपदं तद्दत्राहः शब्देनसौरंदिन
निवारितमतः सावनात्रिधानार्थंद्विति एवंद्वादशसावनमासैः सावनंवर्षंनकेवलं घटीपलेष्वप्येवं नासत्रमासः सप्तवि
शतिदिनैः कैश्चिदुक्तः नक्षत्राणांतन्मितत्वादिसेनचिरासार्थमाह भदिनत्रिंशतेति एवं यथा पूर्वोक्तमासाः स्वस्वदिनत्रिंश
ताजातास्तथेत्यर्थः पूर्वोक्तपरिभाषयानक्षत्रदिनत्रिंशतान्मासत्रमासोयंसंहितास्वनुक्तोपिगणितप्रतिपादकशास्त्रा
त्सिद्धः नक्षत्रदिनस्योक्तमासोपर्यानिवारितोनएवघटिकादिकमाद्दमानादिति भास्करोक्तं मयापिषष्ठ्यानाक्षत्रनाडि
कैस्तेननना क्षत्रमाना द्घटिकादिकं ग्राह्यमितिसूचितं १६ अथकैश्चित्सारसीकंयद्गणितंसंस्कृतेननिबद्धोडुराशेमा

नांतरसुक्तंतदनूद्यप्रसतासुपसुक्तमिसाह चंद्रस्यभगणभोगाराशेमासंवदंतिकेचित्तन्नसंहितासुचोक्तंगणितादौनै
र्मोक्षाभिर्भावाद्विति तेनसमासेमिसुंसकं तत्रवर्षगोयसुक्तं संहितासुवएवार्थे गणितादौगणितमादिर्मुख्यंय
स्यासौगणितादिस्तस्मिन् गणितग्रंथे प्रयोजनाभावाद्दक्तुनयुक्तमित्यर्थः १७ वर्षपर्यंतंकालंमानभेदनिरूपणे नो
क्तंकलियुगकालमाह भवतिलघुयुगंतुपंचवर्षैरथरविभिर्युगकैर्द्वितीयकंतत् रविमितयुगकैर्युगंतृतीयंखखरिपु
भिर्युगपंचकलिस्तृतीयेरिति अथ अनंतरं लघुयुगैर्द्वितीयं तत् लघुयुगं द्वितीयलघुयुगमित्यर्थः द्वितीयलघुयुगैर्युगं
तृतीयलघुयुगमित्यर्थः तृतीयैः तृतीयलघुयुगैः युगपंचकलिः महायुगचरणाः कलिसंज्ञः १८ महायुगस्यान्यच्चरणत्र
यंचतुर्णांचरणानांक्रमंचाह त्रिस्त्रिः कलिर्युगैस्त्रयः कृतत्रेतेद्वापराख्याः क्रमादुक्तः कलिस्तत इति त्रिधास्थापनः कलिः
क्रमेणाचतुर्भिस्त्रिभिर्द्वाभ्यांगुणितः तेत्रयः क्रमात् कृतत्रेतेद्वापराख्याः महायुगचरणाः भवंति ततोद्वापराख्ययुगचर
णानंतरंसर्वश्लोकोक्तोयुगचरणः कल्पाख्योज्ञेयः नादौ०स्थापौतस्यसूक्ष्मभावात्तः १९ अथकल्पकालमाह मा
हायुगंयुतिस्तेषांखखाभ्रेरदाब्धयः तत्सहस्रंब्रह्मदिनंस्फुटंकल्पाभिधंतथेति तेषां चतुर्णांमहायुगचरणानांयु

त्रिद्विगुणास्तेस्युर्युगांघ्र

तिर्महायुगंस्यात् तन्मानमाहस्वरवेति भ्यतएवयुगचरणधर्म ४ ३ २ १ योगेनदशभिर्नेनमहायुगमिदंलभ्यतेनदासवर्ष
मैः किमिति महायुगदशांशः कलिमानं धर्मगुणं युगचरणमानं स्वस्वं भवतीति प्राग्उक्तं तत्सहस्रं महायुगसहस्रं स्फुटं
सूक्ष्मं ब्रह्मणोरिचान्योन्याश्रयदोषपरिहारार्थं पंचसंवत्सरे रकमोक्तं लघुयुगमित्याभिधानादिलगधोक्तमार्गेण का
लियुगमानमुक्तं तत्सहस्रं महायुगसहस्रं स्फुटं सूक्ष्मं ब्रह्मणोदिनं कल्पसंज्ञकं चतुर्युगसहस्रं तु ब्रह्मणोदिनमु च्य
तइति भगवद्भीतोक्तेः एतेनमनुः सुमानगैर्युगैर्युगं दुभिश्चतैर्भवेत् दिनं सरोजजन्मनो निशा च तत्प्रमाणिकेऽक्षरूलस्यष
ट्नसहस्रयुगस्य निरासः अतएव तदग्रे संधयः स्फुर्मन्नूनो रुनाद्यैः समाद्यादिमध्यावसानेषु नैर्मिश्रितैः स्याद्युगानां
सहस्रं दिनं वेधसः सोपि कल्पाद्यरात्रं च कल्पद्वयमिति भास्कराचार्यैः २० महाकल्पमाहनद्वयं द्यु निशो धातुः पूर्वो
क्तपरिभाषयाः शतवर्षस्य तं कायुर्महाकल्पाभिधं तथा कल्पद्वयं ब्रह्मणः अहोरात्रं रात्रियुगसहस्रानां तेहोरात्रविदो
जनाइति भगवद्गीतोक्तेः पूर्वोक्तसामान्यपरिभाषया दिनस्य मासीकरणं मासस्य वर्षीकरणमिति रीसा शतवर्षं कायुः ब्र
ह्मणआयुरुक्तं तथा तदेव महाकल्पसंज्ञं २१ अथ ज्योतिः शास्त्रमूलभूतभचक्रग्रहसंस्थानकालमाहसहस्र

राम०
११

घ२ [illegible]नेदांगशून्याद्रिभूभिः समाभिर्निजाहादिनोजा[illegible]दिसंस्थैः सहैनभचक्रं सहैर्विश्वकर्त्रा ध्रुवावद्दनित्यभ्रमेसंनियुक्तमिति
विश्वकर्त्रा ब्रह्मणा एतेनग्रहभचक्रस्य जनसामर्थ्यं सूचितं निजदिवसारंभाकल्पादेरित्यर्थः सहस्रेसाद्यक्तैर्वर्षैः एतत्प्रस
क्तं भचक्रं नक्षत्राश्रयभूतं अजादिसंस्थैर्मेषादिस्थैर्ग्रहैः सह ध्रुवावद्दनित्यभ्रमे ध्रुवयोर्याम्यसौम्ययोरावद्दः स्थितीस्त
तो योनित्यभ्रमो नवरतं पश्चिमभ्रमणं यस्येनादृशः प्रवहवायुस्तस्मिन् संनियुक्तं सम्यक्प्रकारेणस्थापितमि
त्यर्थः तदुक्तं सूर्यसिद्धांते ग्रहर्क्षदेवदैत्यादिसृजतोस्य वरावरं सतादिवेरादिभ्याद्याः शतघ्नावेधसोगताइति तदनुसृत
सिद्धांतसुंदरीयेकल्पादितो युगमहीधरवेदवर्षैर्दिव्यैः शतेनगुणितैरचितं क्रमेणः भूमंडलार्णवमहाधरखेचराद्यं न
स्तासतो भवलयेनिखिलाग्रहेंद्राः धात्रासिद्धपुरास्थितेनमधुमाधुक्रादिमध्यंदिनेसौरेऽग्रवहानिलेभवलयं प्रस्फ
भ्रमेयोजितं मेषादिस्थितरेवचरैः सहनतो वर्षादिवाराः समंपारब्धाः खगसूत्रयश्च सकलाः कल्पादितोनेवनाइति वसुषि
द्धांतसुंदरे विधेर्दिनादौ युगयत्समस्तं भूत्वायहाः प्राग्गमनप्रवृत्ताः इतीरितं वेदविरोधिनस्ते ब्रह्मार्कचंद्रादिमतादिभिन्नं
ब्रह्माप्राह चनारदायहिमगुर्यच्छो नकायामलं मांडव्यायवसिष्ठसंज्ञकमुनिः सूर्योमयाहयत्प्रसन्नागमसुक्तिरा

लितदिरंशास्त्रंविहायान्यथा यत्कुर्वंतिनरा ननिर्वहंतितद्विज्ञानशून्याश्चिरं सुनिप्रणीतेमनुजैः क्वचिद्वेदृश्यतेंतरं तदात
देवसंसाध्यंनकार्यंसर्वमन्यथेतिकल्पादिग्रहवारप्रवृत्तिवादिशिरोमणयादिमतंदूषितंतत्स्वप्नागस्त्यप्रकटनसूचनमात्रं
नवस्मृतः तेषामपिविबुधमौक्तरांतर्गतयेनामहसिद्धांतोमूलमिस्मृतयोरार्षयोः स्वतंत्रत्वेनकालभेदेनव्यवस्थायाः स
र्वपंडितमनोहरत्वात् सिद्धांतशिरोमणिपरीक्षोपयतः सुधिरेषांदिनादावित्यादिश्लोकव्याख्यानावसरेसिद्धांतसुंदर
तद्टीकाकारप्रपंचितदूषणमस्यविस्तरेणमयादूषितंतत्रैवधीमद्भिर्विलोक्यं अत्राप्रस्तुतत्वाद्विस्तरभीत्यावनक्ष
त्याद्यते २२ भचक्रस्थापनकालएवगतिप्रारंभकालइतिभास्करश्लोकानुवादेनाहततोपराशाभिमुखेभयंजरसरे
चरेशीघ्रतरंभ्रमत्यपि तदल्पगसेंद्रदिशंनभश्चरंतिनीचोच्चतरात्मवर्त्मस्विति ततः स्थापनानंतरमव्यवहितत्रुणादि
काले सग्रहे भयंजरे भाश्रयभूतगोले वक्ष्यमाणस्वरूपेपश्चिमदिगभिमुखे शीघ्रतरंवायुवशाद्भ्रमतिसति अपिश
ब्दोविरोधाभासालंकारायः नभश्चराः ग्रहाः तदल्पगसाः भचक्रगतितोल्पगसा नीचोच्चतराः येनिजमार्गास्तेषु व
स्यमानास्वस्वकक्षास्विसर्थः पूर्वदिगभिमुखंगच्छंति। एकएवग्रहः पूर्वदिशंपश्चिमदिशामव्यवहितंगच्छतीतिवि

रोधः वायुसतंपश्चिमगमनंस्वशक्त्यासर्वगमनमित्येकस्यनिमित्तद्वयेन रुद्धदिग्द्वयगमनमविरुद्धं प्रसक्ताप्रसक्तेपश्चि
मपूर्वगतीग्रहस्यशीघ्रतरमल्पगसेतिपदाभ्यांसूचिते अतएवमध्यमगतिवासनायांतोभचक्रेलघुपूर्वगत्यासेरा
स्तस्यापरशीघ्रगसा कुलालचक्रेभ्रमवामगसायांतोनुकीटाइवभांतियांतइतिभास्करावार्यैः समग्र्यस्यादितं २३
गतिप्रारंभारेवरवंदकालोपाधयः प्रवृत्तादस्यासर्वत्रजातार्कदिनेमधोश्चशुक्लादितोथायमकोटिजातात् सूर्योदयाद्वै
दिनमासवर्षघटयादिकानांयुगपत्प्रवृत्तिरिति अथो गतिप्रारंभसमयं सूर्यस्यदिने आदित्यस्वामिकदिवसे यमकोटा
जातात्सूर्योदयात् चैत्रस्यशुक्लपक्षादितः दिनमासवर्षघटीनां आदिपदात्पलास्वोः संग्रहः सुगपदेक समयावच्छेदेन
वै निश्चयेनप्रवृत्तिः सर्वत्रसर्वदेशेजाताः तेनयमकोटांसूर्योदयकालेन्यत्रशिभकाले आभिन्नरूपोऽभ्रंप्रवृत्तमिति
तात्पर्यं अत्रभचक्रमेषादिस्थानेयमकोटिरितिजप्राग्गसमसूत्रेणब्रह्मणास्थापितमिष्टयातः प्रवृत्तिकालेयमको
टिसूर्योदयः सूर्यस्यमेषादिस्थचोक्तेः अतएवचैत्रमासः चंद्रसूर्ययोस्तुल्यचोक्तेर्दर्शांतरूपः प्रतिपदादिः वारकल्पनंसूर्यस्य
प्रसक्तवादन्येषांसूर्यकराभिभूतत्वेनसुप्रचारः २४ अथब्रह्मदिनादितोग्रहसाधनंब्रह्मदिनांतपर्यंतमित्यंतभूतब्र

स्मरात्रिदिनसंवत्सरमासवर्षाणां निरासार्थमाह यतो भचक्रस्य रवेरानीरिनराश्योर्सुखे क्रमात् स्थितौ कदिनादीनवर्षेभ्यो ग्रहसाधन
मिति ब्रह्मणो दिनरात्रीर्सुरवे दिनादौ रात्र्यादौ चेत्यर्थः क्रमात् भचक्रग्रहाणां स्वजनविरामो पतउक्तावतः कारणात् कदिना
दीनवर्षेभ्यः ब्रह्मणो दिनस्यारंभकालाद्गतवर्षेभ्यः ग्रहसाधनं युक्तं तथा च भगवद्वाक्यं अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरा
गमे रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके इति तथा चांतभूतब्रह्मरात्रिदिनचयमासादीनामप्रयोजकत्वं सिद्धं तथा व
र्त्तमानस्यकस्यासुरोर्द्धगतं साद्वर्षाष्टकं केचिद्वदुः भवत्वागमः कोपि नास्योपयोगो ग्रहावर्त्तमाने द्वयातात्स्वसाध्याद्दिनभास्क
राचार्योक्तेश्च: २४ ब्रह्मदिनादितो गतवर्षज्ञानं श्लोकाभ्यामाह महायुगानि षट्कं च जलधिप्रमितानि च काहादेरादिच
रणो गता गोगेकवह्नयः २६ कल्पाद्याः सर्वजैक्यं स्यात् कल्पेन ग्रहसाधकं शिरोमणिमते शालिवाहनीयशकाननेइति ब्र
ह्मदिवसारंभात् गताइति लिंगपरिणामाद्विभक्तिपरिणामाद्वा गतानि गता विस्यर्थे पियोज्यं आदिवरणो स्तत्रैवा
ख्यो कलेरादितो द्वाः गताः वर्षाणि गतानीत्यर्थः चः समुच्चये उत्तरोत्तरसंख्यं गतमित्यर्थः फलितमाह सर्वजैक्यमिति
सर्वेभ्य उक्तगतेभ्यो तानमैक्यं कल्पेन कल्पादितो गतं ब्रह्मदिनस्य एवं कल्पचीत्रैः ग्रहसाधनोपजीव्यस्यात् ननु क

स्यादितो ग्रहचारप्रवृत्तिकालस्योभरत्वात् कथं कल्पगतं ग्रहसाधकमन्यथा सप्तिवर्षान्तर्ग्रहचाराभावाद्ग्रहसाधनस्यानिवा
रितत्वापत्त्या कुर्वतेतां पुनर्येप्यस्त्वेषुनेभ्यो महद्भ्योनमेस्त्विति भास्करोक्तदूषणग्रस्तत्वप्रसंगइत्यत आह शिरोमणिमते
इति यदेतत्कल्पगतं ग्रहसाधकमुक्तं तच्छिरोमणिमते तद्भवत्वं कमलोद्भवेनेत्यादिना कल्पादावेव ग्रहचारप्रवृत्तेः संगाका
रात् सप्तिवर्षाणामनुक्तेश्च नस्वमतेयेन दोषः शंकेत ननु बोलकानां नियतसंख्यात्वात् संकलितं नियतं कस्मिन्काले
कल्पगतं स्यादित्यत आह शालिवाहनीयशकाननेइति प्राग्वत्सप्तशतीकृतो शालिवाहनस्तदीयः शकः राज्यकालस्य
स्यारंभे सुखवाचकाननशब्दस्यादिवाचकत्वात् अत्रोपपत्तिर्भास्करोक्तपद्यं यथा षण्मनवो युगानि भमितान्यघ
गोद्धित्रयं नंदाद्रीदुदुदुगुणास्तथा शकनृपस्यांते कलेर्वत्सराः गोशैर्द्विद्विमनोकदस्वनगगोचंद्राः शकाश्चाहिताः सर्वे
संकलिताः पितामहदिने स्युर्वर्त्तमाने गता इति एकमनोरेकसप्ततियुगान्यतः षण्मन्वंतरं युगानि षष्टिशत्यधिकचतुः
शतं ४२६ पृथक्सप्तविंशति युगानि एवं त्रिपंचाशदधिकचतुःशतं ४५३ षण्मन्वंतरसप्तसंधयस्तद्रूपं महायुग
दशांशस्य चतुर्गुणस्य सप्तयुगत्वाच्चतुर्दशगुणाच्चतुर्युगपंचमांशः अयं युगात्रियमित्यत्र द्वापरस्य चरणस्य सु

ग पंचमांशाच्चाद्वापरयुगोयुगत्रयं एवंषट्वांशादधिकचतुःशतंयुगानि ४५६ युगांघ्रित्रयमित्यत्र द्वापराख्यस्य पूर्वसं
योजितत्वात्प्रथमचरणोपथग्यानाविसृक्तः कल्पादितोगतवर्षाणि च शालिवाहनशकादावेतानि ग्रंथप्रामाण्यावगता
नि ३१ ७९ सर्वेषामेकं शालिवाहनशकादौकल्पगतं १९७ ७२ ९४ ७९७९ २७ स्वमताभिप्रायेण ग्रहसाधकं
वर्षगणमाह कल्पादेर्ब्रह्मणाचक्रं यैर्वर्षैः प्रवहानिले स्थायिनं तद्विहीनं मेकल्पेनं ग्रहसाधकमिति मेसूर्यपक्षांगीक
र्तुः मनेरितिशेषः शेषंस्पष्टं २८ अथस्वाभिमतं शकादिकालिकं निबध्नन्निष्टकाले ग्रहसाधकगतवर्षगणज्ञानमाह
तत्रुगोघनरामाष्टगजेषचांकभूमितं इष्टकाले शकातीतवर्षैर्तीतैर्युतं भवेदिति शकवर्षेषु प्रामाण्यसंदेहनिरासार्थं
ज्ञातैः यंत्रवेधज्ञातग्रहद्वाराज्ञातैरित्यर्थः तथाहि अभीष्टदिने मध्याह्नसूर्यविधानतो ज्ञाज्ञेयाः लेशांशासंस्कृताः सू
र्यक्रांतिसंस्पाः सूर्यः स्फुटोज्ञेयः एवमत्र हि सूर्याज्ञेयाः ~~[illegible]~~ तयोरव्यवहितयोरंतरं स्पष्टागतिः मेषसंक्रां
तिसमयकालिकः सूर्यः आसन्नचालनेन साध्यसंभवागा अयनांशाः अयनांशाढ्य संस्कृतो नाष्टसूर्यो निरयनः स्प
ष्टसूर्यः ततः प्रसहस्फुटसूर्यकरणे परमात्मगतिदिनीयस्पष्टसूर्यतुल्यमंदोच्चेन स्पष्टसूर्यान्मध्यमो वः सोऽहोरात्रेका

राम०
१४

यंसस्याभ्रगणशेषं तस्मात्कुहकेन फलंगतभगणाएव गताह्नः एतेशकादिप्रोक्तगतवर्षमानेन हीनाः शकवर्षाणि नि
णीतानि भवंति अतएव सिद्धांतसुंदरे सौरवर्षसुखसिद्धखेचराएकवर्षगतिभिर्वियोजिताः उच्चपातसहिताः क्रियादि
गाप्तदुणाभिरहतेन ताहकाइसंज्ञकः अत्र मध्यावेधसिद्धग्रहाः गतभगणैः स्वानीतैर्युताः यदुणाभिरेकवर्षगतिभिर्वि
हीनाः संतः क्रियादिगाः ग्रहस्यमित्यर्थः इहः ग्रहकालेगताह्नः सहिगतवर्षाणि स्फुरंति शिष्यपरंपरया शकगतवर्षै
र्ज्ञातैर्वेत्यर्थः २९ अथोक्तकालनिरूपणसंहरति एवमुद्दिष्टकालो सौरचांद्रार्कसावनैः मानभेदैरन्यतमोगदितो बुध
संमतइति चतुर्मानात्मतमएवयः कालः सबुधसंमतः ज्ञेयं विप्रैस्तुमनुष्यमानं मानैश्चतुर्भिर्व्यवहारसंज्ञैरिति भास्करोक्तः
इतिहेतोः एवमुक्तग्रंथेनमयागदितो निरूपितः नान्योग्रहस्य निमानाद्यात्मकः ग्रहसाधने प्रयोजनाभावात् गुरुमानं
तु बृहस्पतेर्मध्यमराशिभोगासंवत्सरसंज्ञाहिनिकावदंतीस्फुटयाद्वादशाब्दागुरोर्यीनाभगणा वर्तमानकैः राशिभिः सहि
ताः शुद्धाः षष्ट्यास्युर्दिजयादयइतिसूर्यसिद्धांते संवत्सरज्ञानात्मकं सम्पन्नुक्तः ३० अथ ग्रहवारविवक्षुः प्रथमंत
त्साधकान्युगभगणान्यद्योतुष्टयेनाहः अर्कशुक्रबुधपर्यवेगुनगाद्रियायुगेखाभ्रखाभ्रयमरामसागराः एतएव

शनिजीवभृगुवांकीर्त्तिताः सुमुनिभिश्चलोच्चजाः ॥ ३१ ॥ ॥ षड्रामदेवेषुनगाद्रिसायकाश्चंद्रस्यदंताष्टरसांकजातयः भौम
स्यषट्शुभनगाग्निगोघनाविछीघ्रतुंगस्यखरांशुसंमताः २२ नरवह्निषड्रामतुल्यांशिखागप्रमाणं सितोच्चस्यशीघ्रस्यनागाग
पंचरसेंद्राः शनेः पर्ययाः पूर्वगसा ३३ चंद्रोच्चस्यत्रिखाश्व्यष्टनागवेदाश्वयोऽक्रमात् चंद्रपातस्यभगणागजाग्न्यश्विरदाश्विन
इति एतेऽक्रमिताः एवकारात्तदन्यनिरासः सुमुनिभिः कीर्त्तिताइत्यनेनवसिष्ठादिसुन्फलप्रामाण्यादुक्तानांप्रामाण्यं ज्ञातयो
द्वाविंशतिर्घनाः सप्तदशाः खरांशुसंमताइतिप्रसिद्धसूर्यसिद्धांतोऽपिषांमूलं पर्ययाः वक्रपरिवर्त्ताः पूर्वगस्येतिसर्वत्रसंबंधः चं
द्रोच्चेप्यनयोः संबंधः प्रथानंतरं चंद्रपातस्यउक्रमात् पश्चिमगसाभगणाः नपूर्वगसाः चंद्रोच्चपातौवक्ष्यमाणस्वरूपौ अ
त्रोपपत्तिः सिद्धांतसुंदरोक्ता अंभःसमीकृतमहीतलसंस्थितस्यछायादिनाडिघटिकासुसमस्यशंकोः याम्योत्तराभवतिसैव
नडुछमत्स्यपुच्छानस्त्वपरपूर्वदिशौभवेतां १ लंभस्यशोभनतरप्रभवस्यमूलधारायथायमकुबेरदिगायतास्यात् लंबोप
मस्यसुसमस्यडुपूर्वभागेकीलंनिवेश्यशिथिलांनलिकांचकीः २ याम्योत्तरामथतयाप्रविलोक्यसूर्यंतुर्यादियंत्रतइहोत्र
तइहोत्रतभागमानं ज्ञाचाविशोध्यनवतेर्नतभागकाः स्फुलश्चाक्षकांतरसुतीसमभिन्नदिक्कैः ३ क्रांत्यंशास्तज्ज्याजिनः

ज्याविभक्ताचिज्यानिघ्नतद्धनुर्दोर्लवाः स्युः तिग्मांशोस्तद्वासरेरात्रिवत्रेदृष्टाधिष्ठंकल्पयेत्रस्वदेहि ॥ ४ ॥ एवंसूर्यसायनंप्राग्वि
दित्वास्यष्टंभयोवासरेन्यत्रभुक्तिः स्यद्भाभोरंतरेतद्वधुचेयावान्सूर्यस्तत्समंतस्यतुंगं ५ मध्याभुक्तिः स्यादलंस्पष्टनत्रद्धुक्रात्म
चानल्यसंख्याखनेर्यत् एष्टीभुक्तिः स्यात्तदास्पष्टतुल्योमध्यार्कस्तंराशिपूर्वेविदित्वा ६ तदैनःप्रतिदिनंमध्यगस्यामध्यंप्रचास्य
यत् कालांतरेणतन्मध्यस्फुटयोरंतरंफलं ७ साम्यंयत्रभवेन्मध्यस्फुटगस्योः परंफलं ज्ञेयंतन्मासमंयासदलंनीचोच्चमंडले ८
एवंयावान्भवतिसवितारात्रिभागादिरूपलावान्यैः स्यात्रविकलदिनैस्तेभभोगाभिधाः स्युः एभिस्तेकोभवतिभगलाभ्येत्रदा
भूदिनैः किंकल्पेसाध्याइतिबुधजनैः पर्ययास्तेनुपातात् ९ याम्योदग्वलयागतंशशधरंतुर्येणपूर्वोक्तवद्विधासायकसंस्कृता
यमइतिज्ञेयोयतनकालजाः यानारात्रिघटीः स्फुटीकृतघटीयंत्रेणसुधारवेः कार्यंमध्यविलग्नमत्रविधिनालोकोदयैः प्रस्फु
टं १० तत्रमोहिमगुरायनदृष्टिकर्मसंस्कृतदृतीरितमाद्यैः ॥ प्रस्फुटायमखमध्यलग्नकापक्रमांतरमिषुर्हिमगोः स्यात् ११
दक्षिणबाणाभावेयश्चंद्रोभगणशोधितः पातः पुनरप्येनंपातंज्ञात्वाकालांतरेगतिः कार्या १२ सूर्योच्चवद्विधूच्चंमंदज्ञेयंग
तिस्तथैवास्यः अनयाभगणाः साध्यामहायुगेब्राह्मकल्पेवा १३ वक्रवक्रखचरैकपर्ययेपूर्ववद्दिनगतिंसमानयेत् न

न्महच्चलघुनैकखंडकेनैनकल्पभगणांश्च साधयेत्॥१४॥ वेधसिद्धखगमध्यमानरे मंदशीघ्रफलसंस्कृतिः सदा। व्यस्तशीघ्रफलसंस्कृतासती केवलं भवति मंदजं फलं॥१५॥ निजाप्तुनीचोच्चसमे खगे द्वौ फलं स्यनाद्वेपि नमध्यतुल्यः। स्फुटस्य हः सा दनएवमंदस्तुच्चं यहस्याप्यपरं वकिंचित्॥१६॥ स्वशीघ्रनीचोच्चसमेषु नस्याच्छीघ्रफलं व्योमचरेषु नूनं। तदास्फुटोत्थं तन्मध्ययोरंतरमत्र मांदः १७ सौरारमंत्रिषु रवेः परतः स्थितेषु मध्यग्रहात्स्फुटखगोत्पकरा वृहष्टः। एष्टस्थिधिक एवतनस्त्रयाणांरवेश्चलोच्चमिनतुल्यमिति प्रदिष्टः १८ मांदाभावे मंदनीचोच्चतुल्यं रवेर्वलं चान्निमितिः साधनीया। दैत्येज्यज्ञौलग्नतुल्यौ कजस्तौ तैयौनाभ्यांनतुनीसाधनीये १९ यावत्कालं सूर्यनोग्रस्थितोस्तस्तावद्दृष्टौ दृष्टसंस्थौ सदानो। तस्याद्वेयाः पर्ययाः सूर्यचक्रैस्तुल्याः कल्पेसाधनार्थं तभग्वोः २० सितोदयाद्यानघटीप्रमाणं स्वछायया छेगणितेन यस्मात्। तभूमिगर्भस्थितनरयानं तथाघटीपंचसुसाधितेस्वं २१ अंतरेण दिनयानयोर्यदा योजनानि कुदलोन्मितानि चेत्। किंनराद्यनिशानाडिकामितेः कक्षिकाफलमिहानुपातनः २२ तन्महच्चलघुनैकखंडकं मध्यमात्तचलकक्षिकानया। भाजितागगनकक्षिकाभवेच्छुक्रतुंगचलपर्ययोन्मितिः २३ एवमेवबुधशीघ्रपर्ययान्साधयेदिनिसुवासनास्फुटा

BHAU DAJI MEMORIAL

मंदतुंगखगयानपर्ययाः पूर्वसूरिवचनेनसाधवः २४ इतिएतद्व्याख्यानंग्रहगणितविनामणौ विलोक्य सिद्धांतज्ञानांस्वतः

सुतेयं च परंतुमध्यंतचलेसस्यपूर्वं शुक्रबुधयोरपक्रमादृतः शुक्र इति अन्यथासितोदयादिस्फुटपक्रमयबुधशीघ्रोच्च कक्षिकेस्फुटसंहारस्यासंगतत्वापत्तेः शुक्रतुंगचलपर्ययोन्मितिरितिविरोधापत्तेश्च नहिबुधशीघ्रोच्चकक्षयाभक्तारव कक्षाशुक्रशीघ्रोच्चकक्षास्यात्। नवाशुक्रानीतकक्षाबुधसंबंधिनीस्यात् एवमेवबुधशीघ्रपर्ययानिसयिमग्रंथविरोधापत्तेश्च। सेयंसायनग्रहभगणोपपत्तिः प्रतिपादितापिमतुष्यत्रसाध्यत्वादन्योन्याश्रयाच्चस्थूलाकप्रामाण्या प्रयोजिकानावश्यकी। नतुसृष्टिविलंबितकालस्योनस्यानंगीकारेसर्वेषांग्रहाणांशुक्रपातानांचकल्पारोयथा मेषादि ववस्थानंतथैवकल्पांतेवस्थानमितिभगणादीनांकल्पकालापरिपूर्त्यभावादुक्तियुक्ता। परंतुकल्पादिनएतद्वर्षेग्रहचारप्रवृत्तौसुगभगणानांबुधोच्चगुरुव्यतिरिक्तानांतद्वर्षेषुपूर्त्यभावेनकल्पांतेपितद्भगणांणपूर्त्यभावाकथंसमंजस। नचायेनतद्वर्षेभगणपूर्त्तिरस्त्येवेतिवाच्यं कल्पांतेग्रहादिनाशोत्पत्तेरग्रेभगणपूर्त्यसंभवात्। उपक्रमोयसंहारकालयोर्ग्रहसंस्थानाभेदस्यावश्यकत्वात्। अतएवब्रह्मगुप्तादिभिः सृष्टिविलंबितकालानंगीकृतिरेतद्भिन्नाभगणाउक्ताः सू

र्यरूपेण भास्करेणापि सिद्धांतशिरोमणौ स्वपूर्वगतमेतदनंगीकृत्य स्वस्वसत्ताकाले संवादेन ब्रह्मगुप्तमतमंगीकृतं तस्मादुक्तं
प्रारंभकालकल्पादौ नरसृष्टिवर्षीतेऽन्यतः करणादिरीत्या भीष्टवर्षांतकालाद्दूहानयने भीष्टवर्षज्ञानग्रहरूपसेयं योजनमा
वश्यकं तत्र राश्यादिशुद्धादशराशिहीनफलितैर्हीनराश्यादिसंबंधिवर्षाणि कल्पादिगतवर्षेभ्यो भीष्टवर्षमितिसर
नेभ्यो हीनानि कृतानि लाघवाद्भगणांतरस्याप्रयोजकत्वाच्च एतदुपपत्तिगोपनार्थमभीष्टवर्षसंख्याग्रहसंबंधिहीनव
र्षसंख्ययोर्योगरूपवर्षाणि सृष्टिपदसकेतितानि कल्पादिगतवर्षेषु हीनानीत्यक्रमितिचेन्न अभीष्टकाले कल्पादिस
ष्ट्यादिगतवर्षाभ्यां साधितग्रहयोस्तुल्यत्वापत्तेः अस्मिन्कृतयुगस्यांते सर्वे मध्यगताग्रहाः विनातुपातमेरोर्ब्राह्मेषादेषु
ल्पानामितिसूर्यसिद्धांतोक्तस्य कल्पादिगतवर्षेभ्यो सिद्धेऽन्तस्मात्कल्पादितः सृष्टिवर्षांतेग्रहचारारंभः सूर्यसिद्धांतेग्र
हकृद्दैवदैत्यादिसृजतोस्य चराचरं ब्रह्मनाद्विवेदादिव्याह्नाः ज्ञात घ्नावेधसोगताइतिस्कुटोक्तेः अस्मत्सत्ताकाले ब्रह्मगुप्त
मतस्यासंवादात्तदुपेक्षस्य सूर्यसिद्धांतमतस्यैवसंवादेन ग्रहादंगीकारः उपक्रमोपसंहारकालयोर्ग्रहसंस्थानाव्यभे
देसुनिवचनादर्शनाद्यत्र कुत्रापि स्थाने स्थितेषु ग्रहेषु परिपूर्णचक्रेष्वपि स्वतंत्रब्रह्मणइच्छयाग्रहनाशोपपत्तेः अ

तदंगीकृ

तएवसिद्धांतसुंदरोक्तिः तमस्मान्निर्विज्ञानंमुनिसंमतं दर्वैः कल्पमंवासनावेद्यमतुभूयसुकुपुरेनिसंगछते ३४ अथमंदो
च्चभगणान्कल्पेकौमयोराहप्राग्सास्सूर्यतुंगस्य कल्पेसप्तास्ध्रुवयः भौमस्यमंदोच्चभगणावेदशून्ययमैर्मिताइति पश्चा
च्चंद्रपातनिमित्तंपश्चिमगतेरसकृन्मानहारणार्थंप्राग्गस्येति३५ बुधादीनांमंदोच्चकल्पभगणानाहबुधादिमंदतुंगानां
कदिनेष्टरसाग्रयः खाभ्रनंदाबाणरामशरानंदाग्रयः क्रमादिति स्पष्टः ३६ कल्पेभौमादीनांपातभगणान्साद्धश्लोकेन
वदन्साद्धश्लोकेनचनाक्षत्रदिवसासुगेभ्याहयुगंदुपक्षागजनामवेदखांगाभ्रमेघं गयुगेंदवः स्कः सुगादिचंद्रास्त्रि
खगोगसमभ्रभ्रमानिद्विरसांगतुल्याः ३७ भौमादिपातभगणाःप्रत्यग्सावि धेर्दिने अथोप्रसक्तमाभ्यानायुगेवा
सरसंचयः ३८ अहस्त्रिनामसमाग्रिजासप्तनिथिसंमितः पश्चुनक्षत्रभगणोरूनोयंस्कुटभ्रमाइति भौमादिपंचग्र
हाणांयेयातास्तेषांभगणाः कल्पेपश्चिमगस्याः कल्पप्रसंगावसानं द्योतयितुं कल्पेइतिपुनरुक्तं चंद्रपातभगणानांपूर्वग
स्कल्पाव्यवधानास्पर्वगतिनिरासार्थं पश्चिमगस्येति अत्राप्यागमएवप्रमाणमुपपत्तिप्रकारस्यपुरुषकृतसाध्यत्वा
त् तत्रबुधशुक्रयोः सूर्यसिद्धांतोक्तकल्पपातभगणाः सूर्यसिद्धांतोक्तबुधशुक्रशीघ्रोच्चयुगभगणैः सूर्यभगणो

नैसयोः शीघ्रकेंद्रभगणरूपैः सहस्रगुणितैः कल्पकेंद्रभगणास्तैर्युताः सिद्धा एवतयोः कल्पपातभगणा भवन्ति शीघ्र
योक्तः- येचात्रपातभगणाः पविनाज्ञ ऋग्वोक्तेशीघ्रकेंद्रभगणैरधिकायतः स्फुटरिति भास्करोक्तेः अत एवस्वपातो नाद्
हाऽऽजीवाशीघ्रभ्रगुसौम्ययोरिसौवानुसारतामयावुधशुक्रयोरविस्वपातोनाभ्यांबुधशुक्राभ्यांजीवोक्ताशरसाधना
वसरे- नशीघ्रोच्चाभ्यां- एकोक्तिलाघवात्- यद्यपिग्रहवारोक्तरग्रहवारानावधिकल्पकालाद्यैः कल्पभगणानामुक्तानाम
नर्थक्यंतथाविग्रहार्षिभिर्यकालेनतेषांयागतिरुपलब्धास्तस्याः भगणस्थाने एकीकरणंकल्पवर्षतुल्यांकेनेतिकल्पवर्षसं
बंधेनलाघवसौकर्यगणनार्थंतदुक्तिः ननुस्वरूपोक्तिः अन्यथासावपवांकेनगुणनभजनगणितक्रियायांकविलाप
नेरितिदिक्- अथनक्षत्रदिवसानाहअथविति- भानां- प्रसक्तबिंबानां- सूर्यादिकालेप्रसक्तनक्षत्रबिंबाश्रयवाद्यशानांवा
पश्चिमभ्रमात् भानांनक्षत्राणांयुगेदिनसमूहएतन्मितः नाक्षत्रदिवसयुगेएतन्मिताभवासरस्तुभ्रमइतिपूर्वोक्तेः
ननुभानांक्रांतिवृत्तस्वशक्तिगमनेनगमनात्सर्वेनाक्षत्रदिनसावनाहयोर्भेदेनाशंकोकरिनेप्राणादिकालाभेदेनतयोर
भेदसुष्ठुप्रतिपादितः परंतुयुगेएकदिनंतुप्राणावयवानरस्यप्रतिदिनमुपचयेननाक्षत्रदिननाक्षत्रसावनाहयोर्बहु

नरचावश्यंभावेनतयोरैक्यंकथंसमंजसंव्याख्यायामाहतमिति चेन्नः क्रांतिवृत्तस्यपूर्वपश्चिमान्यतरगमनस्यतुल्यस्यार्थोक्तेर्नक्ष
त्राणामपितथावानाक्षत्रदिनेभ्यःपूर्वगस्यायकालेनयत्संख्याभिरक्षत्रसावनदिनानांस्वस्यचंतत्संख्याभिरेवतत्कालेनपश्चि
मगस्याधिवचमितिक्रांतिवृत्तविलक्षणभोगकालेनसंख्ययोर्भेदावश्यंभावात्- युगेनभगणपरिपूर्णेअस्यार्थेसर्वदैकदिग
भिमुखगमनसुक्तंयेनग्रहवन्नक्षत्रसावनंनाक्षत्रदिनेभ्योभिन्नंस्यात्- अत्रसंख्यायामाग मएव- अथपारसीकमतेनक्षत्रा
णांसांप्रतोपलब्धासदेवपूर्वगमनकल्पनं- तन्मतदृढाभ्यासेनकेनचित्तद्विश्वलेनस्वार्थमतंप्रतारकत्वेनमन्यमानेनो छंख
लतयानास्तिकेनमक्षत्रगस्यानक्षत्रभगणान्यकल्पनाक्षत्रदिनेभ्यस्तान्मूलीकृत्यग्रहवन्नाक्षत्रसावनाहाःकल्पितास्तन्मत
माहयस्विति- अयं- नक्षत्रदिनसंचयः नक्षत्रभगणैर्हीनः स्फुटनक्षत्राणां- प्रसक्तबिंबनक्षत्राणांभ्रमाः- दिवसाभवासरस्तु
भ्रमरस्फुटैर्भवंति- गोलभ्रमसंख्यातुल्यानाक्षत्रदिवसाः नक्षत्रभ्रमसंख्यातुल्याग्रहवनाक्षत्रसावनदिवसाइत्यर्थः इतिय
न्मतमेकदेशीयं- तुकारेणोक्तस्यमतस्याग्रिमश्लोकेनक्षयः २९ एतन्मतंदूषयन्ग्रहसावनानिश्लोकाभ्यामाहतत्रुछंग्र
हवद्भानांभगणैर्नामनुक्तितः अर्कोक्तर्णायनांशैश्चभेदरिष्टगतिदर्शनं ४० ननुकालनणामत्रबाधकाभावतस्तथा

भवारायस्यभगणैरूनास्तद्ग्रहाःस्फुटमिति तत्पूर्वप्रतिपादितमनं तुच्छं मिःसारं हेतुमाह यद्यदिति भानांनक्षत्राणांयेभग
णांशीसाः अनुक्तिनः आर्षग्रंथेनुक्तेः यथैकदिगतिरीसापरिवर्त्तेनभगणाउक्तास्तथासुनिभिरेकदिगतिरीसानक्षत्राणां
नोक्ताःकिंतूभयदिगत्यावलक्षणाउक्ताःकल्पनायाअप्रयोजकत्वादार्षोक्तबाधे हेत्वभावाच्च नसुसाप्रतंनक्षत्राणां
पूर्वगमनोपलब्धासर्वदैवपूर्वगमनमनुमेयमन्यथाग्रहाणामपिपूर्वगमनोत्तरपश्चिमगमनप्रसंगः अनएवायनेन
चलनंयेदुक्तंसुजालाद्यैःसएवायंतसक्षेतभद्गणाःकल्पेगोगर्त्तनंदगोचंद्राइतिसुजालमतमनुवदन्नाभास्कराचार्येणा
पिनक्षत्राणांपूर्वगतिरेवसदोक्ता आर्षोक्तंचप्रत्यक्षबाधाद्यवस्थानरकल्पनेनोपेक्षणीयमित्यस्वरसादूषणांतरमाहुः अ
र्कोक्तोक्ताःयेणायनांशास्तस्मिन्संभवकालेरत्यर्थःतत्कालनूणांक्षणायनांशकालजातमनुष्याणांभेंद्रदिगतिदर्शनं
भानांनक्षत्राणांपूर्वदिगतिसुखगमनंचरमिमतंतस्यदर्शनंनतत्कालेतत्क्षणाणांनक्षत्रपूर्वगमनादर्शनात्सदानक्षत्रपूर्वगति
कल्पनमेवायुक्तं अत्र अस्मिन्मतेदूषणोः बाधकाभावात्परिमतेदूषणेत्वयाबाधकमुद्भावनेतत्रैवचरमिम
तपूर्वगमनस्यानवस्थासिद्धेन प्रत्यक्षतताकालिकस्येदानीमप्रत्यक्षत्वेनतस्यैवबाधात्नचतदानींनक्षत्रपूर्वगस

२ स्तेषांग्रहभाग
ण २

अर्कोक्तेति ५

४२

राम०
१९

दर्शनंचपाठ्यंतानमितिवाच्यं अर्कोक्तेस्तत्रागमप्रामाण्येनतन्निश्चायात्आगमेप्रत्यक्षबाधाभावाच्च तथेतिदूषणां
तरसूचकं अथग्रहसावनान्याह भवासइति नाक्षत्रदिवसाःयस्यग्रहादेर्भगणैरूनास्तस्यक्षत्राःसावनदिवसाभवंति
ऊनाइतिपूर्वगतिसंबंधेन पश्चिमगतिसंबंधेनतत्राइत्यत्रसुतविपरीतत्वादिति ध्येयं अत्रहेतुमाहस्फुटमिति नाक्षत्रदिव
साएवग्रहसावनदिवसाःस्फुटदिग्रहाणांगतिर्नस्यात्गतिसद्भावेतुगतिरूपाःपरिवर्त्तोभभ्रमेहीनसुताःपूर्वपश्चिमक्रमात्
गतिरूपाःपरिवर्त्तोक्तभगणाएवातोत्रयुक्तिप्रतिपादभमूतैरपिज्ञायतेइतिस्यादित्यर्थः ४१ अथसूर्यस्ययुगसावनदिनसं
ख्यानिबभ्रंश्चंद्रमासदिनेआहगजाब्धीभमेघांकसप्ताद्रिनिधीरवेर्वासराःसावनाभूदिनानिरवेःपर्ययोनेसुगेचंद्रचक्रश
शांकस्यमासादिनानिरुक्तोक्तेःसूर्यस्यसावनदिवसाःभूदिनानि केवलभूदिनशाहवाच्याः अन्येषांतुग्रहोपपदसु
क्तभूदिनशाहवाच्याःसूर्यस्यभगणैरूनाश्चंद्रभगणाश्चंद्रस्यमासः अत्रयुक्तिःप्रागुक्ताःस्फुटोक्तापरिभाषया त्रिंशद्दि
नैर्मासइतिरूपया चांद्रदिनानिभवंतिः ४२ अथाधिमासावमेआहरविभारवेःपर्ययाःसूर्यमासाःशशांकस्यमासावि
हीनाःस्फुटैकैशशांकप्रसिद्धाधिमासास्तथैवोर्दिनानिकृतेरूनितानिक्षयाहाइतिसूर्यस्यभगणाद्वादशगुणाःसौरमासाःस्फु

सौरमासैश्चांद्रमासाहीनाः ज्ञेयं चंद्रप्रसिद्धा चांद्रत्वेन अधिमासाः स्युः स्पष्टादितः प्रवृत्तयोः सौरचांद्रमासयोरधिकन्यूनमान
योः परिवर्त्तसंख्यायान्यूनाधिकत्वावश्यंभावेन युगे सौरचांद्रमासयोरंतरं चांद्रा अधिमासा अधिकत्वात् अनंतरं चांद्रदिवसाः
सूर्यसावनदिनैरूनाः ज्ञेयं चयाहाः अवमानि प्रवृत्तयोः सावनचांद्रदिनयोरधिकन्यूनमानयोः परिवर्त्तसंख्यायान्यूनाधिक
त्वावश्यंभावे मयुगे सावनचांद्रयोरंतरमवमानि सावनानि चांद्रात्तर्दंतरेण सावनानां न्यूनत्वात् ४३ रवेः पर्ययोनमित्या
दिसार्द्धश्लोकोक्तं मंदबोधार्थं दर्श्यते। चांद्रमासाः ५३५३३३३६ चांद्रमासदिनानि १६०३०००० ८० सौरमासाः ५१८४००००
सौरमासदिनानि १५५२०००० अधिमासाः १५८३३३६ अवमानी २५०८२२५२ नि स्पष्टं। ग्रहचाराज्ञानोपयुक्तमुपसंहर
तिः इति भगणाद्यध्यायः इति स्पष्टः अथ ग्रहसाधनार्थं महर्गणसाधनं पद्यत्रयेणाह ग्रहसाधकपातानां भगणाः पूर्वोदितो ह
तः रविभिश्चैत्रशुक्लादिगतमासैर्युतस्ततः ४४ खरामाहतः शुक्लवक्रेतिथ्यंचितोधोधिमासैर्निरस्तैर्हतो हृत दिनैः सूर्य
जैर्लब्धयानाधिमासैर्निरस्तैः कृताहैर्युगर्क्षस्तिथीनां ४५ गणाहतः कथितावमसंगुणाद्विधुदिनाप्तनिरमगतावमैः तिथिगणो
रहितो रविवारतो दिनगणो रविमध्यमसावनः इति पूर्वोदितः तत्तुगोघनेस्तिना पूर्वसुक्ष्मो ग्रहसाधनप्रयोजकी भूतो ग

राम०
२०

वर्षसमूहः द्वादशभिर्युक्तिः चैत्रमासस्य शुक्लपक्षारंभादिष्टमासादिपर्यंतं येगतमासास्तैर्युतो नंतरं त्रिंशद्गुणितः इष्टमासस्य शुक्ला
देरारंभादन्तिमयइष्टतिथ्यारंभपर्यंतं ताभिर्युतः अयमधः स्थाप्यः पूर्वोक्तैर्युगाधिमासैर्गुणितः सूर्यजैः सौरदिनैः त्रिंशद्गु
णितयुगसौरमासस्तैर्भक्तः फलं गताधिमासैर्निरस्तैः स्वावयवरहितैः कृताहैर्दिनाग्रकैस्त्रिंशद्गुणितैरित्यर्थः ऊर्ध्वस्थो युगतिथी
नां गणः स्पष्टादितश्चांद्राहर्गणः स्यात् अस्मात् उक्तयुगावमगुणाद्युक्तयुगचांद्रदिनैर्भजनाल्लब्धानि स्वावयवरहितानि
यान्यवयवरहितानि गतावमानि तैस्तिथिगणः पूर्वसिद्धो वर्जितः सन् सूर्यवारात् दिनगणः सूर्यस्य मध्यमसावनात्मकः स्यात्
४६ अस्योपपत्तिज्ञानार्थं समनंतरमेव सिद्धांतसुंदरीयश्लोकानुवादे पुनरुक्तिभ्रमनिरासार्थं शिष्यावधानार्थं चोप
पत्तिं प्रतिजानीते अत्रोपपत्तिरिति अत्राहर्गणानयनेन स्पष्टीपादकयुक्तिस्त्वनइत्यर्थः प्रतिज्ञातमेवानुवदति यानः सौरस
मागणो रविगुणश्चैत्रादिमासाश्चितस्त्रिंशद्गुणितिथिर्भवंति दिवसाः सौराः एषकैस्तैः संसाध्याधिकमासकानि नमयैस्तै
र्युक्तएषकस्तो गणश्चांद्रोस्मादनुपातजैः सयदिनैर्हीनो भवेत्सावनइति युगसौरदिनैर्युगाधिमासास्तदेष्टसौरदिनैः वेद्यस्यनुपा
तेन गताधिमासान् प्रसाध्य तैर्गताधिमासैः एषकस्तिनः सौरदिनगणो युक्तः विज्ञातीययोर्दिनमासयोर्योगासंभवा

दाहर्दिनमयैरिति समानजातिच संपादनाद्योगेनानुपपत्तिरिति भावः चांद्रोहर्गणः स्याद्यतः सौरचांद्रांतरेधिमासाः प्राग
[illegible] अस्मात्
चांद्राहर्गणात् युगचांद्रदिनैर्युगावमानितदेष्टचांद्रदिः कानीसत्युपानोसत्रैरवमदिनैर्हीनश्चाद्राहर्गणः सावनोहर्गणः स्यात
यतः सावनचांद्रांतरेवमदिनानि प्रागुक्तानि अनु पानस्मानियनविषयत्वाभावादेकरूपमध्यममानात्सिद्धान्तस्फुटमानात
अवमानांसूर्यसावनसंबंधेनोक्ते सूर्यस्य सूर्यारौसूर्यवारत्वात्तदादिवारगणनासमतत्वाह गणेगतेसादिसुगमंस्वयमूह्यं
॥४७॥ अथात्रस्थानत्रयेसंदिहानः शंकते अह गणस्यानयनेर्कमासाश्चैत्रादिचांद्रैर्गणकान्विताः किं कुनोधिमासावमशे
षकेचसत्रेहिसाग्रंफलमानुपातमिति भोगणकगणस्याहर्गणस्यानयनप्रकारे सौरमासाद्वादशगुणितगतवर्षरूपाः वर्षा
णांसौरत्वात् चैत्रादिचांद्रमासैरूनावधित्वात् अहोदसाश्चर्ये कथंसुक्ताः कृतग्रंथकारैरिति पूरणीयं विजासोर्योगेष्ट्य
किंहसक्तावपियोगांगीरणमाश्चर्ये अधिमासावमशेषके चः समुच्चये अधिमासावमयोः शेषाभ्यांफले कुतोहेतुनुक्ते सक्ते
उपसुक्त तयानगृहीते निरस्योक्तेः प्रसक्तकारणमाहहीनि आलुपातं अनुपातजातं फलं साग्रं सावयवं अतः शेषाभ्यांफ

MEMORIAL
BHAUDAJI

लेमासेएव अन्यथाहर्गणस्यस्फुलत्वापत्तेः ४८ सिद्धांतयति अत्रोच्यते द्वादशनि घ्नसौरसमागणश्चैत्रमुखेहियोगः पूर्वाधिमासास
रपूर्वसाग्रचांद्रार्कमासोर्नतुसौरमासाद्यति अस्मिन्पूर्वपक्षेउत्तरमुच्यतइतिशेषः तत्रविजातीययोगेसजातीययोगत्वमवस्थापना
र्थंकारणमुपन्यस्यति द्वादशेसपन्यस्यति द्वादशेसादि हियतोद्वादशगुणितसौरगतवर्षगणः चैत्रमासस्यारंभकाले पूर्वाधिमा
सात् अभीष्टकालाद्व्यवहितपूर्वपतिताधिमासांतकालमारभ्येत्यर्थः यत्र पूर्वसाग्रचांद्रार्कमासोः। चैत्रमासारंभपर्यंतमुक्त
कालिकायेसावयवाश्चांद्रामासाः अहश्चारप्रवृत्तिकालपर्यंतं पूर्वकालिकायेसा वयवाः सौरमासास्तयोरित्यर्थः योगः वि
जातीयोगकरणंदोषः स्वतः सिद्धाद्योगस्त्वदोषइतिभावः ननुसौरत्वात्सौरमासायुज्यंते नतत्रविजातीयोगश्चांद्रासंबंधा
दित्यतआहनचेति तुरेवार्थे तेनसौरवर्षादौकल्पनेसौरत्वमविरुद्धमपिचैत्रादिकल्पनेनहिरोधाच्चंद्रवर्षाभावेनचांद्रमा
सकल्पनविरोधाच्च द्वयोः सौरचांद्रयोर्योगकल्पनंवर्षमासाभ्यामन्यमानं निरासाद्युक्तं चैत्रादौकल्पनंचांद्रमासयो
जनोक्तः आरोपेसतिनिमित्तानुसरणंनतुनिमित्तमस्तीसारोपइतिन्यायात् ४९ अतश्चांद्रमासयोजनंतत्रचांद्रमासाना
मपिसत्वादुपपन्नमित्याहअतः पंसाभीष्टमासादौनाद्योगस्यसिद्धये चैत्रादिचांद्रमासैरूनचांद्रायुक्तांः कृतानुधेरिति

अतउक्तहेतोः तारयोगस्य अनिपातिनयुनिरूपस्य चांद्राः द्वादशगुणितवर्षातः स्थिता एव चांद्राः शेषं स्पष्टं ५० मासरीतिं दिने ष
ष्ठ्यनिर्दिष्टान्निरवयवाधिमासग्रहणश्लोकाभ्यामुपपादयति एवं स्वाभीष्टतिथ्यंते चांद्रसौराहयोर्युतिः तत्र पूर्वाधिमासांतसौरा
हाः स्वाध्यहैर्युताः ५१ ~~कार्याः स्वाभीष्टतिथ्यंते चांद्राहाः स्फुरतो युतिः द्रसौराहयोर्युतिः तत्र पूर्वाधिमासांतसौराहाः स्वाध्यहै~~
~~र्युताः~~ ५१ कार्याः स्वाभीष्टतिथ्यंते चांद्राहाः स्फुरतो युतिः स्वनुपातनिरग्राधिमासाहैः संयुताहूतेति तत्र युतौ इष्टकालाद्य
वहितपूर्वकालयतिताधिमासस्य विरामकालपर्यंतं सूर्याद्दितः सौरदिवसाः स्वाध्यहैः स्वसंबंधेन ज्ञाता येनुपातेनाधिदिव
सास्तैर्युताः सौराणां चांद्रसिद्ध्यर्थं कार्याः ततो धिमासांतकालादिष्टतिथ्यंतपर्यंतं चांद्रदिनानामपि सम्यग्दिनइष्टतिथ्यंतप
र्यंतं चांद्रदिवसा भवंति अतः युतौ तयोरज्ञानादिनिहेतोः स्वनुपातनिरग्राधिमासाहैः स्वशब्देन युतिरूपस्याश्छाद्यिनाधिमास
ज्ञानार्थं योनुपातस्तेनावयवरहितायेलब्धाधिमासास्तेषां दिवसैः न च धिदिनानुपातलब्धाधिदिनैः अधिमासांतसौरभ्योधिमा
सानां पूर्वैः शेषाभावात् अधिमासांतकालादिष्टतिथ्यंतावधि चांद्रदिनेभ्योधिमासाभावाद्धिशेषं तदप्रयोजकं तत्संबद्धचां
द्रदिनानां स्वतः सिद्धत्वात् अतो युतेर्निरग्राधिमासयुक्तायाश्चांद्रवेधिमासांतसौराहाणामेव चांद्रत्वसंपादनमिति भावः ५२ राम०
२२

सो २

योगाधिमासानुपातयोराशंकोन्नरयति तथा योगोधिमासानामनुपातश्च नोचितः चेदित्यस्य मरीचौ मेरुमरंतद्विलोकयतामिति तथा
उक्तरूपयोः सौरचांद्रयोर्योगः स्वतः सिद्धः पुनर्नोनमवतिः चैत्रादिकल्पनेप्रमाणाभावात् सौरवर्षादौ रौरमासानां वर्षजत्वेनोचितत्वा
त् अंगीकृतेपि योधिमासानां अनुपातः समुक्तः प्रमाणे उभयोरेकजातिज्ञाभावात् चः समुच्चये इति एवं चेद्यद्याहि यसि तर्हि
प्राक्पस्य उत्तरं मे मरीचौ वक्ष्यौ जन्यजनकभावः संबंधः अहर्गणोपपत्त्यवसरे निरूपितमस्ति तत्रोक्तमत्रकथमुपपत्तिमपि
स्तत्प्राहतदिति तत्रैव विलोकयतामत्र ग्रंथविस्तरभयाद्दुक्तमिति भावः तत्रोक्तं संक्षेपाद्दुच्यते द्वादशगुणितसौरवर्षा
णि सौरवर्षादौ सौरमासा निर्विवादास्तेस्वानीताधिमासैर्युक्ताश्चांद्राः सावयवाः सौरवर्षादौ तेवयवानाश्चैत्रादौ निरवयवाश्चांद्राः
चैत्रादिमेषादर्कं कालयोरंतरस्याधिशेषत्वात् एतेकेवलाधिमासैर्हीनाः पूर्वोक्ताः सौरमासाश्चैत्रादौ केवलाधिमासोनाश्चां
द्रामासास्तत्संतुनिरुक्तयोगेपर्यवसन्नं अत्रानुपातस्याभिप्रायोपि युगसौरदिनैर्युगाधिमासास्तदधिमासांतीयसौरदिनैः केइस्य
नुपातेनाधिशेषाभावाद्धिमासानिरवयवाश्चांद्राः सौरेभ्यश्चांद्रार्थमेवाधिमासानां साधनावश्यकत्वात् युगचांद्रदिनैर्युगाधिमा
सास्तदधिमासांतकालमारभ्याभीष्टतिथ्यंतपर्यंतं येचांद्रदिवसास्तैः केइस्यनुपातेनाधिमासाभावादधिशेषं सौरं चांद्रेभ्यः सौरा

अनुनिशीथकालिकाहर्गणसिद्ध्यर्थं तिथ्यंतकावमशेषयोजनमयुक्तं अर्द्धरात्रकावमशेषयोजनस्ययुक्तत्वात्तत्संबंधात् अन्य
था निशीथकालिकाहर्गणसिद्धौ मानाभावः मत्वेदमेवावमशेषमर्द्धरात्रीयमिति वाच्यं चांद्राणां तिथ्यंतकालिकत्वेन तदनुपाना
नीतत्कौ सावयवावमानां तिथ्यंतकालिकत्वात् न चार्द्धरात्रीयमवमशेषं प्रसाध्यतदेवयोज्यमिति वाच्यं अर्द्धरात्रकालिकावमशे
षसाधकैकाया अभावात् भावेवा तत्कालिकावमशेषस्य तिथ्यंतावमशेषावश्याधिकत्वादर्द्धरात्रेहर्गणस्य निरवयवत्वानुपप
त्तेः अन्यथा तिथ्यंतीयावमशेषयोजनात् रवि निशीथेहर्गणस्य निरवयवत्वं ११३ न्यूनसौरूपाणां सिद्ध्यनुपपत्तेः नहि तिथ्यंताव
मशेषं विना हर्गणस्य निरवयवत्वं निशीथेऽस्य घटतइति चेत् उच्यते चांद्रसावनांतरत्वेनावमप्रतिपादनाच्चांद्रसमाप्तौ सावनत्व
तिर्यदंतरे तत्तदंतरस्य सावनावमत्वात् तिथ्यंतकालिकावमशेषयोजनात् सावनपूर्वः सत्वात् तिथ्यंतीयावमशेषयोजनाद्दर्द्धरात्रे
सावनाहर्गणो भवत्येवेति युक्तं अतएव तिथ्यंते तिपूर्वोक्तं संगच्छते नहि सावनांतीयावमशेषयोजनाद्दहर्गणोर्द्धरात्रे निरवयवो
भवति यद्यपि तिथ्यंतसिद्धस्य चांद्रहर्गणस्य खंडद्वयमेकमव्यवहितावमानकालिकं चांद्राहतुल्यं सावयवं परंतद्भिन्नचांद्राहरणि
मितं सावयवं तिथ्यंते चांद्रमपि तत्तुल्यं सावनं तिथ्यंतादग्रे कल्पितं तत्रार्द्धरात्रीयमेव सावनाहर्गणखंडं यतः पूर्वखंडं स्वानीतावमो

नमव्यवहितं यस्यैवमांतकालिकसावनाहर्गणः परमेतत्सावनखंडमनयोरेकं निरवयवमेव चांद्राहर्गणोर्द्धरात्रे सावनपूर्वः सावनाह
र्गणः स्यात् तत्रापरखंडाद्यगसावनैरवमानुपपत्तेनावमाभावादवमशेषं चार्द्धनिशीथे तस्य सावनावमजातित्वसंपादनार्थं सावनी
करणं तिथ्यंतीयखंडयोर्ज्ञानाभावान्न दैवज्ञानाच्चावमज्ञानाच्चावम[illegible]नमवमशेषज्ञानमनुयोगादुपेक्षितं विनावज्ञा
नमवमज्ञानस्याशक्यत्वादित्यलं प्रयत्नेन यथा तथा चांद्रदिवसानां कैरसानुपातेनाधिमासाभावादधिशेषं सौरं चांद्रेभ्यः सौरेभ्यो
वाधिमासानां साधनावश्यकत्वात् तत्राधिशेषस्याधिमासावयवं चांद्रकार्यं युगसौरदिनैर्युगचांद्रदिवसानां तदधिशेषसंबंधि
सौरदिनैः कैरसानुपातेन पूर्वहरेदानीं तन्नगुणयोस्तुल्यत्वाज्ज्ञातसौरदिवसाएवाधिशेषार्थमिष्टचांद्राणां हरः तत्रायं सौरचांद्र
योः एवज्ञानाभावादेवो हरश्चेद्गुणकौ विभिन्नौ तदा गुणैकं परिकल्प्येत्यादिरीत्या चांद्रसौराहयोर्योगादेवोऽधिमासानयनानु
पपत्तिरिति निर्णयश्चिंत्यदोषः ५२ अथावमशेषसागोपपत्तिस्तस्योर्योगान्निमाहतिथ्यंतरात्र्यर्द्धकयोस्तमध्ये सदैव तिथ्य
वमानशेषं स्यात् तेनाद्यभवेच्चिशार्द्धे तिथ्यंतकाले द्यगणोन्यथा तदिति तिथ्यंतरात्र्यर्द्धयोरव्यवहितयोरंतराले काले अवमा
नशेषं नियतमस्त्येव नान्यत्र अतः कारणात् तेन अवमशेषेणात्र नाहर्गणार्थमगृहीतेन रात्र्यर्द्धहर्गणः स्यात् अन्यथा

अहर्गणार्थं गृहीतावमशेषेतु तिथ्यंतकालिको हर्गणः स्यात् अयं भाकः चांद्राहर्गणस्य तिथ्यंतकालिकज्ञानदानीं तसावयवावमहीनेन सावनो हर्गणस्तिथ्यंतकालेः अतो दूरात्रीयाहर्गणसिद्ध्यर्थं तिथ्यंतादूरात्रकालांतरस्यावमशेषं योज्यं तत्रलाघवात्सर्वमेवावमशेषं हीनं न कृतमिति ५४ अथास्मादहर्गणाद्ध्रुवानयनमाह यस्योक्तचक्रगुणितो दिनसंचयो सौ भक्तः ध्रुवैः फलमितो भगणादिकः सः मध्योदयास्यपुरिमध्यरवौ निशीथासन्नप्रदेशगत एव सन्नप्रदेशत एव सनियहः स्यादिति असौ सर्वोक्तः। अहर्गणो यस्य ग्रहादेरुक्तभगणैर्युगसंबद्धैर्गुणितो युगसूर्यकुदिनैर्भक्तः फलप्रमितो भगणादिगतभोगस्वरूपः सः भगणरूपगुणकसंबंधी ग्रहादिर्मध्यमो लंकायां मध्यमसूर्येमध्यरात्रनिकटप्रदेशगते सत्येव नान्यत्र युगकुदिनैर्युगभगणास्तदेष्टाहर्गणेनकेष्टसंनुपातेन भगणसंबंधी यहो भगणादिभोगात्मको नियतविषयचान्मध्यः यमकोटिसूर्योदयकाले चारप्रवृत्तेस्तत्समयएव लंकादूरात्रं एकस्मिन्दिवसेनाहत्रघटिकागतत्वासुसुताः षष्ठ्यः तत्र मध्यमगतसूर्यनामध्यदयवैलस्यादैलसमिसंनुपातेन नियतैकमानविषयेण मध्यरात्रासन्नएवाहर्गणो न चदूरात्रे अतो हर्गणोस्यत्र ग्रहोदूरात्रासन्नेएव ५५ कल्पोक्तभगणीयपदार्थानयने विशेषमाह कल्पोक्तभगणीयानामेवमानयनं विदा ज्ञेयं किंतु हरस्तत्र सहस्रघ्नो हरो भवेदिति एवमुक्तप्रकारेण कल्पोक्तभगणसंबंधिनां विदागण

राम०
२४

क्रा २

केनानयनं ज्ञेयं परंतु तत्र कल्पे युगसंबंधी कुदिनरूपो हरः सहस्रगुणितः सन् हरः स्यात् युगसहस्रस्य कल्पत्वाद्युगकुदिनानां सहस्रगुणितानां कल्पकुदिनत्वात् ५६ अथ सिद्धांतोक्तन्यायेनाधिमासकृतविशेषमहर्गणानयनोपयुक्तं विवक्षुः प्रथममधिमासस्वरूपं श्लोकत्रयेण प्रतिपादयति अधिमासैः सौरमासात्लभ्यंते यदि केतदा एकाधिमासकेनैवमनुपातात्मासकैः ५७ सौरैः ३२ १६।३।५५।७ चांद्रोधिमासः स्यात्त्रिंशद्दिवसैर्दुवासरः गौणमेनमुपेक्ष्यास्य परिणामः कृतो बुधैः ५८ दर्शांतावधिकेमध्यचांद्रमासे तु वर्जिते मध्यार्कसंक्रमेणास्य परिणामः स्फुटे स्फुटइति पद्यपि स्फुटादितः प्रवृत्तमानानां प्रत्येकं द्वादशमासाः संवत्सरइति भक्तेर्वर्षेनाधिकमासस्तत्र चाप्यस्ति त्रयोदशो मासइति भक्तेः पारतंत्र्येण वर्षेधिकमाससंभवः तत्र वर्षस्य सौरत्वेन मासस्य चांद्रत्वेन व्यवहारो भक्तेः सौरवर्षे चांद्रत्रयोदशमासानां कदाचित्पर्यवसन्नत्वादधिकमासव्यवहारो यद्वयितुमशक्यः तत्तद्रूपयन्निस्तप्रवृत्तयोः सौरचांद्रयोर्मानभेदादूनत्वावश्यंस्यूनाधिकत्वमिति सुगमे सौरचांद्रमासांतरमधिमासाच्चांद्राद्प्रधिकत्वादुक्ताः एभ्य उक्तानुपातेनैकाधिमाससंबंधिनः सौरमासाः सावयवाः ३२।१६।३।५५।७ तदा चांद्रमासावयवाः ३३।१६।३।५५।७ अत्रैकः सौरापेक्षया चांद्रोधिको धनुःसंक्रांतेर्गतांशेषु १६।३।५५।७ कृष्णद्वितीयायाः गतघटिकासु व ३।५५।

संपूर्णो जातः तस्मादयं चांद्रोऽधिकोमौणः इष्टनिष्यवयवावधिवात् सुव्यस्तचांद्रोदर्शावधिकएवातस्तदभिप्रायेणयुक्तोऽधिमा
सव्यवहारः तदर्थं धनुःसंक्रांतिरमायांसचांद्रोमासोमार्गशीर्षः मकरसंक्रांतिस्त्वमांतादग्रे एवसौरमानस्यचांद्रमानतोऽधिक
त्वात् अतोमार्गशीर्षांतरमसंक्रांतिश्चांद्रोमासस्तदुत्तरश्चांद्रोमासोमकरसंक्रांतिसुतेःपौषः अतएवपौषादिदर्शांतात्संक्रांस
वधिकः कालः सौरचांद्रांतरत्वादधिशेषं सौरचांद्रमासयोरेककालेसमाप्यभावात्सर्वेषांतिनेष्टनिष्यवधिकोधिमासः संक्रांतिसु
क्रोव्यवहारार्थमसंक्रांतिमासेपर्यवसन्नोसुनिनिरुक्तः एवंस्पष्टमानेनस्पष्टश्चांद्रोमासः स्पष्टसंक्रांतिरहितः स्फुटोधिमासोम
ध्यमासंक्रांतिरूपाधिमासपरिणामरूपः पर्यवसन्नः श्लोकत्रयेनास्यार्थः ५९ अधिमासप्रतिपादनार्थमेवसंक्रांतिसुक्र
चांद्रमासानांचैत्रादिसंज्ञत्वं नकेवलस्येतिस्फुटयन्श्लोकाभ्यामधिमासस्यांतर्भावमाह अतएवार्कमेषादिसंक्रमे श्चांद्रमास
काः सुक्रायेतेक्रमेणस्फ्रश्चैत्राद्याख्यासुनिस्फुटाः ६० संक्रांतिरहितोसंज्ञश्चांद्रोमासोधिकोभवेत् अधिकत्वादुत्तरेषुमासे
स्वगणनास्यतेनि पतोधिकमासस्यासंक्रांतिमासपर्यवसन्नतानुतानएवेत्यर्थः संक्रांतिसुक्रस्यैवचैत्रादिसंज्ञत्वात्संक्रांतिमा
सः संज्ञारहितत्वादधिकएव ननुवर्षेद्वादशैवचैत्रादिमासा अयंत्वधिकोमध्यस्तुः कुत्रांतर्भवतीसतआह उत्तरेइति पद्यः

विमेषादिस्तिसविनरियोमासः प्रपूर्यतेचांद्रः चैत्राद्योसौज्ञेयइत्यत्रपार्वराशिसंबंधेनास्याधिमासस्यपूर्वमाससंज्ञत्वंसमुचितं ग
णितोक्तापितस्यपूर्वमासशेषयोगित्वात्तथापिपक्षातुदिवसैर्मासः कथितोबादरायणैः पूर्वमर्द्धपरित्यज्यउत्तरार्द्धप्रशस्यतइति
विशेषवचनादुत्तरमाससंज्ञत्वमाहतमतएवपूर्वार्द्धेधिमासोस्यइति चैत्राद्योसौज्ञेयइत्यस्यशेषस्तस्यइतिभवः ६१ अथप्र
तिपादितयोर्मध्यस्फुटाधिमासयोः सन्निवेशंसहेतुकमाहसोयंमध्यः सर्वमासस्तत्रएवंचैत्रात्स्पष्टसमसौद्विदानीं सौरस्मा
हस्वल्पचांद्रहचंयस्मात्रघुज्ञेयमर्कात्सगस्येति सः प्रतिपादितः अयमधिमासः मध्यः सर्वमासेषु भवति त्रैराशिकगणना
वशात् मध्यमसौरसावनस्यमध्यमचांद्रसावनादल्पत्वाभावाच्च स्फुटः एवमधिमासः इदानीमादेशे २१२ सूर्यमंदोच्चे
चैत्रमारभ्यसप्तमासेषुभवतिः कदाचित्कार्त्तिकोपि न्यूनं नचांद्रमाससंभवात् नान्यत्र हेतुमाह सौरेति यस्मात्कारणात् ते
षुमासस्यस्पष्टसावनदिवसाः संक्रांतेनरूपात्तेभ्यः स्वल्पापेचांद्रमासस्यसावनदिवसात्तदूनंभवति अन्यथासंक्रांतेर्नरकात
तेदर्शनंहयमनुपपन्नं सौरमासदिवसानामधिकत्वगतस्वल्पतयेत्याहनचेति अधिकसौरसावनमित्यर्थः नचसौरसावन
हानंतुसंक्रांतिकालिकस्पष्टसूर्यभोगविलोमरीत्यामध्यमसूर्यात्त्वसाध्यप्रत्येकमंतरकलामध्यार्कगतिभक्ताः स्फुटसौरस

BHAU DAJI

सावनदिवसाः युगचांद्रमासैर्युगसावनदिनानि तदैव चांद्रमासेनकानीनि मध्यमचांद्रमाससावनदिनानि २९ ३१ ५० परमस्फुटचांद्रार्धे सूर्यपरमफलघटिकादशधनमत्र २९ ४२ ५० चंद्रपरमफलघटिकाश्चपंचविंशतिर्धनमत्र ३० ७ ५० अस्मात्परमाध्यमसौरमाससावनस्यदिनाद्यात्मकस्या ३० २६ १७ धिकत्वादधिकमासः स्फुटसौरमाससावनस्याधिकत्वेतुसूत्रमेकत्र सूर्योत्यगनाचेव अधिकगतौ तत्र तमतोहद्यभावः परमस्फुटचांद्रसावनमितंसौरसावनंयद्वस्यात्तदवधिन्यूनत्वं तत्रुटि आदिसप्तसुसांप्रतं चांद्रमध्यमसावनमितंसौरसावनंयद्वस्यात्तदवधुधिकत्वमतउक्तंयुक्तिमदिति संज्ञेयः विस्तरस्तु मरीचावध्यवसेयः॥६२॥ अथग्रसंगादर्शांतयोर्मंडलनाडिकांतंमासश्चसूर्येंदुसमागमांतः तदंतरेचेद्रविसंक्रमः स्यात्तदासशुद्धाधिकोन्यथासाविति सिद्धांतसुंदरकारेणाहतंत्साभिप्रायंयद्यद्वयेनोपन्यस्यति अर्केंदुगस्यंतरलिप्तिकाभिः षष्टिर्घटीनांयदि तद्दिकास्यात् तद्दिवयोगार्द्धकलाभिरेवं त्रैराशिकादाप्तघटीभिरंतः ६३ अमायनोर्वेंदुयुतेस्फुटोसौतदंतरात्मा शशिमास उक्तः सुद्वोर्कसंक्रांतियुतोधिकस्तद्वर्जितः स्यादितिसुंदरोक्तमिति रवींद्वोर्युत्यवधिकश्चांद्रोमासः शास्त्रे उक्तः तत्रानेनयोगः वेंद्रसमसूत्रैकरूपोनांगीकृतः किंतुमंडलयोरेवयोगोगीकृतः स वित्तमंडलमेतियदाशशीसत्रमंडलपर्यंतधावनात् त

BHAU DAJI

आपियोगविच्छेदकालएवयोगपरिपूर्त्तेः संभवान्मंडलयोगविच्छेदारंभकालोदर्शांतादये एवचंद्रमंडलपश्चात्रेमिसूर्यमंडलप्रवेनेम्योर्योगपरिपूर्त्तिस्तत्र नार्थमंडलयोगकालश्चंद्रपूर्वनेमिसूर्यपश्चिमनेमिसंयोगकालमारभ्यचंद्रपश्चिमनेमिसूर्यपूर्वनेमिसंयोगकालपर्यंतमवांतररूपउभयमंडलव्यासकलायोगक्रमणात्मकरापिद्वयोर्मेयोर्विच्छेदाभावाद्वसंतरकलाभिः षष्टिघटिकास्तदैतद्योगकलाभिः काद्वसनुपाते छाफलतयावगतः तस्यार्द्धमंडलकेंद्रयोगमंडलनेमियोगयोरंतर्वर्त्तीकालः अतोलाघवान्मंडलयोगकालार्द्धमेवमानेकारंदे छासंबद्धोत्रत्रैराशिके छाफलतयोक्तं तत्र तद्दिवेत्यत्र तद्दिवेस्य छद्वस्यपूर्वपरामर्शिचाद्ययोर्गसंतरंतयोरेवबिंबयोरिसर्थः एवंत्रैराशिकात् पूर्वोक्तरूपानुपातात् अत्रघटीभिः अमांतादये उत्तरकालेः सूर्यचंद्रयोर्योगस्यमंडलयोगस्यांतः परिपूर्त्तिः असौ योगविच्छेदावधिर्यः शास्त्रे चांद्रमासः स एवतदंतरात्मा मंडलनेमियोगरूपयोगविच्छेदावधिस्वरूपः स्यात् उक्तः ननुमंडलकेंद्रयोगरूपदर्शांतावधिकः तस्यसुनिमध्यावधिकत्वेनमध्यमत्वात् तद्वर्जितः सूर्यसंक्रांतिरहितः स्फुटचांद्रमासोधिमासः ननुदर्शांतावधिकोधिमासः ननुपूर्वं साधारणमासोक्तोधिमासः केंद्रयोगावध्यभिप्रायेणोक्तः इदानीं तुमेसंयोगांतावध्यभिप्रायेणेति द्वयोरसंवादात् कस्यप्राधान्यमित्यत आहरत्नी

नि· एवं· निरूक्तं· सुंदरोक्तं· सिद्धांतसुंदरेऽपि उक्तं· नान्यत्र· तथा च एवं सिद्धांते साधारणोक्तैव तदनुक्तं· एवोक्तमेव प्रधानं· चरमंत्वेकदे
शीयत्वादप्रधानमिति भावः ६४ नन्वेकदेशीयमतमपि युक्तिमत्त्वात् कुतो न प्रधानमतस्तन्मतं दूषयति· नतु छंगणितं केंद्रं
स्वीकृत्य सोक्तं बुधैर्यतः· अन्यथा भादिनेम्यैक्यसंक्रांतिर्नो च्यते कथमिति· तत्· प्रतिपादितमतमेकदेशीयं· तु छं· असत्· हेतुमा
हगणितं· यतो हेतोः बुधैः सिद्धांतकारैः केंद्रं· मंडलकेंद्रं· भंगीकृत्य· ग्रहभोगादिगणितमुक्तं· नतु नेमिसंबंधेन· अतश्चा
द्रामासोपि केंद्रैक्यसंबंधेन युक्तः· न नेम्यैक्यसंबंधेनेति नेम्यैक्याभिप्रायेणाधिमासकथनमयुक्तमित्यर्थः· नेम्यैक्यरूप
मासांतारणेति· एतमाह· अन्यथेति· केंद्रापेक्षयानेमिप्राधान्ये· मंडलकेंद्रराश्यादिप्रदेशसमसूत्रैक्यरूपसंक्रांतिस्थाने·
पि राश्यादिप्रदेशसूर्यमंडलयच्चिमनेम्योर्योगएव कथं वा संक्रांतिः सौरमासांत· वा नाद्रियते· तथा चैकत्र निर्णीतः शा
स्त्रार्थोपरत्र भवतीति न्यायात् सौरचांद्रमासयोरेकरीत्यैवाधिमासार्थग्रहणं समुचितं· नभिन्नरीत्येति भावः ६५ अत्रा
प्याशंक्य समाधत्ते· अथार्थविचनाच्चांद्रमासो नेम्यैक्यतोत्र चेत्· तस्यास्तामधिमासो यं यज्ञादौ नोचितो न हीति· अत्र· अ
धिमासनिमित्तं· सवितृमंडलमित्याद्यर्थकर्षिवचनादित्यर्थः· चरमनेमियोगांतावधिचांद्रमासो गीक्रियते नतु युक्त्या· ए

राम०
२७

वं यदि वदसि· तर्हि· अयं· मंडलनेमियोगांतोभिप्रायिको धिमासो यज्ञादिमहोत्सवनिषेधार्थमास्तां नास्त्वेवेति· परं त्वस्य कृता
तयुक्तत्वमाह नेति· अत्र· सिद्धांतग्रंथे· तादृशो धिमासो वक्तुं नोचितः· सिद्धांतोक्तगणितस्य साधारणतया केंद्राश्रयत्वात् न दभि
प्रायेस्याधिमासकथनमेव गणितोपयुक्तं समुचितमिति भावः ६६ अथ चंद्रमासस्य सूर्यचंद्रमंडलकेंद्रयुतिरूपदर्शांतावधि
त्वेनोक्तदर्शांतेविशेषसंस्कारमंगीकृत्य तदाभिप्रायेणाधिमासो यास्यइति फलितं मतं यद्याभ्यामाह एवं यदुक्तं इति गर्गा
णां कुष्ठगानामथ संभवस्ये· यः साधितो दर्शविरामकालः स्फुटो न वेलंबनसंस्कृतो च ६७ यतः स्फुटे दर्शविरामकाले
हकूत्रसंस्कृतो रविशीतरश्मी· कुष्ठगानामथ निश्चयेन स्पातां हि तद्वोल विदो वदंतीति· एवं केंद्रयोगदर्शांताभिप्रायेण· यस्य
वोक्तं· तद्गर्गभस्थानस्य उक्तं· गणितागतदर्शांत एव सूर्यचंद्रयोस्तदेकसूत्रस्थत्वेन तद्योगस्य तत्रप्रत्यक्षत्वात् अथानंतरं·
कुष्ठे· सम्यक्प्रकारेण वक्ष्ये· दर्शांतकालिकसूर्यचंद्रबिंबावस्थानस्य भूपृष्ठैकसूत्रसंबंधाभावात् तत्र तदायोगस्य प्रत्य
क्षत्वात् यः साधितो दर्शांतो भूगर्भीयप्रत्यक्षयोगकालरूपो वक्ष्यमाणसूर्यग्रहणोपयुक्तलंबनेन संस्कृतः· अत्र· भूपृ
ष्ठे· स्फुटः· एकसूत्रावस्थानयुतिकालरूपो भवेत्· भूगर्भपृष्ठतादृशसूत्रेन तत्कालस्य यो लंबनं च प्रतिपादयंति· तथा

च भूपृष्ठेधिमासो लंबमसंस्कृतदर्शीनाभिप्रायेणग्राह्योनकेवलादिनिनन्मतनासयर्थः ६८ एतद्दूषयति नदृष्यस मासनिमि
त्तयोगोदृग्योचरत्वेनमतोनपूर्वैः भूगर्भदेशेगणितंहिसर्वेतस्यघदेशेसमसूत्रतः सदिति नदेतन्मते अपिशब्दः पूर्वमंडलाभिप्रा
येणाधिमासस्यदूषितत्वात्समुच्चायार्थकः असुक्तं हेतुमाहमासेति ग्रंथकारैः प्राचीनैर्मासनिमित्तंसूर्यचंद्रयोर्योगःप्रसङ्गेन
नस्वीकृतः दर्शीनेसूर्यचंद्रयोराश्याद्यवयवेनतुल्यत्वोक्तेर्मासांतत्वोक्तेश्च ननुगणितंमध्यचंद्रमधिकृत्योक्तमितिभूगर्भदेशोद
र्शीतोपिसमुचितः पृष्ठेतुव्यवहारावश्यकत्वात्तदप्यएवदर्शीतिःसमुचितः सएवलंबनसंस्कृतइसतआहभूगर्भदेशेइति सर्व
गणितंभूगर्भस्थमेव हि निश्चयेनपृष्ठदेशेसमसूत्रसंबंधात्तद्देवगणितंसम्यग्भवति भूगर्भपृष्ठयोर्गणितमभिन्नं अस्य
प्राभूस्थगणितस्यास्तुच्चप्रासादादिस्थपुरुषानुपयुक्तत्वापत्तेरितिभावः ६९ ननुतर्हिसूर्यग्रहणेलंबनकथनंव्यर्थमि
त्यत आहसूर्यग्रहेतुस्फुटदर्शीनत्वात्तत्साधनंसूक्ष्मतोपिरात्रौ सूर्यग्रहेस्नाननिषेधश्च किंचप्रदेशेष्विति नैकमासस्थिति
सूर्यग्रहणेप्रसङ्गदर्शीनत्वाल्लंबनसाधनंसम्पयुक्तमन्यथामध्यकालादिज्ञानासंभवः एतदेवस्मृतिप्रामाण्येनसाधय
ति अतोयीति यतः सूर्यग्रहणंप्रसङ्गतयोपयुक्तमतएवेसर्थः रात्रौसूर्यग्रहणेसतिधर्मशास्त्रेस्नानादिधर्मकृत्यनिषे

धउक्तउपपन्नः तत्रसूर्यस्यादर्शीनादेवदृग्योचरग्रहणाभावात् अग्रहणभूपृष्ठेसूर्यग्रहणरीत्याधिमासादरेनिषेधूषणांतरमाहकिंचे
ति प्रदेशेषुभूपृष्ठानेकप्रदेशेषु इति सूर्यग्रहणरीतिरंगीक्रियते तर्हि सर्वत्र एकमासोनस्यात् अयंभावः यथासूर्यग्रहणं
सर्वदेशेयुगपत्तुल्यंनभवतितथामासारंभसमाप्तीअपियुगपत्सर्वदेशेनभवतः लंबनहेतुभूतलग्नस्यप्रतिदेशंभिन्नत्वे
न लंबनस्यापिविलक्षणत्वेनप्रतिदेशंभिन्नत्वात्स्फुटदर्शीनस्यप्रतिदेशमेककालिकत्वासंभवात् संक्रांतेः सर्वत्रैककालिक
त्वाच्च तथाचामांतासत्वसंक्रांतौयस्मिन्देशेसंक्रांतिर्दर्शीनादर्वाक्तस्मिन्देशेनदर्शीनावधिकोमासस्तत्संक्रांतिप्रयुक्तसंज्ञो
भवति यस्मिन्देशेदर्शीनोत्तरंसंक्रांतिस्तस्मिन्देशेपूर्वमासोत्तरमासस्तत्संज्ञकः एवंप्रतिदेशेष्वेकमासस्यसंज्ञाउपपत्तिरेक
कालेएवमधिमासोपिक्वचित्स्यात्क्वचिन्नस्यादिति ७० अथाहर्गणेविशेषंविवक्षुः प्रसंगात्त्रयमासंप्रमाणिकाभा
माहअमार्कमासस्यसावनंरवेर्गतेर्महत्त्वतः यदेंदुमासस्यसावनाब्दवेश्वहीनकंतदा ७१ कदाचिदिंदुमासकोसुतार्कसंक्रमद्वयः
द्विमासस्यसंज्ञकःस्यात् तत्रयाभिधोसुनिस्तत्रेति अथाधिमासनिरूपणानंतरं सूर्यगतेर्महत्त्वात्सौरमासस्यसावनंचांद्रमा
सस्यसावनाद्यदाल्पंभवेत्तदा कदाचिदनियमेन संक्रांतिज्ञानाभावात् चांद्रमासः युतलग्नेसूर्यसंक्रमद्वयंयस्मिन्नेतादृ

शः द्विसंक्रांतिकः संक्रांतिप्रयुक्तसंज्ञाभ्यां द्विमाससंज्ञः द्वयोर्मासयोः संज्ञायस्यैतादृशः अनएवैकर्यौमासस्य स्यात् क्षयसंज्ञोमुनि
भिः प्रोक्तः अयंतुस्पष्टमानेनैवस्यात्तुमध्यममानेन मध्यमचांद्रमाससावनादस्मा २९ ३१ ५० मध्यमसौरमाससावनस्या
स्य ३० २६ ९७ न्यूनत्वाभावेनमध्यमचांद्रमासेसंक्रमद्वयस्यासंभवात् अवमसंबंधेनक्षयमासस्यसमदंशपंचवर्षैरवश्यंसं
भवेपिनस्यसावनत्वेनोपेक्षा मासस्यचांद्रत्वेनांगीकारात् ७२ ननुयदाशुक्लप्रतिपदिद्वितीयायांवासंक्रांतिस्तदुत्तरामावहित
स्यचतुर्दश्यामामायांवातदुत्तरासंक्रांतिस्तदेवखलुक्षयमासः तत्रप्रथमासंक्रांतिः पूर्वमधिमासस्यातंविनानभवति अन्यतम
सौरमाससावनस्यचांद्रमाससावनादधिकत्वात्क्षयाधिमासयोर्विरुद्धा कथंसन्निहितत्वाद्द्वयोः समावेशोद्यावध्यदृष्टत्वात्
अन्यथायदाधिमासपातस्तदावश्यमग्रेक्षयमासपातापत्तेः किंच क्षयमासोत्तरमप्यन्यतमसौरमाससावनास्यचांद्रमास
सावनादधिकत्वसंभवादधिमासः एवंयस्मिन्क्षयमासस्तदासन्नाबाधिकालेपूर्वमुत्तरत्राप्यधिमासावश्यंभावाद्द्वात्रिंशाद्भि
र्मासैर्दिनैः षोडशभिस्तथा घटिकानांचतुष्टयेणयतस्यधिकमासकदस्तकाधिमासांतरकालाभावतया द्वयोस्तयोरधिमा
सयोः समावेशोस्यैकवर्षांतरतयाचानुचितएव स्यक्षयमध्यममानासन्नत्वावश्यंभावेनाधिमासयोः स्पष्टयोरंतरा

राम०
२९

लकालस्याष्टाविंशतिमासात्मत्वासंभवादित्यत आह क्षयमासास्तर्हिकालेयेचमासत्रयावधिः अधिमासद्वयंतत्रस्यादाद्योगणितागतइति मासत्रयावधीत्यत्रिलाघवसौकर्यार्थं क्षयमासोत्रिमासेभ्यः पूर्वोग्रिममासमारभ्यपूर्वोग्रिमकाविनिध्येयः अधिमासद्वयं एकोधिमासः पूर्वमितरोधिमासउत्तरत्रेत्यधिमासद्वयंस्यात्रैकत्रद्वयमित्यर्थः तथाचक्षयमासकालसंबंधात्तत्कालेतादृशमधिमासद्वयंभवत्यन्यथाक्षयमासानुपपत्तिः अधिमासप्रसुक्तांतरोत्रिलक्षक्षयमासाप्रसुक्ताधिमासविषयिणीतिनकाचिक्षतिः उभयोरधिमासयोर्मध्येधिमासपतनसरणोकोधिमासद्वयंतत्राहतत्रेति तयोरधिमासयोर्मध्येप्रथमः क्षयमासापूर्वकालिकोधिमासोगणितानयेतः क्षयमासोपजीवकइत्यर्थः ७३ यद्येहशसूर्यराश्यादिमंदोच्चे २।१८ समयेचेत्रादिसप्तस्वधिमासयातस्तद्येनसमयेक्षयमासःकेषुमासेषुभवतीत्यतस्तत्संभवमासकालमाहस्वंवसांप्रतंचेत्स्यात्क्षयमासस्तदारवलु कार्त्तिकादिचतुष्टयेधिमासःफाल्गुनाद्ययोरिति सांप्रतमीदृश २।१८ सूर्यमंदोच्चसंबद्धवर्षसप्तरात्मकस्तत्कालेएवंच अथार्कमाससावनमित्याद्यत्रीत्यायदिक्षयमासः स्यात्तदानर्हिखलुनिश्चयेन कार्त्तिकादिचतुष्टे कार्त्तिकमार्गशीर्षयोषमाद्यन्यतमे पूर्वमुद्भूमासाधि

मासमासंभावनयाक्षयमासस्य संज्ञोत्पत्तिरन्यथा स्वरूपासिद्धेः अस्यः क्षयमासानंतरीयोधिमासः फाल्गुनाद्ययाः फाल्गुने सांप्रतानुक्रा
धिमासकालेगुणपूर्णनये १६०३ युगाब्दिमेषैः १०७५ समयोर्वैशाखयोः सहः क्षयोः अधिकाविषमासिचैत्रमासेक्षयतः प्रागप
रौभविष्यतः १ युगाद्यतिष्य १५८५ निमित्तशकालेतौधिकोपि क्षपएवदृष्टः अंसोधिमासौमासि सार्वभौमान्मुक्तादित
राप्रसिद्धस्य प्रसिद्धिरथपास्तास्यात् चैत्रेवा इदंसर्वं मरीचौव्यक्तं सोपपत्तिकं गणितेनप्रदर्शितं तत्रैवद्रष्टव्यमित्यलं परम्यते
७५ अथाधिमासनिरूप्याहर्गणेतत्कृतविशेषं भास्कराचार्योक्तम् तुवदतिः स्यद्धोधिमासः यतितोप्यलब्धोयदायदाचापति
तोधिलब्धः सोकैर्निरेकैः क्रमशोधिमासैस्तदादिनैघः सुधियाप्रसाध्यइति स्पष्टार्थं अहर्गणानयनांतर्गतगताधिमासानयन
गणितकरणे अप्राप्तः प्राप्तोधिमासइतिज्ञेयं ७५ अथाहर्गणानयनेगतमासांतर्गताधिमासेसतिविशेषं वदक्षयमास
हृतविशेषं चश्लोकाभामाहाः अंतर्गताधिमासोपिनयातोमासयोजने एवंक्षयाद्गतोयातमाससंख्याविधूनिता ७६
अधिमासाद्गतोनैवं किंतुसंख्यैववेवलं एवंविचार्यमतिमान्नाणंकुर्यादसंशयमिति अथिश्राद्धोविरोधाभासाद्गतमास
गणनायांस्पष्टोधिमासोनगणएवस्यादधिमासानयनगणितसिद्धत्वात् अन्यथैकमासांतरितमासगणसिद्धेः क्षयमासप्रयुक्तं

गतमासेविशेषमाहएवमिति यथाधिमासप्रयुक्तोगतमासेषुविशेषोस्तितथाक्षयमासप्रयुक्तोविशेषोप्यस्ति तमाहक्षयायतइ
ति क्षयमासोत्तरं यातमाससंख्याः एकोनाः कार्याः पूर्वाधिमासस्याधिमासानयनसिद्धत्वेनक्षयमासस्याहर्गणानयनासिद्धत्वा
त् क्षयमासोत्तराधिमासोमाघेचेत्स्यात्तदधिमासानंतरं एवं यातमाससंख्याः एकोनाः नकार्याः तदधिमासस्याहर्गणाधिमा
सानयनासिद्धत्वादुतमासेषुतद्गणनायाआवश्यकत्वात् अतः क्षयमासनिमित्तंमाससंख्यैकोनाद्वितीयाधिमासनिमित्त
मेकाधिकाचेतियथास्थितैवमासगणनेत्यर्थः उपसंहरति एवमिति उक्तरीत्याविचार्य सुबुद्धिरसंशयं अव्याकुलरत्यर्थः अ
हर्गणंसाधयेत् ७७ अथाहोतएवग्रहसाधनंविवक्षुः शिष्यावधानार्थंतत्प्रतिजानीते अथकल्पादिवर्षेभ्योगतेभ्योग्रहसा
धनं पूर्वोक्तेनसमंवक्ष्मिलाघवाद्भादिवधियेति अथेतद्ग्रहसाधनानंतरं गतेभ्यः कल्पादिवर्षेभ्यः एकोनाशीत्यधिकशता
धिकसप्ताधिकसहस्रत्रयशकयुतमितिरूपेभ्यः ग्रहसाधनंराश्यादिकं नपूर्ववद्गणादिकं पूर्वोक्तानीतग्रहसमं पुनः क
थनंव्यर्थमित्यतआहलाघवादिति पूर्वगणितांकबाहुल्येनश्रमयासाधिक्यमतस्तदपेक्षयालाघवात् सिद्धांतनिबंधस्या
सूक्ष्मगणितानुक्तिचेननग्रहकौतुकवदतिलाघवादित्यर्थः अन्यथा तोक्तंलाघवेनगृहीतमिसाहधियेति स्वबुद्ध्यावदाविं

मि ७८ तत्रोपपन्नमहर्पतिमाह अहर्गणः सपादादिवसाः समार्द्धनाड्यः समाः स्वार्द्धयुताः पलानि अधस्तनान्यहर्दशांशहीनान्येवं स
मेशोभ्रगुनोगतहृद्दिनि अधः पलेभ्योधः [illegible] नानि पलानि पलांकतुल्यविपलानीत्यर्थः एवमुक्तरीत्यादिनाद्यात्मकः स म
तहः शुक्रवारादितः सावयवो वर्षयोभवति अत्रोपपत्तिः सौरवर्षादौ सावयववारार्थं तद्दानं च युगवर्षैर्युगसावनदिनानि
तदेकवर्षैकानीत्येकवर्षे सावनदिनानि ३६५।१५।३१।३१।२४ वारस्यावश्यकत्वात्समतहानि १।१५।३१।३२।२४ एकवर्षयो
हृयः सावयवस्तदाकालिगतवर्षैः कृतिवर्षा एयतहुणितानि समैस्तनहान्यहृपइति तत्रैकवर्षादेकवर्षाहृपत्रकरूपइतिमंद
नामयिसु ज्ञेयत्वात्सुगमंस्वतोज्ञेयं खंडगुणनेन कल्पादौ शुक्रवारत्वात्तदादिगणना ७९ अथोपयुक्तांशुद्धिमाह समाः
स्वतिथ्यंशासु ताभवघ्नसमारवस्वांगलवेनहीनाः त्रिनष्टवर्षाभ्रकुघातयुक्ताः शुद्धिर्भवेत्सारवगुणेश्वतष्टेति वर्षाणि
स्वयंवदशांशायुतानि एकादशगुणितवर्षाणां षहस्रांशेनहीनानि त्रिनष्टवर्षदशाहतायुतानि शुद्धिर्भवेत्त्रिंशन्नष्टा० अ
त्रोपपत्तिः युगवर्षैर्युगचांद्रदिनानि तदेकवर्षैकानीत्येकवर्षे चांद्राहाः ३७१।३।५३।२४ चांद्रवर्षसमाप्तिर्नानंतरं सौरवर्षसमा
प्तिरेभिश्चांद्रदिनै ११।३।५३।२४ भवतीत्येषांशुद्धिसंज्ञा चांद्रवर्षांतादेतच्चांद्रांतरेणसौरवर्षस्यशुद्धेः अतोनुपातेनैकवर्षा-

MAHARAJA SAWAI MAN SINGH II MUSEUM JAIPUR

शुद्धिगुणितवर्षाणि तैर्वैत्रिंशन्नष्टानि शुद्धिसंज्ञखंडगुणनार्थं दशभिर्नरखंडं एतत्खंडजे फलं वर्षत्रयेणत्रिंशान्शुद्धेरवश्यं त्रिंशा
न्नत्वेन त्रिंशन्नष्टं फलं कार्यं तत्रलाभवाहूर्वाएवत्रिभिस्तनानि दशगुणितानि कृतानि द्वितीयंखंडं १।३।५३।२४ पंचदशांशायु
तैकमितं धृतं तृतीयंखंडं दिनाद्यः ६ ३६ मणमिदं षष्टिसहस्रेणसवर्णितं दिनस्थानेएकादशा अतोयुक्तमुपपन्नं ८० अ
त्रोपपत्तिः अहर्ध्रुवकाभ्यां शुक्रध्रुवकमाह तिथ्यादिशुद्धिः सूर्यग्रीभवेद्दशादिको विधोः ध्रुवकः सौरवर्षादौ तदभावेस्वमेतन्मतर
नि पूर्वोक्तानि तिथ्यादिसावयवशुद्धिर्द्वादशगुणा सौरवर्षादौ चंद्रस्यभागो द्वो ध्रुवको भवेत् ननु सूर्यस्यध्रुवकः प्रथमंवक्तुमुचित
इत्यत आह तत्रभावइति सूर्यस्य ध्रुवकाभावउक्तः अत्रोपपत्तिः सूर्यचंद्रयोर्द्वादशभागांतरेणैकतिथिर्भवतीति शुक्लादितिथ
यो द्वादशगुणिताः सूर्यचंद्रयोरंतरभागा भवंति तेसूर्यस्ययोज्याश्चंद्रः स्यात् तत्रसौरवर्षादौ चंद्रस्यवर्षपर्यंतं प्रयोजना
त्स्थिरत्वेनध्रुवकत्वं सौरवर्षादौ शुक्लादितिथयः शुद्धिमिताएताद्वादशगुणा अंतरभागाएतेसौरवर्षादिजसूर्ययोज्यास्तत्र
सूर्यस्यवक्रसूत्रैः राश्यादिसूर्यस्यशून्यमितत्वेनसूर्यध्रुवकाभावादंतरभागाएवचंद्रस्यांशाद्योध्रुवकः ८१ भौमध्रुवकमा
हद्विधागतांशगुणितारदैस्तैरामैः शराभाः फलयोर्वियोगः भांशाद्ययोर्वदहतांशतत्वभागतलिप्तासहितः कुजस्येति गत

वर्षाणि द्वात्रिंशद्गुणितानि पंचभक्तानि राश्याद्यं फलं स्यात्। गतवर्षाणि त्रिभिर्गुणितानि पंचभक्तानि भागाद्यं फलं स्यात्। तयोः फल
योः साजात्यस्थानेन रकार्यं चतुर्गुणितवर्षाणां पंचविंशतिभागलब्धकलादिना स्वस्थाने युतं भौमस्य राश्याद्यो ध्रुवकः स्यात्।
अत्रोपपत्तिः युगवर्षैर्युगभौमराश्योद्वादशगुणभगणमितास्तदैकेनवर्षेणकेदसनुपातेन भौमैकवर्षीयराश्याद्यो ध्रुवः
६।११।२४।९।३६ अनेनवर्षाणि गुण्यानि ध्रुवकः तत्रखंडगुणनार्थं राशिभागात्मकमेकमिदं खंडं ६।१२ द्वितीयं भागा
द्यमूर्णं०।३६ तृतीयं कलादिकं च०।९।३६ एतो हरगुणितेभ्य एकस्थानस्थेभ्यो गतवर्षगुणेभ्यो हरभक्तेभ्यः फलानां यथायोग
मं तत्रयोगाभ्यां ध्रुवकः फलितः स्यादेव ८२-बुधशीघ्रोच्चस्य ध्रुवकमाह पंचघ्नवर्षाणि पृथङ्नक्षत्राणि घ्नानि तेषां विवरं वि
हीनं तानघ्नवर्षद्विशतीलवेन भागादिको विच्चलतुंगकस्थेति तेषां पंचगुणितवर्षाणां पृथङ्नक्षत्रातीगुणितानां चेत्यर्थः
बहुवाद्बहुवचनं तयोरिति फलितार्थः तानाएकोनपंचाशत् शेषस्थं अत्रोपपत्तिः एकवर्षेनुपातेन भागाद्यो ध्रुवः ९४।९५
।४५।१८ अत्रप्रथमं खंडं १५०० द्वितीयं खंडमूर्णं ५ एवमेकं खंडं १४ ९५ अत्रद्वितीयखंडमूर्णं०।१४।४२ अस्मात्
वीक्ष्य शीसास्पपन्नं यद्यपि भगणानुपयोगेनैकवर्षीयबुधशीघ्रोच्च ध्रुवके भगणसागेन भागाद्यो ध्रुवः ५४ ४५ १८

अस्मात्सर्वैरीस्या पंचघ्नवर्षाणि पृथक्कवर्चैर्निघ्नानि तेषां च सुनिर्विहीनेन नियाढेलाघवं अन्यथा कल्पारंभजगतभगणानां
सेपकवेन योजनोत्पन्नेस्तथापि मौमादिवत्कल्पारंभाद्भगणादिकल्पानां चेन्न योक्तिर्गणितनिबंधनेस्थलानंगीकारं सत्त्वयि
तुमन्यथा सूत्रगणितोक्तावपि तथा शंकीदयापत्तेः ८३ गुरुध्रुवकमाह रक्षत्रिघ्नाः पृथक्तमभौघ्नाद्रसाभ्रकाद्धृताः स्व
स्वांगाभ्यफलेन स्यात्स्ववाद्यो ध्रुवको गुरोरिति अस्मात् त्रिंशद्गुणितवर्षेभ्यः पृथक्स्थितेभ्यः सप्तगुणितेभ्यो गतवर्षयुतेभ्यः ष
ड्गुणभक्तलब्धफलेन युतानि त्रिंशद्गुणितवर्षाण्येव राश्याद्यो ध्रुवः अत्रोपपत्तिः एकवर्षीयो राश्याद्यो ध्रुवः ३० २१ ६ प्रथमं खंडं ३०
द्वितीयं च० २१ ६ हरेण ६०० सवर्णितं २११ अत्रैकं भिन्नं द्वितीयं चेत् २१० पूर्वखंडात्सप्तगुणमतस्तत्सपपन्नं ८४ शुक्रशी
घ्रोच्च ध्रुवकमाह गतनक्षत्राः स्वस्वांगैर्हताः स्वाभ्रवेदांशकोनाः समायं च मांशेन युक्ताः सितोच्चस्य शीघ्रस्य वर्षेषु भागशतांशेन
हा ध्रुवो भागपूर्वं इति गतवर्षपंचभागस्य शतभागेन हीनाद्दिहृत्या हरयोः पृथगुक्तिर्गणितसुखार्थं पूर्ववर्षपंचांशस्य सि
द्धत्वेन शतभागोक्तेरेवपर्यवसानात् शेषं स्पष्टं अत्रोपपत्तिः एकवर्षध्रुवो ज्ञाप्यः ५०५।११।५२।४८ अत्रैकं खंडमधिकं धृतं
६०० अत्रर्णं खंडं १५ कलास्थाने धृताः १२ अस्याधूर्णं खंडं लब्धं०।०।७।१२ पंचशतगुणं भागस्थाने एवः १ अतः

सर्वेमुपपन्नं॰ अत्रापि भगणाः सागेनैकवर्षयमुक्तः शीघ्रोच्च ध्रुवकः २२५।११।५२।४८ ग्रहणेन पर्वरीसागनाद्याहताः खाश्वरा
मैः खवेदांशकोनाद्रिपाढेलाघवं परं तु बुधोक्तपाकस्तु निः संदेहे निधेयं ८५ शनिध्रुवकमाह अर्कभाद्याः स्वपथ्यांशयुक्ताः
सप्तघ्नवर्षतः युक्ताः पंचरातांशोनलवाद्यः स्याच्छनेर्ध्रुवः स्फुटं॰ अत्रोपपत्तिः भागाद्यः शनेरेकवर्षध्रुवः ९२।१२।५०।२४ प्र
थमखंडभा गात्मकं १२ द्वितीयखंडमेनन्यितंकलात्मकं॰ तृतीयखंडभागादिकं॰।०।५०।२४ पंचरातगुणा॰ भागस्थानेस
प्त॰ अतउक्तमुपपन्नं॰ ८६ अथ सूर्यमंदोच्चवर्षादौ साधयति॰ वर्षाद्युतांशोद्धरसांगसप्ताश्विगुणाद्धतो युक्तस्त्रिगुणाद्धतो युक्तः तत्रांशा
केनस्वरसभागोनेनोच्चमर्कस्य दिलिप्तिकाद्यमिति॰ वर्षाण्ययुतभक्तानि॰ त्रिगुणवर्षेभ्यः पंचविंशत्संशोनस्त्रिंशदंशाहीने
नयुताविकलाद्यं रवेरुच्चं सौरवर्षादौ स्यात्॰ अत्रोपपत्तिः विकलात्मकं करणार्थं मंदोच्चभगणानां गुण ९२ ९ ६०० स्त्रीतावर्षप्र
माणं॰ कल्पवर्षैरेतावद्विकलात्मकं देहवर्षैणकाइतिगुण ९२९ ६०० हरौ ४३२०००००० कलिमानाय ४३२००० वर्त्तितो
भगणानां त्रयं गुणो युतं हरभक्तं॰ तथा च सूर्यमंदोच्चध्रुवकस्त्रिद्व्यर्थं सूर्यमंदोच्चभगणाः कल्पीयाः पर्वोक्ता २८७ त्रिगुणा ११
६१ इष्टवर्षाणां गुणो युतं हरभक्तं॰ तत्र गुणस्यैकमितं खंडं द्वितीयखंडं ११६० चत्वारिंशदधिकं धनं १२०० चत्वारिंशत्तु धनगुण

स्य १२०० त्रिंशदंशस्वरूपाः अतो लाघवार्थं गुण १२०० हरौ १०००० चतुःशतेनाद्यवर्त्तितो गुण ३ हरौ २५ अस्य खंडस्याधिकखं
डं त्रिंशदंशइति स्त्रिंशद्दशोनमनेन वर्षायुतांशो योजितो विकलाद्यमुच्चं॰ परं तु कलिवर्षेभ्यः साधितं॰ [illegible] सन्न
मंदोच्चेन युतं कार्यं॰ तत्र तदुच्चं विकलात्मकं सृष्टिवर्षैरेभि १९ ५५ ८८ ०००० तत्प्रकारेणैव साधितं २२७० ७७ ६६८ इदं च
कविकला १२९ ६००० भक्तं भगणाः १७५ एषां प्रयोजनाभावात्त्यागः यद्ध्रुवकं कलिजगतभगणयोजनात्तु त्रिवत्॰ अवशि
ष्टं कल्पादौ सूर्यमंदोच्चं विकलात्मकं २७७६६८ विकलात्मकानीतसूर्यमंदोच्चे युतं कृतं॰ तत्रापि सूर्यमंदोच्चे कदेशो वर्षायुतांश
रूपे स्वेच्छया युतमुक्तं फलसिद्धिर्विरोधाभावादिसूपपन्नं ८७ चंद्रोच्चस्य ध्रुवकमाह स्वभंशहीनाद्भगणाः स्वरवाद्रिलवेन यु
क्तान्नखगघ्नवर्षैः दिग्घ्नैर्युतो वर्षसमाश्वेदांशयुग्विधुच्चस्य भवेच्च वाद्य इति॰ सांकानि चतानि युगघ्नवर्षाणि चतैर्नवयुक्तै
श्चतुर्गुणितवर्षैरित्यर्थः दशगुणितैरेभिर्युतइत्यर्थः शेषं स्पष्टं॰ अत्रोपपत्तिः॰ चंद्रोच्चस्यैकवर्षध्रुवकोंशाद्यः ४०।४१।५४
अत्र प्रथमखंडं ४० द्वितीयखंडं॰।४० तृतीयखंडं॰।१ चतुर्थखंडं लवाद्यं॰।०।०। ५४ दशगुणितं भागस्थानेरूपं॰ प्रथमखंडे युग
घ्नवर्षैर्दिग्भिरिति सिद्धं॰ इदं चंद्रोच्चं कलितइति कल्पारंभजचंद्रोच्चेन युतं कार्यं॰ तद्दानं च सृष्टिवर्षेभ्यः १९ ५५ ८८ ०००० तत्प्रकारेण

तथाहि स्वर्यंशा ६५१९६०००० हीनवर्षाणि १२०३९२०००० स्वर्गाब्धिलव ३२५९८००० युक्तानि १२६५१८००० युगघ्नवर्षैर्दि
ग्भैरेभि ७८२३ ५२ युतानि ७९५७१७१८००० वर्षाणां चतुः सहस्रा ४०००० ऊन ४८८९७० युतानि ७९५७२२०६९७०
इदं भागात्मकं चंद्रोच्चं इदं भगणांश ३६० भक्तं फलस्य २२९०३३९०८ गतभगणतयोपेक्षितत्वात् अवशिष्टं नवतिभागाश्चंद्रोच्चं
इदं स्वछायाशोपमार्थं चद्रशभक्तं कृत्वा चतुर्गुणितवर्षेषु युतमुक्तं तद्दशगुणेनवापि दगुणाः स्फुटितिनवतिभागाः शेषो युतः
कृतइति सिद्धमतउपपन्नं ८८ भौममंदोच्चध्रुवकमाहगणाद्वारसघ्नाः शताप्ताः कुजोच्चं मदुस्पात्स्वपंचाशदंशैर्नयुक्तं विलिप्तादिकं षड्राशागतर्कयुगैः संयुतं भादिकं चोन्नरीत्येति नतु विकलात्मकमंदोच्चस्पराश्याद्यात्मकत्वं कथं स्यादत आह भादिक
मिति विकलानां कलाषष्ठ्यतिप्रायुक्तपरिभाषया राश्यादिकं च स्यात् अत्रोपपत्तिः इष्टवर्षाणां चतुरधिकं शतद्वयं भगणाः
२०४ त्रिगुणा ६१२ गुणो युतं १०००० द्वौ त्रगुणस्येकं खंडं ६०० मपरं च १२ प्रथमस्थाने ~~[illegible]~~ शतापवर्त्तितो गु
णद्वद्वौ १०० अत्रापि द्वाभ्यामपवर्त्तनकृतः पंचभक्तत्वेन गौरवापत्तेः द्वितीयखंडफलसिद्ध्यर्थं प्रथमखंडफलस्य द्वयगुणः
शतं हरश्चेति पंचाशदंशो द्वितीयखंडफलं तद्योगद्वस्तुमुपपन्नं कल्पादावुक्तसाशेषो विकलात्मकः ११९९६ १९५६ ६ राम०
३४

कोलाघवात् इशा एकादशा अद्यानां प्रथमांशाः शताप्तवर्षाणि अन्योर्योतेफलत्वेनसिद्धानि युतानि एतैरुक्तो

चक्रविकलात्मकः फलं गतभगणाः ९२ शेषं विकलात्मकं मंदोच्चं ४६७८५६ अतः सर्वमुपपन्नं ८९ बुधमंदोच्चध्रुवक
माहशतांशवर्षाणि शरद्विभक्तानि शाद्रूपं शाहतौ युतानि गजाब्धिनागाद्रिखवासुहीनान्येव विलिप्तादिविशेषमूह्यमि
ति शतांशवर्षाणामग्रेजनादेकहरो २५०० नौके ५०२८४८ हीनानि एवमुक्तरीत्या बुधस्य मंदोच्चं अत्रोपपत्तिः इष्टवर्षाणां
गुण ११०४ हरो १०००० गुणस्येकं खंडं ११०० परं च ४ द्वितीयस्थाने पवर्त्तनाद्वर्षाणां हरउपपन्नः २५०० प्रथमस्थाने पवर्त्त
नाद्वर्षाणां गुण ११ हरो १०० द्वयोः फलयोर्योगद्वस्तुपपन्नं उक्तरीत्या सप्तविंशवर्षेभ्यः कल्पादौ विकलात्मकः शेषः २९५९२९१५
२ भगणाः १६६ मंदोच्चविकलाः ७९२१५२ एतयोस्थालत्वलाघवाच्च विकलाभ्यो विशोध्यपूर्णशेषः कृतः फलाविरोधा
दित्युपपन्नं ९० सुरमंदोच्चध्रुवकमाहभगणाद्वादशभागो सौरवर्षहिनपक्षकृतः विलिप्तादिसुरोर्मंदतुंगस्याद्वर्षवक्र
जमिति सौरवर्षाद्यस्वमंदोच्चं विकलाद्यं स्यात् अत्रोपपत्तिः इष्टवर्षाणां गुणहरौ २७००।१०००० शतांशवर्त्तितौ गुण २७ हरो जातो
१०० एतद्वर्षेभ्यः कल्पादावुक्तरीत्या शेषः ५२८८ ८७ ६०० गतभगणाः ४०७ शेषं शेषः ६२५६०० अतउपपन्नं ९१
शुक्रमंदोच्चध्रुवकमाहनृपघ्नवर्षाद्यशतांशयुक्तं समासहस्रद्वयभागमानं रवेरसमांग गजाब्धिभिश्चयुक्तं विनिलिप्ता

दिभगोमहच्चमिति· वर्षाणां सहस्रद्वयांशाप्रमाणं षोडशगुणितवर्षसमूहस्य शतांशेनसुक्रमित्यर्थः· अत्रोपपत्तिः गुण १६०५
हरो १०००० अत्रगुणस्यैकं खंडं १६०० परंच ५ प्रथमस्थानेशतापवर्त्तितौ गुण १६ हरो १०० द्वितीयस्थानेगुणकापवर्त्ति
तौ हरस्थाने २००० गुणस्थानेरूपं· अतउपपन्नं· शेषस्तु कल्पादौ ३१३९ १८ ७५० गतभगणाः २५२ शेषं २८६७ ४०
शेषः ९२ शनिमंदोच्चध्रुवकमाह द्विधा द्वाः शिवैः पर्वतैः संगुणाः स्यात्सहस्रेणभक्ताः क्रमाच्चायुतेन· फलैक्यं युगाभ्या
प्त्विवेदाब्धिवेदैर्विहीनं विलिप्तादिमांदं महच्चमिति· मांदं· मंदः शनेश्चरस्यैदमांदं· अत्रोपपत्तिः गुण ११७ हरो १०००० प्र
थमगुणस्य खंडं ११० द्वितीयं ७ अतः सुष्ठु क्रफलैक्यमित्यतं· कल्पादावुन्नरीसाशेषः २२८८३७९६ गतभगणाः १७ शे
षं ८५१७६ चक्रविकलाभ्यः सुदृष्टं शेषः ४४४२०४ पत्रशेषोहीनोनस्यात्तत्र चक्रविकलाभ्योहीनं शेषं कृत्वा योज्यइति
ज्ञेयं· अतः सर्वमुपपन्नं ९३ अथ चंद्रपातध्रुवकमाह सांकगताद्याः स्वयमेर्विनिघ्नाविघ्नयाताद्दनखांशाहीनाः·
गोकुघ्नवर्षाभ्रखखांगभागयुक्ता लवाद्यांशिपातनस्येति· सांकः· नवभिः समेताः गताद्याः विंशत्यागुणिताः त्रयोदशगु
णितगताद्यानां विंशत्यंशेनहीनाः एकोनविंशतिगुणितवर्षाणां षड्सहस्रांशेनयुक्ताः चंद्रस्यपातएवपातकोभागादिकः

स्यात· अत्रोपपत्तिः चंद्रपातस्यैकवर्षध्रुवांशाद्यः १९ २१ ११ २५ अस्यैकं खंडं विंशतिरधिकं धनं· अधिकमिदं खंडमूनं· ३९ अ
चधनं· ।० ।११।२४ एभ्यः स्वयंसुगममूलं· उक्तरीसा कल्पार्कैरीशेषभागाः· ३७८५२५७९६२० चक्रांशभक्ताभगणाः स्थ्या
स्थितवर्षिहे· ९४ भौमपातसौरवर्षादावाह १०५१४५७५ शेषं भागाः शेषः १८० अयं विंशतिभक्तो वर्षेषु युक्तः कृतः·
अद्यानां विंशतिगुणनोपक्रमे शेषस्य यथा स्थितत्वसिद्धेः ९४ भौमपातसौरवर्षादावाह त्रिघ्नाद्रविघ्नभागः स्वसप्तघ्ना
तभागयुक्तः वेदखाब्धिशक्रोनो विकला द्यारपातकइति· त्रिगुणाद्यानां पंचाशदंशोयं स्वशतांशेनसप्तगुणितेनयुक्तः एत
दंकै १४४५०४ हीनो विकलात्मको भौमस्यपात एवस्यात् यत्रांकाहीनानस्यात्तत्र चक्रविकलाभ्यः सुदृष्टांकायोज्या इति पूर्वमु
क्तमेव· अत्रोपपत्तिः गुण हरो ६४२।१०००० गुणस्यैकं खंडं ६०० अपरंच ५२ प्रथमस्थानेशतद्वयापवर्त्तितौ गुण २ हरो ५०
द्वितीयस्थानेद्वाभ्यामपवर्त्तितौ गुण २१ हरो ५००० फलयोर्योगस्क्रमसुपपन्नं· शेषस्तु क्रीसा १२५५ ६७ ४९६ गतभगणाः
९६ शेषं ११५१४९६ चक्रविकलासुदृष्टं शेषः १४४५०४॥९५ बुधपातस्य ध्रुवकमाह गताद्याः स्त्रिनिघ्नाः खखाभाः एष
क्रत्रिनिघ्नाः शरार्कैर्हतालवहीनाः॥ गजांगेंदुपंचाद्रिहीना विलिप्तायुताः सौम्यशीघ्रोच्चकेसौम्यपातइति· तेएव कलाल

?ब्रेनहीनाः एतदंकैश्च ७५१६८ हीनाः एताविकलाः बुधशीघ्रोच्चपर्वोक्तेसुताः बुधपातः स्यात् अत्रोपपत्तिः सूर्यसिद्धांतो
क्ताः कल्पबुधपातभगणा अष्टाशीत्यधिकं चतुःशतं ४८८ एतत्त्रिगुणा गुणो १४६४ युतं हरश्च १०००० अत्र धनोगुणो
धिकः १५०० गुणहरौ पंच शतापवर्त्तितौ गुण ३ हरौ २० अधिकौ गुणो ३६ हरश्च १००० अत्र चतुर्भिरपवर्त्तितौ
जातौ गुण ९ हरौ २५०० पूर्वहरेण २० गुणेन ३ वहरो २५०० गुणश्च ९ भक्तौ जातः प्रथमफलस्य हरो १२५ गुण
श्च ३ द्वितीयफलार्थं इदमृणमधिकं गृहीतवान् उक्तरीत्या कल्पादौ क्षेपविकलाः २८६३४०८३२ गतभगणाः २२०
शेषं १२२०८३२ चक्रविकलासु द्वृणं क्षेपः ७५१६८ अयं सूर्यसिद्धांतोक्तः पातो बुधशीघ्रकेंद्रेणता कालिकेन युतो
वास्तवपातः स्यात् तत्र सौरवर्षादौ रा इत्यादि सूर्यस्याभावात् सौरवर्षादितः बुधशीघ्रोच्चमेव बुधशीघ्रकेंद्रं अतो युक्त
मुक्तमुपपन्नं ९६ गुरुपातमाह स्वरवेषष्ठिभागेन रद्राहतेन युतो द्वाभ्यनेत्रांशकोवर्जितः स्यात् युगांगाब्धसमाष्टदस्रै
र्विलिप्तादिकः सौरवर्षादिजः मूलपातइति वर्षाणां विंशसंशः स्वीयसार्द्धशतद्वयांशैनैकादशगुणितेन युतउक्तां
कैरेभि २८७०६४ हीनो विकलाद्यः सौरवर्षाद्यः देवगुरोः पातः अत्रोपपत्तिः गुण ५२२ हरो १०००० गुणस्यैकं खंडं ५०० राम०
३६

अपरंच २२ एभ्यो गुणहरादिकं स्वयमूह्यं क्षेपस्तु करीत्या विकलात्मकः १०२०९६९३६ गतभगणाः ७८ शेषं १०० ९९
३६ चक्रविकलासु द्वृणं क्षेपः २८७० ६४।९७ शुक्रपातध्रुवकमाह भ्रमाद्वस्वाब्धेंदुलवः स्वरवाभ्रमांशशुक्रोष्टदिगधि
पक्षैः हीनो विलिप्तासु युतः सितद्राक्कुंगेशपातो द्वमुखे सितस्येति स्पष्टं अत्रोपपत्तिः सूर्यसिद्धांतोक्ताः कल्पशुक्रपातभग
णास्त्र्यधिकं ९०३ त्रिगुणाः २७० ९ हरश्च १००० गुणस्यैकं खंडं २७०० अपरंच ९ प्रक्षेपकं हरश्च १००० प्र
थमस्थानेपवर्त्तनेन प्रथमखंडफलं प्रथमखंडस्य त्रिशतीशरूपं द्वितीयखंडमिष्टकं गुपपन्नं क्षेपस्तु करीत्या विकला
त्मकः ५२९८४७८९२ गतभगणाः ४०८ शेष १०० ९८९२ मृणं क्षेपो २२६१०८ यं सूर्यसिद्धांतोक्तः पातः शुक्रशीघ्र
केंद्रेणता कालिकेन युतो वास्तवपातः स्यादिति बुधरीत्या शुक्रशीघ्रोच्चपर्वोक्तेसुतः सौरवर्षादौ पातः स्यात् ९८ शशिपात
माह गताब्धाः शराभाः स्वरवाभ्रचंद्राः शकेनाद्रिनिघ्नेन हीना विहीनाः रदद्व्यष्टिवसुद्रिभिर्भेदपातो विलिप्तादिकः सौरव
र्षादिजः स्यादिति स्पष्टं अत्रोपपत्तिः गुणः १९९६६ हरो १०००० सहस्रद्वयं गुणो गृहीतः २००० अपवर्त्तं वर्षपंच
मांशाः अधिकगुणो १४ पवर्त्यगुण ७ हरो ५००० अतः एवं शिष्टैव सहस्रांशाः सप्तगुणः अनेनोनः पूर्वांशाद्दस्कं

क्षेपस्तन्नरीसाविकलात्मकः ३८८४३७७६८ गतभगणाः २९९ शेषं ९३३७६८ चक्रविकला १२९६०० सुद्धमर्णक्षेप ३६२२३
२७क्रमितइत्यपपंसर्वं ९९ अथोपसुक्रमुक्त्वा वर्षातगतमहर्गणंसविशेषंपद्यचतुष्टयेनाहनाद्य : सुद्धिभवानि जा
द्यपघटीहीनाविनिद्राभवेत्क्षेपः सप्तगुणाधरैःस्वरशरांगाद्रिपंचर्तुभिः स्वीयाबुद्धिमतोपयानघटिकाः संसज्यसुद्धे
धः संस्थाप्याघटिकाः समापतिभवाः सुद्धेस्तनाद्योल्पकाः ९०० भवतिचेत्सुद्धितिथिर्विधूनाद्यचैत्रशुक्लादिगतस्ति
थीनां गणोधिमासोयदिसोपिगण्यः सुद्धाविहीनः कृतयायदातु १ सुद्धागमेत्यपतितोप्यधिमासलाभः किंवाधिम
सुपतितोपिनचात्रलब्धः हीनोसुतः खलुतदाखगणैः क्रमेणसंप्रसयोगविषयः सुधियाविचिंत्यः २ द्विधायंहतस्त्रंगपं
चाभ्रभागैर्युतः क्षेपकेणाद्विदंडाद्वारैः हतोव्ययलब्धोनितोहर्गणस्यात्समेशात्क्वचिद्यकसैकोद्यपार्थमिति अहर्गण
साधनोपसुक्रमेयमाहनाद्यइति सुद्धिभवाः सुद्धानयनसिद्धावयवीभूताः घट्यः सावयवाः निजपदेनसुद्धिस्तत्संबंधे
नयोद्यपस्तस्य घटीभिर्हिनाः एतैरवैः ६५७७६५७ सप्तगुणाधरैः सप्तत्रिंशद्धरो धोवयवोयेषांतैरित्यर्थः गुणिताः संतः
क्षेपोहर्गणानयनोपसुक्रः स्यात् अहर्गणसाधनोपयुक्तां सुद्धिं साधयति स्वीयाइति बुद्धिमतागणकेनसुद्धेः पूर्वोक्तयाः

MEMORIAL BHAU DAJI

स्वीयाः अवयवीभूताः उपयानघटिकाः गणितसिद्धघटीः संसज्यः संमार्ज्य अधः सुद्धिघटीस्थाने समापतिभवाः सुद्धिवर्षसं
बंधिनोद्यपस्यावयवीभूताः घटिकागणितसिद्धाः संस्थाप्याः नद्यवयवा सुद्धिरहर्गणोपयुक्तानपूर्वागतासावयवेत्यर्थः
अत्रविशेषमाह सुद्धेरिति पूर्वागतसुद्धेर्गणितसिद्धाघट्यः स्वाद्यपघटीभ्योल्पाभवंतितत्रहर्गणोपयुक्तसुद्धितिथिरूर्ध्वो
कृत्याविरूपाविधूना एकेनहीना यद्येकोहीनोनस्यात्तदात्रिंशद्युक्तायांतस्यांहीनः कार्यस्तादृशीसुद्धिरहर्गणसाधनोपयु
क्तेतिभावः अधिकश्चेत्तुनैकोनेत्यर्थसिद्धं अहर्गणसाधनार्थंतिथयोयास्याइत्यादिपद्येति अहर्गणोपयुक्तसाधनानंतरं
चैत्रशुक्लादिमारभ्यगतस्तिथीनांसमूहोयाद्यः अनर्गताधिमासोपिनयात्योमासयोसनेइत्युक्तंपूर्वाहर्गणविषयंनसमनं
तरोक्ताहर्गणविषयमितिसूचनार्थमाह अधिमासइति आद्यमासेषुयद्यधिमासस्तदासोधिमासस्तिथिगणनायांग
ण्यएवेसपिशब्दार्थः अन्यथाधिमासानयनात्प्रागानयनंविनाविनाहर्गणस्यमांतरितत्वापत्तेः कृतयाः अव्यवहितपूर्वं
श्लोकसिद्धयासुद्धाहीनः कार्यः हीनोनस्यादित्यस्योत्तरमयेमूलएवस्फुटं अथप्रसंगात्सुद्धानयनप्रयुक्ताधिमासविशेष
पूर्वकमहर्गणसाधनोपयुक्ततिथिगणेविशेषमाह यदाचिति सुद्धानयने हि निश्चयेन अपतितः स्यद्यमानेनासिद्धाधि

मासोपि·खगुणे अनष्टे स्फुटानष्टऋणफलस्याधिमासत्वेन पूर्वफलाद्यदा चिदेकाधिकफलमेनाधिमासः प्राप्तः अयमेकः शु
द्धाधिमासस्य विशेषः अत्रैवापरविशेषमाह किंवेति· अथवेसर्थः अधिमाः अधिमासः सुपतितोपि·मेषसंक्रांतिसर्वस्य
स्पष्टमानेन सिद्धोपि· अत्र·शुद्धानयने· यदा कदाचित्·नलब्ध एकाधिकफलेन नाधिमासः प्राप्तः खरामनष्टेनितऋणफल
स्य पूर्ववर्षफलतुल्यत्वात्·चकारः समुच्चये·तेन विशेषद्वयं·तदा·विशेषद्वये उक्तक्रमेणः खलु·निश्चयेन·विशाना·गृहीतश्चै
त्रादितिथिगणो हीनोयुतोवा कार्यः ननु प्रथमविशेषः कस्मिन्नपि वर्षे संभवति·शुद्धागमे त्वपतितोपि सलभ्यते चेच्छुद्धानय
खदहनैर्युतयादिनौ घटति भास्करोक्तः अ·द्वितीयविशेषस्य तु कदाप्यदर्शनात्सकिमर्थं सुक्तस्य तत्राह संप्रतीति·सांप्रतं·
अयोगविषयः हीनविषयः योगविषयाभावो वा सुधियागणकेन विशेषेण विचार्यः सुधिये तिहेतुगर्भं सुपपत्तिज्ञानार्थं·
तथाहि·ईदृशसूर्यमंदोच्चे २।१८ मध्यमेषाद्यर्ककालादुत्तरं मंदफलस्य धनत्वेन स्पष्टमेषाद्यर्ककालासंभवात्सर्वमेव स्पष्टा
द्यर्ककालः तथा च स्पष्टशुद्धितो मध्यमशुद्धेरधिकत्वाद्यदा स्पष्टशुद्धिरेकोनत्रिंशन्नदा स्पष्टमाने नाधिमासाभावान्मध्यम
शुद्धे अदिनद्वयाद्यंतरेण वश्यमधिकत्वादधिमासलाभः तत्रा हर्गणो यथागतशुद्धामासांतरितत्वापत्त्या मध्यमशुद्धो मध्य·

मासदिनानि त्रिंशच्छुद्धांतर्गतान्येव पात्यानि·मध्यमाधिमासस्य स्पष्टमानाधिमासापतनादग्रहादत एव भास्कराचार्येण त्रिंशद्य
तया शुद्धाहर्गणः साध्य इत्युक्तं· मयापि यथागतशुद्धेः पूर्वं तिथिगणे शोधितत्वान्मध्यमाधिमासहिंदिनान्येव शुद्धांतर्ग
तत्वेन गृहीतानि तिथिगणे नंतरं शोधितानि·तस्मान्मेषादिषट्के सूर्यमंदोच्चे मेषाद्यर्के धनफलत्वात्स्पष्टमध्यमसौरव
र्षयोः क्रमेण पूर्वोत्तरारंभसम्भवाभ्यां भास्करोक्तविशेषविषयत्वं·अत्र स्पष्टमाने नाधिमासपाते वश्यं मध्यममाने नाधिमा
सपाताद्द्वितीयविशेषाविषयत्वं·यदा तु सूर्यमंदोच्चे तुलादिषट्के तदा मेषाद्यर्के ऋणफलत्वान्मध्यमस्पष्टसौरवर्षयोः पू
र्वोत्तरकालयोरारंभान्मध्यमाने नशुद्धानयने धिमासाभावेपि त्रिंशदासन्नायां शुद्धा स्पष्टमाने नाधिमासपातः तत्रापि मासो
त्तरं स्पष्टमेषसंक्रांतेः शुद्धे चैत्रादितिथिगणे स्पष्टमानात्तुरोधेन या शुद्धिः पूर्वमेकद्वित्रिरूपासा शोध्या·तत्र मध्यमशुद्ध्यनुरोधेन
मध्यमचैत्रादेवतिथ्यग्रहणसूचितमिति मध्यमचैत्रादिस्पष्टचैत्राद्यो मासांतरितत्वात्स्पष्टचैत्रादिगृहीततिथिगणे मध्य
मशुद्धागणितक्रियार्थं त्रिंशद्योज्या एवान्यथा हर्गणस्य मासांतरितत्वापत्तेरिति·तत्र द्वितीयविशेषविषयत्वं·अधिमास
स्य चैत्राद्यंतरापातादधिमासो यदि सोपि गण्य इत्युक्तापत्तिसिद्धेरिति दिक्·अस्माभिर्हि शुद्धनाचैत्रादितिथिगणार

ईदृधेति अयं शुद्धोनोविशेषसंस्कृतश्चैत्रादितिथिगणाः स्थानद्वयस्थापितः तत्रैकरूपिरंकै ६२७०५६३ गुणितः अयमेवर्
वौ ऋनाहर्गणासाधनोपयुक्तरूपवर्णयुतः अयमेवचचतुर्भक्तयुगवांद्दिवसैरेभि ४००७५००२० भक्तः निरवयवफलेना
यत्रस्थितोहीनोहर्गणः स्यात्सौरवर्षादितद्दिनवारज्ञानार्थंसमेशादिसूक्ते पत्रावलोकनेनैकस्मिन्नियतेवारेकृताहर्गणाद्वा
रः कदाचिद्दिसंवदतितदाकदाचित् दिनवारसंवादार्थंव्येकसेकोहर्गणः कार्यः अत्रोपपत्तिः सौरवर्षादेः सावनाहर्गणः सा
ध्यस्तत्रचैत्रादितिथिगणाच्छोद्धनः सौरवर्षादिनश्चांद्रतिथिगणः शुद्धैश्चैत्रादिसौरवर्षाद्यभ्यंतरकालस्तत्पश्चात् तत्र शुद्धि
घटिकाश्चांद्रानगृहीताः किंतुसावनास्तद्धानंचशुद्धिघटिकानांचांद्रेनाद्यघटीनांसावनत्वेनाद्यघटीनितशुद्धिघटि
का अवमघटिकाः यदाद्यघटीधिकास्तदाद्यघटूनितषष्टिघटिकायुताः शुद्धिघटिका अवमघटिकाः आभिस्तास्तु
द्धिस्तादृशीनि। तथाहि यदाद्यघटीः शुद्धिघटिकाभ्योल्पास्तदावमघटीरूपं अ १ शुघ १ एतद्हीनाः शुद्धिघटिकाइतिशुद्ध
र्धोकानामवयवोद्यघटिकाः यदाद्यघटीः शुद्धिघटिकाभ्योधिकास्तदावमघटीरूपं अ घ १ शुघ १ रू ६० एतद्हीनाः शुद्धि
घटिकाइतिशुद्धर्धोकानामवयवोद्यघटूनाः षष्टिघटीभ्यः आसाधनत्वसंपादनार्थं शुद्धर्धोकेना इतिमेवशु

रामः

द्धर्धोकानामवयवोद्यघटिकाः एतद्हीनस्तिथिगणस्तत्राधोवयवोद्यघटीः युक्तश्चैतत् अहर्गणस्यसौरवर्षाद्यवधि
त्वेनरूपोहर्गणसमयसिद्धस्यतस्यावश्यमवयवेद्यघटीतुल्यत्वात् अतएवसमेशादितिएवंसूक्तंसंगच्छते बीजंबाये
त्वेवसमनंतरंस्फुटं अहर्गणार्थमिदंसूक्तमप्यवमसाधकेषु चांद्राअवमघटीयुताःसांतराअवास्तवासुगचांद्रदिनेषुगावमा
नितदेभिः कानीतिगुणहरौ चतुर्भिरपवर्त्यैश्चांद्राणांगुणहराबुद्धौ तत्रावमघटीहीनाएतेगुणगुणिताहरभक्ताः फलेनावमा
त्वेनसावयवेनहीनाश्चांद्रागुणरूपास्तिष्ठंतेहर्गणः अयंपूर्वहर्गणकालेकार्यद्वयवमशेषयोर्यमत्र अवमशेषंतुहीना
त्यावमानामवयवसुनसौरवर्षाद्यवमघटीमितंसौरवर्षादावमघटूनमाक्यनिपादिताः अतः सौरवर्षाद्यवमघटिमि
ष्यंताहर्गणेयोज्याः हीनास्यावमानामवयवलवयोर्यशेषसमनयापूर्वमेवागृहीतइतिपूर्वमेवतानकालिकाहर्गणसिद्ध्यर्थं
मिहचांद्राणांसौरवर्षाद्यवमघटीयुताः कृताः लाघवात् एतत्सिद्ध्यर्थंशुद्धिरेवावमघटीहीनाकृता अथावमघटीयुतेषुचांद्रा
णांहरभक्ताः फलमवमानि शेषेसौरवर्षाद्यवमघटीषष्टिभक्तहरगुणितायोज्याः संपूर्णावमानामवमशेषसिद्ध्यर्थं तत्रचांद्रेए
कगुणितावमघटीनामधिकत्वाद्गुणगुणितनादशांद्रेगुणगुणितानामवमघटीनामधिकत्वात्हीनाः तत्रावमघटीलाघवा

हुणो ६२७०५६३ नहर३९४४७९४५७ गुणिताः षष्टिभक्ता योजिताः योनकेगुण ३९४४७९४५७ हरौ ६० हरेणापवर्त्य गुणस्था
नेसावयवांकः ६५७४६५७।३७ अतोवमघद्योगुणः ६५७४६५७। ३७ गुणिताः रूपकचेनभजनात्सर्वमेवेष्टचांद्राणांनां दृ
शानांगुण गु ६२७०५६३ णितानांयोऽत्यास्ततोहरभक्ताः फलमवमानि. शेषंसंपूर्णावयवरूपंप्रयोजनाभावाद्रूपेचिन्ता
दृशाक्षेपानंगीकारेवमानांसांतरत्वापत्तेः अर्थमहर्गणोमध्यममानेनस्यहमानेनवारासंवादार्थमध्यस्यहयोर्दिनभेदेक्वचिद
हर्गणस्यसैकनिरेकत्वंयुक्तमुक्तमतः सर्वमिदमुक्तमनवद्यं ३ नन्वेवाः प्रोस्याष्टपनादिकाः कुरतलेसुद्धेर्यदीत्याः स्वकाव्येके
यंतद्दिनतुभिस्तिथिगणश्चेत्वाद्दिसुग्रहव्रजइतिग्रहको[illegible]तुकेनिलाघवेनाहर्गणस्योक्तेरत्नगुरुभूतंकथमहर्गणानयनसूक्तमि
त्याशयेनाशंकामनूद्यनिराकुरोति. क्रियागौरवंव्यर्थमस्मिन्दिनोद्येत्यतः कौतुकेखेटपूर्वेदिनोद्यः समीचीनउक्तोपितत्वार्थबु
द्ध्यागणेस्मिन्क्रियागौरवंनात्रदोषइति. अस्मिन्उक्ते वर्षांतःपात्सहर्गणे. हि. यतः क्रियागौरवं. गणितकर्मगौरवंव्यर्थमिदमुक्तं. व
र्षांतःपात्सहर्गणेसूक्ष्मावमानयनंविनास्थूलावमानयनेनापिसूक्ष्मत्वसिद्धेरितिभावः अतःकारणात्खेटपूर्वेकौतुके अ
हकौतुकाख्ये. करणग्रंथे. अस्मत्परमगुरुपरमगुरूक्ते वर्षांतः पात्सहर्गणोलाघवात्सम्यग्भूतः अपीति. यद्यप्यर्थे. पूर्वप

रसूक्तसमाधत्ते. तत्रार्थबुद्ध्येति. अस्मिन्नुक्ते वर्षांतःपात्सहर्गणे. गणितक्रियागौरवमुक्तं. अत्र सिद्धांतग्रंथे. वस्तुभूतार्थप्रतिपा
दनतयानदूषणं. करणेतुतथोक्तदूषणमेव. एतेनास्मिन्सिद्धांतग्रंथेपूर्वमग्रेचगणितविशेषेपिसूक्ष्मगणितप्रयासेनोक्तं त
त्तथ्यर्थमिदमुक्तं ४ अस्माद्दहर्गणाद्दिनानयनंविवक्षुः प्रथमंसूर्यबुधशुक्राणामानयनमभिप्रेत्याह. भांगाद्यादिवर्ति
तोदिनगणः खाक्षाब्धिभक्तेगणेशुक्रोवेदरसाक्षभक्तजगज्जांगाग्रहेहर्गणात्. सप्ताक्षाब्धिनवाद्रिवेदयुगणेरामैर्विभक्तात्फलेना
द्यो विकलासुयोजितदनः शुक्रज्ञतुल्योभवेदिति. स्पष्टं. अत्रोपपत्तिः. युगसूर्यसावनदिनैरेभि १५७७९१७८२८ र्युगरवि
भगणांशाएते १५५९२०००० लभ्यंतेतदेष्टहर्गणेनकेदरसनुपातेनयुगणस्यैकस्य १५७७९१७८२८ मितंखंडमधिकं धृत्वापरमणं
खंडं २२७८२८ प्रसेकंहरश्च. प्रथमस्थाने हर्गणमितांशाः द्वितीयस्थाने चतुर्भिरपवर्त्तितोगुण ५६७९४५७ हरौ ३९४४७९४
५७ गुणेएतावत्सावयव ८९५२००।३७ मधिकं धृत्वा ६५७४६५७। ३७ गुणहरौगुणेनापवर्त्यहरस्थानेषष्टिः कृतखंडस्याधि
कंखंड ९९५२००। ३७ मस्यास्कलंयोज्य. संशोध्यमानर्णस्य धनत्वात्. तत्रैकंखंडसावयाव ८६६६ २१।०।५६ मपरंचसावयवं २८
५७९।२६।४प्रथमस्थानेगुणहरौगुणापवर्त्तनेनहरस्थाने ४५० द्वितीयस्थानेगुणोविकलात्मको ६६ ६५ ६४ तउक्तगुण

पन्नं ५ चंद्रसाधनमाह विप्रघ्नोद्धगणोगणांगलवयस्त्रोगनिघ्नाद्गणाद्भौमद्विहृतात्प्रवेनहिमगुर्भागादिको हेंदुयुक्तः
यंचाकाभ्रहिमेघदस्त्रशरनिघ्नेनाद्रियंवाद्रिगोसुन्यभ्रांत्रिनवाग्निरुद्रदिनगणेनोविलिप्तासुचेति वर्षादिचंद्रध्रुवकेनसुगिरुत्य
र्थः शेषंस्पष्टं भौमोपपत्तिः चंद्रस्यपूर्वरीत्यासाद्दृढगुण ५१ ९७ ८०० २४० हरौ ३९४४९४५१ गुणस्यैकखंड ५१२८२३२९४१ म
पसंच ६९५६७२९९ प्रथमस्थानेगुणहरयोर्हरापवर्त्तनेगुणस्थानेत्रयोदशः द्वितीयखंडस्याप्येकखंडं ६५७४६५७६। १० सा
वयवमयरंचसावयवं ३८२०७२२५० तत्रप्रथमस्थानेगुणकापवर्त्तोद्वरस्थानेषड् द्वितीयखंडमधिकंगृहीतं ३८३५२१६।५६
।३५ अत्रगुणहरावेतदंकेनसावयवेन ५४७८८।८।५ अपवर्त्तितौगुण७हरौ७२० अधिकंचसावयवं ९४४ ९४।६।३५
अस्यविकलाः ५२९८७९५ गुणः हरः प्राक्तनएव गणस्यसौरवर्षादिनः सिद्धेसिद्धोग्रहः सौरवर्षादिनएवानः सौरवर्षादि
पहध्रुवयुतः कार्यइत्यर्थः हेंदुयुगितिः ६ भौममाह विप्रघ्नाद्गणनः खखाष्टशशिभिर्भक्तासकलंतद्गणाद्धेयुक्तंतद्धोगणेन
चसुतंभागादिभौमोभवेत् नागांकाभ्ररविघ्नि पंचधृतिभिर्निघ्नाद्गणाद्धेदहृत्साहासादिकलादिलब्धकलाविलिप्तासहितः स्वाद्य
ध्रुवाद्यश्चसदृनि विप्रेसाधकलयसकलंतद्दहर्गणाद्धेयुक्तं तत् सिद्धमधः अवयवेहर्गणेनयुतंभागाद्यो भौमः स्यात् सः भौ

मस्यसौरवर्षादिध्रुवेनयुतः सहितोत्रासस्तुत्रयार्थ अकारः अत्रोपपत्तिः भौमस्यगुण ८९६९५९५२० हरौ १५७७९९१७२२८ अ
त्रगुणस्यहराद्धे ७८८९५८९१४ मितमेकंखंडंद्वितीयं ३७९००६० ६ प्रथमेगणाद्धे सिद्धं द्वितीयस्याप्येकंखंडंसावयव ११
३९६०७३।१२।८ मयरंच२६५०४५३२।४७।५२ प्रथमस्थानेगुणहरावेतदंकेनसावयवेना८७६६२१।७।५६ पवर्त्तितौगुण१२
हरौ १८०० द्वितीयंचेदं २६५०४५३२।४७।५२ कलाअंकंतत् १५९० २७९९१७।५२ अस्यैकंहरमितंखंडंतेनाधोहर्गणयुतसु
द्धं द्वितीयंचकलाअंकं १२३ ५४१३९।५२ अत्रगुणहरौ चतुर्भिरपवर्त्तितौहरस्थानेस्तुरोक्तिः गुणस्थाने २०८८५३४।५८ स्य
विकलाः हताः १८५३१२०९८ अतएवसुपपन्नं ७ सुधशीघ्रोच्चमाह अथशीघ्रोच्चगणस्त्रिधागणयुतोमध्योसकोहतोभा
गाद्यसुधशीघ्रतुंगमथतद्दर्ष ध्रुवाद्यंभवेत् पद्मसाद्रिनवाद्रिदंतांगुणघ्नेयोगणः पर्वनाशाभ्यंकाद्रिकृताद्रिगोगुणहृतास
दंविलिप्तासुचेति चतुर्गुणोहर्गणस्तोप्यः मध्योद्वितीयस्थानस्तोहर्गणयुतः अंसकः चरमस्तोष्टभिर्णिनलाद्दांसावयवं
भागाद्यंतस्यवर्षं ध्रुवेनयुक्तंसुधशीघ्रोच्चंस्यात् शेषस्पष्टं अत्रोपपत्तिः गुणो ६४५७४५१६०० स्यचतुर्गुणहर ६३२१६७१२
१२ मितखंडंपरंचे १४५६७०२८८ ६कलाअंकंतत ८०४०२१७२८० मस्यपंचगुणितहरमितंखंडं ७८८९५८९१४० शेष

मपर ८५०६ २८१४० मिदं विकलीकृतं ५१० ३७६८८४०० अस्य द्वाविंशद्गुणितदूर ५०४९२३० ४९ इमितं शेषमपर ५४४३१०९
०४ मत्र चतुर्भिरपवर्त्तित १३६०७९४७ इमत्र उपयन्त्रं ८ गुरुमाहर्गणो कैर्दूनो शादि पूज्यो द्विपंचायि जास्यंकसप्तेषु नि घ्नं घ्नं
दान्तः दृढ्छिद्दूनाद्दामहीन घ्नं दृढेन हीनो विलिप्तासु वर्ष ध्रुवाद्यस्तिभवतुर्भ क्रयुगकुदिनानि दृढ्छिद्दोध्यः शेषस्य अत्रोपपत्तिः
गुणो १३११९ २०० स्य खंडं सावयवमधिकं धृतं १३१४९३१५२।२० गुणहरौ गुणापवर्त्तनेन हरस्थाने द्वादशाधिकमणं खंडं
सावयव ३७३९५२।२० मस्य विकलाः १३४६२२८ ४०० इदं हरमितं धृत १५७७९१७२८ मतो हर्गणः अत्राप्यधिकं २३१
६८९४२८ अत्र गुणहरौ चतुर्भिरपवर्त्तितौ गुणस्थाने ५७९२३५७ हरः पूर्वोक्त एवानउक्तमुपपन्नं ९ शुक्रशीघ्रमाहर्दि
भक्तो द्युगणो सुतः स्वशरवेदांशेन युक्ताद्दुग्ध्वा शीघ्रेण लवादि कं मितं चलोच्चस्याश्च वर्षध्रुवे सुक्रं षष्ठगणो गोयिनागरस
सुन्यभ्रैर्दुनिघ्नाद्दणाद्दूदामहृत ३९४४७९४५७ भाजिताद्दिकलिकालब्धेन हीनं तथेति वेदामहृद्दृढहरद्दस्यं तथेति संक
लनव्यवकलनाभ्यासमुच्चयार्थकः अत्रोपपत्तिः गुणो २५२२०५५३६० स्यैकं खंड २३६६ ४२ मत्र हरार्द्धेनापवर्त्तितौ गुण
३ हरौ २ द्वितीयं खंड १६११७८६१ ८ मस्यैकं खंडं सावयव १५७७९१७२।४८ मत्र गुणापवर्त्तनेन हरस्थाने दशा द्वितीयं तु

सावयव ३३८६८३५।१२ मिदमधिकं सावयवं धृत ३५०६४८४।३।४४ मत्र गुणापवर्त्तनेन हरस्थाने पंचाशदधिकं चतुःशत
४५० मतो लाघवाद्दशांशाएव स्वपंचचत्वारिंशदंशेन युक्तो धिकमणं खंडं सावयव ९९९६४८।५१।४४ मत्र गुणहरौ चतुर्भिरपव
र्त्तितौ गुणोस्य २९९५१२।१२।५६ विकलाः १७६८३९७६ अतउक्तमुपपन्नं १० शनिमाहर्दिप्रोविनो घ्नः कलिकाः रक्षपसमां
कवेदाभ्यतिथिघ्नसंघात पूर्वोक्तहारेण हृताद्विलिप्ताः फलाः समास्य ध्रुवके शनिः स्यादिति संज्ञो हर्गणः पूर्वोक्तहारेण चतुर्भक्तयुग
कुदिनरूपेण विकलाः स्युः वर्षनिजध्रुवे कलिकाविकलाश्च स्वस्थाने युताः शनिः अत्रोपपत्तिः पूर्वोक्तरीत्या शनिभगणकलागुणो
३१६५८६८८०० स्य द्विगुणहरमितमेकखंडं ३१५५८३५६५६ परंचा १०७३३१४४ स्य विकलाः ६०१९८८ ६४० चतुर्भिरपव
र्त्तितौ गुणो १५०४९७१६० पूर्वोक्तो हरश्च अतउक्तमुपपन्नं ११ चंद्रोच्चमाहर्गणो कभक्तो रामखंनगाद्दध्यांकवेदाष्टहृताद्दि
नो यात हीनद्युगणेन युक्तं विलिप्तिकासु ध्रुवयुग्विधुच्चमिति अंशासुख भागादि हारो दृढहरद्दस्यं द्युगणेन युतं यि
लिप्तिकास्विसंचयि नो त्रैराशिक अत्रोपपत्तिः प्रशान्मागुणो १७५१५३०८० स्य खंडं सावयव १७५२४२०३१६।४० मत्र गुणहरौ
गुणेनापवर्त्य हरस्थाने नव परं सावयव ४२८०६।५३१२० मस्य विकलाः १५४३९५६८०० इदं हरमितं धृत मतो हर्गणः

अधिकंतु ३३९ ६१०२८ चतुरपवर्त्तितंगुणो ७४९० २५७ हरः पूर्वोक्तः स्थिरोनउक्तमुपपन्नं ३२ अथ चंद्रपातमाह सस्वार्द्धयाम
णाचितोदशाहतः क्रमोघनकांशाकोलिप्ताद्योहसुखध्रुवेणसहितश्चंद्रस्यपातोभवेत् समाष्टहिमुगांगवेदखखमूनिघ्नघ्नहृतं
तोहारात्स्यनदिनोघयुक्तविकलोयंराहुमाहुर्बुधाइति सहितइत्यग्रेतनइत्यनंतरार्थकंयोज्यं दृढहारेणपालब्धिलयोनोहतो
स्तैर्मिताहृशः पातः स्यात् रूपार्द्धनिवारणायस्वेति अत्रोपपत्तिः कलात्मागुणो ५०९६ ३४०२०० स्यखंड २३६६२७६७४२ मध्य
हरार्द्धेनापवर्त्तितोगुण३हरा२०वपरखंड २६४६४०५८ मस्यापिखंड २६२९३०४६ ४० मध्यगुणहरावेतदर्केनसावपवेना २
२९८६३०४। ४० पवर्त्तितोगुण १० हरौ द्वौ बंसावयवमूयरंखंड १९६१०११। २० मस्यविकलाः ११७६० ६० ६८० अथ
हरमितधरणादहर्गणः अधिकंतु ४०१८ ५०१४ चतुरपवर्त्तितंगुणो १००४६४२८७ हरः पूर्वोक्तः स्थिरोनउक्तगणितक्रमोप
पन्नं अथप्रसंगादाकाशेसप्तबिंबानांदर्शनाप्रसंबयहाः प्रमाणसिद्धाः कथमत्रसर्वत्रनवग्रहसिद्धिरित्याशंकामनसिकृत्य
सतद्वत्तरमाहयमिति चंद्रमातंबुधाः पूर्वावार्याः दक्षिणोत्तरतोपेवंपातोराहुश्चरंरहसेतिस्यपेसिद्धांतोत्रेराहुमाहुः राहोर्ग्रहत्वा
त्मकचंपुराणस्मृतिसंहिताप्रामाण्यादेवसिद्धं वासनयायिचंद्रपातोराहुर्ग्रहत्वेनासद्भवति तथाहि चंद्रपातस्तुचंद्राकाशगो

लस्तुक्रांतिवृत्तानुसारेणचंद्रकक्षाचंद्रविक्षेपवृत्तयोः संपातरतिगोलयुक्तिहमविचारं एतदासन्नचंद्रस्यचग्रहणसंभूतिदर्शनाहिना
हिनाराहुंपुराणप्रामाण्यसिद्धग्रहणस्यानुपपत्तेरिदमेवराहोः प्रसिद्धासुरस्यविधुतुरस्यामृतलालसस्यस्थानंचंद्रस्यामृतद्वार
वान् अमृतकिरणकारणत्वेनसर्वौषधिरूपणाद्यते अतएवविवाहयज्ञसंबंधेदेवाकीर्तिः नैकनीदिगियमस्यविवर्यते ध्यानंत्र
लिभिःफलाप्तये वेदमचास्यशशाभ्रहिमंडलक्रांतिमंडलमिथश्चतुष्टयं १ सोंधकारचरतोवहन्महीछायया विधुतिसोममंड
ल दीपिनापरलेंदुमंडलछायपाचसहस्रसूर्यबिंबहं २ द्वयोःपतनमेवपातइत्याहुरत्रविलराहुरीक्षते आयतनंमृतघ्नतिसु
धास्वानैहवनांशलालसः ३ सैंहिकेयग्रहतासुपेयुषोर्हरगोवियतिहृत्पातयोः मासमेतिनरविर्नचंद्रमागत्यते सखलुपार्श्व
गस्तयोः ४ किंवगोलगणितेषुजिष्णुजःसोमरोमकमयादयोपिचु पर्ययेणनबुराहुपातयोनमिनीविरधुरेषतांत्रिकाः ५
इति अतएवभगणमुद्रपातस्यराहुत्वंयथागतस्यपातचमितिविवेकोमंदानांमेषादेः क्रमविलोमगणनाविषयकग्रहभोगज्ञा
नार्थं नतुस्थानांतरस्थेनेतियथागतस्यराहुत्वेभगणमुद्रस्यतत्वेप्यसंगतिः अस्ययहत्वेयुक्तिंसएवाह राशिद्वत्रवसतिः ससूर्य
वम्रावगोचरफलैर्नहीयते रिष्टभंगजननैकनायको हारिकैरपि सदैर्नकीर्त्तितः १ अस्याष्टमग्रहत्वमुक्तास्येवस्थानां

दान

८

दान

नांतरत्वेननवग्रहत्वं सएवाहेतुपातमपरंस्वपातनोराहुरेति समयाश्चयेभुवः मंदिरंनदपिनस्पनइनस्कम्पनेनदपिदिव्यरिष्टवत्
१ दिव्यरिष्टः केतुः केतुवत् केतुत्वेनेत्यर्थः अतएवगोलेहन्नयोः संपातद्वयावश्यंभावान्नयोश्चगोलार्द्धांतरितत्वेनषड्भांतरितत्वात्ष
ड्भोराहुरेवकेतुरितिगणितेसुप्रसिद्धं नतुचंद्रपातस्ययुद्धेचौमादिपातानामपिग्रहत्वमनिवारितमतः पुनर्नवग्रहानुपपत्ति
रियतः सएवाहुएकोषस्वगपातनुल्यतोनैतिचंद्रुरविपर्वगर्वितः जातकादिषुपठ्यंतेमंदिरालिंतथानफलमन्यराशितः १
चंद्रस्यफलादेशोन्यग्रहाधिक्यानसातत्वेनास्यराहोर्ग्रहत्वंनान्यपातानामितिभावः अत्रहेतुमप्याहसः अत्रयेनविकलाद्दम
क्ष्ट्रियांतियफलमस्तकिंनतः तावदेवफलगौरवगतिर्यावतीसधिफलः कलानिधिः १ उक्तहेतोरेवराहोर्गतिसम्भावादेवग्रहत्व
मितिसएवसिद्धांतपतिः प्रतिदिनंखचरः प्रचरन्फलंकिमपियच्छतिचारफलोहिसः ग्रहणरूपगएवसवेत्रकिंचलतिकिंचि
दुपप्लवएवतदितिराहुर्ग्रहणसमयेयत्रनक्षत्रगमत्रैवग्रहणांतरावधिभवतिग्रहणांतरेनक्षत्रांतरेभवति मध्येर
शोनाभावान्नचलतीत्येवंचयावेदुच्यतेतर्हितत्ग्रहणं उत्पातःस्यात्तथाचग्रहतेरन्यचसुस्यातइतिग्रहणस्यतथाचेग
णितगम्यतानुपपत्तिर्गणितस्यनियतैकविषयत्वादतोकस्माद्दक्षांतरगमनानुपपत्त्यासहमपिराहुर्गच्छतीतिनमोरू

राम०
४४

ग्रहराहुः

यद्वेनाप्रसक्तेपिकल्प्यते ग्रहणेतुग्रासवशादेवप्रसक्तइतिभावः राहुपक्षांतरितस्थानस्यकेतुग्रहत्वंसूचयन्निहांतयति ज्ञयमे
तियदादिवितस्करंचरतिकेतुरपिप्रतिवासरं भवतिनग्रहएवगतिंविनाजगतिकर्मविपाकविदोविदुः १ तस्करं संपातान्मराहोः ष
ड्भांतरितसंपातांतरं आकाशोउदयंग्रहणविषयवंशग्रोतिनदाकेतुरपिचरतिः प्रसहंप्रोक्तरीत्यागच्छति अपरःसंपातः केतुरि
तितास्यर्थः द्वयोरभिन्नचलनाद्ग्रहत्वमतएवकोसुरोसुरवक्त्रबंधभ्यांराहुकेतुत्वेनव्यपदिश्यते अतएवसएवराहोर्ग्रहत्वमुपस
हरति तदितिविद्यतएवसकिंपरैरुधिरबिंदुवपुर्विलसंतियेतद्ग्रहनामसुकीलकेतकः स्वपितराहुसमर्थनहेतवः १ यःपर्वग
स्तस्यगतिर्नदृष्टासेवग्रहत्वेहिमहत्समाणः विलोमगामीविधुपातएवस्मादृशिप्रतीतः २ काकर्थनकाराहुरेवगतिर्ग्रहणांतर
दर्शनादित्यर्थः नचैवंचंद्रोऽपियद्यः स्यादित्याशंक्यसमाधत्तेसएव पातवद्गतिवशेनशीतगोरुक्तमस्फलदं किलेतिचेत्
अस्मत्किंतुनहितत्रिवशिनंराहुवद्ग्रहपदेविरचिना १ युक्तपरिनोवाक्यएवाहकिंचगोलगणितानियन्महीमध्यकेंद्रमधिकृत्य
तेनिरंतरतनः शशिनमीक्षतेस्फुटंकेंद्रत्वहेतुमपिपातवर्त्मनीति अस्यार्थः भूमध्यकेंद्रंयदधिकृत्य स्वीकृत्यः गोलाश्रितगणि
तानि तद्गतः तद्भूमध्यगर्भस्थोदृष्टापातमार्गे कक्षीरूपेकांतिवृत्ते अपिरेवार्थे तस्मिन्नेवनाम्यत्रेसर्थः स्फुटंचंद्रं व्यक्तहेतु ३।

वधेयः वस्तुतस्तु प्रतिवृत्तकेंद्रीयध्यामिनस्पष्टग्रहाणां व्यवहाराणां व्यवहारोपजीव्यत्वाभावाद्भूगर्भस्थ एव दृष्टास्पष्टं चंद्रमुद्दिश्य
च्छ हेतुमीक्षते इत्यनेन च्छ हेतुत्वेन दर्शनविधानात्पातमार्गे कांतिवृत्तेस्फुटभोगदर्शने उच्चस्यानुपयोगात् क्रमिसलेपस्पष्ट
तानुपयुक्तविस्तरेणा १३ अथ बुधपातमाह त्रिघ्नोगणो धोद्विगुणः स्वनिघ्नांशाद्धोंशाद्ध्रुवो ध्रुवसुक्तपातः सिद्धाभ्रपंच
गुणांकवह्न्याद्रणाद्रसाद्यविलिप्तिकः स्यादिति अत्रोपपत्तिः उक्तरीत्या कल्पोक्तबुधपातभगणाः १२६१७०६०४८८८ ए
ते भगणांशा गुणाः गुणकः ४७०२१४१७७५६८० कल्पकुदिनानि १५७७९१७८२८००० हरः अत्र गुणस्यैकखंडं ४७३३७५
३५८४००० अपरं च १६८३८८२९१६८० प्रथमस्थाने हरापवर्तनेन गुणस्त्रयं द्वितीयं खंडं कलात्मकं कृतं १०१०३२९
७५००८०० अस्याधिखंडं ९४६७५०६९६८००० शेषमपरं ६३५७९०५३२८०० प्रथमस्थाने गुणहरौ हरेणापवर्त्य गुण
स्थाने षट् द्वितीयस्यापि एकखंडं ६३११६७१२१२०० अत्रापि गुणहरावेतेनैवापवर्त्यैकेन १०५१९४५२१८६६४० पत्रत्रिनौ
गुणहरौ १५ शेषं कलात्मकं खंडं ४६२३४०२६०० इदं विकलात्मकं कृतं २७७४०४०९६००० अत्र चतुःसहस्राप ४०००
वर्त्तिनौ गुणा ६९३५१०२४ हरौ ३९४४७९४५७ अतउपपन्नं १४ सुक्रपातमाह गणा हूतलेगघ्नवृदाद्यमंशादिकः सुक्र

पातोविलिप्तासुहानः गजांगोकसमाप्तिदस्त्राब्धिमेघैर्गणाद्वौ द्वुरामेनवर्षं ध्रुवाद्यद्दति· अथ समगुणाहर्गणा सुक्रमहर्गणाद्वै शुक्रपा
तोशाद्यः पर्वोक्तहारोहरः शेषंस्वस्वं· अत्रोपपत्तिः प्रोक्तरीत्यागुण ९७२८५५६८५०८० हरौ १५७७९१७८२८००० गुणस्यखं
रं हरार्द्धं शेषंद्वितीयं १८३८९६७७१०८० कलात्मकंकृतं ११०३३८० ६२६४८०० इदमधिकंधृतं ११०४५५२५७९६००
अत्रगुणहरौहरेणापवर्त्यगुणस्थानेसमः अधिकंचकलात्मकमिदं ११६१८५३१२०० विकलात्मकंकृतं ६९७११९८५२०
०० अत्रगुणहरौचतुःसहस्रा ४००० पवर्त्यगुण १७४२७७९६८ हरौ ३९४४७९४५७ अतउक्तमुपपन्नं १५ चं
द्रातिरिक्तानांमंदोच्चानिचंद्रबुधशुक्रातिरिक्तानांपाताश्चकथमत्रनोक्ताअन्यथाप्रागुक्तनद्भवकानांव्यर्थत्वापत्तिरिस
दलेशंकुर्भवेद्दाथसः अक्षक्षेत्रजकोटिभिर्विगुणितात्कर्णभक्ताद्दृतिस्तत्सर्वविषुवच्छायाव्यभिचारसेवंहियेनादि
तं ५६ तेनावबुध्येनचेत्तेभावोपिसाध्योनभवसभावात् एवंहितेनादरणीयमेवान्यथानुपानात्कथमुक्तवान्सइ
ति मध्यांसयासुतोनितोहत्तनरेणयष्टिकाभवेदुरुदक्षिणगोलयोलयोर्नरः क्षितिजयैवंघगुणश्चसाहृतिश्चरज्य

पाभक्तोमध्याह्नेशंकुः स्यात् प्रकारांतरेणासः दिनार्द्धशंकुः स्यात् कथंस्यादत आह अक्षक्षेत्रेति मध्याह्नहतिः अक्षक्षेत्रसं
बंधिभिः कोटिभिर्गुणिता अक्षक्षेत्रसंबंधिनाकर्णेन गुणकसंबंधेनभक्ता इदं यस्मिन्नंतशिरोमणाबुक्तं तद्वा कंच अं
साधवोन्मंडलशंकुनिघ्नीचरज्यया मासदिनार्द्धशंकुः हतिः पलक्षेत्रजकोटिनिघ्नीतत्कर्णभक्तायदिवासशंकुरिति तदेत
त्सर्वं षडक्षक्षेत्रसाधकसाध्यपदार्थानयनमात्रं विषुवत्क्षणे कांसबुस्यस्त्रिक्षणेव्यभिचरति गोलसिद्धपदार्था
संवादात्मकंभवति कांसभावेमध्याह्नशंकोर्लंबज्यातुल्यस्यगोलसिद्धत्वादुक्तप्रकारेणास्यात्सोस्त्रिज्यातुल्यत्वा
षडक्षक्षेत्रेभ्यः भ्रंदिनार्द्धशंकुस्त्रिज्यातुल्योवागोलासिद्धइतिभावः दूषणंपरिहरति एवमिति एवमीदृग्दूषणं
येनोक्तंतेन बुधेन सिद्धांतसुंदरकर्त्रा ज्ञानराजदैवज्ञेन इष्टमेवंनज्ञानं एवंकिंतदाहभावइति पदार्थः संख्यात्मकः
अभावात् निःसंख्यात्मकपदार्थात् साध्योनभवति अपिशब्दाद्भावोपिभावात्साध्योनभवतीसर्थः अन्यथाय
हफलादिसाधनंभुजज्यादिनियतंकथंसंगतंस्यात् तथाचांसाधवोन्मंडलशंकुनिघ्नीसाधकानयनंकांस्यभावेउ
न्मंडलशंकुचरज्ययोः साधकयोरभावादिनार्द्धशंकुविषयमेवेतिव्यभिचाराप्रसक्तिः हतिः पलक्षेत्रजकोटिनिघ्नी

स्यादिप्रकारेपलक्षेत्राज्ञानोत्पन्नासंख्यात्मिकायाकोटिरित्यर्थेनषडक्षक्षेत्रात्प्रसक्तमेवानयनमिति व्यभिचारइतिभावः
एवं चिन्मयकोन्मंडलशंकुघाताच्चरज्यायाप्रंखलुपृथिसंज्ञामियपिकांसभावाविषयत्वादुक्तं एतेनयद्येपि हिषुवद्दिन
ईजनरत्रिज्याममः स्याच्चरज्योद्धृत्यारयन्नसंहयादितिनसम्भीमास्करोक्तोनयः कैश्चिद्योक्तमिदंतुतेभ्यरगुणाद्दृष्टमना
नोहिनः स्याज्ञानादिति भास्करोदितमसच्छ्रुतेसएवाबुधइतिगणेशदैवज्ञोक्तंसमाधानमज्ञानांनयन्नुद्धरणमात्रमि
त्यवगम्यते ननुगोलेभ्रूत्यात्मकस्थानस्यसत्वेनभ्रूत्यात्मकसाधकानामविनिवारणान्नव्यभिचारास्त्येवेसत आह
एवमिति अनावाभावोनसाध्यरसेवंरूपं हि निश्चयेन तेन व्यभिचारांगीकृता आदरणीयमंगीकार्यं एवकारात्त
दुपेक्षानिरासोर्थः अनादरणेतस्यानिष्टमाहअन्यथेति तदनंगीकारे सः व्यभिचारो ह्यटनकर्त्रा स्वयथे अनुपाता
न एतेनुवाप्यतमरोः अतिकोटिमानेस्त्रैराशिकेनपरज्यासभुजादिसाध्यमित्यनेन कथमुक्तवानंगीकृतवान् तथा
चस्वीकृताकांतिज्याकोटौकुज्याभुजसदाद्वादशकोटौकोभुजइसाधनुपाते अनिवारितत्वेनस्वमदर्शितस्थलेव्यभिच
रितेउक्तसमाधानव्यतिरेकेणभवद्भिः किंवासमाधेयंभवत्कल्पितसमाधानेनैवमदभिमतेसमाधानादिति भावः

५७ अथोपसूत्रमुक्तासूत्रपूर्वप्रतिज्ञातं दिशांसाधनं पद्यचतुष्टयेनाह वृत्तैः सुसमीकृतक्षितिगतेकेंद्रस्थशंकोः क्रमा
त्छायाग्रं यत्र विशासपैति च यतस्तत्रापरेद्यौ दिशौ तत्कालस्फुटभानुतो यगरिता भिर्बिंबमानाङ्गुलाभिर्लिप्ताभिरसुयुताक्र
मगताद्येकृतिजावेतयोः ५८ एकान्यदिक्के विसुतिर्युतिः साछायाकृतेः साक्षिमनोः पदेन हृता हृतालंबजजीवयाम
मितांगुलैः पूर्वदिशः सुचिह्नं ५९ स्वार्कायनांशपरिचालनीयं तथा स्वसूत्राद्दलितस्यकाग्रे यथा भवेद्वृत्तगतं स्फुटं तत्
पूर्वापरसूत्रमतो पियत्स्यात् ६० तन्मत्स्यतोदक्षिणसौम्यसूत्रं तदैक्यकेंद्राद्दलयेद्दिशांसत्तत्रांकयेन्मध्यविभाग
सूत्रं कोणाख्यसूत्रं च दिवैवमेतदिति जलेनसमीकृतायां क्षितितलस्थागतं वृत्तं मानं तस्मिंश्च कृतवृत्तकेंद्रस्थशंकोः मध्यमा
गस्थितद्वादशांगुलशंकोः क्रमात् दिनस्य पूर्वापराह्णक्रमात् भाग्यं छायायां यस्मिन्भागे प्रवेशं करोति दिनपूर्वाह्णे पश्चि
मायां सुखीछायायां यो नरः कासाद्दृश्यं यस्मिन्प्रदेशे लगती सूर्यः यतः यस्माद्दृश्यप्रदेशादिनापराह्णछायायां यो नरः सुपूर्वी
भ्यमानापूर्वाभिमुखीभ्यपैति निर्गच्छति तत्र तस्मिन्भागयोः क्रमेण पश्चिमपूर्वदिशौ स्तः अनयोरेकत्रकालिकत्वासंभवा
त्स्वकालिकचिह्नस्य सूक्ष्मत्वेयितदिनस्य स्वाभिमतचिह्नकालानुरोधेन चालनार्थं तत्कालयोः कांतिज्ये आहतत्काले

ति प्रवेशनिर्गमसामयिकस्पष्टसूर्यात् अग्रेऽग्रिमग्रंथे उक्ताभिः बिंबमानाङ्गुलाभिः कलाभिः क्रमगतात् दिनस्य पूर्वापरा
ह्णक्रमस्थितादिति सूर्यविशेषणं असुयुतात् हीनयुतात् ये पूर्वोक्तप्रकारेण कांतिज्ये तत्तयोः कांतिज्ययोः एकान्यदिक्के
क्रमेणांतरयोगः सः छायावर्गाद्द्वादशवर्गयुतान्मूलेनगुणितः लंबज्यया भक्तः लब्धप्रमाणांगुलैः पूर्वदिशस्तत्कालजातंसू
क्ष्मचिह्नं तथा स्वार्कः दिनपूर्वाह्णकालिकोर्कस्य स्वायनांशं अयनदिशाभिमुखं दक्षिणोत्तरैकत्रदिगभिमुखं परिचाल
नीयं यथा स्वसूत्रात्सर्वचिह्नसूत्राद्दृष्ट्यायेवृत्तगतं चिह्नं स्यात् पूर्वापरसूत्राद्द्वादशांगुलांग्रदृष्ट्यावदेयानीत्यर्थः नतु द्वादशां
गुलानांतद्दृष्ट्यार्द्धज्यात्वं पूर्वापररेखायामध्यरेखात्वाभावात् तत्र चालितं चिह्नं स्फुटं पूर्वाह्णकालिकपश्चिमचिह्नका
लिकं पूर्वचिह्नं स्यात् एतेन पश्चिमचिह्नं वा स्वायनविपरीतदिशि चालयमित्यपास्तं भवति अनयोश्चिह्नयोर्यत्सूत्रं अपिशब्दे
न पूर्वसूत्रसूत्रसमुच्चयार्थः तत्पूर्वापरसूत्रं सूक्ष्मं तस्यैव मत्स्यतः तत्पूर्वापरसूत्राद्योमध्यः स तु चिह्नकेंद्रमकस्य सूत्रमि
तेनव्यासार्द्धेन परस्परं वृत्तद्वयं कृत्वा वृत्तद्वयसंपाताभ्यां वा स्वदृष्टवृत्तखंडे संमार्ज्य तद्वृत्तखंडद्वयाकारेण परिणतो भवति तस्मारे
खासंपातः पुछंपरोमुखं तत्सूत्रं दक्षिणोत्तरसूत्रं तयोः पूर्वापरदक्षिणोत्तरसूत्रयोः ऐक्यं योगः तद्वयं यत्केंद्रं तस्मात्समा

चनं दिशां वृत्तं तच्च वृत्तेमध्यविभागसूत्रं चतुर्दिशां प्रत्येकं मध्ये विभागेन सूत्रं कोणाख्यं सूत्रं चः समुच्चये एतत् दिग्वृत्तसाध
नं एवमुक्तप्रकारेण दिनेभवति ६१ स्वीकायनाशमित्यत्रोपपुक्तमयनदिग्ज्ञानमाह कृतायनांशाद्यचरोमगादिषु देषदा
स्पादयने हि सौम्ये कर्कादिद्वे च यदा तदा वीनीयाम्यायने स्यादिति चिंतनीयमिति स्पष्टं अत्रोपपत्तिः मगादौ यागमनं एवं
ग्रहस्य भवति तत उत्तराभिमुखं गमने प्रवृत्तइति मिथुनांतं तत् एवं कर्कादौ दक्षिणाभिमुखं गमनारंभाद्धुरंतं तदिति ६२
रात्रौ श्लोकत्रयेण दिक्साधनमाह ईदक्षिणापागसंसक्तमूलयं ध्रुवसंदृशा पश्येन्नाध्रुवभं तस्मिन्क्षणे यध्रुवमूलयोः ६३
लंबयातौ भूमिभागे नद्वेखा सौम्यदक्षिणं सूत्रं यत्तत्सौम्यभागे याम्ये नरं क्रमात् ६४ पूर्वापराख्यं तन्मत्स्यात्सूत्रमर्कोदयास्तनः
एवं रात्रौ दिशः साध्याः शेषं पूर्वोदितं भवेदिति दक्षिणनेत्रांतलग्नमूलायाय ध्रुवाग्रे संदृश्य ध्रुवतारां वेधकः पुरुषः पश्ये
त् तस्मिन्क्षणे एव तादृशं संस्थितयध्रुवाग्रमूलयोर्लंबयोः पातौ भूमिभागे कार्यौ तद्वेखा लंबपातांतररेखा क्रमेणोत्त
रदक्षिणं दिक्सूत्रं दिशां निरूढदेशादुत्तरभागे दक्षिणभागे तु ध्रुवमूलक्रमदक्षिणोत्तरं दिक्सूत्रं तन्मत्स्यात् सिद्धदाक्षिणो
त्तरसूत्रजातमत्स्यात् मुखपुच्छसूत्रं मत्स्यमध्यगं तत् पूर्वापराख्यं सूत्रं तच्चतानेपि पूर्वकस्मिन्भागे पश्चिमाचकस्मि

भागे इति तानं कथं स्यादत आह अर्कोदयास्तनइति सूर्योदयोयस्मिन्भागे तद्भागीयसूत्राग्रं पूर्वादिक् सूर्यास्तोयस्मिन्भागीयाग्रं
पश्चिमादिक् एवमुक्तप्रकारेण रात्रौ दिशश्चतस्रः साध्याः शेषं कोणदिक्तुल्यसाधनं पूर्वोक्तं स्यात् ६५ अथ मग्रंथसं
गसर्थमाह अत्रोपपत्तिरिति तदर्थं भूपृष्ठक्षितिजमाह भूगर्भक्षितिजाद्ध्रुवं भूव्यासार्द्धांतरेण यत् समंता भूखयोगाख्यं वृत्तं
भूपृष्ठजं कुजमिति भूव्याकाशयोगसंज्ञं वृत्तं प्रसक्तीभूतं भूपृष्ठीयं क्षितिजं ६६ दिशां तत्सूत्रयोः स्वरूपं श्लोकाभ्यां मा
ह एतत्समाख्यसंयोगौ पूर्वापरविभागयोः पूर्वापरदिशौ ज्ञेये तत्सूत्रांतर्गतं त्विदं ६७ पूर्वापराख्यसूत्रं स्याद्याम्योत्तरकुजैक्य
योः स्यात्सूत्रांतर्गतं याम्यसौम्यसूत्रं हि साधितमिति भूपृष्ठक्षितिजसमसंज्ञयोर्वृत्तयोः संयोगौ पूर्वापरविभागयोः क्रमेण पूर्व
पश्चिमदिशौ ज्ञेये इदं साधितं पूर्वापरसंज्ञसूत्रं तु तत्सूत्रांतर्गतं उक्तस्वरूपपूर्वापरदिशोः सूत्रस्यांतःस्थितं याम्योत्तरक्षि
तिजवृत्तयोर्योगयोः सूत्रस्यांतःस्थितं साधितं दक्षिणोत्तरसूत्रं ६८ पूर्वदिक्साधनस्योपपत्तिं सूचयति छायाप्रवेशागम
नेस्वजवसमाणभिन्नैकदिग्भुजयुगंतरतो भवेतां तत्छायामयोर्युतिवियोगसमं क्रमेण तेनोदितं सुगणकैश्चलनस्वयुक्तेति
भूगर्भक्षितिजसमवृत्तयोः संयोगौ पूर्वापरे तेन विषुवद्वृत्तस्थलेनेत्र क्रमेण तत्सूत्रं पूर्वापरसूत्रं पृष्टेतुपृष्ठक्षि

स्थितिजसमवृत्तसंयोगौ विषुवद्वृत्ताल्लिं विदुदक्स्थितौ निरक्षादुत्तरभागे· याम्ये तु दक्षिणस्थितौ पूर्वापरे· तत्सूत्रं पूर्वापरसूत्रं· न
तत्सूत्रानुरोधेनोदयास्तसूत्राणामपि प्राग्वपरसूत्रत्वं· ततो भीष्मवृत्ते छायायसूत्रस्यापि सूर्यगमनानुरूपत्वेनोदयास्तसूत्रांशत्वा
त्पूर्वापरसूत्रत्वं· परंतु छायाप्रवेशनिर्गमयोरेककालासंभवात् तदभ्यंतरकाले सूर्यस्य निजगत्याचलनात् छायाप्रवेशनिर्ग
मज्ञानसूत्रं पूर्वापरसूत्राकारं न भवति· तदभ्यंतरकाले सूर्यस्य याम्योत्तरगमनसंभवेनैकतरछायाग्रात् द्वितीयछायाग्रस्योत्तर
दक्षिणस्थलत्वावश्यंभावादतएव तत्सूत्रं पूर्वापरसूत्रं स्थूलमुक्तं सूत्रं सूर्यसिद्धांते· तत्परस्परं छायांतरेणैव तत्राह छायेति·
वृत्ते छायाग्रप्रवेशनिर्गमचिह्ने· स्वकालोसंभवत्समाणप्रकारसाधितौ यौ भिन्नदिशावेकदिशौ वा भुजौ तयोरुत्क्रमेण
योगांतरस्परं भवेतां· तथाहि· अभीष्टकाले गोलस्थितस्य सूर्यशंकुमूलं पूर्वापरसूत्राद्याम्योत्तरांतरेण यन्मितं भवति स भुजः
छायाग्रं च षड्भांतरे भुजांतरेण विपरीतं भवति· अतो भीष्मकाले छायावृत्ते द्वादशांगुलशंकोः छायाग्रं भुजांतरेण पतनीति सि
द्धं· तस्माद्याम्यं छायाग्रयोरंतरं दक्षिणोत्तरभुजांतरमितं· तथा च भुजयोरेकदिक्त्वे तात्कालिकभुजयोरंतरमेव छायाग्रयो
र्भुजाग्रयोरंतरं याम्योत्तरं· भिन्नदिक्त्वे तात्कालिकभुजयोर्योगएव छायाग्रयोर्याम्योत्तरमंतरमिति· तद्भुजयोर्योगो

राम०
१५८

तरं वा· सायंयोः· स्वकालिकछायाकर्णवृत्ताग्रयोः क्रमेण· भिन्नैकदिक्त्वे योगांतरतुल्यं भवति· तथाहि· भुजस्वरूपं दक्षिण
गोले। अ१५७। कर्णवृत्ताग्रात्पलभयोर्योगः उत्तरगोले कर्णवृत्ताग्रोनपलभः। अ१५८। पलभोनकर्णवृत्ताग्रात्वा। अ१५९।
अनयोरुभयकालिकयोरेकस्वरूपयोरेकदिक्त्वादंतरेणांतरमुसन्नं· प्रथमद्वितीययोर्भुजयोरप्येकदिक्त्वादंतरेणांतरयोगः
अत्राग्रयोर्भिन्नदिक्त्वादुक्तं समुचितं· प्रथमतृतीययोर्भुजयोरन्यदिक्त्वाद्योगेनांतरयोगः अत्राप्यग्रयोर्भिन्नदिक्त्वादुक्तं स
मुचितं· द्वितीयतृतीययोर्भिन्नदिक्त्वाद्योगेनांतरं· तेन कारणेन· पुनरावृत्त्या· तेनाग्रयोर्योगेनांतरेण वा सुगणकैः कू
ल्यकैः स्वयुक्त्या· पूर्वापरचिह्नयोरन्यतरस्य चलनं उक्तं· तथाहि· कर्णवृत्ताग्रायोगांतरं वा साध्यं· तत्र प्रत्यहं छायायाः सूर्यमंडलो
र्ध्वनेम्यत्यन्तत्वात् सूर्यमंडलोर्ध्वनेमिभोगादग्रयोरंतरयोगसाधनं युक्तं· न सूर्यमंडलकेंद्रजाग्रांतरयोगो· अतः पूर्वाधिकारानी
तग्रहभोगस्य केंद्रसंबद्धत्वाद्ध्वनेमिसंबद्धभोगार्धं बिंबमानकलार्द्धहीनयुतात् पूर्वापरार्द्धसूर्यादिस्फुटं· केंद्राद्ध्वनेम्याराशि
क्रममार्गे दिनपूर्वापरार्द्धयोः क्रमेण पश्चादग्रस्थत्वात्· अग्रांतयोगार्धं तत्कालयोः सूर्यमंडलोर्ध्वनेम्योः क्रांतिज्ये साधिते· त
योरेकदिक्त्वेंतरं योगो भिन्नदिक्त्वे· लंबज्याकोटौ त्रिज्या कर्णलंबाक्रांतिज्याकोटौ कः कर्णद्वयस्मादग्रासंबंधि साध्यं· तत्रस्थि

ज्याहृत्रेरंतराकर्णं वृत्तेकिमिसनुपातेनत्रिज्ययोस्तुल्यगुणहरयोर्नाशात्कर्णोगुणो लंबज्याहरोयोगस्यांतरस्यवा॰ तत्रकर्णस्य
छायावर्गद्वादशवर्गयोगान्मूलं॰ पूर्वापरसूत्रात्भुजांतरेणशंकुछायाग्रंवृत्तेपश्चिमचिह्नं दिनपूर्वार्द्धे॰ पूर्वछायाग्रचिह्नं दिना
परार्द्धे वृत्तेसूर्यस्योत्तरगमनेतस्माद्दक्षिणतउत्क्रांतरेणजातेनसश्चिमचिह्नानुसारेणायेदक्षिणमिसूत्रराभिमुखंचास्यंस्थूलस
र्वसूत्रादर्द्धज्यावत्॰ एवमुत्तरगोलेपरावर्त्तनेपरावर्त्तनेपश्चिमचिह्नात्सर्वचिह्नमुत्तरतस्तद्दक्षिणतश्चास्यमतः परावर्त्तनेदक्षिणा
यनं॰ एवंदक्षिणगोलेक्रांतपचयेपश्चिमचिह्नात्सर्वचिह्नमुत्तरतस्तत्रदनुसारेणदक्षिणतः कार्यं॰ एवंदक्षिणगोलेपरावर्त्तने॰
पश्चिमचिह्नात्सर्वचिह्नंदक्षिणतस्तत्रदनुसारेणोत्तरतः कार्यं॰ तत्रोत्तरायणमतः स्वार्कायनाशामिति सम्यगुक्तं॰ अंतरस्यमोग्य
खंडरूपत्वात्कल्पितपूर्वसूत्राद्वृत्तेचिह्नंतदंतरेणयथाभवतितथाईज्यावच्चांस ६९ इदंप्रथमद्विकाधनंषड्भ्यांशा
देशावधिनाग्रेइत्याहदिनोत्तरदिक्साधनसूत्रमार्यैः षट्षष्टिभागाभ्यधिकाक्षदेशे॰ नस्याद्जन्यक्रमिदंहितत्राप्योर्वीख्य
मेरुव्यतिरिक्तभागेइति॰ अयास्वरूपानुसंसाक्षेत्राभावात्षड्भ्यधिकाक्षभागदेशाविषयत्वेनादृशकालेतस्तत्रदिनापेक्षि
कंदिक्साधनंनस्यादिसूचितं॰ ननुतत्रदिग्ज्ञानंकथंस्यादतआहरजनीति॰ तत्र॰ षड्भ्यधिकाक्षदेशतादृशकालेरात्रावु

त्तरदिक्साधनंपूर्वोक्तंयुज्यते॰ अपिरेतद्देशेनसमुच्चये॰ ननुमेरौवडवानलस्थानेवाधवस्यरवमंध्यस्थत्वेनतद्धाह्वंवपातयोरे
कार्यादक्षिणोत्तरसूत्रानुसारेणपूर्वापरसूत्रानुसारेणाग्रयक्तदिक्साधनमसिद्धमिसतस्तत्रेतिविशिनष्टि॰ और्वीख्येति॰ दक्षि
णभूप्रदेशेऔर्वीख्यंवडवानलस्थानंउत्तरभूप्रदेशेमेरुस्थानं॰ तद्व्यतिरिक्तेतादृशास्थलेइत्यर्थः ७० नन्वेवंतत्रदिशां
ज्ञानंकथंस्यात्॰ नहितत्रदिशाभावः॰ भूगोलेस्थलमात्रस्यदिशांसद्भावादन्यथात्वाप्येतदनुपपन्नेरिसतोव्यासवाक्यात्सिद्धाः
श्लोकाभ्यामाह॰ और्वमेर्वोः पूर्वभागोयमकोटिस्तथापरा॰ रोमकंयाम्यभागोतुसिंहलंकापुरेक्रमात् ७१ सौम्यभागौतयो
र्व्यत्येतिव्यासोक्तितोदिशः॰ ज्ञेयास्तत्रदिशाभावोन्यावार्मौनोक्तासुनीश्वरैरिति॰ और्वमेरुस्थानयोर्द्वयोरप्येकएवपूर्वप्रदेशो
यमकोट्यभिमुखः॰ रोमकाभिमुखंपश्चिमादिगेकेच॰ तयोः क्रमात्॰ दक्षिणभागौसिंहपुरलंके॰ मेरोर्लंकाभिमुखोदक्षिणादि
क्॰ और्वस्यसिंहपुराभिमुखोदक्षिणादिक्॰ तयोरौर्वमेर्वोः सिंहलंकापुरेविपरीते॰ क्रमादुत्तरभागौ॰ और्वस्यलंकाभिमु
खमुत्तरादिक्॰ मेरोः सिंहपुराभिमुखमुत्तरादिक्॰ एवमुक्तप्रकरणे॰ व्यासोक्तेः॰ व्यासस्यसिद्धांतोक्तेर्दिशोज्ञेयाः॰ ननुदिशाभा
वएवास्तु॰ रात्रिदिक्साधनेनाथवादिनदिक्साधनेनयत्रोदितोर्कः किलतत्रपूर्वोनत्रापरायत्रगतः प्रतिष्ठामित्यादिनावाभ्य

नियतादिशोऽत आह तत्रेति मुनीश्वरैः प्राचीनर्षीश्वरैः तत्र पौर्वमेर्वोः दिगभावो नोक्तः तत्रापि पूर्वादिदिशाव्यवहारस्य पुराणोक्ति
सिद्धत्वात् अन्यथा नैयायिकमते प्रागपरादिव्यवहारानुभवसिद्धैकदिशो व्यापिकाया असिद्धत्वापत्तेः अन्याः अनियतादिशो
नोक्ताः स्थलस्य दिगनियमाभावात् अतएव मेरोरविभ्रमतिभ्रजगतः समंतादाशानकाचिरपि तत्र विचारणीया पूर्वहि दृशो
नमुपैति सर्वेहपूर्वात्तत्रासतो भवति सैव कथं प्रतीचीति प्राचीनोक्तिः ७२ अथ दिङ्नियमेन शंकुसाधनं दिक्चक्रस्य दृग्युक्तानां
दिगंशानां ज्ञानं पद्माभ्यामाह दिग्वृत्तकेंद्रस्थितयष्टिकेयं सूर्यांशुखायागणकेन भार्या नष्टप्रभास्याद्दियथातथास्याभ्यामात्सुलं
बः खलु मंडलांतः ७३ यासो यतस्थानगकेंद्रसूत्रभांशांकितेष्टत्रदंविलग्नं तत्सर्वपश्चाद्दिवरेंशकाये पूर्वापराह्णे दिगंशा इति दिग्वृत्तं अथ दिक्साधितं वृत्तं तत्पकेंद्रे स्थापितयष्टिरियं सूर्यबिंबकेंद्राभिमुखमयं यस्या एतादृशी तथा गणके
नधार्या यथा हि निश्चयेन नष्टप्रभा स्थानभवति एतत्सूर्यांशुखलयरीक्षार्थमुक्तं अस्याः एतादृश्या अयात् सुलंब
वृत्तमध्ये पासः एतेन वृत्तव्यासार्द्धानधिकायष्टिः सूचिता अनं नरं लंबपतनस्थानगतं यत्केंद्रमारभ्य सूत्रं इदं वृत्ते
द्वादशारयंशाचिह्नितं संसक्तं कार्यं तत्सर्वपश्चाद्दिवरे सक्रमदेशानदासन्नपूर्वपश्चिमाग्रतरस्थानयोरंतरे वृत्तैकदेशो यं

शकालेदिने पूर्वार्द्धे अपरार्द्धे पूर्वपश्चिमक्रमेण दिगंशाः स्युः ७४ पुनरुक्तभ्रमवारणार्थमाह अत्रोपपत्तिरिति प्रतिज्ञा
तामुपपत्तिं वदन्दिग्ज्यामाह चक्रांशकांकेक्षितिजाख्यवृत्ते दृग्वृत्तजात्रोंद्रदिशोस्तमध्ये येंशाः स्थितास्तेत्र दिगंशकाः स्युस्तज्ज्या
चदिग्ज्ये स्वपरे पि भागे इति निबद्धपूर्वगोले द्वादशराशिभागांकितो भगर्भस्थाभ्यंतरक्षितिजवृत्ते अभीष्टस्थाने भ्रमणे नदृग्वृ
त्तमानीयक्षितिजे यत्र लग्नतिसा दृग्वृत्तीया भीष्टदिक् पूर्वदिक्स्थानं स्वतः सिद्धमेव अनयोर्मध्ये येभागास्ते अत्र दिनपूर्वार्द्धे दि
गंशाः स्युस्तेषां ज्या दिग्ज्या अपरे भागे दिनापरार्द्धे इति एवमुक्तरीत्या अभीष्टदिक्पश्चिमदिङ्मध्यस्थांशा दिगंशाः अपि
समुच्चये ७५ पद्मचतुष्टयेन दृग्ज्यांकत्याहपलप्रभाविज्यकयाविनिघ्नीदिग्ज्योद्धृतासेष्टपलप्रभास्यात् इष्टाहृकर्णस्त
तउक्तरीत्याभीष्टप्रभाविज्याकयोर्हतिर्या ७६ सेष्टाहृकर्णेनहृताहृजीवाभीष्टाभवेत्प्रहुणितापमज्या स्वदेशजाहृज्यक
याविभक्ताफलं दृगारयापमजज्यकास्याः ७७ चापं दृगारयापमभागकाः स्युर्याम्योत्तराः कांप्रभागकाः स्युर्याम्योत्तराः कां
निवशारथोयत् इष्टाहृजीवाधनुरंशपूर्वे निरक्षयाम्योत्तरयोः क्रमेण ७८ सौम्यं तु याम्यं युतिरंतरं स्फुटयोरभिन्नान्य
दिशोर्नतांशाः खांकास्तदूनात्तउन्नतांशास्तज्ज्ये तु दृग्ज्यापुरतो भवेतामिति ततइष्टाहृमयाः उक्तरीत्या नदृग्द्वारशव

वर्गयोगान्मूलेनेत्यर्थः॥ इष्टपलकर्णः स्यात्॥ याहतिः सा॥ इष्टपलकर्णेन भक्ता॥ अभीष्टाक्ज्या स्यात्॥ अक्ज्यया गुणिता क्रांति
ज्या॥ निजदेशीयाक्ज्यया भक्ता॥ फलं दृक्संलग्नक्रांतिसंबंधिनी ज्या॥ दृक्क्रांतिज्या स्यादित्यर्थः॥ अस्याः दृक्क्रांतिज्यायाः सकाशा
द्भुजः दृग्रवक्रांसंज्ञाः कोसतुरो भेनदक्षिणोन्नराः इष्टाक्ज्यायाः धनुर्यदंशादि तु कारान्नत निरक्षदेशादक्षिणोन्नरदेशयोः
॥ क्रमेणोन्नरं दक्षिणं॥ ज्ञेयं॥ तयोः॥ दृक्क्रांत्यंशेष्टांशयोः एकभिन्नदिशोः क्रमेण॥ योगोन्नरं॥ नतांशाः स्युः॥ ततः॥ अनंतरं॥ न
ज्ये॥ नतांशोन्नतांशयोर्ज्ये क्रमेण दृग्ज्याशंकू स्तः ७९ अत्र पद्याभ्यां विशेषमाह एवं कृतेये पलभागकाः स्युस्तद्धीना
खार्द्धं द्युमिता अयं शाः॥ तांश्चाक्भागान्न विकल्प्य दृष्टिक्रांत्यंशतो येतु नतांशकाः स्युः ८० द्वितीयकालज्ञानितौ हि
दृग्ज्याशंकू द्वितीयौ भवतस्ततः प्राक्॥ काले दिनस्याधदले परस्मिन्नंदेतु पश्चात्प्रथमौ विलोमभिति एवमुक्तप्रकारेण॥ ग
णितकर्मणि कृते ये तांशाः॥ गणितागता इष्टाः स्युस्तेरूनाः अशीत्यधिकशतसंख्याः येभागास्तान्॥ चकारः पूर्वोक्तेनसमुच्च
ये॥ इष्टांशान्न विकल्प्य दृक्क्रांत्यंशेभ्यः पूर्वागतेभ्यः पूर्वोक्तप्रकारेण द्वितीयाः नतांशाः स्युस्तेभ्यः साधितौ प्रोक्तरीत्या द
ग्ज्याशंकू द्वितीयौ॥ दिनस्य पूर्वार्द्धे॥ ततः प्रथमदृग्ज्याशंकुकालात्॥ पूर्वसमये॥ स्तः॥ अपरेर्द्धे तु पश्चात्॥ अनंतरकाले॥ स्पष्टय

ति॥ प्रथमाविति॥ पूर्वागतौ दृग्ज्याशंकू विलोमं॥ द्वितीयदृग्ज्याशंकुकालात्पूर्वार्द्धे॥ अनंतरं॥ अपरार्द्धे पूर्वकाले॥ इत्यर्थः ८१ अस्योक्तवि
शेषस्य स्फुटमाह निरक्षदेशोन्नत्याम्यभागे क्रमादुदग्दक्षिणगोलयोः॥ तत्॥ दिग्ज्याग्रकातो नधिकात्तदेवं द्वितीयकावप्यथसा
धनीयाविति॥ तदा॥ तादृशस्फुटे॥ एवमुक्तप्रकारेण॥ द्वितीयकौ दृग्ज्याशंकू॥ अपि शब्दः प्रथमाभ्यां समुच्चयार्थः॥ अन्यदा॥ प्रथ
मौ साध्यौ द्वितीयावसाध्याविति॥ ८२ दिङ्नियमानयनमुपसंहरति॥ एवं दिगंशानिषुसागरांशं प्रकल्प्य खांकान्खदिशोऽ
खांश्च दिक्कोणपूर्वापराम्यसौम्यानराः सदृग्ज्याः खदिशश्चसाध्याः॥ दिशोः कोणाः॥ पूर्वापरं॥ दक्षिणोन्नरं॥ एतद्धृतत्रयसंबं
धेन क्रमेण शंकवो दृग्ज्याश्च॥ अभीष्टदिशोपि स्युः॥ ८३ अत्रोपपत्तिं प्रतिजानन्यद्याभ्यां स्वेष्टाक्दृक्क्रांत्योः स्वरूपं दर्शयति॥
अत्रोपपत्तिं विमलां विमलांदामिसंज्ञेपनः स्वोक्तमरीचिस्थां॥ स्वेष्टप्रदेशे निजदृष्टिदृग्गोलं विधाय भ्रमणेन तत्र ८४ दृ
ग्ज्याक्षिकामंडलयोगदेशः खस्वस्तिकाद्योनिकटे लवैर्यैः॥ स्वेष्टाक्भागा न्यथ तद्घनेर्यैस्वेष्टं स्फुटं ते पलभागकाः स्युरिति॥ अप
र्वत्वमाह स्वोक्तेति॥ स्वनिर्मितो यः सिद्धांतशिरोमणेर्मरीचिस्तस्मिन्संस्थायस्याः॥ विमलाभिसंज्ञेनाद्यावधिकेनाद्यितत्त्वसि
द्धांतशिरोमणिस्फुटकानयनस्याज्ञानमिति सूचितं॥ अत्र॥ आनयने॥ अथवात्र सार्वभौमग्रंथे॥ संक्षेपेणोपपत्तिं वदामि वि

स्वरभयात्· तेनविस्तरापेक्षायामत्रस्थूलेमंरीचिर्ईष्टव्यइतिभावः गोले· पूर्वनिबद्धगोले· स्वाभीष्टस्थाले· निजदृग्वृत्तंभ्रमणेन
कृत्वा· तत्र· तादृशदृग्वृत्तैः खमध्यात्· यः· निकटे· दृग्वृत्तनाडिकावृत्तयोरैक्यभूतोदेशः· अनेनहितीयोयिनत्संपातोस्ति· समा
नवृत्तयोर्गोलेर्द्वौतरत्वेनैक्यावश्यंभावादितिसूचितं· यैरंशैस्तेस्वामिमताइष्टाक्षांशाः· तद्यतैः विषुवद्दृग्वृत्तैक्यासर्वगृही
तात्स्वामिमतंगोलेस्थानंयैरंशैस्तेंशाः· क्रांत्यंशाः· दृग्वृत्तंस्थूलाद्दृग्ख्याः ७५ नतांशस्वरूपमाह क्रांत्यंशाकागोलवशा·
त्स्वदिक्कायाम्याः· पलांशादृहखस्यमध्यात्· तयोरभिन्नान्यदिशोश्चयोगोंतरंनतांशाः· स्फरभीष्टदिक्के इति· गोलदिगुत्तरो धा
क्रांत्यंशादृगाख्याः· स्वक्रांतिदिक्काः· प्रत्यक्षाः· इह· निरक्षादुत्तरभागेजंबूद्वीपे· खस्यमध्यस्थानादक्षांशाः· दक्षिणाः· विषुवद्द
ग्वृत्तसंपातयोर्दक्षिणस्थत्वात्· अर्थान्निरक्षादक्षिणभागेतत्रत्याअक्षांशास्तत्संपातयोरुत्तरस्थत्वात्· अतः कारणाद्भीष्टा
दिक्के· स्थाने· तयोः· क्रांतिस्वेष्टाक्षांशयोः· एकभिन्नदिशोः· योगोंतरंक्रमेणखमध्यान्नतांशाः· दृग्वृत्तेस्युः ७६ अथनतदर्थं
स्वेष्टाक्षज्यानयनमवतारयति· याम्यात्तराक्षांशगुणोरुभातीयथातथेष्टाक्षभयेष्टजाक्षाः· अतोत्रसाध्यापलभेष्टदिक्कात्
साधनंपूर्वनरैः कृतंतदिति· याम्योत्तरवृत्ताकारेदृग्वृत्तेयाम्याउत्तरावाअक्षांशाः· स्वदेशीयालिषांज्याः· यथास्वदेशाक्षभा·

याःसाधिताःतथा· तद्दीप्ताः· इष्टाक्षभयादृष्टोत्क्षांशाः स्युः· अतः कारणात्· अत्र· इष्टाक्षज्यासाधनार्थं· पलभा· इष्टदिगंशानुरूपा
साध्या· तस्याः· पलभायाः· साधनं· पूर्वनरैः· तास्कराचार्यैः· कृतंकल्पितं· तत्· सिद्धांतशिरोमणित्रिप्रश्नाधिकारस्थपलप्रभाध्या
सदलेनत्रिज्ञीसादिमरीचीयन्त्रयासविशेषंविवृतमित्यर्थः ७७ अथनतासनंविवक्षुः प्रथमंछायाक्षेत्रंगोलस्थमवतार
यति· शंकुमूलपरपूर्वसूत्रयोर्याम्यसौम्यविवरंभुजोभुजः· दृग्गुणः· श्रवणएतयोर्मध्येकोटिरत्रपरपूर्वसूत्रवेइति· गोलेभी
ष्टस्थानादवलंबेशंकुरूपेपातिनेशंकुमूलप्राच्यपरसूत्रयोर्दक्षिणोत्तरमंतरंभुजाख्योभुजः· शंकुमूलभूगर्भयोरंतरसूत्रं
नतांशज्यातुल्यंदृग्ज्याकर्णः· एतयोर्भुजकर्णयोरुत्करीसाकोटिः· अत्रभूगर्भीयेपरपूर्वसूत्रे· तदग्रयोर्मध्येस्यात्· ७८
प्रसंगात्भुजंसवासनंविवक्षुः शंकुतलस्वरूपमाह दिवोदयास्तोभ्रवसूत्रतोनुस्तलंहियाम्यंहियाम्यंघनिशंकुजोर्ध्वे· या·
म्यांगतंनक्रमधश्चसौम्यांतनोत्रसौम्यविपलोत्तरेतदिति· दिने· उदयास्तजातसूत्रात्· शंकोस्तलंमूलंदक्षिणं· हेतुमाहघ
निशमिति· अहोरात्रवृत्तंस्वक्षितिजवृत्तादुपरिरि· याम्यादक्षिणांदिशंप्रतिगतंतिर्यग्भवति· निरक्षेसमानत्वादुदयास्तसू
त्रएवशंकुमूलमतः शंकुतलाभावः· नक्तं· रात्रौ· क्षितिजादधोहोरात्रवृत्तंसौम्यांप्रतिगतं· तः कारणात्· ततउदयास्तसू

ग्राह्य· अत्र· रात्रौ· तत्· शंकुतलं· निरक्षादुत्तरभागे उत्तरं ७९ निरक्षादक्षिणभागे शंकुतलस्वरूपं वदन्भुजमाह निरक्षयाम्ये विपरीतमेतद्दृग्यं ततः शंकुतलाग्रयोश्च· योगोत्तरं त्वेकविभिन्नदिक्के भुजः समे स्यात्तरभाजुत्ये इति· निरक्षादक्षिणभागे· एतच्छंकुतलं विपरीतं· दिने उत्तरं रात्रौ दक्षिणं· अहोरात्रवृत्तस्य क्रमेणोत्तरदक्षिणयोर्नतत्वात· तत्तः कारणात· शंकुतलं· शंकुमूलोदयास्तसूत्रयोर्दक्षिणोत्तरमंतरं· अथ· प्राच्यपरोदयास्तसूत्रयोर्दक्षिणोत्तरमंतरं· अनयोरेकभिन्नदिक्के क्रमेण योगोत्तरं भुजः स्यात· तत्स्वरूपमाह समेति· समवृत्तस्वेष्टस्थानयोर्दक्षिणोत्तरांतरभागाः याम्योत्तरभूगर्भदिक्तिजवृत्तसंपातद्वयप्रोतदलवृत्तस्थांशास्तेषामुत्पन्नज्यातुल्यत्वमर्थः ९० योगोत्तरं त्वेकविभिन्नदिक्के इत्यत्रोपपत्तिमाह सौम्याग्रकाग्राच्छंकुतलं हि याम्ये याम्यायामुत्तरे याम्ये· दिवे निशायां विपरीतमेवं यत्तोत्तरे याम्यदिनो विलोममिति· उत्तरायायाः प्राच्यपरोदयास्तसूत्रांतरूपायाः· अग्रादुदयास्तसूत्रात· शंकुतलं· उदयास्तसूत्रशंकुमूलयोरंतररूपं हि यतो दक्षिणं· याम्याग्रायाः अग्रात्तु सुतरां याम्यं· अत्र कदाचिद्भ्रमासंभवः· पूर्वकत्तरगोलत्वाद्भ्रमसंभव इति भ्रमाप्रसक्तिर्योगमार्थ एव कारः· दिने एवं· रात्रौ व्यस्तं· उत्तरायाच्छंकुतलमुत्तरं· दक्षिणायायादुत्तरं शंकुतलं· एवं निरक्षादुत्तरभागे· दक्षिणभागे तु· इत्युक्तात· विपरी

तं· सौम्यायाग्राच्छंकुतलसूत्रं· याम्यायादुत्तरं चेति दिने रात्रौ व्यस्तमतएकदिक्के तयोर्योगो भिन्नदिक्के तयोरंतरं· शंकुमूलप्राच्यपरसूत्रयोरंतररूपो भुजउपपन्न इति भावः ९१ अथोन्नतेन विषुवद्वृत्तसंबंधेन कथनार्थं हेतुमाह विषुवद्वृत्तसंबंधात्सत्प्रभाविषुवत्प्रभा· मृतासुत्तैस्तनोस्यात्स्वज्ञानं स्यात्क्रांतिभावनत इति· ततो हेतोरस्याः विषुवत्साः छायायाः दृष्टायाः ज्ञानं क्रांतिभावात्स्यात· क्रांतिभावे विषुवद्वृत्तसंबंधावश्यंभावात् ९२ विषुवद्वृत्तसंबंधेन फलितं पूर्वोक्तेन माह अतो याम्याभाववशतो भुजः शंकुतलं भुजः तद्दृग्ज्या श्रवणस्याभ्यां कोटिः प्राच्यपरसूत्रवद् इति· अतः क्रांतिसंबंधेनाग्रायाः सत्वादग्रायाअभावानुरोधात्भुजः पूर्वोक्तः शंकुतलं सिद्धः· अभीष्टस्थानेदृग्वृत्तभ्रमणेनानीयते स्यविषुवद्वृत्तेयः संपातस्तस्मादवलंबरूपशंकोर्मूलं प्राच्यपरसूत्रात्स्वदेशगोलावस्थानेन शंकुतलेनांतरितमिभावः· स भुजः· तद्दृग्ज्या· तच्छंकुमूलभूगर्भघोरंतरसूत्रं तच्छंकुदृग्ज्या कर्णः· ताभ्यां भुजकर्णाभ्यां कोटिर्वर्गांतरमूलं प्राच्यपरसूत्रे भूगर्भभुजाग्रयोर्मध्ये इति दृष्टच्छायाक्षेत्रं गोलसंधि ९३ इदमेव द्वादशांगुलशंकुप्रमाणेनाहलघुक्षेत्रप्रमाणेन पलभादीः क्रांतिः प्रभा· दृष्टाक्षतुल्यनग्नांशज्यौ छाया भ्यां कुकोटिकेति· शंकुस्थाने द्वादशांगुलशंकुः· शंकुतलस्थाने पलभा· अक्षक्षेत्रे तस्याः पूर्वभुजत्वेनोक्तः· लघुक्षेत्रप्रमाणानुरोधेन भूमि

गर्भसमानभूमौ पलभाभुजः इष्टांशासमनतांशाभ्यां ज्यारूपदृग्ज्यायाः वक्ष्यमाणप्रकारेणोत्क्रमच्छायावैषुवतीकर्णः नाभ्यां पलभाछा
याभ्यां भुजकर्णरूपाभ्यां कोटिः प्रसिद्धैव ९४ अनुपातार्थं क्षेत्रांतरमाह दिग्ज्याभुजः अक्षनिष्ठ्यादिगंशोत्क्रमजीवया हीनात्रिभक्ताकोटि
रिष्टक्षेत्रकुजेस्फुटमिति पूर्वं दृष्टक्षेत्रं तदुदयास्तकालिकं क्षितिजे एव भवतीति प्रसक्तमुक्तं ९५ इष्टाक्षभानयनमुत्पादयति एतद्भूस
क्षभाक्षेत्रकर्णयोर्ज्यामनीषिभिः अनुपातात् पूर्वजात्यभुजेष्टाक्षभाहतेति पूर्वश्लोकोक्तं भूगर्भसमभूमिसंक्रम्य छायाक्षेत्रतत्कर्ण
भुजाभ्यां पूर्वोक्तलम्बछायाक्षेत्रस्य जात्यत्रिस्रस्य भुजेन सुधीभिरनुपातात् दिग्ज्याभुजेत्रिज्याकर्णस्तदा पलभाभजेकः कर्ण इति रूपा
त् इष्टाक्षभाकर्णरूपा हता आनयनोपक्रमेऽङ्कैरित्यर्थः ९६ दृक्क्षांशानयनं श्लोकाभ्यामुत्पादयन्नुपपत्तिमुपसंहरति दृग्ज्याभ्य
सौम्यदृक्क्षेत्रे क्रांतिस्वाक्षांशयोर्नताः भागाः संस्कारजा जाताः अतः स्वेष्टाक्षज्यया ९७ अनुपातात् हता दृक्क्रांतिज्यातदनुर्लवा
दृक्क्षेत्रे रिति पूर्वोक्ताभिन्नानयनवासनेति दृग्वृत्तयाम्योत्तरयोः सर्वावयवावच्छेदेनाभिन्ने याम्योत्तरवृत्ताकारे दृग्वृत्तेऽस्यर्थः यथागत
क्रांतिभागस्वदेशाक्षभागयोः संस्कारोत्पन्नः नताः अंशाः जाताः भवंतीत्यर्थः अतो हेतोः स्वेष्टाक्षांशज्यपेक्षया अनुपातात् स्वदेशा
क्षांशज्ययायथागतक्रांतिज्यासंस्कारयोग्यानदेष्टाक्षांशज्यया केनिरूपात् दृग्वृत्तक्रांतिज्योक्ता तस्याः अनुर्दृग्वृत्तक्रांतेर्भागाः एवं

पूर्वाचार्यभास्करोक्तैकानयनस्योपपत्तिर्व्यक्तीकृतेत्यर्थः ९८ अथ विशेषस्योपपत्तिं विवक्षुः प्रथमं देशविशेषे श्लोकत्रयेणादि
गंशानां व्यवस्थामाह अथ क्रांत्यधिकांशाः देशोत्तरगोलगे कुजस्थे यांशतुल्याः दिगंशाः स्युः उत्तरे ९९ क्रमेणोनाभवंत्ये
वं तदभावः समस्थले ततः क्रमेण हृद्यातेमध्याद्देवांकसंमिता १०० अतो वारद्वयं तत्रायांशानधिकवाः दिनार्द्धतः समाधा
म्योत्तरस्थे याम्यसौम्यदृति उत्तरगोलगते क्षितिजस्थे यहे यांशाएव ते पूर्वोक्ताः दिगंशाः ततः क्षितिजहृद्भाद्युन्नते यहे क्रमेणोनाः
दिगंशा भवंति एवमुक्तदिशाः समदृग्वृत्तस्थानेयहेसति दिगंशाभावः तदनंतरं क्रमेण मध्याद्गते दिगंशा न भवंति फलितमाह अ
तइति अतः कारणात् तत्र नाहतदेशविशिष्टोत्तरगोले दिनार्द्धमध्ये अयांशोऽधिकदिगंशाः वारद्वयं समयभेदेन भवंति परंतु
समदृग्वृत्तादक्षिणोत्तरस्थे यहे क्रमेण दक्षिणोत्तरस्थाः १०१ उक्तातिरिक्तदेशे दिगंशानां व्यवस्थामाह क्रांतिस्तत्तदेशेपि कुजस्थे यांशा
संमिताः ततोऽस्ताः कियत्कालं ततोऽपचयात्मकाइति अपि पूर्वोक्तदेशे न समुच्चयार्थः तेनोत्तरगोले तदनंतरं कियत्कालावधि
स्थाः तदनंतरं दिनार्द्धावधिवृद्ध्यात्मकाः दिगंशाः १०२ अत्र फलितं वदन्निरसादुत्तरभागे उत्तरगोले दक्षिणभागे दक्षिणगोले च
साधारण्येनैकं फलितं श्लोकाभ्यामाह अतो वारद्वयं तत्रायांशानधिकदिग्लवाः दिनार्द्धतः परस्तेनैसौम्याभस्मान्निरक्षतः ३

सौम्यभागे सौम्यगोयांशानधिकदिग्लवाः कारहयंदिनार्द्धान्तर्याम्यगोले तु दक्षिणेऽनि अतोस्माद्धेतोः तत्र तादृशदिशि शोत्तरगोले दिनार्द्धमध्ये अयांशानधिकदिगंशा अनधिकेनि तुल्यानामपि सिद्धार्थमुक्तं परं विशेषस्तु एतेदिगंशाः उत्तराः फलितमाह अस्मादिति उक्तहेतोः दक्षिणे निरक्षदेशाद्दक्षिणप्रदेशे दक्षिणगोले वारद्वयमयांशानधिकदिगंशाः दिनार्द्धान्तः परक्रांतिस्पनाक्षदेशोदक्षिणाद्स्यर्थः ४ समदिगंशेषु पूर्वानयनेननतांशानराणामसंभवाद्विशेषकथनमावश्यकमित्याह तुल्यदिग्भागकेम्य स्तु पूर्वदिस्थानतांशाकाः समागोले तु भिन्नाले द्वितीयाः साधिता स्तनइति पूर्वदिस्था आनयनेनेत्यर्थः गोले कालभेदान्ने ननतांशाः साधितमतांशेभ्यः भिन्नाः अन्यथा कालभेदानापत्तेः दिगंशाभेदे कालद्वयेनतांशसाम्यमेककपाले निविरुद्धमिति भावः ततः द्वितीयाः भिन्ननतांशाः विशेषोक्ता साधिता ५ अथ विशेषोपपत्तिं वक्तुं स्फुटविशेषे तु कारणं श्लोकाभ्यामुपपादयति तत्र क्रांत्यधिकांशोत्तरमहत्ता दुदग्रहे विषुवद्वृत्तिवृत्तैक्यं तदासन्नं खमध्यतः ६ यैरंशैस्तैः पलांशास्तु यात्यानयांशसाधने ननु खस्वस्तिकाद्दूरतरैक्यांशाः स्युनाः पलाइति तत्र देशे उदग्रहे उत्तरस्थग्रहे इति कालविशेषे विषुवद्वृत्तयोरैक्यं संपातरूपं तदासन्नं अहनिकटस्थं खमध्यद्वृत्तवृत्तयोरैक्यं संपातरूपं तदासन्नं अहनिकटस्थं खमध्यद्वृत्तवृत्तयोरैक्यं तदासन्नं खमध्यतः ६ यैरंशैस्तैः पलांशास्तु यात्यानयांशसाधने ननु खस्वस्तिकाद्दूरतरैक्यांशाः स्युनाः पलाइति तत्र देशे उदग्रहे उत्तरस्थग्रहे इति कालविशेषे विषुवद्व

गणिता गतनतांशानामभीष्टाद्विशेषानयेदिति भावः ९० अत्रैकत्रविशेषोपपत्तिर्दर्शयन्नपरत्रसाधारणसिद्धिं दर्शयन्नुपप
त्तिश्लोकत्रयेणोपसंहरति-कुजादासन्नगेखेटे पलांशाः शोधिता मताः आसन्नत्वान्नतोन्नतेथैवं दूरगते ग्रहे ९१ ग्रहापर
कपालस्थान्नाडीदृग्वृत्तस्योगतः अक्षांशागणिता सिद्धा याम्याः क्रांतिसंज्ञका अपि ९२ नशोधिताः सुदूरत्वादिति सिद्धं
यंत्रमात्र-नतांशानां दिगंशैक्येवमुक्तासुवासनेति-दिनिजादासन्नदृग्वृत्ताहोरात्रवृत्तसंपातस्थग्रहे-शोधिताः-रवा
सेंदुभ्यः शुद्धाः विशेषोक्ताः आसन्नत्वात्त्वीकृताः उक्तालेपलांशानां गीकृताः-दिनिजा दूरस्थतादृक्संपातस्थितु-एव-
मासन्नत्वादिसर्वः-दिषुवद्दृग्वृत्तयोः संपातात्-यद्वाधिष्ठितकपालादितरदिनकपालसंस्थात्-अक्षांशाः गणिता सि
द्धाः पूर्वोक्ताः याम्याः क्रांतिसंज्ञका अपि संस्कारार्थं तस्मादेव दर्शनीयाइति भावः-शोधिताः-विशेषोक्ताः पलांशाः-सुदूरत्वात्-
अनासन्नत्वान्नत्याः इति-उक्तरीत्या दिगंशाभेदेन नतांशानां द्वयं सिद्धं-अनुपपन्नं नेति भावः-एवं-अत्रोपपत्तिं विमलामि
त्यादिनैतद्ग्रंथेन-सुवासना-उक्ताचिरद्वोपपत्तिर्निरूपितेत्यर्थः ९३ साधितदृग्ज्यायाः प्रतीत्यर्थं दिगंशानयनं विस्तुः प्र
थमं शंकोर्भुजसाधनमाह नरोरूभाग्रोक्तहतः फलं तुस्तलं च याम्यं चियलो नरेस्यात्-याम्येथसौम्यं निजगोलदिक्स्यादग्रा

नयोः संस्कृतिनो भुजः स्यादिति-नरः पूर्वानीतः फलं-शंकोस्तलं-शंकुतलं-निरक्षादुत्तरभागेदक्षिणं-दक्षिणभागेउत्तरं स्यात्-
अग्रागोलदिक्स्यात्-नयोः शंकुतलाययोः-संस्कारात्-एकदिशियोगो भिन्नदिश्यंतरमिति निरूपात्-भुजः स्यात् ९४ भुजाद्दि
गंशानयनमाह भुजस्त्रिज्याहतोदृग्ज्याभक्तो लब्धधनुर्लवाः-दिगंशाख्याः समालितु स्फुटनतांशगुणद्दृग्ज्याद्दिति-ननु दिगंशाभे
देशंकोर्दृग्ज्ययोर्भेदाद्भुजभेदेनोक्तरीत्या दिगंशभेदापत्तिरिति मंदाशंकापरिहरति-समाइति-नतांशयोर्ज्ययोः द्वयं-
तस्यात्-ते-दिगंशाः अभिन्नाः स्युः-भुजादीनामिव खेपि दिग्ज्यारूपफलयोर्गोलेतद्भेदनिश्चयाद्भेदावश्यंभवइति भा
वः-दृग्ज्याकर्णो भुजो भुजस्त्रैराशिज्याकर्णको भुजरसनुपाते नोपपत्तिः ९५ अथ दिङ्नियमितशंकुसाधनमुपसंहर
न्कालनियमेन प्रतिजानन्नग्रमं दिनमानं विवक्षुरघटिकानयनमाह उक्तो नरो भिन्नदिङ्नियमेन योथनं बध्नि
कालनियमेन पुनः सदृग्ज्यं-पूर्वोदितमग्रगुणोस्य धनुर्लवा ये षष्ठिहृताग्रभवा घटिका भवंतीति-अथानंतरं यो भिन्न
दिगंशनियमेन शंकुरुक्तस्तं शंकुं-कालनियमेन पुनर्द्वितीयवारं-सदृग्ज्यं-दृग्ज्यसहितं चेत्यर्थः-निरूपयामि-पूर्वोक्ताच्चस्य
या-अस्याः पेघनुर्भागालेषष्ठिर्भक्ता अग्रसंबंधिन्यो घटिकाः स्युः ९६ दिनार्द्धरात्रार्द्धे व्याहत्वरघटीसहितारहिताः क्रमात्

धिमिताघटिकाः स्युतगोलयोः भवतितद्धृदलनिजसावनंखगुणतः पतितंरजनीदलमिति स्यताबुत्तरदक्षिणौगोलौतयोः
क्रमात् चरघटीभिर्युताः हीनाः पंचदशाघटिकाः तस्य यथास्यग्रहस्य चरं दिनार्द्धनद्धहसावनांतर्गतंस्यात् दृग्वित्रिंशतः मु
हूर्ताग्रहेस्यात् ९७ अत्रविशेषमाह यस्तात्सौम्ये वेदैनदुक्तं याम्ये स्यादन्यथा भवेत् एवंषड्दृष्टिभागाद्रूपर्यंतचरस्य क्रिये
ति अन्यथा वैपरीत्यं चरसंबंधिनीक्रिया गणितेतिकर्त्तव्यता तद्देशावधि अन्यत्रापिचरज्यायास्त्रिज्यानधिकत्वेपथो
क्तैव अग्रेएतद्गणितविषयत्वमितिभावः ९८ अथशंकुसाधनार्थं हृतिं विवक्षुस्तदुपयुक्तंनतोन्नतकालंसूत्रंचाहस्या
दुन्नतंद्यगतशेषकयोर्यदल्पंतेनोनितंदिनदलंनतसंज्ञकंच गोलक्रमेणचरनाडिकयोनयुक्तात्वेष्टोन्नताद्रसगुणाद्गुण
कोचसूत्रमिति यस्मिन्कालेभाष्टशंकुः साध्यस्तस्मिन्काले यद्ग्रहस्य यद्दिनंतस्यगतशेषयोर्मध्ये यदल्पंतदुन्नताख्यंतेनोन्न
तेनहीनंस्वीयंदिनार्द्धनतसंज्ञकः समुच्चये उत्तरदक्षिणगोलक्रमेणचरघट्याहीनयुताद्दौ नतकालात्षड्गुणितात्स्या
अत्र निरक्षादुत्तरभागेसूत्रंस्यात् दक्षिणभागेतुयुतोनादुक्तगोलक्रमादितिवैपरीत्यमर्थसिद्धं ९९ नतकालात्सूत्रंसा
धयन्नत्रविशेषंचाहनताद्रसघ्नाद्विरीनजीवात्त्रिज्यारहिताथवातत् दिनाधिकेचेदधिकंनतंयद्रसघ्नमस्य क्रम

मौर्विकानदिति नतकालात्षड्गुणितदुक्रमज्या तयात्रिज्योना यकारांतरेणनसूत्रंस्यात् ननुपंचदशाघट्यंतर्गतस्यज्यासाधनो
नेत्वरधिकनतकालस्योक्रमज्यासाधनाभावात्सूत्रंकथंस्यादत आहदिनाधिकमिति चेद्यदिपंचदशाघटिकाभ्योधिकंनतं अधि
कं पंचदशाभ्यायदल्पंषड्गुणितं अस्य षड्गुणितस्यक्रमज्या उक्रमज्याप्रसंगात्तद्वारणार्थं क्रमपदं तत्सूत्रंस्यात् परंतद्विपरीतं
२० कलानयनंकस्याग्रहस्यानयनमाहसूत्रंद्युभोगांगुणितंविभक्तंत्रिभज्यया स्यात्स्वसाकलास्या रवेस्तदुत्तरदक्षिणगोलगो
त्रक्रज्यायुतोनाकलिकाहतिस्यादिति अथसूत्रंक्रज्यापरिणतंकलाख्यं कलिका कलासंज्ञा उत्तरदक्षिणगोलस्थेयद्दैः हि
तिश्चयेन क्रज्यात्रमेणयुतोनाअत्र निरक्षादुत्तरभागे हृतिः स्यात् दक्षिणभागेतनयुतेत्यर्थः ग्रहाहृतिः २१ हृतेः शंकुं दृ
ग्ज्यांचाहृतिः पलक्षेत्रजकोटिनिघ्नीकर्णभक्ताभवतीष्टशंकुत्रिज्यानचापोक्रमजीवयेनादृग्ज्याभवेदेवमतोवेति शंकुसा
धनस्योन्नतांशसूत्रस्योक्रमज्ययोनात्त्रिज्या दृग्ज्यास्यात् अतोदृग्ज्यायाः सकाशात् एवं दृग्ज्यासाधनरूपनतांशानामुक्रमज्ययो
नात्त्रिज्याशंकुरिनिवादिष्टियमोक्तशंकुसाधनंस्यात् २२ ननुएवंसत्रानयनेचरघट्यूनमुन्नतंनस्यात्तद्दासूत्रंकथंस्यादित्य
स्योत्तरमस्यदपिभास्करोक्रमनुवदति यत्रक्वचिद्दृष्टिविधौयद्दृशोध्यंनमुद्दिष्टपरीतमुद्या विधिसमरामोक्तवदेवकिंतुयो

गेवियोगः सुधियाविधेयइति· इह त्रिप्रश्नाधिकारे यत्रकुत्रचिच्छोधनविषये यदा शोध्यंशोधकान्नमुद्धेनदा विपरीतशुद्ध्या शो
धकेनहीनं शोध्यमितिरूपयागणितविधिः प्रोक्तवत् एवकारः क्वचिदपि विधिर्विपरीतो नकार्यस्तस्यर्थकः नतु पूर्वविपरीतशु-
द्धेः शुद्धिः कथंभविष्यतीत्यत आह किंत्विति· यथोक्तकरणे पितु शुद्ध्यर्थकश्चनविशेषः· तमेवाह योगइति· विपरीतशोधना
नंतरमग्रिमक्रियायोगेप्राप्तेवियोगोनंतरं कार्यं· सुधियेति हेतुगर्भं· तेद्यादिस्थलेयोगे यस्मिन्नुपपत्तावविपरीतशुद्धेः शुद्धि
र्भवतितस्मिन्नेवयोगस्थानेनंतरंनान्यत्र· गुणनभजनादिकं यथास्थितमेवेतितात्पर्यं· यथागोलक्रमेणचरनाडिकयोनशु
क्लत्वेदोन्नताद्गमगुणादिसत्रोत्तरगोलेचरघट्यूनमुन्नतंनभवतितदोन्नतमेवचराद्यूनमवशेषात्सूत्रं विपरीतमथ विपरी
तसूत्रात्वेष्टस्थक्षक्षिणगोलगेत्रेसादिनाद्यूतिसाधनेकुज्यायोगे प्राप्तेविपरीतकलयाहीनाकुज्याद्यूतिः स्यात् २३ अथो
क्तस्योपपत्तिं विवक्षुः प्रथमं दिनरात्रिमानोपपत्तिंवक्तुकामः संगतसर्वभास्करोक्तप्रश्नमनुवदति महदहः किमहोरजनीनतु
र्दिनमणौगणकोत्तरगोलगे· नतुमनुर्दिवसोमहतीनिशावदविचक्षणदक्षिणदिगनेइति· हेगणक· गणितज्ञ· चरघटीस
हितारहिताइष्टक्रविधिनोत्तरगोलस्थेसूर्ये· अहोरात्राश्चर्यं दिनंमहत्परिमाणं किंकुतः रात्रिरल्पप्रमाणा कुतः हे विचक्षण·

उपपत्तिकल्पक· दक्षिणगोलगनेर्के नतु· वितर्के· दिवसोल्पप्रमाणः· निशा· महत्परिमाणा· कुतः· आकाशभस्योः संबंधस्य सर्वत्रै
करूपत्वान्निरक्षदेशोनयोः समत्वदुत्तरभागेपिसमत्वंतयोरुचितं· वैलक्ष्येकारणाभावात्· यद्यत्तरगोले दिनवृद्धिस्तर्हि रात्रेर्ह्रा
रात्रेर्वृद्धिरथवा दिनस्यापचयो रात्रेर्वृद्धिरितिद्वयोः· कथंनोत्पन्नमेवं दक्षिणगोले दिनह्रासवद्रात्रिह्रासो थवा दिनवृद्धिरात्रिवृद्धी उ
तोनोत्पन्ने· एवं निरक्षाद्दक्षिणभागस्थे उक्तवैपरीत्येनेत्यस्योपपत्तिंवदेतिभावः कथय· चरघटीसहितेत्यादिनियामकस्योपप
त्तिंवदेतिभावः २४ अत्रोपपत्तिमुत्तरंपद्यत्रयेणाह्याम्योत्तरोन्मंडलमध्यसंस्थद्युरात्रवृत्तेतिथिनाडिकाभाः उभूजवृत्तांतर·
संस्थितेनचरेणगोलक्रमतोनाः २५ दिनार्द्धमानंविपलोत्तरेस्याद्युद्वृत्ततोधोस्तपरिस्थरूपं· याम्यविभागे विपरीतमस्याद्यत्लंभ
वेदुत्तरयाम्यवृत्तात् २६ द्युरात्रवृत्तंदलितंयतोतोदिनार्द्धहीनाः स्वगुणानिशार्द्धं· रात्रवृत्तेस्थितिजादधःस्थे रात्रिर्यतः स्याद्दिनमा
नमूर्ध्वे इति· स्वयाम्योत्तरमंडलोद्वृत्तयोर्मध्यसंस्थे होरात्रवृत्तचतुर्भागे· याः पंचदशघटिकाः संपूर्णवृत्तस्पष्टं कितज्ञात· ताः
स्वोन्मंडलस्थितिजवृत्तैकखंडरूपेणचरेणपूर्वप्रतिपादितेन· उक्तगोलक्रमेण· युतोनाः संस्वोदिनार्द्धमानंनिरक्षादुत्तरभागे·
स्यात· हेतुंस्पष्टयति· उद्वृत्तनइति· हि· यतः· स्वोद्वृत्तक्रोलक्रमेणाधस्तादुपरिस्थितिजवृत्तं निबद्धगोलेप्रसक्तं· निरक्षाद्दक्षिण

परदेशे विपरीतं गोलक्रमेण खोन्मंडलात्स्वक्षितिजवृत्तमुपर्यधस्तात्स्वति अस्माद्धेतोः तत्र व्यक्तं स्यात् राश्यर्द्धोपपत्तिमाह उत्तरयाम्यवृ
त्तादिति यतोहेतोः याम्योत्तरवृत्तादुभयत्रभागे होरात्रवृत्तं याम्योत्तरवृत्तेनार्द्धछिन्नमित्यर्थः अतः कारणाद्दिनार्द्धोनास्त्रिंशद्घ
ट्यर्द्धमुक्तं याम्योत्तरावधेकनाराहोरात्रवृत्तार्द्धे त्रिंशद्घटिकानां दिनरात्र्योरर्द्धयोगात्मकत्वात् अतः फलितं दिनरात्र्योर्विसदृश
त्वमित्याशयेनहेतुमुपन्यस्यति यद्रात्रवृत्तेइति क्षितिजवृत्तादधस्तेहोरात्रवृत्तभागे रात्रिः स्यात् ऊर्ध्वे उपरि अहोरात्रवृत्तभागे
दिनमानं यतः स्यात् क्षितिजवृत्ते जवृत्तेनाहोरात्रवृत्तान्यर्द्धभागाछिन्नान्यतो दिनरात्र्योः समत्वाभावाद्विसदृशत्वं युक्तमिति
भावः १२ अथ निरक्षदेशे दिनरात्र्योः समत्वं देशांतरे विशेषांतरमप्यस्तीति भास्करोक्तमनुवदति सदा सर्वसमत्वं च निरक्षे
नोन्मंडलं तत्रक्षजाद्यतोन्यत्र षड्राशिभागाभ्यधिकाः पलांशा यत्राथ तत्रास्य परो विशेष इति निरक्षे लंकायमकोट्यादिदे
शे सदा निसं दिनरात्र्योस्तुल्यमानत्वं हेतुमाह नेति तत्र निरक्षे यतोहेतोः क्षितिजवृत्तादन्यत् अतिरिक्तमुन्मंडलं नास्ति निरक्षे
क्षितिजोन्मंडलयोरभेदात् नरं नररूपचराप्रसिद्धादिनरात्रिमानैर्न योस्तुल्यत्वं न क्षितिजवृत्तस्याहोरात्रवृत्तानामर्द्धछिन्नत्वा
दतएव विषुवद्वृत्तस्य स्वक्षितिजवृत्ते नाप्यर्द्धछिन्नत्वात् स्वदेशे विषुवति दिनरात्र्योः समत्वं चराभावाद्दिनभावः यत्र देशे षड्धि

डॉक्टर भाऊ दाजी लाड स्मारक
DR BHAU DAJI MEMORIAL

कषष्ठिभागेभ्योऽधिका अक्षांशास्तत्र देशे निरक्षाद्याम्योत्तरभागे अपरः उक्तातिरिक्तः विशेषः अस्ति विशेषदर्शनेन तत्र देशे यस्मिन्का
ले विशेषस्तस्मिन्काले पूर्वोक्तस्यासंभवस्तद्यस्मिन्काले विशेषाभावस्तस्मिन्काले पूर्वोक्तस्य सामान्यस्यासंभवो नेति सूत्रचिंतं २८
विशेषमेवाह लंबाधिकांतिरूपकयावन्मात्रदिनं संततमेव तत्र यावच्च याम्यासततं मिस्राभ्यां उत्तरेभ्यस्तमिरंहि याम्येइति उत्तरांतिर्यावच्च लंबांशेभ्यः अन्यत्रा तावत्तत्र देशे संततं रात्र्यवहितं दिनं एवकारात्तत्रकाले पूर्वोक्तप्रसंगः लंबांशाहीनांतौ पूर्वोक्त
रीतिरित्यर्थः यावत् दक्षिणांतिर्लंबांशाद्धिका तावत् सततं दिनात्र्यवहितारात्रिः एकारात्तत्रोक्तकाले पूर्वोक्तनिरासः लंबांशा
हीनांतौ पूर्वोक्तरीतिरित्यर्थः दृष्टसूत्रं निरक्षादुत्तरे मरदेशे दक्षिणे भागे एतद्भ्रमं दिनस्थाने रात्रिः रात्रिस्थाने दिनं लंबांशोनांतौ चरेणैव दिनरात्रिव्यवस्थेति अत्रोपपत्तिः विषुवद्वृत्तात्लंबांशांतरे दक्षिणोत्तरयोः क्षितिजवृत्तं याम्योत्तरेलग्नमस्त्येव तदधिका या
याम्योत्तरांतौ तदहोरात्रवृत्तानां क्षितिजवृत्तसंबंधाभावाद्दिनरात्रिमानसूत्रं युक्तं एतत्कोत्यहोरात्रवृत्तानां क्षितिजवृत्तसंबंधाद्धरगणि
तोपजीव्यदिनरात्रिमानव्यवहारोऽबाधितस्तत्र देशे एतत्कांतिकालेइति निवृत्तोलेप्रत्यक्षं निरक्षाद्दक्षिणभागे व्यस्तमेतत्क्षितिज
स्य व्यस्तावस्थानात् २९ एवं लंबाभावेऽव्यवहितं दिनं रात्रिश्च गोलपर्यंतमिति गोलेदर्शनं विषुवत्तुल्यत्वमेरौ वडवास्थाने च क्षितिज

वृत्तमाह विषुवद्वृत्तं मेरौ क्षितिजमितं तथा च वडवाग्नौ उत्तरयाम्यौ क्रमशो मध्ये ऊर्ध्वगतौ ध्रुवौ यतस्तत्रेति मेरौ वडवाग्नौ तथा समुच्चये विषुवद्वृत्तं क्षितिजस्थं वृत्तं याम्यं तयोः क्षितिजं विषुवद्वृत्तमित्यर्थः कुतस्तद्वृत्तमुत्तरयाम्या विति यतः कारणात् तत्र तयोरित्यर्थः उत्तरदक्षिणौ ध्रुवौ नात्मकौ क्रमात् मस्तकोपरिस्थितौ ध्रुवात्तवस्थानेरे परितो वृत्तं क्षितिजं तद्विषुवद्वृत्तमेवेति भावः ३० तयोर्दिनविभागमाह उत्तरयोर्गोलेक्षितिजाद्ध्वं परितो भ्रमं तमेव खगं सव्यं तत्स्थाः क्रमशः पश्यन्ति शं सव्यगं याम्येऽपि तत्स्थाः मेरुवडवानलस्थाः क्रमशः उत्तरगोलेदक्षिणगोलेक्षितिजवृत्तादुपरि परितः आसमंतात् सव्यं पूर्वदक्षिणपश्चिमोत्तरदिक्क्रमेणेत्यर्थः अभ्रमं प्रवहवायुनाभ्रममाणं ग्रहं असव्यगं पूर्वोत्तरपश्चिमदक्षिणदिगिति क्रमेणेत्यर्थः अनिशं निरंतरमव्यवहितं निशारहितं पश्यन्ति मेरावुत्तरगोलेदिनभागः वडवानलेदक्षिणगोलेदिनभाग इतीतास्यार्थः दक्षिणोत्तरगोलौ रात्रिभागौ तयोरित्यर्थात्सिद्धं ३१ अथ प्रसंगात्सिद्धेन्दोर्दिनरात्रिव्यवस्थापद्याभ्यामाह विधूर्ध्वभागे पितरो वसंतः स्वावः सुधादीधितिमामनंति पश्यन्ति ते कैस्वकयाम्यसौम्ये दर्शो यतोस्माद्ध्रुवदलं सएषां ३२ षड्भांतरस्थान्नविधोरधःस्थं तस्मान्निशीथः खलु पौर्णमास्यां कुक्षेरविः पश्यति लेभ्रदेति शुक्लमेत्यर्थतएव सिद्धमिति चंद्रबिंबगोलस्योर्ध्वभागे भूमिगोलानभिमुखे पितरो यिष्वान्नादयो धिनिष्ठंतः ननु चंद्रबिं

बस्य मणेनेषांपतनापत्तिरित्यतआह स्वाधरति सत्यान्मनोधस्तात्चंद्रबिंबगोलं मन्यंते भूगोलेसमंतात्स्थिताजना अव्याकुलाः स्वाधोभूमिमन्यंते तद्वदिति भावः ते पितरः दर्शे अमांते यतः कारणात्सूर्यबिंबं स्वकयाम्यसौम्ये पश्यंति शराभावे निजमस्तकसमसूत्रेणोर्ध्वं पश्यंति उत्तरदक्षिणशरे स्वमध्याद्याम्योत्तरवृत्ते याम्योत्तरभागे क्रमेण पश्यंति न पूर्वापरभागे अस्मात्कारणात् सः दर्शो नः एषां पितॄणां ध्रुवदलं मध्याह्नकालः पौर्णमास्यां पौर्णमास्यंते षड्राश्यंतरस्थात्स्वाधिष्ठानचंद्रबिंबगोलाद्धः स्थितं सूर्यं यतस्तेन पश्यंति तस्मात्कारणात्पितॄणां निशीथः मध्यरात्रकालः कुक्षेपक्षाद्दे अन्नपक्षाद्दे अर्कः अभितः उदेति पितॄणामुदयविषयं गच्छति शुक्लेपक्षाद्दे सूर्योस्तं तेषामस्तविषयं गच्छति क्रमेण दिनारंभसमाप्तीस्तः इदमर्थतोस्मायात्तदर्शो नपूर्णिमां नयोस्तेषां दिनार्द्धराम्र्द्धयोः सिद्धत्वात् एवकाराद्यत्क्रमंतरप्रतिपादननिरासः सिद्धं अतुक्रमेवनिष्पन्नं मेरुवडवानलनिरक्षेषु साक्षे विषुवद्दिनेमध्यरात्रमध्याह्नकालमेव्येयथायोग्यमुदयास्तयोर्निर्णीतत्वेनैकत्रमिलीतः शास्त्रार्थो परत्रभवतीति मायाज्ञेति भावः यद्यपि यथाभूगोलार्द्धद्वयसंधिस्थं वृत्तं क्षितिजं तथा चंद्रबिंबगोलोर्ध्वभागस्थानां पितॄणां चंद्रगोलार्द्धसंधिस्थं वृत्तं क्षितिजं तन्मसमसूत्रेण सकलास्तु सूर्यो पदा भवति तदा तेषां सूर्योदयः सूर्यास्तो वास्यादतः सितोपजीव्यचंद्रस्य वृद्धिक्षयमाणस्य सूर्येण त्रिभांतरं तदैवाकोलोदयाविति

यस्तार्द्धं क्रान्तुदयास्तावन्तुचिनौ तथापि यस्तार्द्धस्य स्थूलकालोपलक्षणत्वेनोक्तेः पूर्वदलेदृसस्य तदासन्नेभिमतकालेदृसर्थाद्दुक्रमुचि
तमेव ३२ कालाछेंक्षानयनस्योक्तस्योपपत्तिं पद्यत्रयेणाह द्युरात्रवृत्ते हि तिजिद्दृहस्य तद्दुन्नतं यद्दिवरं नतं तु पाम्योत्तरात्स्या
द्दलयादधोयास्तद्दृन्नखेटांतरकालजीवा ३४ सूत्रं भवेत्तत्रनजोक्रमज्याहीनत्रिभज्यासमसे नरेव कुज्याप्रमाणेन कलगला
भिधंस्वयस्तोदयास्तोद्भवसूत्रमध्ये ३५ कुज्यास्थितायाथ नयाविहीनयुक्तोक्तरीत्याच कलाख्यतिः सा यहोदयास्तोद्भवसूत्र
मध्यसूत्रान्तिकास्पास्तनरोनुपातादिति भूगर्भस्थितिजवृत्तात् यहबिंबस्याहोरात्रवृत्ते यदंतरं तद्द्युत्मकमुन्नतं याम्योत्तर
वृत्तात्दृहोरात्रवृत्ते यदंतरं तन्नतं घट्यात्मकं मुन्नतं याम्योत्तर
वृत्तेसूत्रं स्यात् गोलक्रमेणेत्यादिदलमुपपन्नं अनंतरमुन्नमंडलयहयोरंतरकालस्य ज्याहोरात्र
वृत्तेसूत्रं स्यात् गोलक्रमेणेत्यादिदलमुपपन्नं अनंतरमुन्नमंडलयहयोरंतरकालस्य ज्याहोरात्र
ननात्सूत्रसाधनमुपादयति तदिति तत्सूत्रं नतकालोक्रमज्योनत्रिज्यया तुल्यं तथाहि अहोरात्रवृत्ते याम्योत्तरवृत्तवद्दसूत्रं म
ध्यसूत्रं तस्यार्द्धज्यायहयर्यंतमहोरात्रवृत्ते नतज्या नतज्यावर्गो नत्रिज्यावर्गपदं सूत्रमनोध्रुवसूत्रपर्यंतं मध्यसूत्रार्द्धं त्रिज्यसं
पंनतोक्रमज्यया त्रिज्याशरूपया हीना ध्रुवसूत्रपर्यंतं नतज्या धोमध्यसूत्रखंडं पूर्वोक्तसूत्रैत्र समं समसूत्रेणानिबद्धगोलेप

सूत्रं एतदेवसूत्रं कुज्याप्रमाणेन मापितं कलाख्यं सूत्रकलयोर्मानरूपत्वो विशेषो नस्तीत्यभावः तत्रपपत्तिमाहस्वयस्ते
ति स्वदेशः स्वयस्तदेशः अनयोरुदयास्तलग्नेप्राग्रूपेनयोरंतराले योक्रा कुज्यासमानरेणावस्थिता तया कुज्यया समसूत्ररू
पया कला उक्तरीत्या उदग्दक्षिणगोलगे कुज्यायुतोनाकालिकेतिप्रकारेण हीनयुक्ता सा पूर्वोक्ता तदिः कुतदसनसत्वरू
पमाहयहेति यहस्थानस्योदयास्तसूत्रयोरंतरालसूत्रस्वरूपा नन्वेवमस्याउन्नतकालसूत्ररूपत्वेनलाघवादुन्नतज्यैव
सिद्धेरेतद्गौरवेणसाधनमयुक्तमिति चेन्न स्योदयास्तसूत्रस्याहोरात्रवृत्तमध्यसूत्रत्वाभावान्नदवधिसूत्रस्योन्नतज्यात्वासि
द्धेः शंकूपपत्तिमाहत्रस्याइति कर्णरूपेपदृतेः सकाशादक्षेत्रानुपाताछंकुरूपकोटिः स्यादेवेसर्थः ३६ पूर्वानयन
विशेषोपपत्तिंसूत्रयन्नुपपत्तिमुपसंहरति ननोन्नतप्रोक्तविधौ विशेषाबुद्धजवृत्तांतरगयहेतुगोलेस्फुटौतौसुधियाबम
स्याविस्फुटशंकोरपपत्तिरुक्तेति ननोन्नतकालाभ्यामुक्तप्रकारेयोविशेषो दिनाधिक्येत्यादि यत्रक्वचिदित्यादिरूपावुक्तौ
तौ गोले निबद्धे उद्दृत्तक्षितिजवृत्तयोरंतर्गताहोरात्रवृत्तैकदेशप्रदेशस्थेयहेप्रसक्तौ सुधियास्वतोज्ञेयौ विशेषोपपत्तिर्गो
लेप्रत्यक्षेति सुगमोयेक्षितेति भावः तथाहि तत्रस्थेयहेसूत्रमुद्दृत्तारंभोमुखमिनीष्टकालोनचास्यज्या कलापितदनुरोधे

नाधोमुखीनिकृज्यातो विशोध्याहूनिरिस्कृकेयत्रेसाद्यपपन्नं· भ्यानएवतत्र पंचदशाधिकनते पंचदशाधिककाले सूत्रस्पाक्र
मज्योक्तेनिसर्वंनिरवद्यं· इत्येवंकालानानशंकोरुपपत्तिः प्रतियारिना ३७ शंकुदृग्ज्याभ्यांछायाछायाकर्णावाहदृग्ज्याविजीवे
रविसंगुणेतेशंकुकृतेभाश्रवणौभावेतौ· एवंहिसाध्यौस्वदुगर्भदेखेटस्यबिंबस्थितकेंद्रनानाविति· एवं· पूर्वोक्तप्रकारे
ण· स्वदेशावच्छेदेनभूगर्भप्रदेशे· ग्रहस्य· बिंबस्थितंयत्केंद्रं· तदीयौछायाछायाकर्णौसाध्यावभीष्टौ· यथाग्रहभोगाणांकेंद्री
यत्वंतथानयोरपिकेंद्रीयत्वमितिभावः ३८ अस्योपपत्त्यर्थंछायाक्षेत्रेभाहशंकुदृग्ज्याविभज्याःस्फःकोटिदोः अनयः
क्रमात्· भौर्धक्षेत्रेलघ्वोतुस्फः सूर्यभाश्रतयलघ्वेति· छायायाऊर्ध्वीयक्षेत्रे· पूर्वोक्तदृहक्षेत्रे· लघावपवर्त्तिते· द्वादशां
गुलशंकुतच्छायाछायाकर्णाःतथा· क्रमात्कोटिभुजकर्णाः· अतएवशंकुकोटीदृग्ज्याविज्ये भुजकर्णौतदाद्वादशकोटी
काविकैस्फक्रानुपातेनछायाछायाकर्णौलएवेस्फपपन्नमितिभावः ३९ अथभूपृष्ठेछायासाधनार्थंस्पष्टयोजनक
र्णबिंबतुल्यावत्रदुपयुक्तमध्यमयोजनकर्णार्थंकक्षानयननिमित्तंखकक्षांतत्स्वरूपंचाहवेदांगमंगलखनागखसूर्यसप्त
नागैर्दवः प्रयुतसंगुणिताः खकक्षा· कल्पेग्रहः स्वबलयेस्वजवेनगच्छेत्सन्मानयोजनचयंनियतंभुनक्ति· मंगलाग्रष्टः ए

तेंकाःप्रयुतेन· दशलक्षेण· गणिताःसंतः· चैसंखकक्षाभवति· ननुखस्यपरिधिरित्यर्थस्याकाशस्यानंतत्वान्नयुक्तइत्यतः पारिभा
षिकःखकक्षाशब्दइत्यभिप्रायेणाहकल्पेइति· ग्रहःस्वकक्षाक्षेत्रेस्वगत्यागच्छन्सन्· तन्मानयोजनचयं· प्रोक्तखकक्षापरिमितयो
जनान्यवश्यं· भुनक्ति· गच्छतीत्यर्थः· ग्रहस्यकल्पेस्वशक्त्यागमनयोजनसंख्याखकक्षापदवाच्या· अतएवब्रह्मांडमेतन्मितम
त्रलोवाकल्पेग्रहःकक्षामनियोजनानि· यावंतिपूर्वैरिहतत्प्रमाणंप्रोक्तंखकक्षाख्यमिदंमतंनइतिभास्करोक्तंसंगच्छते· नच
ग्रहस्यकल्पावधिग्रहचाराभावात्कथमेतदिति वाच्यं· मंदोच्चपातभगणावत्कल्पकालेयुगप्रमाणानुरोधेननक्रमनयोजन
संख्याकल्पनस्याबाधितत्वात्· अत्रोपपत्तिरागमः· केचित्तुचंद्रोदयमारभ्य चंद्रास्तकालपर्यंतंघटिकाः जलवालुकायंत्रा
भ्यांज्ञाताभ्रष्टदिनमानं· चंद्राक्षरेणपदिनमानंनभूगभौयंतयोःसाजातरेणोभयतोभिनिलिखाभ्यासयोजनानिनं
दाहोरात्रघटीभिःकानीसनुपातेनस्पष्टचंद्रकक्षा· स्पष्टगतेयंतदामध्यगस्यकेनियस्तानुपातेनमध्यमकक्षा· एकभगणभो
गेनैतानियोजनानितदाकल्पभगणैःकानीतिखकक्षामितयोजनानीसाद्धः ४० अथग्रहस्यकक्षानयनंतत्रमंचाहय
स्यग्रहस्यखखदिग्गुणितैःस्वचक्रैर्भक्तालिप्तंफलमितारवलुनस्यकक्षा· यस्यग्रहस्यभगणावहवोस्यकक्षाभोस्यास्तयस्य

भगणाः सतद्धर्धकक्षैरिति यस्य ग्रहस्य स्वाभिमतयुगभगणैः सहस्रगुणितैः कल्पभगणरूपैः इयं खकक्षा भक्ता फलप्रमाणयो
जनात्मकग्रहस्याकाशगोलपरिधिर्मध्यमो भवति एवं ग्रहाणां कक्षाः तत्र यस्य ग्रहस्य भगणाः बहवोधिकाः अस्य ग्रहस्य
कक्षाधस्तात् यस्याल्पाः भगणाः सः ग्रहः तद्धर्धकक्षाः तस्मात् अधःकक्षाग्रहादुपरिकक्षायस्येत्येतादृशः अन्यथा क
क्षासंनिवेशानुपपत्तिः ४१ ननु क्रीस्योच्चयोर्भगणसम्भावात् कक्षाप्यनिवारिनेति पूर्वं पातोच्चनिवाहैकग्रहप्र
दाभिनिवेशः कथं युज्यते इत्यतो विशेषं चाह ग्रहस्य कक्षैव हि तुंगपातयोः कक्षा एव अस्मिन्नयोस्तु वास्तवा भुक्तयो
रात्मचलोच्चकक्षयोः स्थितिर्यतोर्केणनतुल्यकक्षेति ग्रहस्य कक्षाः उच्चपातयोः कक्षा एव कारोनिरिक्तकक्षयोर्निरा
सार्थकः नतु भगणाधिक्ययोः कक्षयोर्गतिः केवलं आह पृथगिति तयोरुच्चपातयोः पृथक् ग्रहकक्षातिरिक्तावस्तुभूताधि
ष्ठानानुमितानास्ति ग्रहवत्तयोः स्वरूपाप्रसिद्धेः भगणोपजीव्यकक्षेकक्षागणितगुणितोपयुक्तः अतएव फलाभावे ग्रह
स्थानमेवोच्चं पातोपि शराभावे ग्रहस्थानमिस्फुटं ग्रहकक्षातयोरिति सम्यक् नचैवं बुधशुक्रयोः सूर्यभगणतुल्यभगणत्वे
नार्धकक्षैवतयोः कक्षा तत्रत्रयाणां प्रोक्तबिंबानां परस्परं मंडलभंगापत्तेः एकत्रावस्थानासंभवेनायुक्तमेतदिति आह शुक्र

स्तयोरिति आत्मनोर्ये शीघ्रोच्चभगणास्तत्रैकक्षेतयोस्तयोरवस्थानं यतः प्रसक्तं पूर्वं ग्रंथे व्यक्तादितं चातः सूर्येणतुल्यकक्षिका
अभिन्नकक्षागणितसिद्धान्तयोर्नस्यात् तथाच नानुपपत्तिरिति भावः ४२ अथ तत्र चंद्रकक्षायोजनकर्णो मध्यमो वा
हरवाभ्रखाग्निरद्रयोजनैर्मितस्तोयगोलशशिनोथ मध्यमः व्योमगोलपरिधिः कुगजैर्मतः खाद्रिपंचकुशरैः समंततः
इति भूगर्भात्तवाद्रीस्थाकक्षयोजनैः समंतात् जलगोलस्वरूपचंद्रस्याकाशगोलपरिधिर्मध्यः खाभ्रेस्थाकक्षयोजनमितः
अत्र चंद्रस्य तेजसत्वं नार्विकाभिमतं नांगीकृतं ग्रहणचंद्रशृंगोन्नत्यनुपपत्तेः जलगोलत्वे तदुपपत्तेश्च समर्थितं चैत
न्मरीचाविस्फुरत्यस्य विस्मरात् ४३ बुधशुक्रयोराहतेजोगोलबुधस्य वेदसुगषशृंगेंदुसंख्योच्छ्रिताभूमध्यात्परि
तोनगाभ्रखरैर्वेदाशोन्मिताकक्षिका तेजोगोलस्य तस्य समगुणषट्द्वंगतर्काभिनः कक्षास्वर्गकुवेदरसनिगमैस्फुटं
तदोच्चं अनिरिति तेजोगोलस्वरूपबुधस्य भूगर्भात्समंतात् वेदसुगेस्याकक्षयोजनोच्छ्रितनगाभ्रेस्याकक्षयोजनमिता
कक्षा पूर्वोक्तः कर्णः द्वितीयोक्तः कक्षा तेजोगोलस्वरूपशुक्रस्य समगुणेस्यादिपंचमोक्तः कक्षा तस्याच्चोच्चं उच्चता कर्णः
स्वर्गस्यादिद्वितीयोक्तः अत्र बुधशुक्रयोस्तेजसत्वमेवाहतं जलमयत्वे शृंगोन्नतिदर्शनापत्तेः सूर्यस्य बिंबे कदाचित्स

नमस्कृतादर्शनप्रसंगाच्च ४४ सूर्यभौमगुरूणामाहनेजोगोलरवेस्तत्वाभ्यतिथिवद्ग्रहयुद्धयः कक्षिकाभ्यां कगजारयः
निरयोभौमस्यकक्षाभ्रनीजौधांकांगयुगेंहिमानपनगांकाश्चिचंद्रायुरोर्वेदांगाद्रिशराद्रिविश्वपवनागोत्वाग्नगाद्रिभा
इति भौमगुर्वोस्तैजसत्वेजलमयत्वेवास्वमतेनिर्वाहादेकतरस्याप्यनुक्तिरनिष्टेयं पद्यार्थः स्पष्टएव ४५ शनिनक्षत्र
गोलयोः परिधिकर्णौकर्णौपपत्तिं चाहयंचेषश्विगजांगषड्रशिनः कक्षाशनेसप्तुनिर्मत्रीषभयमायिशून्ययमलाऊ
र्ध्वभद्वत्तनतसूर्याभ्भनवाष्टगोद्रयमाः कर्णस्तुभाक्षेषुषड्विश्वाद्रिमिनोथवृत्तवशतोमासाद्रिमानभवेदिति षड्
भानिसप्तविंशतिः शशी एकः तस्यशनेः कर्णः भूगभोदुच्चतानतः शने ऊर्ध्वं अस्यपरिभगोलपरिधिः सूर्याभ्ये
सास्यः वृत्तवशतः परिधिमाणेनानुरोधान्मध्याधिकारोक्तपरिध्यानयनचेपरीसाद्वगतव्यासस्यार्द्धप्रमाणं भूगभो
दुच्चताकर्णसंज्ञकक्षामध्यकेंद्रस्यभूगर्भत्वात् ४६ अथपारसीकंकक्षाकर्णमानंयैस्वग्रंथेउक्तंतत्स्वमतेनादरणीय
मित्याहयवनरचितवेधाद्येनकक्षानिरुक्ताः सकलमुनिमतेभ्यस्तामहाभेदयुक्ताः निखिलगणकवर्यैर्नोदृताःयुक्तभा
वात्तरदृगविषयेर्थेवाक्यमेवप्रमाणमिति येन यवनकृतवेधप्रामाण्यासारसीकसंस्कृतीकरणार्थंस्वग्रंथे याः क

क्षानिरूपितास्तीक्ष्णाः सर्वर्षिसंमतकक्षाभौमहरंतरिताः अतस्तांप्रतंयेगणकवर्यास्तैः सर्वैरनंगीकृताः ननुमुनिप्रोक्तविरु
द्धंप्रसक्तसंवादादंगीकार्यमेवेसत्याहयुक्तभावादिति मुनिप्रोक्तविरुद्धंगोलसंयुक्तिसिद्धमंगीकार्यं तासांगोलयुक्तिसि
द्धत्वस्यानिर्णयादितिभावः ननूपलब्धेर्वगोलसिद्धत्वनिर्णयरसत्याहनरदृगिति यास्मादृशांनराणामुपलब्धिः सैवप्रमाण
ननुपूर्वनराणांपूर्वकालिकोपलब्धिरिदानींप्रामाण्योपयादिका इदानींतादृशोपलब्धिसद्भावेप्रमाणाभावात् उपलब्धि
प्रकारस्यास्मादृशामशक्यत्वाच्चगोलयुक्तस्मादृग्दृष्टोरगोचरेर्थेमुनिवचनमेवकारान्नदृगतिरिक्तयुक्तंनराभासनिरासः
प्रमाणं ४७ नचिदानीमपियहणादिसंवादेनपूर्वोपलब्धिःप्रमाणं उपलब्धेस्तत्कालसंबंधेनांगीकृतत्वादन्यथोप
लब्धपलापप्रसंगादसत्याहयतोरसाध्यंतत्कालसंमतंसमयांतरे स्थूलदृष्टिभवेनैवकथंस्यान्नियतंनतदिति यतः कार
णात् अस्मादृशानरैःसाध्यंग्रहकर्म तत्कालसंमतं उपलब्धिकालावधिसंवादि स्थूलदृष्टोसादितमिदं नरदृशः सूक्ष्म
स्वादिषयत्वात् समयांतरे उपलब्धिसंबद्धकालातिरिक्तकाले नैवसंवादिभवेत् अतः कारणान्ननूपलब्धेरनियतायाः
नियतंकथंसिद्धंस्यात् सिद्धांतग्रंथेसार्वकालिकंवक्तव्यं उपलब्धिस्तुनसार्वकालिकेतितत्सिद्धंवस्तुसिद्धांतग्रंथनिबंधना

निबंधनानुचितं करणग्रंथेत्पत्तिसिद्धनिबंधनमेवोचितं तस्यात्यकालसंबंधादिति भावः ४८ अथस्पष्टकक्षानयनेसोपपत्तिकमाह ग्रहस्पष्टकक्षानिजकर्णनिघ्नीस्फुटाभवेद्व्यासदलेनभक्ता तद्व्यासखंडांतरितः कुमध्यात्मभ्रम्यतेहि प्रवहानिलेनेति ग्रहस्यप्रागुक्ताकक्षायोजनात्मिका स्वकर्णेनस्पष्टाधिकारोक्तेन सूर्यचंद्रयोर्मंदकर्णेन भौमादीनांशीघ्रकर्णेनभौमादीनांशीघ्रकर्णेनसूर्यः गुणिता त्रिज्याभक्ता स्फुटाकक्षास्यात् अस्या स्वरूपमाह तदिति भूगर्भात् तद्व्यासखंडांतरितः मंदकर्णशीघ्रकर्णाभ्यतररूपेणव्यासार्द्धेनांतरितः सः ग्रहोबिंबात्मकः प्रवहानिलेन ह्रियतोभ्राम्यते भूगर्भाद्ग्रहबिंबयदांतरेणसकर्णः तेनांतरेणग्रहभ्रमणंवायुनाक्रियतेतत्रभ्रमणेनवृत्तेस्पष्टकक्षाबुद्धिकल्पिताकाशवृत्तरूपासिद्धाकर्णव्यासार्द्धे त्रिज्याव्यासार्द्धेप्रागुक्तायोजनात्मिकाकक्षातदाकर्णव्यासार्द्धेनकेसनुपातावगतोपपन्ना ४९ अथ सूर्यचंद्रयोः स्पष्टयोजनकर्णानयनमाह योजनकर्णौगुणितौसूर्येद्वौमंदकर्णाभ्यां त्रिज्याभक्तौस्पष्टौजनकर्णौतयोर्भवतरनि सूर्येद्वौ प्रागुक्तौयोजनकर्णौ सूर्यचंद्रयोः मंदकर्णाभ्यां क्रमेणगुणितौत्रिज्याभक्तौ तयोः सूर्यचंद्रयोर्योजनकर्णौस्पष्टौस्तः ५० भौमादीनांस्पष्टयोजनकर्णानयनंवैनत्स्वरूपंचोपपत्त्यर्थमाह भौमादीनांषाश्रतिर्योजनाख्याक्षिप्त

MEMORIAL

असासाहतात्रिज्याकाप्ता स्पष्टाः कर्णायोजनाख्याभवंतिनेव्यासार्द्धाः स्पष्टकक्षोत्पत्तौहीति हि यतः ते स्पष्टयोजनकर्णाः स्पष्टकक्षीयाः व्यासार्द्धाः स्पष्टकक्षानयनानुपातवत्स्पष्टयोजनकर्णानयनानुपातइतिभावः ५१ भास्करमतंदूषयति शिरोमणोपाकधिनारवीद्वौमंदश्रुतीसादिकलाश्रुतिरूः सायुक्तभावाचसतीमुहूर्यामंदश्रुतिः सापिनयुक्तिसिद्धेति सिद्धांतशिरोमणौचंद्रग्रहणाधिकारे मंदश्रुतीसादिकलाश्रुतिः मंदश्रुतीसादिनापद्येनकलाश्रुतिः सूर्यचंद्रयोर्याकक्षाव्यासार्द्धरूपाभास्करार्थेरक्ता तथाहि मंदश्रुतिर्द्वादशश्रुतिवत्सासाध्यानयात्रिभज्याद्विगुणाविहीना त्रिज्याहृतिः शेषहृतास्फुटाःस्याच्छिप्राश्रुतिस्निग्धरुचेर्विधोश्चेतिनसर्वं अत्रमंदकर्मणिकर्णानुपातानुक्तेर्मंदनीचोच्चवृत्तपरिधिभागाउक्ताः कर्णायेशीघ्रनीचोच्चवृत्तपरिधिभावत्तांगीकृताः किंतुत्रिज्यायेस्वीकृताः येनैषांकर्णायेपरिणामेनफलस्यतदानीतस्यकर्णानुपातेनकर्णतुल्यगुणहस्योः समखेनभाशात्कर्णानुपातानुक्तिः संगतेति तथाचत्रिज्यायस्थितपरिधिभागेभ्यः साधितमंदकर्णस्यस्थूलत्वात्कर्णायस्थितपरिधिभागेभ्यः साधितमंदकर्णस्यशीघ्रकर्णवत्सूक्ष्मत्वाद्वयर्वमंदपरिधिभागानांकर्णायोयाभमज्ञानात्स्थूलमंदकर्णात्यथमासारिधिभागालेभ्योसफलज्यया कर्णइससहत्सूक्ष्मोमंदकर्णः कक्षाया

साईरूपः कलाकर्णस्तत्र त्रिज्यातुल्यप्रथमकर्णे उक्तरीत्या सकृत्साधितो मंदकर्णः विकारात्त्रिज्यातुल्यः कलाकर्णस्तथा त्रिज्याधिक
न्यूनप्रथममंदकर्णाभ्यामसकृत्साधितमंदकर्णौ क्रमेणाधिकन्यूनावेव तत्रापि त्रिज्यातुल्यमंदकर्णे त्रिज्यातुल्यः कलाक
र्णस्तदाभिमतमंदकर्णकदृस्यनुपातेन मंदकर्णो लिप्ताकर्णदृस्यसंख्यस्यानुपातस्याप्रसक्तत्वाच्च षड्भांतरितमंदकर्णानानु
पातः कृतः तद्यथा त्रिज्यातुल्येन षड्भांतरितमंदकर्णेन त्रिज्यातुल्यो लिप्ताकर्णस्तदाभिमतषड्भांतरितमंदकर्णेन स्वाभिम
तमंदकर्णो न द्विगुणत्रिज्याभितेन कदृति प्रतिवृत्तव्यासस्य द्विगुणत्रिज्याभितत्वाद्भूग्रहबिंबांतररूपकर्णेन व्यासस्य षड्भांत
रितस्थानीयकर्णत्वसिद्धेः अत्राभिमतकर्णाधिकन्यूनत्वेन कलाकर्णस्य निश्चितत्वादिष्टाष्टौ फलेष्टासोहासे वृद्धिरिष्टक्र
लाद्यस्तः पर्यवसितः सदृक्पपत्राभास्करोक्ता कलाश्रुतिरिति सा कलाश्रुतिः सती समीचीनानहेतुमाहयुक्तभावादिति
उक्तप्रकारेण स्वाभिमतकर्णाधिकन्यूनकलाकर्णसिद्धावप्यसकृत्साधितसूक्ष्ममंदकर्णरूपकलाकर्णसिद्धौ युक्तभावादि
त्यर्थः नन्विदमाचार्यैरेतत्प्रकारोक्तौ स्वगणितिकप्रागल्भ्यं प्रदर्शितं न त्वेतावता किंचित्स्थूलत्वेप्यसकृत्साधितमंदकर्णरू
पसूक्ष्मलिप्ताकर्णं आचार्याभिमतो निरावर्तुं शक्यः अतएवाचार्यैर्लघुतरशिष्यधीवृद्धिदं तत्र व्याख्यानवद्भिः स्पष्टयोजनक

र्णानयने मंदश्रुतिरित्यस्यासकृत्साधितमंदकर्णदृस्यसंख्यानं पुज्यते इत्यतो युक्तभावादिति हेतोरभिप्रायं स्पष्टीकुर्वन्नाह सुद्ध
रिति असकृत्साधितायामंदश्रुतिः सा एवकारार्थोपि शब्दः पुनिभिः साधयितुमशक्येत्यर्थः तथा च मंदकर्णस्यासकृत्साध
नेभवदुक्तं कलाकर्णानयनं युज्यते इति प्रथमतस्तदेशकासकृन्मंदकर्णसाधनमयुक्तं मंदपरिधिभागानां शीघ्रपरिधिभागवत्क
र्णानीयत्वैकरीतिकल्पनोचितेन तदानीं मंदकर्णस्य स्थूलत्वायोगात् विनास्थूलत्वं तदनुपपत्तेः अन्यथा भौमादीनामपि शी
घ्रकर्णात्कलाकर्णानयनोक्त्यापपत्तेः न च मंदकर्णानुपातानुक्त्या मंदपरिधिभागानां त्रिज्यानीयत्वकल्पनात्सर्वं समुचितमिति
वाच्यं मंदपरिधिभागानां शीघ्रपरिधिवत्कर्णानीयत्वौचित्येपि मंदकर्णानुपातावश्यकत्वेनदुपेक्षयालघुभूतगणितांगीकारात्त
त्स्थूलगणितांतरस्यासकृत्साधनेसिद्धेरिति प्राच्यिणीतत्वात् नन्वेवं भौमादीनामुचितमभूत्सूर्यचंद्रयोस्तत्सकृत्साधनानु
क्तेर्लिप्ताकर्णस्योक्तिर्युक्तैवेति चेन्न तयोरपि सकृत्साधनस्यानिवारितत्वात्स्वल्पांतराद्वासकृत्साधनांगीकारात् न चासकृत्सा
धनात्सूर्यचंद्रयोर्भौमाद्यनिमशीघ्रकर्णग्रहणवदर्थसिद्धमंतिममंदकर्णग्रहणं नतु सकृत्साधितमंदकर्णपर्यवसन्नमि
ति वाच्यं मंदकर्णानुपातोपेक्षया प्रथमशीघ्रकर्णस्य स्थूलत्वेनासकृत्सिद्धौ तिमशीघ्रकर्णस्य सूक्ष्मस्य ग्रहणोचितात्

सूर्यचंद्रयोस्तत्प्रथमं मंदकर्णयोरेव सस्त्वात्तद्दृग्गौचित्यात्. असकृत्साधनं तु तयोर्मंदकर्णानुपात्स्यागजनितांतरसिद्ध्यर्थं. अतएव मंदकर्णानुपातो त्रिपक्षे मंदशीघ्रफलयोरेकदैव सस्त्वयोः सिद्धेः शीघ्रकर्णानासकृदिति नत्वं ५२ भूपृष्ठीयशंकुं साधयति. स्वयोजनाख्यस्फुटकर्णभक्ताभ्यासखंडेन हता भज्या. लब्धेन हीनो निजशंकुरेषः स्याद्भूमिपृष्ठे प्रथमैव दृग्ज्येति. स्वस्य ग्रहस्य योजनाख्यस्य स्फुटकर्णेन प्राग्युक्तेन भक्ता. भज्या सार्द्धेन गुणिता त्रिभज्या. लब्धेन ग्रहस्य शंकुः पूर्वानीतो हीनः एषः शेषभूतः भूमिगोलपृष्ठे शंकुः स्यात्. दृग्ज्या प्रथमागतैव. न तु शंकुवदिन्ना. खस्वस्तिकस्याभिन्नत्वात् ५३ अस्योपपत्तिमाह कुपृष्ठगानां कुदलेन हीनं दृग्खंडलार्द्धं स्फुटमयत्र दृश्यं. कुछत्रसूत्रं तु रतो विशोध्यमेतत्प्रकारावगतं प्रभार्थमिति. भूपृष्ठस्थानां मनुष्याणां भज्यासार्द्धेन. उभयत्र पूर्वापरयोः प्रत्येकं हीनं. दृग्सूत्रार्द्धं दृश्यं स्यात्. भूगर्भे हि निजस्य गोलमध्यस्थत्वात्तत्र दृग्खंडलस्यार्द्धयोरूर्ध्वाधरयोर्दृश्यत्वेन तत्तो भूपृष्ठे हि निजस्य भज्यासार्द्धान्तरेणोन्नितत्वाद्दृश्यदृग्खंडलार्द्धपूर्वापरभागयोः प्रत्येकं भज्यासार्द्धयोजनसूत्ररूपार्द्धज्यासंबंधिनैधनुर्दृग्भागैरूनं दृश्यं यतः. अतो हेतोः. कुछत्रसूत्रं. भूस्पाछादितसूत्रं. भज्यासंबंधि. एतत्प्रकारावगतं. पूर्वं यद्यार्द्धं. स्फुटयोजनकर्णे त्रिज्यातो भज्यासार्द्धयोजनैः वेस्फुटपपन्नं. तु शंकोः सकाशाद्विशोध्यं. शंकु

भूपृष्ठे भवति. अस्य प्रयोजनमाह प्रभार्थमिति. पूर्वं भूगर्भसंबंधिनः शंकोः छायोक्ता भूगर्भीयाऽस्याः प्रतीत्यभावाद्भूपृष्ठे मनीनिजनकछायासाधनार्थं शंकुः साधितइति भावः १४ भूपृष्ठे छाया छायाकर्णाद्वाहपूर्वोक्तदृग्ज्यारविसंगुणेन तन्नरेण भक्ताद्भिन्नभूपृष्ठभास्यात्. तद्दर्गवेदेदृश्यतेः यदंतर्दृक्कर्णः स्वाविंबस्थितमध्यजातइति. पूर्वोक्तदृग्ज्येत्यनेन भूपृष्ठशंकोस्त्रिज्यानत्वपोक्तमजीवयोनादृग्ज्यानसाध्या. भूगर्भे शंकुदृग्ज्यात्रिज्याभिः क्षेत्रसंस्थानवद्भूपृष्ठे शंकुदृग्ज्याभ्यां गोलवृत्तमध्यत्वाभावेन क्षेत्रसंस्थानाभावादिति सूचितं. द्वादशगुणा. एतच्छंकुना. भूपृष्ठीयसाधितशंकुना. भक्ता. भूपृष्ठे छाया द्वादशांगुलशंकोः स्यात्. यद्यपि भूगर्भे तत्प्रकारत्वेन यं छाया शंकुमूलात्सूत्ररूपान भूपृष्ठसंबद्धा वृत्तांशरूपा. अन्यथोक्तानयनं भूपृष्ठवस्तमाणछायारूपयोरनुपपन्नेरित्यस्या भूपृष्ठसंबद्धत्वं साध्यं. तथाप्यत्र कायनपालोक्ताः स्वस्थानात्सर्वतो मुखं. पश्यंति वृत्तामध्येनांचक्राकारं वसुंधरामिति सूर्यसिद्धांतोक्तेः परिधिभागस्यापि भूप्रदेशस्य समत्वोपलंभात्तत्साधनमतिदुर्गमं विशेषादुपेक्षितमिति यं तयं. तस्याः भूपृष्ठछायायाः वर्गः. चतुर्भ्यस्त्रिंशदधिकं शतं. अनयोर्योगान्मूलं. भूपृष्ठछायाकर्णः स्वस्य ग्रहस्य बिंबे मंडले स्थितं मध्यं वेद्यं तस्माज्जातः. यद्बिंबकेंद्रीयदृग्ज्यार्थः. एतेन छायापि तदीयेति स्पष्टीकृतं ५५ नन्वियं छाया दृग्ज्ञा

नुपयुक्ता· प्रत्यक्छायायाग्रहमंडलोर्ध्वनेमिजानत्वात्· अन्यथासूक्ष्मासूक्ष्मदीपछायपयोस्तुल्यत्वापत्तेरित्यतोग्रहमंडलोर्ध्वनेमि
छायांविवक्षुः प्रथमंग्रहबिंबसाधनार्थंतद्योजनानियताभ्यामहसूर्यादीनांखाभ्रपंचांगसंख्याविबव्यासाः खाष्टवेदाः क्रमेणः
पंचेभेभस्यानवाष्टाग्निनांकवेदांगांगस्याः खचंद्रेशतुल्याः ५६ पूर्णेषष्ठांकाश्विनोयोजनानिकैश्चिसारस्फुरीसोदितापि
ते·नोयुक्तायुक्तभावात्सुधीभिः प्रामाण्यस्यानिश्चितत्वोपलब्धविति· सूर्यादिग्रहाणांक्रमेणोक्तांकमितानियोजनानि· बिंब
वृत्तव्यासाइत्यर्थः· अत्रोपपत्तिरागम एव· केचित्तुत्रिज्यातुल्यमंदकर्णेसूर्यस्योदयास्तकाले बिंबासवोज्ञेयाः· एवंपूर्णोनेत्रिज्या
तुल्यमंदकर्णेचंद्रोदयास्तकालेरात्रौचंद्रबिंबासवः भौमादीनांत्रिज्यातुल्यशीघ्रकर्णेरात्रावुदयास्तले बिंबासवः ततोहोरा
त्रासुभिः कक्षायोजनानितदाबिंबासुभिः कानीतिग्रहाणांबिंबव्यासयोजनानीत्याहुः· प्रसंगादाहकैश्चिदिति· पारसीका
भिमानिभिः पारस्यांयवनकक्षौ· उक्तायारीतिसया· येबिंबव्यासाउक्ताः पारसीकोक्ताबिंबव्यासाः संस्कृतीकृताइत्यर्थः· ते
नयुक्ताः गोलयुक्तभावात्· ननूपलब्धिरेवगोलयुक्तिरित्यतआहसुधीभिरिति· उपलब्धौ· प्रामाण्यस्य सर्वकालावच्छेदे
न· सुधीभिरभियुक्तैः· अनिश्चितत्वात्· भावप्रधानोनिर्देशः· अनिर्णीतत्वादित्यर्थः· उपलब्धौसार्वकालिकत्वेप्रमाणाभावद्

तिभावः ५७ एम्यः कलाद्यंबिंबमाहत्वयोजनाख्यस्फुटकर्णभक्तंत्रिज्यागुणंयोजनमंडलार्द्धं· तच्चापलिप्ताद्विगुणाग्रहाणांस्वं
कलाद्यंभवतीहबिंबमिति· योजनात्मकबिंबस्यार्द्धं· त्रिज्यागुणं· स्वस्वयोजनाख्यास्फुटकर्णेनभक्तं· फलस्य धनुषः कलाः द्विगुणाः
स्वस्वकलात्मकं· ग्रहाणां· इह· भूरभौ वह्निनभःगोले· बिंबस्यात्· अत्रोपपत्तिः· कक्षायांग्रहबिंबकेंद्रस्यावश्यंसद्भावान्नेमिसूत्र
कक्षाप्रदेशात्केंद्रसूत्रकक्षाप्रदेशस्यकक्षायांपरंतरंकलात्मकंतन्मंडलार्द्धकलाद्यं· नेमिकेंद्रयोरंतरेमंडलव्यासार्द्धं· अतः स्वस्वयो
जनकर्णेनत्रिज्यातद्बिंबयोजनार्द्धनकेतिज्याः स्याच्चापंमंडलार्द्धसंबंधिकक्षाप्रदेशस्थाः कलाः द्विगुणामंडलसंबंधि
नः कक्षाप्रदेशस्थाः कलाः यद्यपिपूर्णजीवायाः धनुःकरणमनुचितंतथापिसूर्येंदुभ्यामानयोजनानित्रिज्याहतान्यर्कशशी
दुकर्णैः· भक्तानितत्कार्मुकलिप्तिकालालेषांक्रमान्मानकलाभवंतीतिभावंतीतिभास्करोक्तौमंडलव्यासस्यकक्षाप्रदेशेमंड
लसंबद्धेज्यात्वाभावान्नदूनुःकरणमनुचितमतिस्थूलंवेतितदपेक्षयाजसंपूर्णज्यात्वेनबिंबार्द्धकक्षाप्रदेशसंबंधात्तथाना
नुचितंकिंचिच्चसूक्ष्मतिसाहृतं ५८ इदमानयनंग्रहसाधारण्येनोक्तंग्रहविशेषेव्यस्थापनार्थंप्रथमंखंडयति· भौमादी
नांमध्यकक्षाधऊर्ध्वनीचोच्चेस्याद्बिंबमेकांतरेण· तस्यान्मध्यात्तुल्यदृष्टिक्षयाभ्यांबिंबंयुक्तंतत्रतत्रोक्तरीत्येति· भौमादीनां

मध्यकक्षायास्त्रिज्यादृग्रूपाया अधोभागे ऊर्ध्वभागे क्रमेण नीचोच्चकक्षे एकांतरेण समांतरेण यत्र तस्मिन् मध्यकक्षा तो यदंतरेणो
च्चस्थाने परमा महीनीकक्षा तदंतरेणैव नतो नीचस्थाने परमाल्पा कक्षा स्यात्. अतस्तत्र बिंबमपि मध्यस्थानबिंबात्समांतरेणो
चितं स्यात्. स्पष्टयति. तस्मादिति. उक्तहेतोः. मध्यकक्षास्थानस्थान्मध्यबिंबात्. तुल्यत्वदृष्टिस्पर्शाभ्यां. क्रमेण समाभ्यां सु
पचयापचयाभ्यां बिंबं. नीचोच्चयोः समुचितं. न विलक्षणांतराभ्यां हेत्वभावात्. अत एव. उच्चस्थितो व्योमचरः सुदूरेनी
चस्थितः स्यान्निकटे धरित्र्याः. अतो शुबिंबः एधुलश्च भातीति भास्करोक्तिः क्षेत्रे संगच्छते. दूषणोपपादकं हेतुमुत्कापू
लितमाह तत्रेति. नीचोच्चस्थाने उक्तरीत्या. पूर्वपद्योक्तप्रकारेण. तत्. बिंबं. समानांतरेण न स्यात्. मध्यबिंबाद्येनांतरे
णोपचितं बिंबं तेनांतरेणापचितमुक्तप्रकारान्न भवति. किंतु विलक्षणांतरेण यद्भवति तदनुचितं. अथोक्तप्रकारेण
तुल्यांतराभावे कोपपत्तिरिति चेत्. शृणु. त्रिज्यागुणितमंडलार्द्धरूपात्सर्वदेवरूपाद्राज्यादंत्यफलज्यायोजनहीनपुच्छां
तमध्ययोजनकर्णाभ्यां फलयोरतुल्ययोरतुल्ययोरपि तुल्यांतरानुपलब्धेर्गणितेदृशीनात्. यथा. भाज्यः २१५ भजकः
१५ फलं १५ दशायुतभाजकात्फलं ७ दशाहीनभाजकात्फलं ४५ अनयोः ७४५ पंचदशाफलात्तुल्यांतराभा

राम०
१७९

कः. हरोयदंशेन हीनयुतस्तदंशेनाधस्तीशाधिकोनेत्याद्यक्तव्यस्तविधिविशिष्टेन लब्धिर्युतहीने तिस्वतः सिद्धं वैलक्षण्यं. तत्रांशोयुत
हीनो विलोमक्रियायां यथास्थितो येन तुल्यांतरोत्पत्तिः. संकलनवावकलनाभ्यां फलयोरतुल्यत्वादिति मंदानामपि स्पष्टोपपत्ति
: १५९ व्यवस्थापयति. उक्तप्रकारेण नतोर्कचंद्रबिंबे हृते तुहिनादिकानां. हृत्वा कवन्मध्यकलास्तो च्चस्वांशदृष्टिक्षय
कल्पनाभ्यामिति. ततउक्तदूषणात्. स्वयोजनाख्या स्फुटकर्णे साद्यक्तप्रकारेण. सूर्यचंद्रयोर्बिंबे हृते. भौमादीनां तु मध्यबिं
बकलाः उक्तवत्. उक्तप्रकारेण मध्ययोजनकर्णवशात्. हृत्वा. संपाद्य. ततो नंतरं. अत्र. बिंबानयने. तदर्थमिसर्थः. स्वांशदृष्टिक्षे
यकल्पनाभ्यां. स्वशब्देन मध्यबिंबकलास्तासां तत्तीयांशो नोपचयापचययोः कल्पनाभ्यामप्रकारः. हृतरनिशेषः ६० प्रकारमेवा
द्यपनेनोपन्यस्यति. यदि शीघ्रपरज्यया त्रिभागस्त्रिगुणद्वाक्श्रवणांतरेण किं स्यात्. इति लब्धफलेन तासुतो नानिजबिंबं क्रमशः सु
रतनोक्तमिति. नीचोच्चयोः क्रमेण परमाल्पपरमाधिककर्णयोः सत्वान्मध्यकर्णात्त्रिज्यातुल्यानयोः शीघ्रांसफलज्यामितांतर
त्वाद्यदि शीघ्रपरमफलज्यया मध्यबिंबकलात्तीयांशरूपमंतरं तदा भीष्टेन त्रिज्याकर्णयोरंतरेण किं स्यादित्यनुपातो ज्ञेयेन नल
ब्धेष्टाफलेन तासां मध्यबिंबकलाः क्रमशः. नीचासन्ने. उच्चासन्ने. त्रिज्यातः कर्णस्यन्यूनाधिकत्वे सुनाज्जनाः. निजबिंबं भौमादि

पंचतारान्यतमस्यबिंबकलात्मकं पुरातनोक्तं भास्कराचार्यादिभिरुक्तं एतेनमन्मतंनेतिभावः ६१ एतद्दूषयन्स्वाभिमतं
बिंबानयनं प्रतिजानीते तदसत्त्रिलवेसुसूक्ष्मभावादुपलब्धिसूधियातथानमान्या ममयत्प्रतिभातत्तद्दूहदामियहबिं
बंकलिकामयंस्वयुक्त्येति तत्पुरातनोक्तमसत् बिंबतनीयांशोउपचयापचयत्वेसुसूक्ष्मभावात् उपलब्धिरेवयुक्तिरि
त्यतआहउपलब्धिरिति अभिसूक्ष्मांतांबुद्ध्या तथा यथागोलयुक्तिर्मान्या नश्चेष्टा उपलब्धिर्नासिकांसंकोचयति पूर्वम
तएवसुदानं ममबुद्धौयत्प्रतिभातितद्ग्रहबिंबंकलात्मकं निजकल्पनयाहंवदामि ६२ प्रतिज्ञातंवदंसदुपपत्तिंवयद्या
भ्यांप्रतिजानीते सूर्यंदुमंदश्रवणाद्ग्रहानत्रिज्यागुणंयोजनबिंबमुक्तं भौमादिकानांचलकर्णखंडहीनत्रिज्यागुणितां
विभक्तं ६३ मध्यस्वयोजनमयश्रवसामखंडचापाद्विघातकलिकाग्रहबिंबलिप्साः अत्रोपपत्तिममलांप्रवदामिसु
क्षमान्यानुपानविधिभिःसुगमामभूदूर्वीमिति योजनात्मकबिंबंप्रागुक्तं मध्योग्रहसंबंधीयोजनात्मकः कर्णस्तेनभक्तं फलाः
स्याद्दिनस्यपदनुश्चत्वारश्च अनयोर्वधस्यकलाः ग्रहबिंबकलाः अस्मिन्नानयने उपपत्तिंनिर्दूषणंसुगमामभिनवां सु
क्षैर्मान्यायेनुपानालेपांविधिभिःप्रकर्षेणवदामि ६४ तत्रफलोपपत्त्यर्थंपद्यत्रयेणस्फुटबिंबज्यामाहमध्याख्ययोजनमव

श्रवणोविभज्याचेन्नहिबिंबभवयोजनखंडकेकालबुंतुबिंबदलयोजनजातनीवामध्याभवेद्ग्रहधिक्रियुणेनचेत्सा ६५
तर्यकेंदुमदुजांसश्रेफलज्यायाकाभौमादिशीघ्रफलजांसगुणेनकाच लब्धंपरंभवतिबिंबदलज्यकायामध्यस्फुटांतर
मतोंसफलज्ययाचेत् ६६ एतन्नदात्रिगुणकर्णवियोगकेनबिंस्पाफलेनसहितारहिताचमध्याः हीनाधिकेत्रिभगुणाद्भव
णेत्रबुद्ध्याकर्मोपहंसंहरणतः फलितास्फुटज्येति पूर्वोक्तानुपातोक्तेखेनेछाफलबिंबार्द्धयोजनज्या त्रिज्याकर्णत्वान्मध्या
भवेत् अस्याःप्रयोजनास्यधित्यर्थं त्रिज्याप्रमाणेत्रबिंबदलस्यमध्याज्यातदीयफलज्यायाकेसनुपातस्यात्रिगुणेनेसारिका
चेत्संतयोर्द्विरिवनस्वेछाफलबिंबदलज्यायाःमध्येस्फुटयोरंतरंपरमंभवति मध्यस्फुटबिंबार्द्धज्ययोःपरममंतरंनीचोच्च
स्थानांतस्याहिसर्वं आनोनंतरं परमात्मकर्णपरमाधिककर्णाभ्यंतरत्रिज्ययोरंतररूपांसफलज्ययायद्येनसुरममेतरंतदा
त्रिज्याभीष्टकर्णयोरंतरेणबिंस्पाद्विसनुपातजेछाफलेन त्रिज्यातःकर्णहीनाधिकेसतिक्रमेणपूर्वोक्तमध्याज्यायुक्तो
ना अनुपातत्रयेकेबुद्ध्या समसुणहरयोर्तोघबेनायहणरूपया कर्मणाउपसंहारात्संकोचारत्यत्वात् स्फुटज्याबिंबा
र्द्धजासिद्धा ६७ फलितंचरस्फुटोपपत्तिमहद्विग्रत्रिज्याकर्णहीनास्वबिंबव्यासार्द्धोत्थैर्योजनैः संगुणाप्ता मध्यश्चत्वा

स्थानात्कक्षावृत्ते बिंबनेमिसंयोगलग्नापूर्णजीवाबिंबव्यासार्द्धतुल्या बिंबव्यासार्द्धसूत्रं कक्षावृत्ते स्फुटज्यासंपूर्णे स्पर्शः १६९
आसन्नखंडचापाद्विघातकलिकायुहबिंबलिप्ताश्चस्योपपत्तिं पद्याभ्यामाह अस्याश्च अर्द्धबिंबकेंद्रस्वनेम्योरंतः कक्षादेशखंडा
र्द्धजीवा अस्याश्चापं तत्कक्षाप्रदेशखंडं तस्यस्यार्द्धनिघ्नाः कलास्ताः १७० केंद्रस्थानात्नेमिकक्षे मध्ये कक्षासंस्थाश्चोभ
यत्र हि निघ्नाः कक्षावृत्ते बिंबनेम्योश्च मध्ये चापं पूर्णं बिंबलिप्ता मयंहीति अस्याः बिंबव्यासार्द्धरूपपूर्णज्यायाः अर्द्धं बिंबकें
द्रबिंबनेम्योर्मध्यभूतः कक्षाप्रदेशस्यार्द्धस्यार्द्धज्या अस्याधनुः पूर्वोक्तकक्षाप्रदेशस्यार्द्धं तस्यायाः कलाः द्विगुणास्ताः कलाः
केंद्रस्थानात् बिंबनेमिकक्षयोर्योगमध्ये केंद्रमारभ्ययोगपर्यंतमित्यर्थः कक्षास्थाउभयत्र अतोद्विगुणाः बिंबनेम्योर्मध्ये क
क्षावृत्तप्रदेशे धनुःसंपूर्णं अतश्चापं चतुर्गुणं फलिणं बिंबकलात्मकं ७१ अथ पूर्वोक्तं बिंबसाधनं सूर्यचंद्रयोः सूक्ष्ममेव न स्थू
लमित्याग्रहवारिणामतमन्यद्यपद्यत्सेणहृषयति यैर्बिंबयोजनगुणस्त्रिगुणः स्वकक्षाव्यासोलयोजनहतः फलचापमुक्तं हि
घंरवीदुकलिकात्मकबिंबमेतत्तुल्यं यतः स्वचरबिंबजमध्यनेम्योः ७२ मध्यस्थकक्षावलयप्रदेशसंपूर्णजीवात्मकलाहतु
र्न स्यादीदृशं प्राग्गदितं त्वयापि नाथोपलब्धिज्यकयोः कृतीये ७३ तदेकमलेनतृतापलघ्नज्याभनेतत्तृतलब्धिजिनोपं

MEMORIAL

एवंमयोक्तं वदसीत्यमेतच्चायुक्तमर्द्धाख्यगुणाप्रसिद्धेरिति· ये: सुधीभि:· फलचापद्विगुणं सूर्यचंद्रकलात्मकबिंबमुक्तमिति संबंध:·
एतत्तु तुच्छं· अयुक्तं· हेतुमाह यतइति· ग्रहबिंबीयकेंद्रेनेमो:· अंतर्गतकक्षावृत्तप्रदेशस्य संपूर्णज्यारूपपूर्वोक्तफलात्· धनु:·
नस्यात्· अर्द्धज्यातो धनु: सर्वत्रोक्तमत्र संपूर्णज्यात: संपूर्णधनुर्द्धज्याभिरयुक्तं हृतं· नहि संपूर्णज्यांका: क्वचिदुक्ता: येनो
क्तं युक्तमिति सर्वथै· ननु संपूर्णज्यांककथनेनापि संपूर्णज्यात: संपूर्णधनुर्भवेत्सवसूत्रमिति सत्यमाह दृश्यमिति· संपूर्णज्या
त: संपूर्णज्यात: संतु पूर्णधनुरानमिति सर्वथै· त्वयैतदंगीकृतं· अपि शास्त्रात्पूर्वग्रंथकारै: पूर्वं नोक्तं· आक्षिपति· अथेति·
कक्षावृत्तबिंबं कृत्वा तद्व्यासरेखातिरश्चीनाकार्या· तद्रेखार्द्धफलतुल्यभुज: केंद्रयोरंतरत्रिज्याकोटि: भुजाग्रकक्षावृत्त
केंद्रांतरसूत्रं तद्दृग्योगमूलं कर्णा: कर्णाग्रे फलमिति भुजरेखा तदाकर्णरेखांतर्गतत्रिज्यामितायेकिमिति लब्धिरियं·
तदर्द्धज्या· बिंबव्यासदलमितसंपूर्णज्यासंबंधिकक्षाप्रदेशरूपसंपूर्णधनुषोर्द्धज्या· तच्चापसएवकक्षाप्रदेशोर्द्धध
नुराकार:· एवमुक्तमयोक्तं पद्यक्षेपेण· इत्थं नेत्वं वदसि· आक्षेपं निरस्यति· एतदिति· च: समुच्चये· युक्तिविरुद्धं· हेतुमा
ह अर्द्धाख्यगुणाप्रसिद्धेरिति· त्रिज्याग्रपरिणतस्य कर्णरेखाया: बिंबांतर्गतत्वेननेमिकक्षैक्यासंस्पृष्टत्वाद्बिंबकेंद्रेने

मोरंत: स्थितकक्षाप्रदेशार्द्धज्यात्वेनासिद्धे:· किंतु कर्णसूत्रं कक्षावृत्ते पत्रलग्नं तदवधिबिंबकेंद्रस्थानाकक्षाप्रदेशस्यार्द्धज्या
त्वसिद्धे: प्रकृतानुपयुक्तत्वं दोषइति भाव: ७४ भूपृष्ठेऽर्धनेमिसंबंधेन छायाछायाकर्णौ श्लोकाभ्यामाह कुगर्भशंकुदृग्ज्य
योर्धनुर्लंबौ क्रमेण यो· स्वबिंबखंडलिप्तिकायुतोनितौ ज्यके तयो: ७५ नृदृग्ज्येन तो दृग्ज्यकासूर्यनिघ्नीधराछन्नसूत्रोन
शंकारवभक्ता· प्रभादर्शनीयानतो भाक्रति: स्यात्कुपृष्ठे स्वबिंबोर्धनेमिप्रजातेति· भूगर्भीययो: शंकुदृग्ज्ययोर्धनुरत्रौ यो
बिंबकेंद्रीयौ तौ क्रमेण पहबिंबार्द्धकलाभिर्युतौ नितौ बिंबोर्धनेमेर्दृग्वृत्तसंस्पर्शान्ननतनतौ तयोर्ज्ये शंकुदृग्ज्ये· ततो नंतरं
इयं दृग्ज्योर्धनेमे भूगर्भपृष्ठयोरभिन्नाद्द्वादशगुणा· शंकोर्भूगर्भीयत्वा भूपृष्ठीयत्वसिद्ध्यर्थं भूसूत्रोन शंकुस्तेन भक्ता· दर्श
नयोग्याद्द्वादशांगुलशंकोर्छायास्यात्ततश्छायाया: सकाशात्· छायाद्वादशयोर्वर्गयोगात्सदं छायाकर्ण:· भूपृष्ठे ग्रहबिं
बोर्धनेमिसंबद्धोछायाछायाकर्णावित्यर्थ:· भूपृष्ठे त्रिज्यासंबंधेन छायाक्षेत्राभावात्त्रिज्याद्वादशगुणा भूपृष्ठशंकुभक्ता
छायाकर्णइत्युक्तमिति सूचितं ७६ अथ छायाया: कालानयनविवक्षु: प्रथमं दृष्टछायाया: पद्याभ्यां भूगर्भशंकुमाह
कुछन्नसूत्रार्कलंबेन निघ्नीदृष्टप्रभादृष्टभयायुतास्या:· कुछन्नसूत्रार्कयुतेश्च वर्गयोगात्सदं तद्विहृतात्त्रिभज्या ७७ कु

छन्नसूत्रार्कसुनिप्रयुक्तयास्याश्चापभागारहितानिनेन· बिंबस्यार्कखंडेनततोज्यकासौभूगर्भजोभीष्टनरोतिसूक्ष्मइति·कुछन्नसूत्र
स्यद्वादशांगुलशंकोः प्रसक्तछायया·प्रसक्तछाययायुता·अस्याः सिद्धायाः कुछन्नसूत्रद्वादशयोगस्य चः समुच्चये·तेनद्वयोर्वर्गयो
र्योगान्मूलं तेन· कुछन्नसूत्रद्वादशयोगगुणितात्रिज्याभक्ता·अस्याः भूगर्भबिंबोर्ध्वनेमिशंकुरूपायाधनुरंशाःस्वीयेनबिंबस्या
र्द्धेनकलात्मकेनोनाः बिंबकेंद्रस्योन्नतांशास्तेभ्योज्या· असौभूतगर्भो योभीष्टकालिकः सूक्ष्मः शंकुः अत्रोपपत्तिः भूपृष्ठछाया
समसूर्यो क्रांत्यास्वीकृताः अस्याः कर्णेनभूपृष्ठेत्रिज्यासंबंधाभावाच्छंकुसाधनं· दृग्ज्याया अज्ञानाच्छायावैपरीत्येनतदज्ञानं· अ
तोभूगर्भसंबंधेनक्षेत्रात्रिज्यया अत्याशंकुरितिभूमर्भसंबंधेनक्षेत्रंकल्पितं· स्थापितद्वादशांगुलशंकोर्भूपृष्ठस्थस्यभूगर्भा
दंतरंकुछन्नसूत्रं· तेनयुतोद्वादशांगुलशंकुर्भूगर्भांकोटिः द्वादशांशंकुकोटौछायायुतनलदास्यांकोटौकोयुजदृस्यतुपाते
प्रमाणापवर्त्तनेनेष्टानेकुछन्नसूत्रार्कभागःसरूपः छायायुणितोयुजोजातोभूगर्भसमभूमौसुनेसंतं·तद्वर्गयोगपदंसुज्ञा
याछंकुग्रपर्यंतकर्णः·एतत्कर्णेनद्वादशांकुछन्नसूत्रयोगःकोटिस्तदात्रिज्याकर्णेनकेतिभूगर्भऊर्ध्वनेमिशंकुः अग्रेपूर्वो
क्तवैपरीत्येनबिंबकेंद्रोन्नतांशास्तेषांज्याभूगर्भशंकुरितिसुगमं ७८ शंकोर्वैपरीत्येनोन्नतनतकालौचतुर्भिःपद्यैराह

राम०
१८३

शंकुः पलक्षेत्रजकर्णनिघ्नलंबकोटिभक्तोहनिरिष्टकाले सात्रिज्यकाधीविहृताद्यमौर्व्याभीष्टांसकासौत्रस्यगोले ७९ चरज्य
योनासहिताक्रमेणसौम्येरक्षादथदक्षिणेतु व्यस्तंनतश्चापलवांगश्चरेणगोलक्रमतोसुतोनः ९० सौम्येनिरक्षादथदक्षि
णेस्याद्व्यस्तंकुगर्भोन्नतनाडिकाःस्फुटः त्रिज्याचरज्यासहितोनितासामध्याक्रमादुत्तरयाम्यगोले ९१ सौम्येनिरक्षादथदक्षि
णेस्याद्व्यस्तानिजेष्टांसकयाविहीना· शेषस्यचापंविपरीतखंडांशमित्यानतनाडिकास्युरिति·दृष्टकाले· छायाकाले· तदितिःसा·
दृष्टहनिः·साःअभीष्टांसा·निरक्षादुत्तरभागेउक्तं·दक्षिणभागेतुव्यस्तं· ततःसूत्ररूपाणि·धनुरंशानांषडंशाश्चनेणोक्तगोलक्र
मात्कृतोनः·निरक्षादुत्तरभागे·दक्षिणभागेव्यस्तंकुगर्भेउन्नतघट्यःस्फुटानतकालमाहत्रिज्येति·चरज्यायासुतोनात्रिज्योत्त
रदक्षिणगोलेक्रमान्मध्यांत्यानिरक्षादुत्तरभागेदक्षिणभागेमध्यंत्याव्यस्तास्यात्· स्वामिमतेष्टांसयाप्राक्सिद्धयामध्यांत्याही
ना·शेषस्योक्तमंधतुः अस्यषडंशप्रमाणेनपूर्वोक्ताः उन्नतज्ञानेनस्वतःसिद्धाः नतघट्यःस्फुटाः अत्रोपपत्तिःयाम्योत्तरा
होरात्रवृत्तसंपातबद्धसूत्रमुदयास्तसूत्रपर्यंतमूर्ध्वगोलहृश्यमध्यांत्यात्रिज्याप्रमाणेन·अतउन्मंडलसूत्रावधितत्सूत्र
योरंतरालेचरज्यात्वादुक्तामध्यांत्योपपन्ना·तन्मध्येदृष्टांत्योन्नितंसमसूत्रेणोनंशेषंनतकालोक्रमज्येति ९२ ननुत्रि·

ज्याधिकस्यकर्णचापंकार्यमिसनत्र्याहत्रिज्याधिकयत्खलुनक्रमोत्क्षचापंसखांकं धनुरुक्रमंस्यात्. ननेनहीनंक्रदलंकुगर्भ
संबंधतोवोन्नतनाडिकाः स्फरिनिःयत्. त्रिज्यातोधिकं. तस्याधिकस्योर्धंत्रखंडक्रमेणजातंधनुःत्र्यत्रक्रमपदमुक्रमज्याप्र
संगात्केवलज्यापदस्याक्रमज्यार्थलद्वारणाय. नवस्यंशयुक्तं. उक्रमंधनुःस्यात्. वा. पूर्वमुन्नतघटीनामुक्तं. कुगर्भसंबंधतः
भूगर्भीयाइत्यर्थः. अत्रोपपत्तिः. त्रिज्याधिकनतोक्रमज्यायास्त्रिज्यासंबंधिचापंतद्दृक्क्षयाम्योत्तरवृत्तांतर्गताहोरात्रवृत्तप्र
देशः पंचदशाघटिकात्मकोनवतिकालांशरूपंच. अधिकमुद्भूतस्तत्रक्रमज्यारूपंसूत्रमधलपमुद्भूतादभीष्टग्रहस्छा
नपर्यंतमहोरात्रवृत्तैकदेशरूपंकालांशाश्चक्रमुपपन्नं ८३ अथभूएष्टोन्नतघटिकाआहकुछन्नसूत्रोन्मितशंकुतो
याउक्रमप्रकारोन्नतनाडिकास्ताः भूगर्भजासूत्रनाडिकासुशोध्याः कुएष्टोन्नतनाडिकाः स्फरिनि भूएष्टदृग्निजेग्रहत्वि
बंस्यान्नराकुछन्नसूत्रोन्मितशंकुर्नियतंस्यात्तस्माद्दुक्प्रकारेणोन्नतघट्योयास्ता. भूगर्भएष्टांतरूपाः भूगर्भीयासूत्रनत
घटीषुशोध्याः शेषाः कुएष्टीयोन्नतनाड्यः स्फः ८४ कालसाधनेविशेषमाहछायानीतघटीसुसाधितखगाक्रांतिज्य
कादेः पुनस्त्रिशांसेष्टहृतेसतोपिसमयः साध्योमुहुः स्यात्सुरः कालानीतभयातुकालमसकृन्नोसाधयेदेकदा भाभुद्भवे

मिहागतोहिसमयः सूक्ष्मो भवेत्साधनरीति. कालाज्ञानेछायातःसाधितघटीभिःसुसाधितग्रहाक्रांतिज्याकपयुक्तंसाध्यंतस्मा
त्पुनर्द्वितीयवारमिष्टहृतेशिंशासा. साध्या. ततइष्टांस्यायाः समयः साध्यः एवंमुहुर्यावदभेदः सूक्ष्मः कालः स्यात्. सुक्ष्मंचैतत्.
कालानानेनतात्कालिकगणितोपयुक्तपदार्थानामत्तानरभीष्टकालिकग्रहीतग्रहादिजानितपरार्थैःछायातः कालः सूक्ष्मो
नभवत्येवातः साधितस्थूलकालिकग्रहाक्रांत्यादिकस्यासन्नकालिकत्वात्सर्वापेक्षयातत्साधितकालः सूक्ष्मस्यसकृदिति. का
लज्ञानेनकालानीतछायायातुकालमसकृन्नसाधयेत्. हेतुमाहएकदेति. कालज्ञानेकालानीतछायातः कालानयनंव्यर्थमेव.
परंतुसाधितछायायाः शुद्धिनिमित्तं. इष्टज्ञातकाले एकदा. एकवारमेवगणितत्रिप्रयानीतः समयः साधनः सूक्ष्मोपनः
स्यात्. गणितोपयुक्तपदार्थानांतात्कालिकत्वेनसूक्ष्मत्वादितिभावः ८५ मध्याह्नछायातउन्नतांशानतांशज्ञानमाह न
ध्याह्नकालेरविदृष्टमायाः पूर्वोक्तरीत्यावनिगर्भशंकोः चापोन्नतांशानवतेर्विमुक्तानतांशकाः स्फः खलुयाम्यसौम्याइतिसू
र्यबिंबस्यहादशांगुलशंकुसंबंधेनयत्सत्छायायाः सकाशात्. पूर्वविधिना भूगर्भीयः शंकुस्तस्याचापरूपाउन्नतांशाः
नवतेः शुद्धानतांशाः स्वमध्यादर्कबिंबपर्यंतदक्षिणाउत्तरावाज्ञेयाः ८६ नतांशेभ्यः क्रांत्यंशापलांशान्यतरज्ञानेनतरज्ञान

माहनमाहननांशापमांशांतरंतुल्यदिक्केपुनर्भिन्नदिक्केपलांशाभवेयुः पलांशैर्नतांशा अथोक्तप्रकारात्कृताः संस्कृताः क्रांति
भागाभवंतीति. उक्तप्रकारात् एकभिन्नदिक्क्रमेणांतराद्योगाद्वेत्यर्थः संस्कृताः युक्ता अंतरिताः कृताः संपादिताः क्रांत्यंशाः
अक्षांशादधिकेदक्षिणेदक्षिणा अन्यथोत्तरा इति ध्येयं. एतत्सर्वपदार्थव्यक्तीकरणात्सुगमं ७७ अथ नलिकाबंधं विव
क्षुः प्रथमं तदुपयुक्तं भुजं प्रतिजानंस्तदुपकरणमाह प्राक्सिद्धस्तुवरवेचरान् भसितेसंवादमायांति किंनोवेति ग्रहदर्शनार्थं
नलिकाबंधोपयुक्तं भुजं वक्ष्येत्र निजेष्टकालजनितछायाश्रुतीसाधिते भूपृष्ठे ग्रहबिंबकेंद्रजनितेग्रास्येनुनेम्यस्त्रवे
इति. पूर्वसाधितस्पष्टग्रहायेने भ्याकाशसंवारं भ्याकाशसिद्धचारतांप्राप्नुवंति. नवा. इतिविप्रतिपन्नौ ग्रहदर्शनं नियाम
कं. नचिमित्तं योनलिकाबंधस्तत्रोपयुक्तं भुजं वक्ष्ये. तत्र. भुजानयने निमित्तसप्तमीतदर्थमित्यर्थः स्वाभीष्टकालजातेछा
याछायाश्रुतीभूपृष्ठेसाधिते. ग्रहबिंबकेंद्रीयग्रास्ये. ग्रहबिंबनेम्यस्तन्नेपागुक्तेछायाछायाश्रुतीनयास्ये. नलिकामुखे
नेमिदर्शनेग्रहदर्शनसंदेहात्केंद्रदर्शनेग्रहदर्शनमिश्रयादुक्तंयुक्तं ८८ भुजमाहमिति त्रिभज्याहतास्वाग्रकाकर्मणनिघ्नी
भवेत्कर्णवृत्ताग्रहीकाव्यस्तदिक्का. पलछायया सौम्ययाव्यस्तसौम्ययुतोनैकभिन्नाशायास्याद्भुजोयमिति. स्वस्ययह

स्याया. छायाकर्णेनगुणिता. त्रिज्यया भक्ताफलंछायाकर्णवृत्ते याव्यस्तदिक्का. उत्तराचेद्दक्षिणाचेदुत्तरेस्यर्थः निरक्षादुत्तरभा
गेक्षभयासदोत्तरयाः दक्षिणभागेसदादक्षिणयेत्यर्थात्. एकभिन्नदिशया. क्रमेणयुतोना. भुजः. अयंप्रतिज्ञातः स्यात्: ७९
पुनरुक्तभ्रमवारणायाह अथोपपत्तिरिति उपपत्तिमेवाह त्रिज्यावृत्तेग्रातदाभाश्रुतौकारवेदारछायावृत्तपट्टांतरेस्यात्. व्य
स्तांशासासंस्कृतासौम्यदिक्का. छायाभेनुस्तलेभाग्रहोः स्यादिति. गोलेग्रहस्यदृग्वृत्तस्थितत्वादपिनद्वृत्तसंबद्धा. अतो
दृग्वृत्तरूपेत्रिज्यावृत्तेपूर्वोक्तायातदाछायाकर्णवृत्तेदृग्वृत्तानुकारलघुवृत्तेकाफलमया. यहात. वृत्ते. दृग्वृत्तेपट्टांतरे
वृत्तार्द्धइत्यर्थः छायाभूमेर्भवति. अस्मात्कारणात्सा. छायाकर्णवृत्तेऊर्ध्वाधरेलघुनिदृग्वृत्ताकारेसाधितायाद्वादशांगुलशं
कोः छायायीयाः विपरीतदिक्का. अयाशंकुनलयोः संस्कारेपूर्वेभुजोक्तः शंकुनलस्यनिरक्षदेशादुत्तरभागेदक्षिणत्वाटा
यांकर्णवृत्तेशंकुनलंपरिणामितंपलभोत्तरा. अतएवोत्तरदिक्कमरुछायाभाभुल्यतायस्यैतादृशी. नुस्तले. शंकोस्तले.
पलछायारूपोत्तरशंकुनलेस्यक्. उत्तरीसासंस्कृताछायायस्यभुजः स्यात्. पूर्वापरसूत्राभुजांतरेदक्षिणतउत्तरतोवाछा
यायंभवतीत्यर्थः ९ भुजस्वरूपोक्तादिशोपिसिद्धाइत्याह अतएवभुजांतरेणभाग्रात्परपूर्वेदिनपूर्वेपश्चिमार्द्धे. भुजभा

कृतिभेदमूलको योनरतः लोभुजएवयाम्यसौम्येइति·यतः पूर्वापरसूत्रछायाग्रपर्यंतं दक्षिणोत्तरं भुजोतएवेत्यर्थः छायाग्र
भुजांतरेणयस्तदिक्केन·दिनस्यपूर्वार्द्धे उत्तरार्द्धे क्रमेण·द्वादशांगुलशंकुमूलात्·आनीतभुजछायायोर्वर्गौतयोरंतरमूल
रूपकोघा·तदंतरेणेत्यर्थः परपूर्वदिशोस्तः भुजरेखैवदक्षिणोत्तरे·अतएवैकस्मादपिभाग्यतोभुजमितांकोटामितांशंकु
तः·अस्येघष्टिमुजनघाभुविपथायथ्ययोःस्याद्धतिः कोटिः प्राच्यपराभवेदितिहृतेबाहुश्चयाम्योत्तरदिनिभास्करोत्रं
संगछते ९१ चतुर्भिःपद्यैर्नलिकाबंधमाहविधायबिंदुंसमभूमिभागेज्ञात्वादिशःकोटिरतःप्रदेयाःप्रसक्तुरवीपूर्वक
पालसंस्थेपूर्वामुखीपश्चिमगेग्रहेसा ९२ कोद्यगतोदोरपियाम्यसौम्योबिंदोश्चभाभाग्रभुजाग्रयोगात्·सूत्रंनलग्रोत
मपिस्वकर्णाकारंकुबिंदुस्थनराग्रसत्रं ९३ तद्देवतन्मार्गवशान्निबद्धमौर्वेग्रहष्टाछयमूलकंतं·नलंविधायाथनिबद्ध
मूलाग्रयोःसुवंशाद्दिनयेनिखाते ९४ सूत्रंचनिष्कास्यविलोकयेत्तेग्रहंनलछिद्रगयास्वदृष्टा·एतद्विलोमात्यनिबिं
बमंद्वादशांदिक्केगणकःप्रपश्येदिति·समभूप्रदेशेबिंदुंकृत्वादिशोपिज्ञात्वा·अतः·बिंदोःसकाशात्·सा·पूर्वोक्त
दिक्साधनोक्तकोटिरित्यर्थः पूर्वकपालसंस्थेग्रहे·पंग्रहमध्यंदिनपर्यंतममीष्टेकाले पश्चिमदिगभिमुखीदेया·पश्चिम

कपालगेग्रहे·यदापरहिनार्द्धानर्गनाभीष्टकाले·पूर्वाभिमुखीदेयेत्यर्थः कोद्यगमारभ्यभुजोपिदक्षिणोत्तरोदेयः·बिंदोःसका
शाद्भुजाग्रावधिछायादेया·इदंप्रसक्तेनंपूर्वमुक्तं·छायाग्रभुजाग्रयुतिस्थानमारभ्यनलेयोनंसूत्रंछायाकर्णाकारंभूबिंदुस्थ
द्वादशांगुलशिखरस्पृष्टंसन्नदेवसूत्रंकर्णमार्गवशाद्दोर्द्वेग्रदेशेनिबद्धं·अत्र सूत्रे·नेयस्मिन्निदंसूत्रंप्रोतमस्ति·नलं·दृष्टछाये
मूलेयस्येवंविधंकृत्वानंतरं·नलमूलाग्रयोःसुवंशाद्दिनयेरोपितेनिबद्ध·सूत्रंनिष्कास्यच·आकाशेग्रहबिंबंनूलछिद्रप्रदि
ष्टयानिजदृष्टागणकःपश्येत्·छायायाः बिंबस्थकिरणमार्गवशात्सनमात्रदयशोज्ञानार्थंक्षेत्रंभूमाबुक्तं ततोग्रहबिंबदे
द्वावधिसूत्रंग्रहदर्शनमार्गइत्यादिसुगममस्तु·प्रकारांतरेणदर्शनमाहएतद्दिति·उक्तवैपरीत्यात्·ग्रहप्रतिबिंबजलाद
र्शादौगणकःपंडितःपश्येत्·तद्दर्शनेनविलोमप्रकारःस्वतोज्ञेयइति ९५ विलोमप्रकारमेवाहमिवेरपशंकुजभाग्र
योगेबिंदोर्नराग्रयुगतेचसूत्रे·तथैवधार्यंनलकोत्रखेटंबिंदुस्थतोयेसुशिरेणपश्येदिति·भुजभाग्रयुतिस्थाने·शंकुस्थाग्र
·बिंदुतःशंकुग्रसंक्रांतसूत्रेनलकःप्रागुक्तरीत्याधार्यःदृष्टछायायोनलकोग्रमूलयोर्वशाद्द्वयेरोपितेनिबद्धः·अ
त्रनलकेसूत्रंनिष्कास्यानेनबिंदुस्थजलादर्शादौःग्रहप्रतिबिंबं·नलकाग्रछिद्रद्वारापश्येत्·तथाचशंकुसूत्रयोरेवनिबे

ज्ञानं विपरीतं नास्त्रेनिनास्त्यर्थे भूपृष्ठाद्ग्रहबिंबे शंकुतरेणतदंतरेणैवाधोप्रतिबिंबदर्शनमतः प्रतिबिंबदृक्सूत्रं भूमौप
त्रलगतिसत्रप्रतिबिंबदर्शनीयमिति बिंदुस्थाने सूत्रयोगात्सर्वं समंजसं १९६ ननु यत्काले ग्रहदर्शनमिष्टं तं
काले ग्रहादिनलिकाबंधांकर्मकरणे ननत्कालस्यातिक्रांतत्वादतिक्रांतकालिकनलिकाबंधे ग्रहबिंबदर्शनं कथमपिनसंभ
वति ग्रहस्यस्थिरत्वामात्रादिसतो भास्करोक्तमुपसंहारमनुवदति दर्शयेद्दिवि चरंदिवि केवलानेह सिद्धचरदर्शनयोग्ये पूर्वमेव
विरचय्य यथोक्तं रंजनाय सुजनस्य नृपस्येति ग्रहदर्शनयोग्ये काले यथोक्तं नलिकाबंधं यत्कालेदर्शनमिष्टं तत्कालात्पूर्वं
एवकारान्नरकालनिरासः सिद्धत्वा सुजनस्य राज्ञो रंजननिमित्तं ग्रहमाकाशे जलेवा दर्शयेत् तथाचनोक्तदोषइति भावः
तत्काले ग्रहदर्शनं चेदुक्तगणितस्याकाशसिद्धत्वं नो चेदसंवादइति परीक्षात्वमस्याधिकारस्योपपन्नं १९७ अधिकार
मुपसंहरति इति सिद्धांततत्त्वार्थसुनीश्वरकृते भवत्सिद्धांतसार्वभौमे यंत्रपूर्णस्त्रिप्रश्नसंज्ञकइति यद्यपि वत्समाणो
क्तात्राधिकारासमाप्तेरेतत्पद्यमनुचितं तथापि प्राचीनानुसारेण शिष्यजनमनःप्रसादार्थं विश्रामोक्तिसूचकमेत
त्पद्यमिति ध्येयं श्रीः अथ चंद्रादिग्रहनक्षत्राणां परीक्षार्थं गणितविशेषप्रतिपादकग्रंथं विवक्षुः शिष्यावधानार्थं सं

MEMORIAL

गतिपूर्वकं प्रतिजानीते अथ प्रसंगाच्छशिपूर्वकाणां षण्णां ग्रहाणां खलु भानिमित्तं दास्यादिबिंबात्मकतारकाणां चासां विशेषं
गणितं प्रवक्ष्यीति अथ पूर्वं यथानंतरं स्पष्टत्वसत्त्वपेक्षानहेतुरूपात्त्वसंगादित्यर्थः अश्विन्यादयो बिंबस्वरूपाः यास्ता रक्ता
स्तासां प्रसरद्रश्मीनां कांतिवत्त्वसमविंशतिविभागात्मकानामदृश्यानां निरासः विशेषं पूर्वोक्ताधिकं गणितमावश्य
कमहं वदामि १ तत्रैषां यन्मिमित्तं विशेषगणितं तत्तत्साधनं मूलभूतं ग्रहाणां पद्याभ्यामाह विक्षेपलिप्ताः शशिनः खभा
निरवांकाः खसूर्याः खरसाः खसूर्याः खांकाः क्रमात्स्यातयुतस्फुटाख्यग्रहाः भुजज्योक्तशरश्चकाग्नी २ त्रिज्याहतालब्धधनु
र्लवाद्यं शरः सपातग्रहगोलदिक्कः अत्रोपपत्तिं शृणु निर्मलांतां कांसंशावस्वर्बमताद्विभिन्नामिति शशिनमारभ्य ग्र
हाणां विक्षेपकलाः क्रमात् मध्यमाधिकारानीतपातेन युतः स्पष्टपातग्रहस्य भुजज्या उक्ताः विक्षेपायरनाम्नः शरस्य
कलास्ता संज्ञया गुणिता त्रिज्यया भक्ता लब्धस्य धनुरंशाद्यं सपातस्य स्पष्टग्रहगोलदिक्कः शरः स्यात् शिष्यावधानार्थं
मुपपत्तिं प्रतिजानीते अत्रेति शरानयने निर्मला महत्वणा हेतुमाह कांसंशानयनोपपत्तिरहूषणा तद्दोषेतदुपपत्तिरूप
नमप्यदुष्टमन्यथा कांसंशानयनोपपत्तेरपि दुष्टत्वापत्तेरिति भावः नन्वेवं चार्यैस्तयोरुपपत्तौ भिन्नरीत्योपपादना

स्तदुपपन्ने पूर्वमतविरोधो दूषणमिति मतमुपपन्नेर्युक्तिविरोधाभावे तद्विरोधोप्यसूनिकरइति भावः ३
तत्राक्षाग्रहणोक्षेपवृत्तं पद्याभ्यामुपपादयति महर्षिभिश्चंद्रसूर्यग्रहाणां स्वबुद्धितस्तद्गमनानुरोधात् कक्षास्थपातांकस
षष्ट्यंशपातांकयोर्विलग्नशरवृत्तसंज्ञं ४ पातादग्रे एष्टभत्रयांतेकक्षावृत्तीयास्यदेशात्क्रमेण सौम्ये याम्ये प्रोक्तविक्षेपलि
प्ताभिर्लग्नंतत्स्थितंक्षेपवृत्तमिति चंद्रादिग्रहाणां षण्णां महामुनिभिः स्वबुद्ध्या ग्रहबिंबगमनानुरोधात् यत्स्थितंक्षेपवृ
त्तं तच्छरवृत्तसंज्ञं कक्षास्थपातभोगांकसप्तपातभोगचिह्नयोर्विलग्नं पातस्थानाद्राशिक्रममार्गेणाग्रे एष्टराशित्रयांते
कक्षावृत्तसंबंधिनः प्रदेशात्क्रमेणउत्तरेदक्षिणे प्रोक्तविक्षेपकलाचिह्नं तत्रितप्रदेशे लग्नं च ५ अथास्यानुकल्पवृत्तं दृग्गो
लेप्रोतयति स्वेस्मिन्वृत्ते चंद्रपूर्वग्रहास्तिष्ठंतीतः क्रांतिवृत्ते सदैव यस्मात्तस्मात्प्रोक्तगोलसंस्थे प्रोतं कार्यं राशिवृत्तेवि
वृत्तमिति चंद्रादिग्रहाः बिंबात्मकाः स्वकीयेगिस्मिन्विक्षेपसंज्ञे वृत्ते प्रतिवृत्तस्थितिद्वाराधिनिष्ठंति सूर्यस्तु क्रांतिवृत्तानु
सृतस्वगोलवृत्ते सदा प्रतिवृत्तस्थितिद्वारा तिष्ठति एवकारात्कदाचिदप्यविच्छेदः यस्मादुक्ताकाशस्थितिरियं तस्माद्धेतोः प्रा
गुक्तदृग्गोलस्थितेराशिवृत्ते क्रांतिवृत्ताख्ये विवृत्तं विक्षेपवृत्तं वंशशलाकानिर्मितं क्षेपाक्षरलोपात् प्रोतमुक्तरीसाका

राम०
१८८

निर्मितं क्षेपाक्षरलोपात् प्रोतमुक्तरीसाकार्यं ६ पातभगणोपपत्तिमाह कक्षावृत्ते क्षेपवृत्तं स्वशक्त्या पश्चात्पातिप्रसहंतेनपू
र्वैः तज्जाः प्रोक्ताः पर्ययाः पातजाता यस्मात्सातो योगरूपश्चलोस्मिन्निति यतः कक्षावृत्ते क्षेपवृत्तं स्वरेशक्त्या प्रसहं पश्चिमा
भिमुखं गच्छति तेनकारणेन तज्जाः तद्वृत्तगमनजाताः भगणाः पातजाताः पातीयाभगणाः पूर्वं प्रोक्ताः वृत्तभगणानां पा
तभगत्वं कुतइत्यतो हेतुमाह यस्मादिति अस्मिन् क्रांतिवृत्तानुकारे कक्षावृत्ते योगरूपः शरवृत्तयोगस्वरूपः पातश्चलः प्रत्य
हं स्वशक्तिवृत्तगमनादस्थिरइत्यर्थः एतदेवयुक्तमैः साहित्योक्ताभिरुक्तं निवद्धं स्ववृत्ततोपक्रमतश्चक्रतायेविक्षेपविक्षेपि
तविग्रहाभ्यां स्वमेडलेपूर्वं विकारवंतस्तेषामवश्यं भवतीहपातइति ७ शरस्वरूपंतत्परमाभावस्थानेचानुपातप्रवृत्त्य
र्थं पद्याभ्यामाह नाडिकामंडलाक्रांतिवृत्तांशकोयाम्यतः सौम्यैर्लवैः स्याच्चते क्रांतिसंज्ञास्तथा क्रांतिवृत्तांशतः खेरविबाश्र
यः क्षेपवृत्तांशकः ८ यैर्लवैर्याम्यतः सौम्यतोवाभवेत्तैर्लवायाम्यसौम्याः शरास्याः स्युतः तेलवाभावात्मकाः पातनुल्येग्रहेस्त
ः पराः पातनस्यक्षेपतुल्यांतरेरति नाडिकावृत्तप्रदेशाद्यैरंशैर्दक्षिणेउत्तरेवा क्रांतिवृत्तप्रदेशास्यात्तेशायथा क्रांतास्याः पूर्वमुक्ता
स्तथा क्रांतिवृत्तप्रदेशाद्दक्षेपास्यशरवृत्तप्रदेशो बिंबो धर्मधरसूत्रस्थत्वेन बिंबाश्रयभूतो बिंबस्यप्रतिवृत्तस्थत्वात् यद्वा क

णेवृत्तमेवत्रिज्यावृत्तंस्वीकृत्यतद्भिप्रायेणाकाशशोलेसाक्षादेवग्रहबिंबाश्रयोविक्षेपवृत्तप्रदेशोनोर्ध्वाधरत्रसंबंधेनयेरंशौ
दक्षिणेउत्तरेवामवेभागादक्षिणाउत्तराः क्रमेणशरसंज्ञाउक्ताः तेप्रोक्तस्वरूपाः शरांशाशुक्रारान्मतांतरेन्यथैतिसूचितं
पातनुल्येग्रहे अत्रपातपदद्वादशराशिशुद्धराश्यादिपातान्यनरपरं तेनपातस्थानेग्रहेसषड्पातस्थानेग्रहेचपातसं
स्थेइतिपाठेतुक्रांतिशरवृत्तयोःसंयोगद्वयरूपपातद्वयान्यनरसंस्थेग्रहभोगेइत्यर्थः अभावात्मकाःशराभावइत्यर्थः पा
तस्थानाच्चिराशितुल्यांतरेग्रहेसति परोः उक्तशरकलाषष्ठांशमिताभवंति ९ अथशरानयनमुत्पादयन्पूर्वमतं
चेतिपद्याभ्यामाह मध्येग्रहेनुपतनाच्छरएवमुक्तपातग्रहेक्षशरसाधकर्केंद्रोयाः दोर्ज्यानयापरमबाणकलागुणोन
क्रांतिज्यकावद्दिताशरजज्यकास्याः १० धनुःशरःकेंद्रजगोलदिक्कोभवत्तयाम्योत्तरसन्मुखोसौ पूर्वेतुमंदस्फुटतो
वदंतिशरस्वशीघ्रश्रवणानुपातादिति मध्ये पातस्थानतच्चिभांतरितस्थानयोरभ्यंतरेग्रहेसति अनुपाताच्छरः
एवमुक्तप्रकारेणोत्पन्नइत्यर्थः एतदेवस्पष्टयति उक्तेति उक्तास्त्रीक्रांतपातग्रहयोर्योगरूपंशरसाधकर्केंद्रय
थाफलसाधनेग्रहोच्चांतररूपंकेंद्रंतथाशरसाधनेपातस्थानाद्ग्रहभोगस्यापेक्षितत्वेनपातग्रहभोगयोःपश्चिमप

र्वमार्गतयातदैक्यरूपंशरसाधकर्केंद्रंतस्यादित्यर्थः या भुजज्या अनयाभुजज्यया परमशरकलानांज्यया चोभुसंधेयः
क्रांतिज्यकावत् यथायनांशसंस्कृतग्रहाद्भुजज्यया परमक्रांतिज्या याचक्रांतिज्यास्यात्तथापातग्रहेक्षभुजज्यापरमशर
ज्याभ्यांत्रिज्यातुल्यभुजज्ययापरमशरज्यातदेष्टभुजयाकोसमुपाताच्छरज्योक्तेत्यर्थः अस्याः शरज्यायाः धनुः शरः केंद्रं
पातग्रहेक्षयुक्तं तस्यगोलस्यादिक्कः ग्रहभोगस्यक्रांतिवृत्तस्थत्वेनक्रांतिरहितात्ग्रहबिंबस्योत्तरस्थत्वेक्रांतिवृत्तेपात
स्थानाद्भोगोमेषादिषड्भोभवतिदक्षिणस्थत्वेतुलादिषड्भवतितदिगित्यर्थः अयंशरः भवतिक्रांतिवृत्तंतस्ययाम्योत्तर
स्थानेकदंबरूपेतदुन्मुखः यथाध्रुवप्रोतवृत्तेक्रांतिस्तथाकदंबप्रोतवृत्तेग्रहबिंबकेंद्रक्रांतिवृत्तप्रदेशयोरंतररूपंशरइति
भावः पूर्वोक्तादिदंभौमादीनांविलक्षणंसमुक्तिकंव्यवस्थापयितुंग्राहकमतमाहपूर्वेइति पूर्वेग्रंथप्रवर्तकाः मंदस्प
ष्टग्रहात्स्वशीघ्रकर्णानुपाताच्छरंवदंति मंदस्पष्टपातयोगाद्भुजज्यापरमशरज्यपायुत्पन्नास्वशीघ्रकर्णभक्ताभौमादी
नांशरज्यैतिनमतंफलितं तथाचतद्वाक्यं मंदस्फुटात्वेत्यरवः स्वपातयुक्ताद्भुजज्यापदिनेषुनिघ्नी स्वशीघ्रकर्णेनहृताशरः
स्यात्सपातमंदस्फुटगोलदिक्कइति ११ एतत्पूर्वमतंपद्याभ्यांदूषयति तदसद्भुवद्भुक्तंदबाणानयनाद्भौमसुखय

इस्यवणः नमुक्तं भवतीत्यदोषयोगादथगोले गदितं शिरोमणौ चेत् १२ तदसत्वलु मध्यचंद्रतः स्याच्छशिबाणोनभवे
त्स्फुटादिधोः सः उपलब्धिरथात्रबुद्धिवर्यैर्नैमतासंशयकारणायतः सेति तत्र पूर्वोक्तमनमसत्र हेतुमाह भव
दिति भवदुक्तं चंद्रस्य शरानयनं तद्विधेर्भौमादिग्रहस्य शरः कथं न स्यात् रसेन दुक्तस्यादोषयोगात् बाधकाभावा
दित्यर्थः अत्र बाधकमाक्षिपति अथेति सिद्धांतशिरोमणौ गोले गोलबंधे गदितं चंद्रशीघ्रोच्चभौमादीनां शरोन
साध्य इति प्रतिपादितं तथाहि मंदस्फुटोदाक्यनिमंडले चभ्रमसूर्यस्य मनस्तस्य च तत्र पातः पाते न युक्ताद्गणिता
गतेन मंदस्फुटात्तेव चरतः शरोस्यात् पाते यवाशीघ्रफलं विलोमं हत्वास्फुटात्तेन युताच्छरोनः चंद्रस्य कक्षावलयेहि पातः टाद्वि
धोर्मध्यमपातयुक्तादिति एतत्प्रपंचितं मरीचाविस्फुटरम्यते इति चेत् बाधकमिदं निरस्यति तदिति सिद्धांतशिरोमणौ एक
कं बाधकमसत् अत्र हेतुमाह मध्यचंद्रतइति यदि भौमादिबिंबं शीघ्रप्रतिवृत्ते भ्रमति ततः स्फुटग्रहस्य मध्यमोमंदस्य
वृत्तत्र तस्यैव वृत्तस्य वक्रभूतत्वात् अतोनुपातानीतपातोपि मध्यमत्वात्तत्रैव न मंदप्रतिवृत्ते तत्र भौमादिबिंबाभावा
त् अन्यथा शीघ्रफलानुपपत्तेः अर्हगणानीतभौमादेर्मध्यममध्यमत्वात् तेन पातमंदस्य वृत्तयोरेकवृत्तस्थत्वात्सातयु

नापि छरसाधनं न गोले शरसाधनार्थं कर्णानुपातइति नहि चंद्रबिंबस्य मंदफलान्यथानुपपत्तामंदप्रतिवृत्तस्थत्वेन मध्यमचं
द्रस्य तत्रास्थानाच्चंद्रपातस्याहर्गणानीतस्य तत्रावस्थानं तेन भौमादिशीघ्रोच्चं चंद्रशनैरो मध्यमचंद्रात्सातयुतात्कर्णानुपातेन
साध्यः स्यात् न स्पष्टचंद्रात्सातयुताद्दिनाकर्णानुपातं शरः साध्यो भवेदिति भवदुक्तं चंद्रशरे दूषणं यदि भवदुक्तं भवदुक्त
चंद्रशरोपपत्तिः प्रमाणं न हि भौमादीनामपि शीघ्रोच्चैव शरसाधनमुचितं उपपत्तेरेकनियामकत्वे नौचित्यादिति नियामक
मकत्वे प्रमाणाभावादिति भावः अत्राशंकते उपलब्धिरिति अथ उपपत्त्यनुपपत्तौ अत्र प्राचीनशरानयने उप
लब्धिः चंद्रशरस्य दृश्यत्वगणितोपयुक्तदृष्टिनथाकल्पनं युक्तं भौमादीनां शरस्य भिन्नशीघ्रागणितोपयुक्तदृष्टि प्रत्य
क्षदर्शनान्नथाकल्पनमिति भावः आशंकां निरस्यति बुद्धिवर्यैरिति सा उपलब्धिः बुद्धिरेव प्रमाणं स्वीक्रियते नै
नांगीकृतेसत्यैः नन्वसर्वादिसंमतं प्रसक्तप्रमाणं कथं नांगीक्रियते इत्यत आह संशयकारिणीति उपलब्धिः सर्व
कालावच्छेदेनाभिन्नानेकप्रकारेणा दृश्योपलब्धौ प्रमाणाभावादुपलब्धिः संदिग्धत्वादप्रमाणमिति भावः १२
ननु मंदस्य शरसाधनं भौमादीनां युक्तमेव बिंबसंबंधात्तेन भौमादीनां निर्णीतः शास्त्रार्थ चंद्रेणांगीकृतइति स्प

षचंद्रस्यैवमंदस्यष्टत्वान्नछरसाधनं चंद्रस्योक्तं चंद्रस्यकलावलयेहियातः स्फुटाद्धिधोर्मध्यमपातयुक्तादिति चनायुक्तं
नहिस्यष्टचंद्राछरसाधनंस्यष्टत्वेनांगीक्रियतेयेनभौमादीनामपिशरसाधनंस्यष्टग्रहादापद्येतेस्यतोबिंबसंबंधेनश
रसाधनंस्वंदयन्मसंगादन्यदपिपद्यत्यामाहमंदस्फुटाद्यदिशरोग्रहतारकीयःसिद्धःपुनःकथमतःश्रवणानुपातात्
त्रिज्योत्थवृत्तजनितोविपलःकृतस्तैरेवंपराःशरकलागदिताःश्रवोग्रे ९४ युक्ताःकथंचनियताश्चलकर्णयोगादेवं
स्फुटाद्ग्रहशरःश्रवणानुपातात् श्रीनीलकंठविदुषागदितोप्यसुक्तोऽर्थश्रवोनुपतनात्सुधियावबोध्यइति यदि
मंदस्फुटोभोगःशीघ्रप्रतिवृत्तेग्रहबिंबसंबद्धइतिग्रहशरोवस्तुभूतोमंदस्पष्टात्सिद्धोग्रहबिंबीयःसूपपन्नइतिहि
तैः बिंबसंबंधांगीकृतिः अतः मंदस्पष्टसाधितशरात् पुनरनंतरंकर्णानुपातात् त्रिज्यासन्नकलावृत्तसंबद्धोग्रहबिं
बसंबंधाभावान्निःप्रयोजनः शरःकुतःकृतः उक्तमभिप्रायेकर्णानुपातोक्तिरयुक्तेतिभावः ननुपरमशरकलाःकर्णच
प्रमाणोक्तास्त्रिज्याप्रमाणेनप्रसाध्योक्तशरानुपातेनशरसाधनंपूर्वाभिमतंसुज्यतेन्यथानुपातात्प्रत्तेरितिमंदस्पष्टस्था
नीयशरएवहनोनत्रिज्यासन्नकलावृत्तीयइतिनोक्तदोषइत्यतआहएवमिति यथाशरस्यकर्णानुपातोक्तिरयुक्ता

तथात्वदुक्तानुपातपर्यवसितपरमशरकलाकर्णानुपातोप्ययुक्तः यतःपराःशरकलाउक्ताःनियताःकर्णाग्रेकथंयुक्ताः
समुचिताः नोचितइत्यर्थः अत्रहेतुमाहचलकर्णयोगादिति अनियतकर्णसंबंधात् तथाचकर्णानियतत्वेपरमश
रकलाअनियतायुक्तानियताअनसंभवतीतिपरमशरकलानांकर्णानुपाताप्रवृत्तिः नचैवंशीघ्रपरिधयःकथंनि
यताःकर्णाग्रेइतिवाच्यं ग्रहबिंबस्यशीघ्रनीचोच्चवृत्तपरिधिस्थत्वेनतत्फलज्यायास्तत्रस्थत्वेनतदुपजीव्यपरिधि
प्रदेशस्यकर्णाग्रेप्रत्यक्षत्वात् अतस्त्रिज्याग्रेउक्तानांपरमशरकलानांसमुचितत्वात्तदनुपातःसपातमंदस्पष्टो
र्ज्यायानुचितएवफलेछयोरेकवृत्तस्थत्वाभावात् सपातस्पष्टोर्ज्ययोक्तानुपातोमन्मतेसूपपन्नोपितारासं
बंधाभावाद्भवन्मतेनुचितःपरमशरकलानांकर्णानुपाताभ्युपगमेपिसपातमंदस्पष्टोर्ज्यायानुपाताछरसाधन
मयुक्तं कर्णानुपातफलितानांपरमशरकलानांत्रिज्यावृत्तस्थत्वाभावात् ननुपरमशरकलानामुक्तानांत्रिज्याग्री
यत्वेसिद्धेत्रिज्याग्रेउक्ताःपरमशरकलास्तदाकर्णाग्रेकाइत्यनुपाते नोर्ध्वाधःक्रमसिद्धसमप्रदेशीपात्मब
हुकलानामसिद्धिरतोव्यस्तानुपातेनफलितकर्णानुपातेनकर्णाग्रेपरमशरकलानांज्ञानात्सपातमंदस्पष्टोर्ज्यं

यायहबिंबसंबद्धशरानयनसुक्तमुपपन्नमितिचेन्न· अवगतशरस्यकर्णाग्रीयत्वेनोक्तांतेश्चभद्वत्रेत्रिज्याग्रीयत्वेन
तयोः संस्कारकरणानुपपत्तेः· तारासंबंधसिद्धशरात्कर्णानुपानेनमहत्त्रीयकरणापत्तेश्च· चंद्रस्यबिंबसंबंधेनशरा
सिद्धेश्च· तस्माद्भद्वत्रीयशरस्यापेक्षितत्वेनोक्तपरमशरकलाभ्यः स्पष्टग्रहादेवक्रांतिवृत्तस्थाद्दृणितागतपातावेरपि
तत्रस्थादन्यत्रकल्पनेमानाभावाच्चंद्रवच्छरसाधनंभौमादीनांसुक्तरमन्यथाचंद्रशरसाधनंभवदुक्तंमहत्त्रीयम
नुपपन्नंस्यादितिभावः· अतएवज्ञानराजदैवज्ञैर्वक्ष्यैः सिद्धांतसुंदरे प्राचीनशरसाधनसुक्तापिशरवासनास्पष्ट
ग्रहाक्रांतिवद्दुक्ता· नभास्करोक्तविशेषवासनावश्यकी निरूपिता· स्वाभिप्रेतनिकटमतमनूद्य हृषयति· एवमिति·
यथापूर्वोक्तमयुक्तंतथेत्यर्थः· स्फुटान्ग्रहस्य शरः कर्णानुपातात् श्रीनीलकंठपंडितेन ताजिकवंत्रीउक्तः· अपिशब्दान्ग
हस्यस्पष्टस्यैव विचारेणग्रहणंयच्चिंतनंतमितिसमीचानंमतमित्यर्थः· परमशरकलानांकर्णानुपातेनत्रिज्यावृत्तपरि
णतानांज्ञानात्त्रिज्यावृत्तस्थस्यस्पष्टग्रहभोगाद्दृणितागतपातेनत्रिज्यावृत्तस्थेनान्यथानुपपत्त्याकल्पितेनसुक्तासुजस
याशरसाधनंमहत्त्रीयंसुक्तरमितिभावः· सुधियायुक्तिशून्योक्तेयः हेतुमाहव्यर्थेति· स्पष्टात्साधितशरस्यक-

र्णानेयेसिद्धभावाद्व्यर्थकर्णानुपानस्यात्· नचपरमशरकलानांकर्णानुपानान्नदोषइतिवाच्यं· परमशरकलानां·
कर्णाग्रीयत्वकल्पनेमानाभावात्त्रिज्यावृत्तस्थत्वकल्पनस्यलघुभूतत्वात्· अन्यथामंदस्यस्पष्टादेवसाधनापत्तेः· नच
स्फुटपरस्यमंदस्यस्पष्टएवेसर्वकरणेएवंमताभिन्नंमतंनेतिवाच्यं· मंदस्फुटाल्लेचिदुक्तेतिबाणमितिस्वग्रंथेनैव
प्राचीनमतस्यपरमतेनन्यस्तत्वात् ९५ ननूक्तंयुक्तिसिद्धंकुजार्किगुरुपातानांग्रहवच्छीघ्रजंफलं· वामंतत्तीय
कंमांदंबुधमार्गवयोः फलं १ स्वपातोनाद्दृहाज्जीवाद्गुरुभार्गवसौम्ययोः विक्षेपाद्भौमसर्कणां विक्षेपात्त्रिज्यया
त्रिज्यया विधोरितिसूर्यसिद्धांतविरोधात्कथंवयुक्तिनंभवाद्दृशामित्यतः प्राचीनमतमेवार्षमलक्षत्वेनसमर्थय
ति· एवंवादितंसायकसाधनंपत्रागमोमानयुक्तिः· इसाशयेनैवमिदंमयोक्तंनतत्वतोवाच्यं· हुलांतरवादिति·
यत्प्राचीनोक्तंशरसाधनं· तत्र· शरसाधने· अहो· परंपरामार्गानुरोधगणवश्यथानांभयादिसर्वः· आगमः· प्रमा
णं· युक्तिः प्रमाणंनसिद्ध्यति· चंद्रपातभौमादिपातयोरहर्गणानीतयोश्चंद्रत्रिज्याव्यासार्द्धकलात्रिज्याव्यासार्द्धकला
प्रतिबद्धशीघ्रप्रतिवृत्तयोरवस्थानेनियामकाभावात्· प्रोक्तशरपरमकलानांचंद्रभौमादिक्रमेणत्रिज्याकर्णा

यौयत्वेनियामकाभावाच्च एतदभिप्रायेण इदं शरानयनं एवं सग्रहाद्दिनाकर्णानुपातं मयाकथितं नत्वनः भौमादि
शरसाधनं वस्तुगत्यास्पष्टग्रहाद्दिनाकर्णानुपातं साध्यमिति आशयेन नोक्तं युक्तोक्तस्य शरसाधनस्य एवं स्वतंत्रमतत्वेन प्र
तिभावैनाद्दृक्तं पक्षांतरावगमार्थमिदं ननु युक्तिनिरस्तस्य पुनरादरणमयुक्तमिति सत्यं आहबहुलांतरत्वादिति यदस्प
ष्टस्यस्पष्टयोरंतरे शीघ्रफलत्वात्तस्य बहुत्वेनापि संभावनायां कर्णस्यार्थंतरबहुत्वसंभावनायां च एवं कल्पितशरानयन
योर्मेरुसर्षपयोरिव तुल्यताभावादिति भावः सूर्योक्तान्यथानुपपत्त्या गोलस्थितिरपि वस्तुभूता पाताच्चिभांतरे स्पष्ट
चंद्रबिंबवेधात्रवगतचंद्रपरमशरो नियतः प्रतिपरिवर्त्तवर्णाग्रे त्रिज्याग्रे नियतः स्वभूमिनः कर्णवृत्तयोः शरकला
वृत्तयोः संपातस्थाने चंद्रमंदफलसंस्कृतश्चंद्रपातश्चंद्रवद्भवति तत्र मंदप्रतिवृत्तसंबंधाच्चंद्रोहर्गणानीतो मध्य
मः तथा च कर्णवृत्ते शरसाधनार्थं मध्यमचंद्रस्पष्टपातयोगाद्भुजज्यया कर्णाग्रानियतपरमशरकलाभ्योनुपाते
न शरः साध्यः स एव कर्णानुपाताच्चिज्यावृत्ते एवं त्रिज्यावृत्तयोः शरकलावृत्तयोः संपातस्थाने हर्गणानीतपात
एव भवति चंद्रस्य त्रिज्यावृत्ते स्पष्ट इति यथोक्तं शरसाधनं सम्यक् चंद्रस्थितेर्भौमादीनां स्थितिरन्यथा भौमादिवे

MEMORIAL

धाच्छरः परमः कर्णाग्रे उक्तनियतस्तत्र कर्णव्यासार्द्धवृत्तयोः शरकलाख्ययोः संपाते हर्गणानीतो मध्यमः पातः तत्र शीघ्र
प्रतिवृत्तसंबंधाद्भौमादयो मंदस्पष्टाः पातो मंदस्पष्टयोगभुजज्यया नुपातेन शरः कर्णाग्रे सएव कर्णानुपाताच्चिज्यावृ
त्ते एवं त्रिज्याव्यासार्द्धवृत्तयोः शरकलाख्ययोः संपातस्थाने यद्दृ शीघ्रफलस्पष्टसंस्कृतो हर्गणानीतपात एव भवति
यद्दृस्पष्ट एव नित्यस्पष्टपातस्पष्टग्रहयोगाद्भुजज्यया नुपाते न शरः परंतु वृत्तयोर्दक्षिणोत्तरमंतरं परमशरकलाभ्यां
कर्णाग्रे उक्ताः परमशरकलास्तत्रिज्याग्रे का इत्यनुपाते नेति सुस्थमानयनं पूर्वोक्तं अत एव सिद्धांतशिरोमणौ
शीघ्रकर्णेन भक्तास्त्रिभज्याघ्नाः स्युः परस्परं भागा ग्रहाणां स्फुटाः क्षेपवृत्तानि षण्णां विदध्यात् पृथक्स्वस्ववृत्ते भ्रमंती
त्युपपन्नं ग्रहदृक्तिभगोले स्फुटएव पातः ग्रहस्य गोले कथितायमंडलं प्रकल्प्य कक्षावलयं यथोदितं निबद्ध्य शीघ्रप्रति
वृत्तमस्मिन्विमंडलं तत्सदिनैः शरांशैः मध्योच्चपातो यत्सदामिति चोक्तं संगच्छते अन्यथा भौमादीनां चंद्रस्य च क्रांतिव
त्परमशराणामप्येकसंख्यानियतकल्पनापत्तेः सूर्यस्य शरकल्पनापत्तेः पुष्पवतोः शीघ्रफलकल्पनापत्तेश्च तस्मादा
गमप्रामाण्येन गोलस्थितिरबाधिता कल्प्याबाधितगोलस्थितावागमस्याप्रामाण्याश्रयणमादितिनत्वं १६

अथ क्रांतिसंस्कारयोग्यं शरं विवक्षुस्तदुपयुक्तमायनवलनमाह कृतायनांशग्रहकोटिजीवाजिनांशजीवागुणिता विभक्ता
क्रजीवया लब्धधनुस्तदीपायनांशमुक्तं वलनं लवाद्यमिति अयनांशसंस्कृतग्रहस्य कोटिज्या चतुर्विंशसंशज्यया गुणिता
अयनांशसंस्कृतग्रहक्रांतिज्योत्पन्नक्रज्यया भक्ता फलस्य धनुर्भागाद्यं तदीयायनांशं अयनांशसंस्कृतग्रहायनदि
क्कवलनमुक्तं १७ उपपत्तिं प्रतिजानीते अत्रोपपत्तिरिति अथ प्रतिज्ञातामुपपत्तिं विवक्षुर्गोले विषुवद्वृत्तदिग्वि
भागमाह सर्वतः क्रांतिसूत्राणां ध्रुवे योभवेद्यतः विषुवन्मंडलं प्राच्यां ध्रुवे याम्यां तथोत्तरे इति सर्वतः विषुवद्वृत्तस
र्वप्रदेशेभ्यः क्रांतिसूत्राणां गोले वृत्ताकारपरिणतानां यतः कारणात् ध्रुवस्थाने संपातो भवेत् तत्कारणाद्वि
षुवद्वृत्तेच्यां उपलक्षणात्पश्चिमायां च देशानवच्छिन्नगोले ध्रुवानुरोधेन पूर्वापरं स्यात् ध्रुवद्वये क्रमेण दक्षिणोत्तरा
स्यात् क्रांतिसूत्रे याम्योत्तरमिति भावः १८ अथोपपत्तिहेतुभूतं क्रांतिवृत्तानुरूपदिग्विभागं गोलस्य दिशः कदंबं नि
रूपयति सर्वतः क्षेपसूत्राणां ध्रुवाज्जिनलवांतरे योगः कदंबसंज्ञो यं क्षेपो वलनबोधकृदिति सर्वतः क्रांतिवृत्तस
र्वप्रदेशेभ्यः क्षेपशाद्वाच्यशरानुरूपसूत्राणां गोले वृत्ताकारपरिणतानां ध्रुवस्थानाच्चतुर्विंशतिभागांतरे संपा

जिनलवांतोयः स्यादयं कदंबसंज्ञो वगम्यः प्रकृतेस्य प्रयोजनमाह वलनबोधकृदिति प्रतिपादितवलनस्य गोले
स्वरूपदर्शनेनावबोधकारकः एतेन प्रकृतानुपयुक्तत्वं निरस्तमुक्तं १९ अथैतमेवस्फुटं वलनोपपत्तिं त्रिभिः श्लो
कैराह तत्रापमंडलप्राच्यायाम्यासौम्याच्चदिक्सदाः कदंबभ्रमवृत्तं च बभ्रीयासरितो ध्रुवात् २० गोलेतुजिनतुल्यांशैस्त
त्क्रांतिसिंजिनी कदंबध्रुवसंप्रोतवृत्तेश्च यतपानयेत् २११ कक्षावृत्तस्थरेखांकेतत्स्थलाक्षकयोः तद्वृत्तांतर
कं विद्यादावयनं वलनं दिशामिति तत्र कदंबद्वयस्थाने निसमनवरतं क्रांतिवृत्तरूपप्राच्यपरवृत्तस्य क्रमेण दक्षिणोत्त
रादिक् यथा विषुववृत्तस्य ध्रुवयोर्दक्षिणोत्तरान्यथा क्रांतिवृत्तस्य कदंबयोर्दक्षिणोत्तरे सर्वः कदंबयोरस्थिरत्वेन तद्दक्षि
णोत्तरयोर्ध्रुवस्थानानुरोधादस्थिरत्वं क्रांतिवृत्तस्यानवरतं प्रवहभ्रमणादिति सदैत्यनेन सूचितं अथ दिग्विभागसु
स्फुटवलनस्वरूपदर्शनार्थं निबद्धगोले कदंबभ्रमवृत्तनिबंधनमाह कदंबेति निबद्धगोले पूर्वोक्तध्रुवस्थानद्वयात् प
रितः समंतात्चतुर्विंशसंशैर्गोलपृष्ठस्थैः कदंबयोः प्रत्येकं भ्रमणज्ञापकं वृत्तं वंशशलाकादिनिर्मितं बभ्रीयात् तत्र
कदंबभ्रमणज्ञापकवृत्ते क्रांतिज्या ज्या स्यात् यथा त्रिज्याभ्यासार्द्धवृत्ते विषुववृत्तादौ त्रिज्याप्रमाणानुरोधाज्ज्यात

यास्मिन्वृत्ते क्रांतिज्यैव ज्याग्परमक्रांतिज्यामितव्यासार्द्धे पत्वारिनिभाः वलनस्वरूपं दर्शयति कदंबध्रुवेति निबद्धगोले कदं
बद्वयप्रोतवृत्तं तथाध्रुवद्वयप्रोतवृत्तं एते उभे वृत्ते अथवेनयथायोग्यभ्रमणात् क्षाद्वृत्तस्थग्रहस्य
चिह्नं प्रतिनयेत् कक्षावृत्तस्थग्रहस्य भोगचिह्नस्थानेद्वयोर्द्वयोः संपातो यथा भवति तथा सन्निवेशः कार्य इति भावः तस्य
लात् ग्रहभोगचिह्नस्थानीयसंपातमारभ्येत्यर्थः नवसंज्ञांतरितस्वप्रदेशयोरिति सप्तमी तयोरुक्तयोर्वृत्तयोरंतराल
सूत्रमेव क्रांतिसंज्ञारूपं दिशामायनं वलनं जानीयात् तथाच वलनीतिनद्वलनमिति व्युत्पत्त्या विषुववृत्तदिग्भ्यः क्रांतिवृ
त्तदिशामवदंतरेण वलितत्वान्नवसंज्ञांतरितं प्रदेशयोस्तदाक्षिणोत्तरभूतयोरंतरं प्रदर्शयित्वात् तुल्यमेव पूर्वापरयो
रिति साधारण्येन दिशां वलनमुक्तमिति भावः २२ अथ सर्वदिशां वलनं समभवेति मंदप्रतीत्यर्थं कृत्वादयन्वलनस्व
रूपं प्रकारांतरेण दर्शयन्नुक्तमेव मंदावबोधार्थं स्फुटयन्नंचश्लोकानाह अथवा परितः खेटचिह्नात्वा काशक्रेन्यसे
त् त्रिज्यावृत्तं कुजे तस्मिन्विषुवत्क्रांतिवृत्तयोः २३ अंतरे चायनं तत्स्याद्विषुवात्सौम्ययाम्यदिक् अयनादिकदंबौ च
स्यातां वृत्तद्वयैकागौ २४ आयनं वलनं तस्मादायनादौ प्रजायते यतो भ्रमति गोले यमयनादिर्यथा यथा २५

तथ भ्रमसेषः कदंबो निजमंडले अयनाग्रस्थुरेदांके ध्रुवप्रोतसुवृत्तगे २६ ध्रुवप्रोतश्च यावद्वृत्तात्कदंबो निजमंडले अर्द्ध
ज्यांतरितो यस्माद्वलनं तन्निजं भवेदिति क्रांतिवृत्ते ग्रहभोगचिह्नमारभ्य नवसंज्ञांतरितप्रदेशे त्रिज्यायासार्द्धवृत्तं गोले परि
तोन्यसेत् तस्मिन्ग्रहभोगचिह्नीये क्षितिजारभ्ये वृत्ते विषुववृत्तक्रांतिवृत्तप्रदेशयोः स्वस्वपूर्वापरयोरंतराले क्रांतिसंज्ञानुसंतद्व
लनमायनं विषुवप्रदेशादुत्तरदक्षिणदिक्क्रांतिवृत्तप्रदेशानुरूढं स्यात् एतेनायनाद्यंवलनसुपपन्नमिस्तक्रं उक्तमेव मं
दावबोधार्थं विशदयति अयनादीति वृत्तद्वयैकागौ ध्रुवद्वयप्रोतं वृत्तं कदंबद्वयप्रोतं वृत्तं च उभयोरेकं सर्वावयवा
वच्छेदेन पूर्वापरांतराभावस्तत्रगतौ स्थितौ अयनादिकदंबौ अयनादौ स्थिरक्रांतिवृत्तीयमकरकर्कयोरादिप्रदेशौ कदंबावुभौ
स्यातां कदंबप्रोतवृत्तेकदंबौ ध्रुवप्रोतवृत्तेदयोः स्वतः सिद्धत्वात्तस्मिन् ध्रुवप्रोतवृत्तेनसत्यायनादिस्थग्रहविहेसति भवेतामेवायन
नादिकदंबौ ध्रुवप्रोतवृत्तेइति फलितोर्थः तस्मादुक्तहेतोः अयनादौ ग्रहभोगचिह्नेसत्यायनं वलनं नासद्यते ध्रुवप्रोत
वृत्तात्कदंबप्रोतवृत्तस्य भान्यसंज्ञात्वपिकदंबपृथक्स्थितत्वाभावात्तद्वृत्तयोरंतरानुसत्तेः नन्वयनादौ ध्रुवप्रोतवृत्तेसति
कदंबौ ध्रुवप्रोतवृत्तेसतुतः स्यातामत्यर्थांतराभावपिकदंबयोर्ध्रुवप्रोतवृत्तस्थत्वापत्तेः क्रांतिवृत्तीयसर्वावयवैः सहवेधत्व

तुल्यत्वादिसतोयनादिकदंबयोरसाधारणसंबंधरूपकारणसंबंधमाह्यनइति. गोले निबद्धगोले. अयं स्थिरक्रांतिवृत्तस्थ
करकर्कादिप्रदेशरूपोयनादिः. यथायथाप्रवहवायुनाभ्रमतिस्वाहोरात्रवृत्तरूपमार्गे. तथातथा. तदनुरोधेनेसर्थः. एषः क्रांतिवृ
त्तस्यमाम्योत्तररूपस्थेनपतिपादितः. कदंबः स्ववृत्ते. ध्रुवासरितश्चतुर्विंशसंख्यांतरितवृत्तेहोरात्राख्येप्रवहवायुनाभ्रमति. ए
तेनकदंबयोर्ध्रुवस्थानस्थत्वासंभवःसूचितः. अतोध्रुवप्रोतवृत्तेकदंबयोरयनादिनासहस्थितिःसूचयन्नेसर्थः. अयनभिन्न
स्थानेध्रुवप्रोतवृत्तेकदंबयोरवस्थानंनास्तीसाह. अयनान्येति. अयनानिरिक्तस्थिरक्रांतिवृत्तप्रदेशस्थग्रहभोगस्यचिह्नतस्मिंध्रु
वप्रोतवृत्तस्थितेसति. ध्रुवप्रोतनयाप्रथमेतादृशादुक्तरूपाद्वृत्तात् कदंबः स्वभ्रमणवृत्ते. अर्द्धज्यांतरितः क्रांतिसंज्ञैरर्द्धज्यावसरिण
नैरंतसंज्ञानंयस्यैतादृशः वस्तुतोध्रुवस्थानासरमक्रांतिसुक्रमज्यांतरितध्रुवसूत्रेयत्स्थानंतत्रेंदुमधिकृत्यपरमक्रांतिज्याव्या
सार्द्धेनयद्वृत्तंतत्कदंबभ्रमवृत्तंएवंतद्वृत्ताभिन्नं. तत्रपरमक्रांतिज्यातुल्यव्यासार्द्धमितमध्यसूत्रात्कदंबपर्यंतमस्तुसूत्रमर्द्धज्या
कारंक्रांतिज्यैवेसक्रमनुपपन्नंनैवेति. यस्मादिदमस्मात्कारणात् नहर्द्धज्यापरिमितंवलनमायनंस्यात् ध्रुवप्रोतवृत्तात्कदंबप्रो
तवृत्तस्यपृथक्स्थानस्थितत्वात् अर्द्धज्यांतरितदृक्क्षेपालक्षारिभिरुक्रमज्यावलनंसाधितंनभास्कराचार्यैः सिद्धांतशि

रोमणौगोलाध्यायेवलनवासनावसरेदूषितंतत्सम्यगेवेतिसूचित २७ अर्द्धज्यारूपंवलनंकस्यक्रांतिज्येत्यत आह. अयनोक्त
कालांशक्रांतिज्यासममेवतत् कदंबभ्रमवृत्तंहिक्रांतिवलयानुगमिति. अयनसंधौवलनाभावस्तदन्यत्रवलनमुपपद्यतेतोय
नादिसंधितोयेउक्ताःज्ञाताःकालांशास्तेषांयाक्रांतिज्यातयातुल्यंतद्वलनं. एवकारस्तेनांशक्रांतिज्यातेनवलनंयेरुक्तंतत्स्थू
लत्वान्निरस्तं. अत्रहेतुमाहकदंबेति. हियतोयस्मिन्वृत्तेवलनंप्रदर्शितंतत्कदंबभ्रमवृत्तंध्रुवकेंद्रत्वाद्ध्रुवप्रोतवृत्तानुरूपं. तस्मा
कालांशज्यैवविषुवद्वृत्तानुकारवृत्तस्थत्वात्. नतुकदंबकेंद्रकचतुर्विंशत्यासार्द्धवृत्तेवलनमुपपन्नंयेनक्षेत्रांशज्यायाःवल
नत्वंसिद्ध्येत्. २८ अतोयनसंधितोज्ञातांशानांकालज्यावलनानयनोपजीव्यासिद्धेत्याह. अतोयनारितोबाहुज्यासाकौ
टिल्यकायग्रहात् अस्याःकालज्यकाकार्याकोटाद्यदयरीतिनइति. यतोवलनस्यायनोक्तकालांशक्रांतिज्यातुल्यत्वमुक्तमतः
कारणादिसर्थः. अयनसंधितोवगतग्रहभोगस्यभुजज्यायानवतिसाग्रहाद्गणितागतादयनांशसंस्कृताद्ग्रहभोगादिसर्थः
कोटिज्यकायर्यवसन्ना. ग्रहभोगावधेर्मेषादेरयनसंधिभ्योपदानरितत्वात् अस्याःकोटिज्यायाःकोटाद्यदयरीतितः सि.
द्धांतशिरोमणौस्पष्टाधिकारेकोटादिराश्यंतजकोटिजावास्तिज्यागुणाःस्वस्वदिनज्यायामाःवापीकृतौनाः प्राग्वदधो

विशुद्धाः कीटादिकासुदमायासवोवेस्फुटकर्कादित्रयोदयासुप्रकारवशात् कालज्यासाध्या तदुपपत्तिस्तु मया मरीचौ नद्याख्या
वसरे निरूपिता २९ कालज्याद्वारा क्रांतिज्याधने बलनानयनमुपपन्नमिसाहृते नेयं त्रिभजीवाग्रा ग्रहज्याहृता फलं का
लज्यास्याः क्रांतिजीवोयन्नोन्नावलनज्यकेति यतः कालज्यासाधनमावश्यकं तेन हेतुनेत्यर्थः इयं अयनांशसंस्कृतग्रहस्य
कोटिज्या त्रिज्ययागुणिता ग्रहज्यया भक्ता फलं कालज्या या कोटिज्या सा होरात्रवृत्ते जीवा प्रसक्ता गोले अतो ज्याप्रमा
णसिद्धा स्वतः कोटिज्या तद्वत्कुः करणार्थं त्रिज्या परिणता होरात्रवृत्ते कार्येति अस्याः कालज्यायाः सकाशात् क्रांतिज्या साध्या सा
तु पूर्वोक्तावलनज्याफलिता क्रांतिज्यार्थं कालज्यायाः परमक्रांतिज्या त्रिज्ये गुणहरा विति त्रिज्ययोर्गुणहरसमत्वेन नाशा
त्कृतायनांशेसारिपूर्वोक्तमुपपन्नमित्यर्थः ३० अथ प्रकृतं स्पष्टशरसाधनमाह अयनवलनजीवावर्गहीनत्रिभज्या
हतिपदगुणितेषुज्याहृता त्रिज्ययायत् फलधनुरथ सूक्ष्मः क्रांतिसंस्कारयोग्योलवसुखखगबाणः स्पष्टसंज्ञः स दिवस्ता
दिक्सादिति आनीतशरस्य ज्या आयनवलनज्यायाः वर्गेण हीनो यस्त्रिज्यावर्गस्तस्य मूलेन गुणिता त्रिज्ययाभक्ता यत्फ
लस्य धनुः सूक्ष्मांशा योग्रहस्य शरः स्पष्टसंज्ञकः स्पष्टत्वं स्फुटयति क्रांतिसंस्कारयोग्य इति पूर्वानीतशरस्य दिग्यस्ये

नाहशः ननु पूर्वशरेणकदाविदपिविभिन्नदिग्भ्यस्यर्थः ३१ नन्वयंसूर्यसिद्धांतादावनुक्तेरप्रमाणाद्दृसतोगोलस्थितिसाध्य
सत्तप्रमाणगम्य इतिनिरूपणार्थं प्रतिजानीते अत्रोपपत्तिरिति उक्तशरानयनेगोलस्थितिसिद्धत्वमुच्यते तेनप्रसक्तं प्र
माणं नागमप्रामाण्यपेक्षते इतिभावः प्रतिज्ञातंगोलेदर्शयति ध्रुवप्रोतवृत्तेलग्नायेभवंतिस्वबिंबवृत्तप्रदेशांतराति
स्फुटाख्याः शरांशा मिरुक्तानुधैलेनिजक्रांतिसंस्कारयोग्यायहाणामिति यहाणात्मनोबिंबकेंद्रस्थानेसत्तवृत्तक्रां
तिवृत्तेतस्यासन्नः प्रदेशः अनयोर्मध्ये ध्रुवप्रोतवृत्तेबिंबकेंद्रसंक्रमेयेभागाः भवंतितेस्पष्टसंज्ञाः शरभागाः बिंबसंक्रमे
ध्रुवप्रोतवृत्तंसदायहभोगस्थानेक्रांतिवृत्तेलग्नतितर्हि पूर्वोक्तशरादस्मिन्शरस्यासिद्धत्वंसिद्धेत् नचैवं बिंबकें
द्रसंक्रमध्रुवप्रोतवृत्तस्यहभोगस्थानक्रांतिवृत्तेपूर्वापरांतरेणैवसंलग्नत्वात् अतएवतत्स्थानभोगस्यायनयंग्रहत्वम
येस्फुटं ततोध्रुवाभिमुखशरः कदंबाभिमुखशरात्पूर्वोक्तादतिरिक्तः सिद्धोयमेवस्पष्टत्वेनाहतः क्रांतेर्ध्रुवाभिमुख
त्वेनसजातायनयापरिणतः स्वक्रांतिसंस्कारयोग्यत्वेनभास्कराचार्यादिभिरुक्तोनमयैवोक्तः तथाचसिद्धांतशिरो
मणौग्रहछायाधिकारे त्रिज्यावर्गादयनवलनज्याहतिपोश्वमूलंयष्टियंत्रे ध्रुवचरविशिखस्तादितस्त्रिज्ययाप्तः य

दूराशित्रयसुनरवगद्यज्यकाग्रस्त्रिमौर्व्यीभक्तः स्पष्टोभवतिनियतं क्रांतिसंस्कारयोग्यइति. एतद्द्वारयोपपत्तीम
रीचौसचिस्तरेविलोक्ये ३२ अथाशंकानिषेधति. अथपूर्वागतोयोसौशरोनदृष्यगस्तिचेत्. वक्ष्यमाणायनदृशःक
र्मयर्थतदाभवेदिति. पूर्वोक्तः स्पष्टोपजीव्यः शरोयः सएवासौ. नस्पष्टशराशिनः पूर्वोक्तः शरोध्रुवाभिमुखत्वेनसिद्धो
नकदंबाभिमुखत्वेनप्रमाणाभावाद्गौरवाच्चेतिस्पष्टक्रियानिबंधनंव्यर्थमितिभावः उत्तरयति. वक्ष्यमाणेति. तदाध्रु
वप्रोतंवृत्तंग्रहभोगीयक्रांतिवृत्तप्रदेशलग्नंग्रहबिंबकेंद्रेलगत्यवश्यमितिकल्पनेइत्यर्थः. वक्ष्यमाणमायनदृक्कर्मव्यर्थं
स्यात्. कदंबाभिप्रायिकग्रहभोगाद्ध्रुवाभिप्रायिकग्रहभोगस्यदृक्कर्मांतरेणैवसिद्धत्वादवस्थापितसर्वग्रंथसिद्धायनदृक्क
र्मणोनुपपत्तिः. पूर्वोक्तग्रहभोगस्यैवत्वन्मते आयनग्रहभोगत्वेनसिद्धेरितिभावः. अतएवसिद्धांतशिरोमणौगोलाध्याये
क्रांतिसूत्रेशरंकेचिन्मन्यंतेतेकुबुद्धयः. यद्येवमायनंतेअविकृतमिसूत्रं ३३ अथैतदानर्मयनोपपत्तिज्ञानार्थंशरोस
ंस्तेत्रमाहपूर्वोक्तशरजीवास्फुटशरज्यका. कोटिर्भुजस्तद्धराज्ञाशज्याक्षेत्रेशरोरवेरिति. कदंबप्रोतवृत्तेपूर्वो
क्तशरज्याकर्णः स्पष्टशरज्याकोटिः. तद्धराज्ञाशज्या. तयोः कर्णमूलकोटिमूलयोर्मध्यक्रांतिवृत्तसंबंधेनयद्धराज्ञ

MEMORIAL

वृत्तस्यप्रदेशरूपंखंडंतस्यजेत्यर्थः. भुजः. इदंक्षेत्रंपूर्वाचार्योक्तानुरोधेनोक्तंस्वल्पांतरात्. सूक्ष्मदृष्ट्यातत्वंनयुक्तमेतत्
स्फुटास्फुटशरज्ययोर्ग्रहबिंबकेंद्रेयसंपातात्कोटिकर्णोपपत्तावपिनमूलयोः क्रांतिवृत्तस्थूलत्वस्यचतिर्यक्त्वेननमूलां
तर्वर्तिक्रांतिवृत्तप्रदेशस्यकोटिवशात्तत्सूत्रानुकारत्वाभावाद्भुजत्वमनुपपन्नं. एतेनसिद्धांतसुंदरेनस्पष्टभुजत्वंगणित
कर्मणाहतंनिरस्तः. नचतन्मध्यवर्तिधराक्षेत्रप्रदेशस्यकोद्यनुरोधेनभुजाभुजत्वंयुक्तमुक्तमितिवाच्यं. मूलप्रदेशयो
स्तिर्यक्त्वेनैकधराक्षेत्रतृतीयप्रदेशस्यासंलग्नत्वात्. एकतरमूलसंलग्नत्वेनभुजोक्तादरेऽत्रयोः कोटिकर्णयोरनुपपत्तेः. तथा
हि. कर्णमूलाद्दृक्सूत्रमहोराक्षेत्रप्रदेशरूपंकोपस्पष्टमनः कोटित्वमसिद्धं. कोटिमूलाद्दृक्सूत्रमहोराक्षेत्ररूपंकर्णस्प
ष्टत्वंबाधकारमनः किंचिन्न्यूनशरस्यैवकर्णत्वंनसंपूर्णस्येत्यत्रकर्णानुपपत्तिरिसत्वंविचारेण ३४ अथसाधकंक्षेत्रमाह
अयनवलनजीवापूर्वमुक्ताभुजः स्यादयनवलनजीवामूलभगर्भमध्ये. भवतिबुधजनोक्ताकोटिस्त्वाचिभज्याग्रवणाद
ग्रिहगभीदंतरंचाकदंबमिति. पूर्वमुपपन्नमवसरेध्रुवप्रोतश्लथादित्यादिनानिरूपितेसर्वं. अयनवलनज्यायाः मूलंध्रु
वप्रोतवृत्तेकदंबभ्रमवृत्तीयव्यासार्द्धसूत्रेकेंद्राद्दूरकालांशक्रांतिज्यामितांतरे. भगर्भश्च. अनयोर्मध्येयासूत्ररूपाभु

धजनोत्क्रायष्टिः कोटिः भास्कराचार्यैस्तु बुधानां सर्वेषां मान्यमिति सूचनार्थं जनपर्यंतं धावनं कृतमिति ज्ञेयं अत्र क्षेत्रे भू
गर्भमारभ्य कदंबपर्यंतं इति सूत्ररूपमंतरं चिज्यासाकर्णः ३५ स्पष्टशरानयनोपजीव्यामुपानसुल्लेखयति वलनस्यावर्ग
हीनात्त्रिज्यावर्गात्पदं यदि त्रिज्याकर्णे कोटिरूपं तदेषुज्या श्रुतौ वक्रिमिति स्पष्टार्थं ३६ अस्मात्स्पष्टशरानयनमुपपन्नं
मिसभिप्रायेणाह लब्धास्पष्टशरस्यास्याधनुः स्पष्टशरो भवेत् कोटावपि ध्रुवोर्ध्वाधः स्थायी ध्रुवभसंमुखदृष्टि लब्धा इष्टा
फलरूपेत्यर्थः अस्याः स्पष्टशरज्यायाः अयनवलनजावेत्याद्युपपन्नमिति भावः ननु कदंबप्रोतवृत्तस्थशरस्य त्रि
ज्याकर्णसंबंधेन कदंबोन्मुखत्वं तथा स्पष्टशरस्य कोटिसंबंधात् कोघ्र्याभिमुखत्वेन ध्रुवाभिमुखत्वं सुज्ञं कोघ्र्यस्य ध्रु
वसंबंधाभावादिसत्याह कोटावपि ध्रुवस्थानहूर्ध्वाधोवस्थितामपि कोटौ स्पष्टशरो ध्रुवतारोन्मुख एव ध्रुवप्रोतवृत्ता
शाखादिति भावः ननु ग्रहभोगचिह्नस्थानेकदंबध्रुवसंप्रोतवृत्तद्वयसंपातं कृत्वायनवलनं सर्वत्रैवं च प्रसक्तं तत्र ध्रुवप्रोतवृत्ते
ग्रहबिंबसंबंधाभावात्स्पष्टशराभावः स्पष्टशरावस्थानं तु ग्रहबिंबकेंद्रसंक्रेध्रुवप्रोतवृत्ते एवेति रिक्तेप्राग्दर्शितमतः
स्पष्टशरकोट्योरभिन्नवृत्तस्थत्वाभावादनुपातः कथं स्यात् न च ध्रुवप्रोतवृत्तं ग्रहबिंबकेंद्रसंक्रं यत्र कोटिवृत्ते आसन्नं

तयं तत्स्थाने आयनग्रहभोगचिह्नस्थे कदंबप्रोतवृत्तमानीयतत्रैवायनवलनक्षेत्रोपपत्तेः कोटिस्पष्टशरयोरभिन्नवृत्तास्त्र
यत्वाद्युक्तोयमनुपात इति वाच्यं तत्रायनग्रहभोगोत्थायनवलनजकोटिग्रहापत्तेरिति चेन्न पूर्वैः स्वस्वांतरेणसुसार्थग्र
हभोगीयायनवलनस्यादृतत्वात् वस्तुतस्त्वायनग्रहभोगीयायनवलनग्रहाद्युस्पष्टशरसाधनं सूक्ष्ममिति गम्यते नचाय
नग्रहनिरूपणात्प्रागेतन्निरूपणमसंगतमिति वाच्यं एतन्निरूपणे तदावश्यकतयतन्निरूपणमनंतरमपि संगच्छते
उभयथा दोषानवकाशात् ३७ अथ स्पष्टक्रांतिसोपपत्तिमाह एवान्यदिक्स्फुटशरापमयोः क्रमेण योगांतरं ग्रहलवाद्य
पमः स्फुटोसौ संस्कारदिग्विषुवदृत्तनभोगबिंबकेंद्रांतरे ध्रुवगवृत्तगतेवधेयदृष्टि अभिन्नदिशौ ये स्पष्टशरक्रांतीप्रायुक्ते
तयोरुक्तदिक्क्रमेण योगांतरं ग्रहस्यांशाद्याक्रांतिः स्पष्टा असौ क्रांतिः संस्कारदिक्योगे दिशोः विवाहस्थे अंतरे त्वधिकदि
गिसर्थः गोलेस्याः स्वरूपमाह विषुवदृत्तेति विषुवदृत्तप्रदेशो ग्रहबिंबस्य केंद्रं तयोरंतरे ध्रुवप्रोतवृत्तस्थे ते ये सर्थः ३८
स्वस्वबन्धदंगोलस्थितत्वादृषयितुमुद्यतः कदंबस्थानाद्यशरायीयगोलस्थितिसिद्धेः शरक्रांत्योः स्पष्टमाने आह कदंबस्थ
ले स्फुटरूपाणुरोधात्समाने शरस्य स्फुटाः खांकभागाः स्फुटक्रांतिभागाः षडंगानि तत्रायनादि स्थूलमेतद्ध्रुवप्रोतवृत्तमि

नि·कदंबस्थाने·हि·निश्चयेन·ध्रुवयोनवृत्ते इति पूर्वोक्तस्वरूपनिरूपणानुरोधात्·क्रांतिवृत्तद्वादशांशप्रदेशात्मकराशिमात्रेशा
रांतरेण संबंधसद्भावाद्धरस्पनवसंज्ञाः स्पष्टाः स्पष्टक्रांतिसंज्ञाः तत्र·कदंबस्थाने षड्दृष्टिः·हेतुमाह·अयनादिस्थमिति·ध्रु
वप्रोतवृत्तं·एतत्·कदंबस्थानसंबद्धं·अयनादिस्थं·अयनसंधिस्थं यतो भवति ३९ उक्तानयनं स्पष्टयोः शरक्रांत्योरक्तन
घटनीनिदूषयति·गोलायनादिव्यतिरिक्तराशौ नस्युः स्युटाः क्रांतिलवाविधेले·स्युटेषु भागा अयनादिभिन्ने नोक्तप्रकारादि
ति चिंत्यमेतदिति·गोलायनसंधिभिन्नक्रांतिवृत्तभागे·स्पष्टक्रांतिसंज्ञा उक्तप्रकारात् षड्दृष्टिर्न भवति·गोलसंधौ द्युज्यायास्त्रि
ज्यातुल्यत्वादायनवलनज्यायाः परमक्रांतिज्यातुल्यत्वेन तत्कोटेस्त्रिराशिद्युज्यात्वेनोक्तप्रकारात् स्पष्टशरांशाः षड्दृष्टिः·क्रांतेः
शून्यत्वात् स्पष्टक्रांतिः षड्दृष्टिर्गोलस्थिति सिद्धा·एवमयनसंधावायनवलनस्याभावात् तत्कोटेस्त्रिज्यातुल्यत्वादुक्तप्रकारेण
स्पष्टशरांशानवतिः क्रांतेः क्रांतिपरमत्वात् स्पष्टक्रांतिः षड्दृष्टिरंशाः·अनोलायनादिव्यतिरिक्तेऽक्षे·अन्यत्रत्वायनवलनस्य·
कोटेः सत्रिराशिग्रहद्युज्यातः किंचिन्न्यूनत्वेन स्पष्टशरांशानवसूनाः ग्रहक्रांतिस्तु चतुर्दिशासन्नेति नियमाभावात् तत्सं
स्कारस्य षड्दृष्टिमितत्वानुपपत्तेः यथा·एकराशिज्या ९५।३० क्रांतिज्या १८।५०।३६ द्युज्या १८७।१। ९ ग्रहकोटिज्या

१६५।२४।५८ आयनवलने ७४।३।३६ अस्य कोटिज्या १७६ अस्याः अंशाः ६७।३० ग्रहक्रांतेः अंशाः २१।३० अनयोः संस्कारे स्पष्ट
क्रांतिसंज्ञा एकोनाशीतिर्न तु षड्दृष्टिरुपपन्ना·एवमन्यत्रापि·अत्र हेतुभूताः स्पष्टशरांशा अयनासिद्धाः स्पष्टस्फुटेषु भागा
इति·अयनसंधौ वलनाभावात् स्पष्टशरानयने नस्पष्टशरांशानवतिः·अन्यत्र तु वलनोत्थस्य स्पष्टशरांशाल्पन्यूनाः आनयन
सिद्धा गोलस्थिति विरुद्धाः·उपसंहरति·इतीति·एवमुक्तरीतिरोषेण·एतत्·स्पष्टशरानयनं·स्पष्टक्रांत्यानयनं च विचार्य सं
गतमसंगतं वेति·सर्वोक्तिलाक्षिप्तमिति नासिकासंकोचेनोक्तं·स्पष्टनदसदिति नोक्तं·यद्यप्यायनवलने नस्पष्टशरांशाः सर्व
त्र भवन्ति तेन सिद्धास्तथापि स्पष्टक्रांतिसंज्ञाः षड्दृष्टिं नासिद्धा इति पूर्वोक्तस्पष्टक्रांत्यानयनमयुक्तमेव ४० पूर्वोक्तस्पष्टक्रां
त्यानयनस्यासंगतत्वात् प्रकारांतरेण संगतं स्पष्टक्रांत्यानयनं पद्याभ्यामाह यद्यपमज्यात्रिगुणानि घातस्त्रिभाघ्नवेदयमुणो
नभक्तः फलस्य वापं ग्रहजोपमोर्ज्ञाद्यः स्वदिक्कुरयुग्विपरीतो ४१ एकान्यदिक्के भवनः क्रमेणान्यद्भुजीवात्रिभयुक्तवे
दात्·भुजीवया प्रीत्रिगुणोनभक्तो नद्यापमं शाद्यपमः स्फुटः स्यादिति·ग्रहस्य द्वितीया क्रांतिः पूर्वक्रांतिरिक्तस्तस्याः शा
रस्य चाभिन्नदिशि क्रमेण योगांतरयोर्भुजज्या·योगो नवत्यधिकस्तदा शीत्यधिकशतात् शोधितो भुजस्तस्य ज्येत्यर्थः·स

चिभग्रहात् उत्पन्नक्रमपायुणिनात्रिज्यया भक्तायलस्य धनुरंशादिक्रांतिः स्पष्टास्यात् ४२ द्वितीयक्रांतेरग्रमिहत्वनिराकरणा-
योपयोगिमनिजानीते अत्रोपपत्तिरिति अत्र ग्रहद्वितीयक्रांतौ युक्तिर्वक्ष्यतइत्यर्थः तत्रगोलेनस्वरूपंदर्शयंस्तदानयनोपयु
क्तक्षेत्रमुपपन्नमिति श्लोकत्रयेणाह कदंबप्रोतवृत्तं यद्ग्रहबिंबोपरिस्थितंतद्वृत्ते क्रांतिविषुववृत्तयोरंतरांशाः ४३ अग्र
क्रांतिः सायनादौ पूर्वक्रांतिसमायनः कदंबध्रुवसंप्रोतवृत्ते क्रांत्यग्रतस्तयोः ४४ भेदाद्भिन्नाकर्णरूपाकोटिरूपाग्रयक्र
मात् अतस्तत्साधकं क्षेत्रं वृत्तयोर्भेदतस्त्विदमिति तद्वृत्ते ग्रहबिंबकेंद्रस्थकदंबप्रोतवृत्ते क्रांतिवृत्तप्रदेशयोर्मध्यस्थांशाः
अग्रक्रांतिः पूर्वध्रुवप्रोतवृत्तस्थक्रांतेः प्रसिद्धोक्तेः सा अग्रक्रांतिः अयनसंधिस्थक्रांतिवृत्तप्रदेशे पूर्वोक्तक्रांतितुल्या हे
तुमाह यतइति कदंबद्वयप्रोतध्रुवद्वयप्रोतवृत्तयोः पूर्वापरांतराभावः अग्रतः अयनसंधिस्थानातिरिक्तग्रहचिह्ने तयोः ध्रुव
प्रोतकदंबयोर्नयोर्वृत्तयोर्भेदात् पूर्वापरांतरितत्वात् ध्रुवप्रोतवृत्तस्थकोटिरूपक्रांतेः कदंबप्रोतवृत्तस्थकोटिरूपक्रांतेः कदं
बप्रोतवृत्तस्थकर्णरूपक्रांतिरति रिक्तासैव द्वितीयाग्रहक्रांतिः यतो द्वितीयक्रांतिर्गोलसिद्धातो हेतोरित्यर्थः कदंबध्रुवप्रोत
वृत्तयोरंतरसंभवात् द्वितीयक्रांतिकारणीभूतं जातसंस्थं तदं वक्ष्यमाणं तुकारादुक्तं ४५ त्रिभिः श्लोकैः क्षेत्रं प्रदर्शयन्निदं

यक्रांत्यानयनोपजीव्यानुपातं मुल्लेखयति क्रांतिमूलस्थ विषुवप्रवशाल्लिनिजं तुयत् तस्मिन्कदंबसंप्रोतवृत्तदेशाध्रुवांतरं
४६ तज्ज्यानुजः सत्रिभोत्थक्रांतिज्याध्रुवसूचनः तन्मूलभूमिगर्भांतः कोटिस्तद्भुजकामता ४७ भूगर्भात्रिज्यकाकर्णः क्रां
त्यग्रस्थक्रांतोयदि एतत्कोटाग्रमिस्त्रिज्याकातदास्वापमग्रयेति ध्रुवप्रोतवृत्ते ग्रहभोगचिह्नसंबंधिविषुववृत्तेयत्रासन्नंतयंत
स्थानं क्रांतिमूलतत्संबंधिनो विषुवप्रदेशात् तं मध्यकेंद्रं कृत्वा परितो नवसंख्यांशैर्यद्वृत्तं तद्धि निजाख्यं ध्रुवद्वयसंक्रांतस्मिन्वृत्ते
कदंबद्वयप्रोतवृत्तस्य ग्रहचिह्नभोगसंक्रांतस्य पोलयप्रदेशः ध्रुवस्थानं च अनयोरंतरं स्थितिनिजवृत्तस्थ ध्रुवसूत्रस्थानात्तस्याईज्यासत्रिभ
ग्रहभोगस्य क्रांतिज्या कदंबासरितं अनुविशासंशांतरितवृत्ते कदंबप्रोतवृत्ताद्ध्रुवस्थानपर्यंतमर्द्धज्याकारांशस्य ज्यारूपाभुजः तन्मूलं
ध्रुवसूत्रसंस्थं भूगर्भः अनयोर्मध्ये ध्रुवसूत्रैकदेशरूपासत्रिभग्रहज्यात्मिका कोटिः मतेसनेन पूर्वाभास्कराद्यानयनवलनसंबं
धेनक्षेत्रमुक्तमिदानीं तद्धुसुरानयनोक्तायनवलनसंबंधेनोक्तं परमायनवलनं पुरातनं स्थूलं यदविद्वस्तत्रमुख्यत्वाद्भास्कराचार्यो
क्तमायनवलनं सूक्ष्मं स्पष्टक्रांतौ तु विदुनद्वृत्तस्थानस्याभ्यर्हितत्वेन प्राचीनानुरोधेनोक्तं क्षेत्रमस्थूलमेवेति सूचितं भूगर्भमार
क्रांसयं कदंबप्रोतवृत्तस्य नाडीवृत्तदेशस्थं स्पष्टानीतिस्पष्टानीतिस्पष्टं कृत्वा त्रिज्यामितं सूत्रं कर्णः ततः क्षेत्रमतिपादनानंतरं उ

क्षेत्रेकोटिज्यामितःकर्णीतःकर्णीयदिलभ्यतेतदाग्रहभोगचिह्नीयपूर्वोक्तक्रांतिज्यायाकोटयाकरस्यनुपातेनकदंबाभिमुखा
क्रांतिर्जायेवसिद्ध्यति ४८ अतएवस्पष्टक्रांत्यानयनमुपपन्नमित्यभिप्रायेणाहफलंद्वितीयापममौर्विकास्यात्रबाणांशा
जसंस्कृतिर्या·तज्ज्याक्रतौप्रोक्तविलोमरीत्याकोटिःस्फुटापक्रमभागजीवेति·अनुपातोत्पन्नमिष्टाफलं·ग्रहस्यद्वितीयाक्रांति
ज्याकदंबाभिमुखी·तद्धनुरंशशरांशाभ्यांकदंबोन्मुखत्वेनैकजातित्वाज्ज्यानासंस्कृतिर्यत्संख्याका·ग्रहबिंबकेंद्रसंबद्धाकदंबाभि
मुखीक्रांतिःतस्याःज्या·तन्मितायांश्रुतौप्रोक्तक्षेत्रानुपातोत्पन्नकर्णानयनंतस्यविलोमगणितेनःगुणहारयोर्हरगुणत्वकरणेन
त्रिज्याकर्णक्षेत्रकोटिस्तदास्मिन्कर्णकाकोटिरित्यनुपातोत्पन्नेन·याकोटिर्ध्रुवाभिमुखीस्पष्टाक्रांतिज्याबिंबकेंद्रसंबद्धा·स्पष्टक्रां
तिस्वरूपस्यध्रुवप्रोतवृत्तेग्रहबिंबकेंद्रसंबंधेदर्शितत्वात्·यद्यपिग्रहबिंबकेंद्रसंबद्धध्रुवप्रोतवृत्तस्थकोयायनग्रहचिह्नस्थक
दंबप्रोतवृत्तसंबंधेनोत्पन्नयाक्षेत्रानुपातःसमंजससद्भ्याभ्यामुत्पन्नसाधकक्षेत्रकोटिसंबंधात्·ग्रहचिह्नसंबद्धध्रुवप्रो
तवृत्तस्थकोयासाधकीभूतयासाध्यक्षेत्रकोटिसंबंधाभावाच्च·तथाप्ययनग्रहचिह्नसंबंधेनप्रमाणेछ्यो
रेकवृत्तस्थत्वाभावात्तदनुपातस्यासंगतत्वात्·ग्रहचिह्नभोगस्थकदंबावृत्तेत्रिज्याकदंबाभिमुखशरसंस्कृतक्रां

राम०
२०२

सोःस्थितत्वेनफलस्यान्यजातीयत्वेनग्रहबिंबकेंद्रसंबद्धध्रुवप्रोतवृत्तस्थत्वाभावेप्यनुपातस्योचितत्वमितिदिक्॥४७॥
नन्विदमानयनंपूर्वगंतथानुक्रेरनुपातस्यापिसंदिग्धोपपत्तिकत्वाच्चप्रमाणंकथमित्यतउपसंहारव्याजेनोक्तस्यप्रा
माण्यंसूचयति·एवंनवीनाःप्रवदंतिहित्वाश्रीभास्करोक्तप्रथमप्रकारं·द्वितीयतस्साधनरीतिमात्रसूक्ष्मत्वतोगौ
रवमप्यदोषइति·एवं·ग्रहापमज्येत्यादिस्पष्टक्रांत्यानयनं·नवीनाःप्रतिसूक्ष्मगोलतत्वज्ञाः त्रिज्यावर्गादयनव
लनज्याकृतिंमोऽस्यमूलंयद्यद्यत्कचरविशिखस्तादितस्त्रिज्यया·इतिभास्करोक्तप्रथमप्रकारस्य·यद्राशिस्त्रि
यपुतखगपज्यकाघ्नस्त्रिभोर्व्याभक्तःस्पष्टोभवतिनियतंक्रांतिसंस्कारयोग्यइतिद्वितीयंभास्करोक्तंस्पष्टशरसाध
नंतस्यविधिना·सूक्ष्मत्वेनकल्पयंतीत्यर्थः·तथाचभास्करोक्तस्यपूर्वंदर्शितदोषत्वान्नवीनैस्तदुक्तानुरोधेनाना
यनंभिन्नमेवाद्यभिचरितत्वादसंदिग्धोपपत्तिकंकल्पितंप्रमाणमितिभावः·ननुभास्करोक्तंलघुभूतमिदंतुगुरु
भूतमित्यतआहअन्येति·नवीनकल्पितानयने·गोलसिद्धपदार्थसाधकत्वाद्गौरवमवक्तभूतानयनेदोषोप्यदूषणा
मित्यर्थः·प्राचीनोक्तमानयनमयनग्रहविद्भोगीयायनबलनग्रहणग्रहचिह्नभोगीयपूर्वागतशरस्यस्पष्टत्वे

प्रसाध्यतेनायनग्रहचिह्नभोगीयक्रांतिः संस्कृतस्यवधानेदृष्टेनैवध्येयं॥ ५०॥ अथस्पष्टारोपयोग्यायनग्रहस्या
नयनंश्लोकाभ्यामाह आयनवलनजीवासंगुणाद्येषुजीवाद्यपमजदिनजीवाभाजिताचापमस्याः ततइष्टसमयांशा
द्यक्षदेशोद्भवंयत्स्वस्वचरवशातस्क्रामिकंयाम्यबाणो॥ ५१॥ सोम्यबाणोद्यक्रमाच्चलग्नंस्यादायनग्रहः एवंसौ
म्यायनेयाम्यायनेतद्यस्तमायनइति आद्यस्यकदंबाभिमुखस्यत्रारस्यज्या गणितागतग्रहस्यापनवलनज्य
यागुणिताभ्रबाभिमुखग्रहक्रांतस्तत्रपद्ज्यपाभाज्या अस्याः फलरूपायाः धनुः ततोधनुस्तत्कालांशाज्ञास
भिप्रायेणोक्तवचनं धनुस्तत्कालांशोभ्यइत्यर्थः इह आयनग्रहकर्मणि त्रारसंबंधियद्वशात् निरक्षदेशी
योदृष्टकालांशोभ्यउत्पन्नदक्षिणत्रारेयद्दृश्यमाणंक्रामिकंलग्नं उत्तरत्रारे उक्तमाद्दृश्यमाणंयल्लग्नंतदायनग्र
हःस्यात् एवमुक्तंग्रहचिह्नस्योत्तरायणे दक्षिणायने उक्तादिपरीतंलग्नं दक्षिणत्रारेउक्तमलग्नमुत्तरत्रारेक्र
मलग्नमायनग्रहः स्यादित्यर्थः॥ ५२॥ ॥संगतस्पष्टमाह अत्रोपपत्तिरिति॥ ॥तत्रपूर्वश्लोकपूर्वार्द्धोक्तस्यो
पपत्तिमाह त्रिज्याकर्णोचेद्भुजोबाहुलनज्याद्येषुज्यायांकः फलंबाहुरवं पज्याहृत्तेरवेटचिह्नस्यसोयंत्रिज्याहृत्तेका

MEMORIAL

र्मुकार्यंप्रसाध्यइति ग्रहचिह्नसंस्कृतकदंबप्रोतहृत्तीयव्यासार्द्धमितभूगर्भकदंबांतरसूत्रंत्रिज्यात्मककर्णो वलन
संबंधिज्याप्रागुपपादिताद्यदिभुजस्तदाकदंबाभिमुखग्रहत्रारज्यामितकर्णोकः एवमनुपातोल्लेखात्सिद्धमिष्टा
फलंत्रारासंस्कृतक्षेत्रेग्रहचिह्नसंबंधिपद्ज्याहृत्तभुजोत्तरसूत्रात्मकोग्रहचिह्नायनग्रहचिह्नांतर्गतक्रांतिवृत्तप्रदेशा
संबंधिपरात्रवृत्तप्रदेशरूपोनतुक्रांतिवृत्तेतिर्यक्स्थात् सोनुपातागतः अयं पज्याप्रमाणसिद्धः वृत्तगतकालांशा
रूपतयासंख्यानार्थंत्रिज्याहृत्तेप्रसाध्यः त्रिज्याप्रमाणपरिणतः कार्यइत्यर्थः अन्यथाद्यज्याप्रमाणेनज्याना
मनुक्तेर्धनुषोसंभवात् तथाचत्रिज्ययागुणाहरयोः समत्वान्नाशादपनवलनजीवेसाद्यर्द्धमुपपन्नमितिभावः
अत्रापियद्यपिग्रहचिह्नसंबंधेनभ्रवप्रोतवृत्तसंबंधिवलनज्याग्रहतद्वृत्तग्रहपिंडाधिष्ठानाभावाद्ग्रहबिंबकेंद्र
सत्कभ्रवप्रोतवृत्तसंबद्धक्रांतिवृत्तप्रदेशासंबद्धफलंकथंसिद्धमिति नचग्रहचिह्नसत्कभ्रवप्रोतवृत्तंविक्षेपवृत्तेय
त्रलग्नंतद्ग्रहबिंबकेंद्रांतरीभूतविक्षेपप्रदेशासंबंधिसरलद्यरात्रवृत्तप्रदेशस्थमितिवाच्यं विक्षेपवृत्तेत्रारूपादिभो
गानंगीकारात् नचायनग्रहचिह्नीयकदंबप्रोतवृत्तसंबंधेनायनवलनग्रहाद्भवसेवग्रहबिंबकेंद्रसत्कभ्रवप्रो

तद्वृत्तसंबद्धक्रांतिवृत्तप्रदेशासंबद्धं फलमतएव पूर्वमयनग्रहस्थानानाङ्ग्रहविङ्गस्य स्थूलत्वेन ग्रहे ग्रसकत्वर
णमावश्यकमपि स्वल्पांतराद्युपेक्षितमिति वाच्यं· पूर्वत्वदंबवृत्तग्रहादामधिष्ठानात्प्रमाणयोरेकवृत्ताश्रय
त्वाभावेनानुपातप्रवृत्त्यनुपपत्तेस्तथापि नवीनमतोक्तिवत्प्रमाणयोरेकवृत्ताश्रयत्वेन फलस्य वृत्तांतरसंबं
धेप्यनुपातस्यौचित्यान्न दोषः· प्रत्यक्षाकदंबप्रोतवृत्तेप्रमाणयोः सद्भावे पितत्संबद्धध्रुवप्रोतवृत्तेवलनसं
बंधात्स्वीकृतानुपातस्याप्यप्रवृत्त्यापत्तेरिति संक्षेपः ॥५३॥ ॥· अहोरात्रवृत्तस्य फलक्रांतिवृत्तसहेतुकमाय
नदृक्कोनाहतकालभागोद्भवराशिवृत्तभागा भवंत्यायनदृष्टिजाताः यतो ध्रुवप्रोतसुवृत्तलग्नो भवृत्तभागो यन
खेटउक्तइति· अहोरात्रवृत्तैकदेशीयकालांशोभ्यउत्पन्नाः संबद्धायक्रांतिवृत्तभागाः· ते· आयनदृगाख्याः· अत्र
हेतुमाह यतइति· ध्रुवप्रोतपत्सुवृत्तं· सुपदनग्रहबिंबकेंद्रसक्तं· तस्मिन्वृत्तलग्नोयः क्रांतिवृत्तप्रदेशः· अयनग्र
हाभिज्ञैः स्मृतः तथाचग्रहविङ्गायनग्रहविङ्गयोरंतरप्रदेशास्यायनग्रहसंबंधादायनदृक्कमिति भावः ॥५४॥
क्रमोक्रमजलग्नसाधने हेतुमाह सौम्यापनेयाम्यशरायनाख्यग्रहोग्रहांकासुरतोपपश्चात्· सौम्यशरेस्याद

यनेतुयाम्येन्तरषोक्रमशोविलोममिति· ग्रहबिंबकेंद्रसक्तध्रुवप्रोतवृत्तेकृतेक्रांतिवृत्तेस्य स्यग्रहभोगस्थाना
दयनग्रहभोगस्थानंप्राक्पश्चिमतोवाशरसंत्रसंभवेवश्यंभवति· तत्रग्रहायनग्रहशरयोरभिन्नदिक्के प
श्चिमतः भिन्नदिक्के ग्रहतिगोलेनुभयसिद्धमस्तीतिभावार्थः ॥५५॥· अतोलग्नंक्रमोक्रमंक्रमेणापप
न्नमित्याह· अग्नेपश्चाल्लालभागेग्नेहांकासुग्नंसाध्यंक्रामिकंस्वक्रमंवा· यस्यांशोस्तद्वृत्तमुद्धृत्तरूपंयस्मात्तस्मा
पक्रियुक्तंनिरुक्तमिति· अग्नेपश्चादयनग्रहविङ्गेज्ञातेतद्भोगस्थानार्थस्य स्यग्रहभोगाक्रामिकंधनलग्नं· उक्रमम
णालग्नं· वाक्रमार्थः· यस्यांशोः· निरक्षदेशीयोदयकालभागोरित्यर्थः· वक्ष्यमाणप्रकारेणासाध्यं· लग्नंस्वदेशोदयेरे
वोक्तमिसतोयस्यांशोरित्यत्रहेतुमाह तदिति· यस्माद्धेतोः· तद्वृत्तं· ग्रहबिंबकेंद्रसक्तंध्रुवप्रोतवृत्तमित्यर्थः· उक्तरूपं नि
रक्षदेशक्षितिजाभिन्नं· तथाचग्रहस्य स्यविङ्गादयनग्रहभोगः साध्यस्तत्रतस्योद्धृतस्य स्वेन तदंतरकालांशोर्ज्ञाते
र्धनमणांनिरक्षदेशोदयेर्लग्नमेवसः· नतुक्षितिजाकारंतद्वृत्तं· ध्रुवद्वयप्रोतत्वात्· येनस्वदेशोदयेर्लग्नसाधना
पत्तिरितिभावः· प्रतिज्ञातमुपसंहरति· तस्मादिति· प्रतिपादितादस्मादर्थात्· निरक्षं· अयनवलनजीवेसादिस्ते

कदृयं·युक्तियुक्तमुपपन्नमित्यर्थः ५६॥ अथोपोद्घातसंगतस्यालग्नानयनं विवक्षुस्तत्रोपयुक्तस्वदेशोदयसाधना
र्थं स्वदेशीयप्रसंशाचरणपादप्रसंशाजीवाजनिताश्चरांशाः स्वाध्योविशोध्याउदयांशरीत्या· तेसर्वपादेचरखंडकां
शास्तेनिरक्षोदयरीति ·तः स्फुरिति·प्रसंशाज्याभ्यः पूर्वोक्तरीत्योत्पन्नायेचरकालांशाः अत्रजीवापदकरणा
यकक्रीत्यास्थूलचरवारणार्थं·उदयांशरीत्या· यथापूर्वमुदयकालांशाः प्रसंशोत्पन्नाः स्वाध्योविशोधिताउक्तास्त
थेतेस्वाध्योविशोध्याः·प्रथमांशाजाएयागताः प्रथमांशाजाताअंशादृयजाद्वितीयांशास्य· अंशादृयोत्पन्नानागत्र
यजास्तृयांशास्यैवं पूर्वपादे·चक्रस्य प्रथमचरणात्मकराशित्रये·ते·पूर्वसिद्धाः प्रसंशा· चरखंडकस्यकालांशाः खं
डकपदेनैकांशामात्रसबद्धंचरं·नतुसमुदयांशासंबद्धचरमिति· नन्वन्यपादेषुकथंचरखंडकांशाज्ञेयाइस
नग्राहतत्रइति·अनन्तरमन्यपादेषु·कर्कादिमारभ्यमीनांतपर्यंतमसंशं·निरक्षदेशीयोदयकालंशा रीत्या·रा
वंशिरापक्रमवृत्तपूर्वपदेद्वितीयेथविलोमतस्तु·अतस्तृतीयविपरीतमस्माद्यत्तु चतुर्थेपिनिरुक्तरीत्येति पू
र्वोक्तपा·चरखंडकांशाभवंति·यथागताः प्रथमतृतीयपदयोः द्वितीयचतुर्थपदयोर्विपरीताइतितात्पर्यार्थः·अ

त्रोपपत्तिर्निरक्षोदयक्रमोपपत्तेवसुगमा॥५७॥ अथसाक्षदेशोदयकालांशानयनमाह पूर्वोक्तपादेषुनिरक्षदेशोदयांशा
हीनाः·द्विघ्नेष्टिकस्थः स्वचरांशायुक्ताश्चरीयदेशोदयांशाकास्तेइति·प्रथमचतुर्थचरणयोः प्रसंशानिरक्षदेशोद
यकालांशाः पूर्वोक्ताः·स्वस्वभागसंबंधिचरखंडककालांशाहीनाः·द्वितीयतृतीयचरणयोः प्रसंशानिरक्षोदय
कालांशाः·स्वांशाचरखंडकालांशायुक्ताः·ते·सिद्धाः गतचरसंबंधिदेशप्रसंशामुदयकालांशाः॥५८॥ ॥सं
गतसर्पमाह अत्रोपपत्तिरिति॥ ॥प्रतिज्ञातामुपपत्तिं भास्कराक्षपद्याभ्यामनुवदति·यउक्तमेयाभ्यनतामगाद्याः स्वसा
पमेनापिनिरक्षदेशो· याभ्यासतस्तेनिनतत्वमाप्ताउपंतिकालेनततोल्पकेन॥५९॥ कर्कादयः सौम्यनतास्तियेन्नतेयांति
पाभ्यासवशादुत्तं·कालेनतस्माद्रुनोदयंतितदंतरंस्वचरखंडमेवेति·मकराद्याद्याः येशाः क्रांतिवृत्तस्योदयेस्वस्वक्रां
सा·निरक्षदेशोदक्षिणतोनतास्तेप्यंशाः दक्षिणाक्षदेशीयगोलस्थितिवशादसतंनताः·ततोहताः·पुनराहसा·ततोनि
रक्षदेशोदयकालादित्यर्थः·अल्पेनकालेनोपंति·पूर्वेतिर्यग्भागस्याल्पोदयकालत्वप्रतिपादनात्·कर्कोद्याद्याः येभागाः नि
रक्षदेशस्वस्वक्रांत्योन्नतानतास्तेप्यंशाः क्रांतिवृत्तस्याः·अत्रः साक्षदेशो·दक्षिणाक्षांशानुरोधाद्गोलस्थितौनिरक्षदेशाति

र्यक्तापेक्षपासरलतांगाष्टति·तस्माद्धेतोः।पुनराद्वसा·तस्मात्·निरक्षदेशोदयकालात्·बहुनाकालेनोदयंति·सरलभागस्यपूर्वं
बहूदयकालत्वप्रतिपादनात्·चरसंस्कारेणास्योदयाद्यत्रप्रमाणमाहतदिति·स्वनिरक्षुदेशास्वदेशीयोदयकालयोरंतरं·स्वे
देशोत्पन्नस्वभागसंबंधिचरखंडं।एवकारान्नदतिरिक्तमंतरंन·तदेशास्थितिजांतरचरत्वप्रतिपादनात्॥६०॥ ॥
एतद्विशेषकर्तुंनिरक्षसाक्षयोः स्थितिभास्करान्नामनुवदति·मेषचक्रपादास्त्रिपिमादिकाभिःएपक्षमुद्यंतिनिरक्षदे
शे·चक्राद्धमाद्यंचतपादिमीयंसर्वत्रपूर्णाग्निमिताभिरवेति·क्रांतिवृत्तस्यचत्वारश्चरणाःगोलसंध्ययनसंध्याद्यंताः
एपक्·प्रसेकं·पंचदशघटीभिर्निरक्षदेशेसमुद्यंति·सर्वत्र·साक्षनिरक्षदेशे·प्राद्यद्वितीयंच·गोलसंध्याद्यंतक्रांतिवृत्त
स्याद्धं·प्रसेकं·त्रिंशद्घटीभिः·एवकारात्साक्षभचक्रपादोदयकालदेशगुणपनिरासः।तथोदयंति॥६१॥ ॥चरखंडसंस्कृतो
दयकालोपपक्षिभास्करस्यष्टिकृतांत्रिभिरार्याभिरनुवदति·मेषादेर्मिथुनांतानाडीभिस्त्रिपिमिताभिरुद्गमे·लग्नतिबुजे
तदधःस्थप्रथमंताभिश्चरानाभिः॥६२॥कन्यांताद्धनुषांतस्त्रिपिमितनाडीभिरुद्गतये·लग्नतिबुजेचोर्ध्वस्थप्रथमांत्राभिश्च
राद्याभिः॥६३॥तद्रहितेः खहुताशोः कन्यांतोवाद्धनुषांतोवा·चरखंडैरुन्नाद्यास्तेननिरक्षोदयाः स्वदेशस्फुरिति·मेषादिप्र

२·६

देशलग्नक्षितिजकालमारभ्य·तदधःस्थ·उद्धत्तादधःस्थक्षितिजवृत्ते·पूर्वं·उद्धत्तलग्नमिथुनांतकालात्पूर्वकाले·पंचदशघटी
भिश्चरानाभिर्लगति·पूर्वमित्यत्राधःस्थखंडेनुःतुलादिप्रदेशलग्नक्षितिजकालमारभ्य·स्वक्षितिजे·उद्धत्तादूर्ध्वस्थ·ताभिः·पंच
दशघटीभिश्चरयुक्ताभिः·पश्चात्·उद्धत्तलग्नधनुरंतकालादनंतरं·तद्रहितेरिति·स्वदेशक्षितिजलग्नमेषादिराशित्रयकाले
नपूर्वोक्तनानाभिस्त्रिंशद्घटीभिः स्वदेशक्षितिजलग्नतुलादिराशित्रयकालेनपूर्वोक्तनानाभिस्त्रिंशद्घटीभिः स्वदेशक्षि
तिजलग्नकर्कादिकालानंतरं·स्वदेशक्षितिजलग्नमकरादिकालानंतरं·कन्यांतोमीनांतोवायथायोग्यंक्रमार्थकौ·स्वक्षितिजे
लग्नति·तथाचराशित्रयकालेराशित्रयचरयुतेनस्वदेशराशित्रयोदयकालसिद्धावर्थतः स्वांशोदयकालांशाः स्वांशसंबद्धच
रखंडयुतेनः स्वदेशतद्भागोदयकालांशामानतयासिद्धइतिफलितमाहचरखंडैरिति·तेन·पूर्वनिरूपितेन·निरक्षोदयाःस्व
चरखंडैरुन्नायुक्ताःस्वदेशोदयाः भवंति॥६५॥ ॥अथोक्तंनिरक्षाक्षरविषयंतद्दक्षिणभागेऽक्षवेपरीतंसहनुकंवदन्साक्षनिर
क्षोदयमुत्पादयानसिद्धाइतिसहनुकंफलितमाहएतन्निरक्षोन्नरदेशोऽक्षंयाम्यविलोमंगदितंयतोत्र·सोम्याक्षतः स्यात्क्षितिजं
विलोममक्षांशभेदान्नसमोदयांशाइति·एतन्न·स्वदेशोदयसाधनंपूर्वोक्तं·निरक्षोत्तरदेशोऽक्षं·निरक्षादक्षिणभागविप

रीतं · संकलनयाश्चकलनयोरेव · हेतुमाह एतइति · अत्र · निरक्षादक्षिणाभागो · उत्तरांशावशा। ।तिजंतिपरीतं · निरक्षक्षितिजा
त्क्षितिजंदक्षिणागोलेधउत्तरगोलउर्ध्वमिसर्पः · निरक्षसाक्षदेशयोरक्षांशभेदादेवगोलस्थितिभेदात्तुल्योदयकालांशाने
स्फुटमुपपन्नं ॥६५॥ ॥इदंमदबुद्धिभिः कर्पंज्ञेयंगोलस्यालक्ष्यत्वादिसतोभ्रमदर्शनंगोलेसर्वेप्रत्यक्षमितिभास्करोक्त
मनुवदति · क्षितिजेजादिकृत्वागोलंभ्रमयन्प्रदर्शयेत्सर्वं · उक्तमनुक्तमनुक्तंवान्यच्छिष्याणांबोधजननार्थमिति · भास्करो
क्तनिबद्धभ्रमदर्शनगोलं · क्षितिजक्षेमेषादिकृत्वाभ्रमयन् · उक्तमिदं · अनुक्तंचगोलसंबंध्यन्यच्च · शिष्याणांज्ञानोत्पत्तिनिमि
त्तं · गुरुः · अर्थविशेषजातंसूक्ष्मंसनदर्शयेत् · भ्रमगोलेसर्वमिदंसुबोधमितिभावः ॥६६॥ ॥अथांशानामस्तकालांशानां
हेतुकमाह यांशकदेतिसमयेनयेनतत्क्षणेभूलवउपेतितेनच · अस्तमूर्ध्वमपमंडलंकुजादृङ्मेषसततंयतः स्थितमिति · यांशाय
नकालेनोदेति · तत्तएकांशीसधिकरातभागस्तेनैवकालेनास्तंप्राप्नोति · उदयकालांशाएवघटीतरितांशास्यास्तकालांशाइत्यर्थः ·
हेतुमाहऊर्ध्वमिति · क्षितिजवृत्तादूर्ध्वंक्रांतिवृत्तमदृङ्मेषसदास्थितंभवति · क्षितिजवृत्तस्यगोलमध्यस्थत्वात् ॥६७॥ ॥सा
क्षेपीदमुक्तंसर्वत्रोपपन्नंनेसाहयत्रलंबजलवाजिनोनकास्तत्रनोदयचरांशमुक्तवत् · अस्मसंस्थितियापसाकुजेनक्षरात्रव

त्वादखंडितादिति · कुतइत्यतोहेतुमाह अन्यसंस्थितियेति · षड्राशांशावधि · यो देशसंबद्धगणितस्थितिस्तद्देशिरिक्षातद्दे
शगणितस्थितिः तस्याभावः · स्थितिता · नयेति · तत्रान्यस्थितिरपिकुतइत्यतआह अपवृत्तयोगजनितत्वात् ॥ ६८ ॥ ॥
अस्मसंस्थितिंस्पष्टयति · अंशायुङ्गवरसाः पलांशाकाव्यसोम्यविषयकदाचन · दृश्यतेनमकरोनकर्मुकंतत्रकर्कमि
थुनोसदादिताविति · यत्रकोनसप्ततिर्विंशास्वयवाधिकाप्रक्षांशास्तत्रनिरक्षादुत्तरदेशे · कदाचन · सर्वदेसर्पः · मकरस्त
त्रस्थैर्नदृश्यते · धनुश्चनदृश्यते · तत्र · देशेकर्कमिथुनोसदादृश्याः अर्थान्निरक्षादक्षिणादेशातन्मितांशाधनुर्मकरोसदाद
श्या · मिथुनकर्कावदृश्याविति · अत्रतद्देशक्षितिजवृत्तंनिरक्षोत्तरमागीयमनसंधितोराश्यंतरस्थरात्रवृत्तावधिलग्नमि
तिविपुवद्वृत्ताक्षितिजांतरराशिदृग्क्रांतिसंज्ञाः २०।३०।३६ प्रक्षांशाः ६७।२२।२५ राहुलाघवार्यभास्कराचार्यैः कलादंपंच
तुर्विंशातिविकलाधिकंसूक्ष्मं ॥६९॥ ॥अथमेकराशिक्रांतितुल्यलंबांशादेतांपुनर्भास्कराक्षामनुवदति · यत्रसांध्रिगजवाजि
संमितास्तत्रवृश्चिकचतुष्टयंनच · दृश्यतेषडषभाश्चतुष्टयंसर्वदासमुदितंचलस्यतेइति · तस्यतेगोलस्थितास्मादृशोर्ध्वंय
तइत्यर्थः · एकराशिक्रांतिसंज्ञालंबांशाः ११।५५।५ प्रक्षांशाः ७८।१५।५६ अत्रापिराहुलाघवार्यतैरेवषट्चत्वारिंशत्कला

उपेक्षिताः॥७०॥अथलग्नार्थंग्रहणप्रकारमाहग्रहोदयाद्याघटिकाग्रभोग्याःसावनाश्चेदुदयप्रजातः खेटः प्रचालोय
दिधिस्पजाः सम्मासस्तदास्योदयिकः खगातेरिति·ग्रहबिंबकेंद्रोदयकालमारभ्येष्टकालेज्ञाताग्रनीष्टाघटिकास्ताः सावनाश्चे
त्तर्हि उदयकालिकोग्रहः·ग्रहोदयकालिकंलग्नमित्यर्थः स्वगत्याप्राग्भ्रमरीत्याचाल्यं·तात्कालिकोग्रहः स्यात्·यदिनाक्षत्रा
घटिकास्तदातर्हि औदयिकोग्रहः ग्रहोदयकालिकलग्नात्मकोग्रहोभिन्नेर्भाग्यः॥७१॥ ॥अथलग्नानयनप्रसंगाद्भुतभो
ग्यकालानयनप्रकारमाहकृतायनांशाग्रहभागतः स्वाग्निमोदयांशोनहतागतेष्याः· लिप्ताः खषड्भिर्विहृताः फलेतयाते
ष्यकालांशमितीभवेदिति·हृताः संस्कृताग्रयनांशाग्रयस्मिन्नेतादृशाग्रहस्यमेषादिभोगभागसमूहात्·स्वाग्निमोदयां
शोन·स्वदेशीयेनभागसंख्याग्निमभागमितोदयकालांशानेत्यर्थः·अंशाधःस्थाः कलाः साधयबागतागताः षष्टि
शुद्धाभोग्याः षष्टिकलाभिरुदयस्तदागतभोग्यकलाभिः कइत्यनुपातीयफले·गतेष्यजे·ते·क्रमेणागतभोग्यकालां
शमानेस्तः॥७२॥ ॥लग्नज्ञानार्थमन्तरादयशोधनमिष्टकालेआरुषड्भोनाद्योयातगम्याः क्रमेणताभ्यायाते
ष्यांशकालंविजह्यात्·शेषात्पश्चादग्निमाः स्वोदयांशाः शोध्यायातेष्यक्रमेणक्रमेणेति·षड्भिर्नाद्ययोगतभोग्या

DR BHAU DAJI MEMORIAL

दृष्टकालांशास्तेभ्यः प्रागानीतंगतभोग्यभागकालांशं·यातगम्यक्रमेणशोधयेत्·भवेद्यात्·यातेष्यक्रमेणपश्चिमाः स्वदे
शीयोदयकालांशाग्रवहितक्रमेणशोध्याः·एषांस्वाभीष्टसमयलग्नत्वाभावोवगतइतिभावः॥७३॥ ॥त्रिभिः षड्लग्ना
नयनंकालज्ञानप्रकारंचाहशोधंतत्तत्क्रमतस्तथुद्भस्तनादिमेनवभजेत्फलंयत्·अशुद्धकोष्ठादियुतंतदंत्यप्रशुद्धको
ष्ठेनयुतंक्रमेण॥७५॥व्यस्तायनांशाक्रमशोविलग्नेलवादिकेह्यक्रमतः क्रमात्तः यातेष्यभागात्समयांशकाद्येस्वल्पास्त
दाप्तगुणकोदयेन॥७५॥तदादिलग्नानयुत·क्रमात्स्याद्भुहाविलग्नंघधनंधनंच·तदापुराक्रंनभवेत्स्यात्रविलोमतोगात्स
मयः सुसाध्यइति·ततोनंतरं·तत्क्रमतः उदयशोधनक्रमाद्योशुद्धोदयकालांशास्तेनप्रथमभक्तेन·एवकारात्सन्निहितानाम
शुद्धानांनिरासः शेषभजेत्· उदयमानेनकांशास्तदाशेषणाकिमिसनुपाताद्यत्फलंभागादिभोग्यांतंतक्रमेण·यातभोग्य
ग्रहणक्रमवशात्·अशुद्धकोष्ठात्·प्रथमाशुद्धक्षेत्रांशस्यमेषादिभागतोमानात्·अशुद्धोदयकालांशमाननिरासार्थंकोष्ठ
पदं·हीनं·अंतिमशुद्धक्षेत्रांशस्यमेषादिभागतोभोगमानेन·अत्रापिकोष्ठपदमंतिमशुद्धोदयकालांशमानव्यस्तार्थं·यु
तं·उभे·भागादिके·व्यस्तायनांशे·व्यस्ताः·उपक्रमदत्तादिपरीताअयनांशापयोस्ते·पूर्वयुतास्तर्हिहीनाइष्टानीहीनाश्चेद्य

नाइत्यर्थः॥ अतएव तनुः स्यादयनांशहीनमिति भास्करोक्तं पर्वायनांशानुरोधात्संगच्छते॥ क्रमशः यातभोग्यकालग्रहणात्क्र
मादित्यर्थः॥ उक्रमतः॥ क्रमात्॥ विपरीतक्रमाद्वा लग्नं स्यातां॥ विशोधमाह्यातेष्यभागादिति॥ यातभोग्यकांशाभ्यः इष्या
तभोग्यघटीनामंशादिस्वल्पास्तदा॥ ते॥ गुणाकोदयेन॥ पूर्वं यातभोग्यकालसिद्ध्यर्थं गतभोग्यकलानां योगुणाकउदयका
लांशाउसन्नस्तेनेत्यर्थः॥ भक्ताः भागादिप्राप्तफलेन गतभोग्यसमयक्रमात्॥ उदयलग्नात्मकोग्रहेनयुतज्ञाप्यं॥ उक्रमक्रमे
णालग्नं स्यात्॥ पूर्वोक्तप्रकारस्य बाधमाह तदेति॥ प्रागुक्तं॥ यातभोग्यघट्यः गतभोग्यकालांशाभक्ताः फलं॥ ग्रहभागमात्रा
द्दीनयुतमितिनस्यात्॥ यातभोग्यकालांशायोरुदयकालतोज्ञानादंशादिलग्नकालावधित्वाभावात्॥ कालज्ञानार्थमाह अथ
पति॥ अत्र॥ ग्रंथे॥ लग्नात्॥ कालः॥ विलोमरीत्या॥ लग्नानयनप्रकारेण॥ सुखेन साध्यः॥ प्रश्नाकावगमोनेत्यर्थः॥१६॥ ॥
संगत्यर्थमाह अत्रोपपत्तिरिति॥ ॥तत्र प्रथमं लग्नस्वरूपमाह भूमिगर्भकुजमंडलेनिजेप्राविलग्नमपमंडलं भ्रमात्॥ यत्र
तत्क्रियमुखाद्ग्रहादिकं लग्नमाहुरपरे वदन्ति॥ निजे॥ स्वाधिष्ठानप्रधानभूमिगोलमध्यभागकेंद्रीयक्षितिजवृत्ते प्रागुक्ते॥
प्राचि॥ सूर्योदययोग्यभागे॥ लोहक्रांतिवृत्तं॥ प्रवहवायुभ्रमणाद्वशात्॥ यत्र॥ यस्मिन्स्वमदेशसमसूत्रेणालग्नं॥ तत्॥ क्रांतिवृत्तस्या

ने॥ मेषादिस्थानमारभ्य राश्यादिभोगात्मकं॥ खेटवत्॥ गणितागतग्रहभोगवत्॥ बुधाः पूर्वे मुनयो लग्नं वदंति॥ एतेनयथाग्रहास्त
थालग्नमपि तत्संक्रियायोग्यं सजातीयं॥ तेन सूर्यसिद्धांतेलग्नेव्यस्तायनांशसंस्कारानुक्तेः स्थिरक्रांतिवृत्तानुरूपं लग्नं तद्ग्रहाग्रहा
ग्रपितपतिकस्यचिदभिमतं परास्तं सूर्यसिद्धांतेलग्नसाधनोपक्रमणावसर्ययनांशसंस्कारानुक्तेस्तत्संयुक्तव्यस्तायनांशसंस्कारा
नुक्तलग्नस्याचित्वात्॥ यद्विशोपपत्त्यविरोधात्सूर्ययनांशसंस्करणं लग्नसाधनार्थमवश्यं तत्रावश्यं तद्दिसिद्धिस्थिरक्रांति
वृत्ताभिप्रायिकं लग्नं चलक्रांतिवृत्ताभिप्रायिकग्रहपंक्त्यामनुचितमिति फलादेवारूपेकपंक्तिसजातीयनिवेशान्यथानुपप
त्तालग्नेव्यस्तायनांशसंस्कारावधानमप्यर्थसिद्धमिति॥ तत्रभिप्रायिकं खेटवदिति पदं॥१०॥ ॥प्रथमलग्नसाधनोपयु
क्तग्रहग्रहणप्रकारोक्तेरुपपत्तिं भास्करोक्तामनुवदति॥ लग्नार्थमिष्टघटिकायदिसावनास्तास्तात्कालिकार्कक्षणानभवे
युरार्क्षः॥ प्रार्क्षोदयादिसदृशीभ्यहापनेयास्तात्कालिकत्वमपनक्रियते यदार्क्षइति॥ लग्नसाधनमिमिन्नमिष्टघटिकायदिसाव
नास्तदोदयकालिकसूर्यतुल्यलग्नस्यभुक्तभोग्यकालोनाक्षत्रो यथायोग्योदयाश्वनक्षत्राः सावनघटीपुकपंक्तौ ध्याविजातीय
त्वादतस्ताः सावनाइष्टघटिकाः॥ तात्कालिकसूर्यक्षणाननाक्षत्राः भवंति॥ नचसावनघटीनांतत्कालावनाक्षत्रत्वमतिविरुद्ध

मितिवाच्यं·षष्टिसावनघटीभिर्नाक्षत्रसावनांतरंगाससुमितंतदेष्टसावनघटीभिः किमित्यनुपातलब्धफलासुयुताः सावन
घटिकानाक्षत्रघटिकाः स्युरित्यस्याविवादसिद्धत्वान्नत्रलाध्वालब्धासुजनितक्षेत्रांशाधिकरविरवोदयकालाल्लब्धासुका
लेलग्नंकृतं·गास्सुभिर्गतिकलास्ताहलब्धासुभिः काइत्यनुपातेनगास्सूनांसमगुणाहरत्वेननाडीषष्टिसावनघटी
भिर्गतिकलास्तदेष्टसावनघटीभिः काइत्यनुपातजनितक्षेत्रकलानांचालनफलत्वसिद्धेस्तात्कालिकार्कस्यतत्काल
लानत्वेनपर्यवसन्नत्वात्·ततइष्टकालपर्यंतंसर्वेज्ञातघटीनांसावनानांनाक्षत्रत्वमविरुद्धं·अतएवसाजात्यसंपाद
नोत्तरंभुक्तभोग्याक्षदयकालसाधनेबाधकाभावइत्याहुःप्राक्षोदयाइति·इह·लग्नानयने·प्राक्षोदयाः·सदृशीभ्यः
नाक्षत्रघटीभ्योहियतोपनेयाःशाध्याअतस्तासांसावनघटीनांनाक्षत्रीकरणंतन्नुतात्कालिकार्कणावसिद्धमितिभावः
नाक्षत्रघटीज्ञातेप्रोदयिकार्कादेवलग्नंयुक्तमित्यभिप्रायेणाहतात्कालिकत्वमिति·अथानंतरं·यदोदयकलान्नाक्ष
त्रघटिकास्तदातात्कालिकत्वंसूर्यस्यलग्नसाधनार्थंनसाध्यते·यदिषूदयसाधनस्यस्वतएवाधितत्वादितिभावः
अत्रार्कपदस्यग्रहोपलक्षकत्वं·तेनग्रहोदयाद्भौग्रहणाग्रहणवोदयिकाद्भालइ ॥तिफलितं·परंतुयाप्यासूर्योद २१०

यकालेसूर्यभोगतुल्यलग्नंतथाग्रहोदयकालेग्रहभोगतुल्यलग्नंनभवति·ग्रहबिंबस्यराशाग्रेस्थितत्वात्·अतएवग्रहभोगो
दकर्मसंस्कृतोग्रहोदयलग्नमित्यक्तं·तथाचग्रहोदयलग्नमेवलग्नसाधनार्थंग्रहःतस्यतात्कालिकीकरणंग्रहगतिचाल
नेनायुक्तं·अतिक्षणांशादिवेलक्षणयात्·अतस्तात्कालिकग्रहभोगादेवग्रहोदयलग्नंलग्नसाधनार्थंतात्कालिकंसूक्ष्म
मितितत्वमवधेयं॥७८॥ ॥अथविलोमतोगात्समयःसुसाध्यइतिप्रागुक्तंपद्याभ्यांविशदयति·खेटस्यनोग्याःसमयां
शाकायेलग्नस्यभुक्ताःसमयांशाकाश्च·तयोर्युतिःखेटविलग्नमध्यभागोदयांशैःसहितांगभक्ता॥७७॥नाड्योभवंस्य
त्रकृतायनांशैर्लग्नग्रहौबुद्धिमताविचिंत्यौ·चक्रुल्यभागौकलयोर्वियोगनिष्प्रोदयोभांशहृतःस्वनाड्यइति·सहितमं
तमिष्टकालांशाःसिद्धाःषडुक्ताःघट्यःस्फः·अत्रःकालानयने·अयनांशासंस्कृतौ·लग्नग्रहौग्राह्यौ·बुद्धिमतस्तेनग्र
हपदेग्रहोदयलग्नंसचिंत·विशेषस्यवपरीत्यंविशदयति·चेदिति·यदेकभलग्नरविइत्यादिपूर्वोक्तिवत्लग्नग्रहावभिन्न
भागौतदाभागाधःस्थयोःकलयोरंतरेणगुणितस्वोदयकालांशौ·द्वादशराशीनामंशैःषष्ट्यधिकशतत्रयमितैर्भक्तः
स्वनायोग्रहस्यगतघटिकाःअत्रषष्टिकलाभिरुदयकालांशास्तदंतरकलाभिःकइत्यनुपातेनष्टकालांशाःषडुक्तादृष्ट

टिकाग्रतोभांशाहतइस्रपपन्नं॥२०॥ ॥अत्रविशेषंतदुपपन्नमपेक्षांचवदन्यघत्रयेणाप्रकृतमनुसरति·लग्नस्पर्केयं
स्वचरोदयात्माक्कालोभवेदौदयिकग्रहात्सः·नाक्षत्रएवंयदिसावनस्यापेक्षातदातत्समयोस्त्रखेटात्॥२१॥सुहुः प्र
साध्यःसमयोयदानुताक्कालिकाद्भातखगात्सकालः·सकृद्भवेत्सावनएवमत्रतत्कालजादौदयिकग्रहाद्भु॥२२॥नाक्षत्र
कालःपुनरेवसाध्यस्त्वत्रोपपन्निःसुगमाबुधानां·उपेक्षितापायनदृक्क्रियेयमुन्नाविचिंत्यतिवदंतिनम्माइति·ग्रहोदयल
ग्नरूपग्रहादभीष्टलग्नेहीनसति·अयमानीतःकालोग्रहोदयकालमारभ्याभीष्टकालपर्यंतंपूर्वोभवति·नतूत्तरत्र·लग्न
स्याधिकत्वाभावात्·ग्रहोदयकालिकग्रहोदयलग्नादेवमुक्तप्रकारेणायःकालःसनाक्षत्रः·अथयदिसावनकालस्यापे
क्षातर्हिकपूर्वागतनाक्षत्रकालचालितग्रहात्·समयःप्रसाध्यस्तच्चालितग्रहापुनरिथेवमसकृत्साधनकालःस्यात्·
पूर्वसावनस्याज्ञानान्नाक्षत्रकालएवसावनत्वेनस्थूलतयाकल्पितस्तच्चालितग्रहस्तात्कालिकोस्मात्कालःसावनए
वपरंकिंचित्स्थूलः चालितग्रहस्यनाक्षत्रकालसंबंधेनस्थूलत्वादतःकिंचित्स्थूलसावनचालितग्रहात्कालःपूर्वापेक्ष
यासूक्ष्मइत्यसकृत्सूक्ष्मइत्यत्रोपपन्निःयदितात्कालिकाद्भाताद्ग्रहोदयलग्नरूपग्रहाद्यःसकृदेकवारं·एवं·साधितःकालःस

२३१

सावनःतात्कालिकग्रहस्यस्वतःसिद्धत्वात्·अत्र·ज्ञातात्कालिकग्रहपक्षे·आनीतसावनघटिकाक्षेनयस्तचालितस्तत्काल
ग्रहेणजातादौदयिकग्रहात्·नाक्षत्रकालःपुनःएवकारोसकृन्निवृत्यर्थे·साध्यः·साधितःकालोनाक्षत्रोभवतीत्यर्थः·अ
त्रविषयेउपपन्निलग्नार्थमिष्टघटिकाइत्यादिपूर्वोक्ता·बुधानां·सुगमा·स्वतोवगम्यातउपेक्षिता·अत्रनोक्तेत्यर्थः·अ
वसरसंगतासाप्रकृतमनुसरति·अथेति·अनंतरमोयनदृक्क्रिया·इयं·सोपपत्तिका·अयनवलनजीवेत्यादिभानिरूपि
ता·विचिंत्या·विचारणासंगतेत्यर्थः·इत्येवं·नव्याःगोलतत्त्वज्ञाःसूक्ष्मगणिताभिमानिनोवदंति॥२३॥ ॥असंगत
त्वमेवनिरूपयति·कदंबस्थलस्योन्नतरूपोपपन्नायनाख्योयनादौखगःसर्वराशौ·त्वदुक्तप्रकारादयंसर्वराशौभसिद्धे
दतोयुक्तिमत्यंतदुक्तमितिकदंबस्थलस्य·यतोध्रुवप्रोतमुक्तलग्नोभक्तभागोयनखेटउक्तइत्युक्तरूपोपपन्ना·अयना
ख्योग्रहभोगाःसर्वराशौ·राशिमात्रसंबंधे·कदंबस्यक्रांतिवृत्तसकलप्रदेशीयपाम्योन्नतत्वात्·अयनसंधौ·स्थिरक्रांति
वृत्तस्थेकर्कीदोमकरादौवा·नान्यत्र·कदंबसमध्रुवप्रोतवृत्तसंबंधाभावात्·त्वदुक्तप्रकारात्·अयनवलनजीवेत्यादिवि
धेरित्यर्थः·अयं·अयनसंधिस्थेयनग्रहभोगोराशिमात्रे·क्रांतिवृत्तसकलप्रदेशसंबंधेननसिद्धेत्·यथाहि·ग्रहः०।

०।०।०।०अयनबलनज्या ७०।४१।१२ शरज्या १०।१ क्रज्या १०।१ दृक्कालांशाः २४ एभ्योलग्नमयनसंधौनैव·एवंग्रहः १।०।०।०अ
यनबलनज्या ७५।३।३९ दृक्कालज्या ७५।३९।१५ दृक्कालांशाः २३।२०।१५ एभ्योपितथैव·एवंग्रहः २।०।०।०अयनबलन
ज्या ५३।५८।५८ दृक्कालांशाः १३।१८।५५ एभ्योप्ययनसंधौलग्नंनैवेति·फलितंदूषणामाहअतइति·अतोहेतोस्वदृक्कं·अ
यनबलनजीवासंगुणोसादिसर्थः·गोलयुक्तिसिद्धंनैव॥८५॥ ॥नवीनोक्तमिदंदूषणंपरिहरति·अबोधादिदूषणंने
वयस्माच्छरागमहतःस्पष्टक्रांतिजायाः·क्रमोर्व्यामदानादिमध्यज्यकायाः प्रकारेणतोगोलविद्भिर्विचार्यमिति·३२·न
वीनोक्तंदूषणं·नैव·हेतुमाहअबोधादिति·पूर्वोक्तायनग्रहश्लोकस्यार्थावबोधाभावादिसर्थः·अनवबोधंस्फुटयति·यस्मा
दिति·यस्माद्भूतोःग्रहः·बिंबात्मकःशराग्रेस्ति·अतस्तद्भ्रमणंविषुवद्वृत्तात्स्पष्टक्रांतेरणस्वाहोरात्रवृत्तेतदनुरोधेनच
क्रावप्रोतवृत्तक्रांतिवृत्तेआयनग्रहभोगज्ञापकं·शरसंबंधारागतापनदज्याग्रहबिंबाधिष्ठितक्षेत्रवृत्ते·ननुग्रहभो
गचिह्नीयक्षेत्रवृत्तेअतोहेतोरित्यर्थः·शरसंस्कृतक्रांतिरूपस्यस्पष्टक्रांतिसन्नायाःक्रज्यायाःप्रकारः·अयनबलनजीवा
संगुणाद्येषुजीवेसाद्यायनग्रहानयनपदेआद्यपमजरिनजीवेसत्र·ग्रहः·स्वीकाराभिमतःयथाग्रतार्थंनिरस्यति· २१२

नेति·ग्रहभोगचिह्नीयक्षज्यायानस्वीकारः·तथाचाद्यपमजरिनजीवेसत्राद्यपमशरेनग्रहबिंबसंबद्धसुरम्यापमोर्थइतिभा
वः·उपसंहरति·तमइति·उक्तार्थाद्धेतोःगोलविद्भिर्भवद्भिर्नवीनैः·विचार्य·स्वोक्तंदूषणं·संलग्नमसंलग्नंवेतिनिर्णीयतां·
यथाहि·ग्रहः०।१०।१०अयनबलनज्यापरमक्रांतिज्या ७०।४१।१२स्पष्टक्रांतिसंज्ञाः मोडिन्नीताः षाड्भिः·तेषांक्रज्यापरम
क्रांतिज्यैव·शरज्यात्रिज्या·उक्तविधिनादृक्कालांशाः ९७ एभ्योलग्नमयनसंधावयनग्रहः ५०।०।० एवमन्यत्रापिस्पष्टं·स्प
ष्टमार्गेणानुसन्निभग्रहक्रांतेरायनबलनत्वादुक्तरीत्यास्पष्टत्वेआयनफलेद्वाराशिमितप्रसक्तेः॥८५॥ ॥ननुदृक्का
लांशेभ्योलग्नंकिमर्थंगोरवमुक्तं·सिद्धांतशिरोमणावायनंबलनमस्फुटेषुणासंगुणांघ्रगुणाभाजितंरूपं·पूर्णापूर्णाध्यति
भिर्ग्रहाश्रितमक्षभोदयहृदायनाः कलाइतिविनालग्नानयनंलाघवोक्तेरित्यतआहपूर्णापूर्णाध्यतिसंगुणाग्रहमक्ष
भोदयहृदायनाइति·तच्छिरोमणिगमुक्तराद्धेगमोक्तलग्नवशातोगपरंस्यादिति·पूर्वार्द्धोक्तहेतुमित्यस्योत्तरार्द्धेनुवादमा
त्रेणोवानुवादसिद्ध्यर्थंभिर्ग्रहाश्रितेत्यक्षरस्थानेसंगुणाग्रहेतिपाठेहगतस्फुटोनयातन्मात्रानुवादस्यास्मिन्नंपर्थंबो
धकत्वानुपपत्तेरितिध्येयं·इतियत्·सिद्धांतशिरोमणिपूर्वार्द्धोक्तिं·तत्·अंगपरं·लग्नसाधनार्थघातकमेवतात्पर्या

न॰ प्रमाणमाह उन्नराद्गोति॰ शिरोमणौ रत्नराद्गोलाध्याये स्थितं नयत्योऽक्लग्नपदं॰ तच्चापेक्षांतरप्राणैः कुजात्वेवयनन्त
न्नतः॰ ते प्राणैर्यक्रमाच्छनैनतारेवयात्प्रजायते॰ उक्तक्रमेणोन्नताधच्चतद्गृहोदयलग्नकं॰ उक्तव्यस्यतः प्रत्यगस्तलग्नं स
षड्गृहादितिदृक्कर्मवासनानिरूपणे॰ तदनुराधात्॰ तदेकवाक्यतानिरूपणावश्यकतावलात्॰ अन्यथा ग्रंथविरोधापत्तेः
सुक्रेचेतत्॰ अन्यथा राशिसंबंधिदृक्कर्मणि ग्रहाश्रितराश्यन्यराशिसंबंधे यथाश्रुतार्थे नतदुदयाग्रहणे नस्थूलत्वापत्तेः
अतएव यथाश्रुतार्थो भाग्यास्पकाले खगुणाहतेर्कः स्वीयोदयाप्तांशयुतो विलग्नमितिलग्नविशेषानयनेनैकवा
क्यतापन्नः क्वचित्संगच्छते॥२६॥ ॥अथ प्रसंगात्सिद्धांतसुंदरोक्तमतिलघुभूतमप्यनूद्य खंडयति॰ यत्त्रिभाद्य
खचरादपमज्यकायाखेटगुणाविगुणितात्त्रिगुणेन भक्ता॰ सिद्धांतसुंदरकृतादितमतदत्रबाणमहसस्तदवहि य
तस्वसूक्ष्ममिति॰ सत्रिभग्रहाद्याक्रांतिज्या॰ ग्रहशरगुणितात्त्रिज्यया भक्ता॰ इति यत्सिद्धांतसुंदरकारेणाज्ञानरा
जगणकेन॰ उक्तं॰ एतत्॰ अत्र॰ सूक्ष्मगोलतत्वविचारे॰ महतिशरे॰ अस्तं॰ निरस्कृतमस्तंजानीहि॰ अल्पशरे तस्या
लक्ष्यत्वात्॰ यतः सूक्ष्मं॰ तथाचभास्करोक्तमयनवलनज्याशरज्ययोरनुक्रमातासिद्धफलचापानुक्रमाचकिंचित्स्थूल

DR BHAU DAJI

मप्यनादृतमिदं तु क्रज्यानुपातानुक्रमाक्षेत्रांशकालांशयोरभेदाभिप्रायिकमतिस्थूलं गोलतत्वविचारे सुतरामदृश्यं दृश्यान
तथावहिःकरणयोर्यमितिभावः॥२७॥ ॥ननूक्तमिदमायनग्रहनयनं गोलयुक्त्यासिद्धं॰ उदयांशानामसंवासिद्धत्वेनतत्तो
ग्नसाधनस्यकलानुपातगर्भितत्वेनस्थूलत्वान्नदृष्टितत्वेनस्थूलाभासत्वादिसपरितोषान्नदानयनप्रकारांतरं प्रतिजानीते॰ वि
नाविलग्नानयनं खगोभ्योयनाख्यदृक्कर्मसुसंस्कृतं तत्॰ अथातिसूक्ष्मखचरनवीनयुक्त्याबुधाद्यादृक्करं प्रवक्ष्यामीति॰ स्पष्टा
र्थं॥२८॥ ॥प्रतिज्ञातमेवचतुर्भिः पद्यैराह कृतायनांशाग्रहबाहुजीवात्रिभघ्नजीवागुणिताविभक्ता॰ स्वयज्ज्यया लब्ध
तुलेवायते पूर्वपादे विषुवांशकाः स्युः॥२९॥ अन्येषुमुद्धारसंभाद्रसर्क्षसुक्ताविषुद्धारविभाक्रमेण॰ दृक्कर्मपद्धाद्रजचा
पभागैः खगायनेष्वेकविभिन्नदिक्के॥३०॥ हीनाश्चतास्तेक्रमशोभवंति दृक्वेटभागा विषुवोद्भवाख्याः एतद्दिती
यापमजज्यकाघ्नीत्रिज्यापरक्रांतिलवोत्थभोग्याः॥३१॥ भक्ता प्रचापं प्रथमे पदेस्याद्दृक्वेचरोद्यादिपदेक्रमेण॰ प
ड्राशतः षड्युतो विषुद्भक्राद्दिलोमापनभागकः स इति॰ त्रिराशिज्यया गुणिता॰ चलांशसंस्कृताद्भुजज्या॰ भुज
ज्योत्पन्नक्रांतिज्यातउत्पन्नज्यया भक्ता॰ फलस्य धनुर्भागाः ते भागाः प्रथमचरणे॰ विषुवांशाः स्युः॰ अन्येषु॰ दि

तीयतृतीयचतुर्थग्रहचरणेषु क्रमेण षड्राशोधिताः अत्र साजात्येनांतरयोगयोः स्वतः सिद्धाक्रः षड्भांशैर्युक्ताः द्वादशराशिभागेभ्यः शुद्धाः प्रथमचरणीयविषुवांशाद्दृग्ग्रहभागस्य विषुवांशाः स्युः ते राते ग्रहस्यायनांशयोरभिन्नभिन्नदिक्त्वे सति क्रमात् पूर्वोक्तं यद्दृक्कर्मणाः श्लोकस्य पूर्वार्द्धे अयनचलनजीवासंगुणाद्यषुजीवाद्यपमजदिनजीवाभाजिताच्चापमस्याइति तत्प्रकारेण अन्यग्रहीयधनुर्भागैरित्यर्थः हीनाशुताः आयनदृग्ग्रहस्य भागा वेषुवांश्याभवंति एतेषामंशानां भुजः नवति मध्येंशायपास्थिताः अहीनाधिकशातभागमध्येहीनाधिकशातभागेभ्यः शुद्धास्ततः सप्तत्यधिकशातद्वयनागमध्येहीनाधिकशाते नशोधितास्ततोधिके द्वादशराशिभागेभ्यः शुद्धाइति तद्भानंतस्य ज्या तया साधितक्रांतिज्याद्वाराजातो योग्रहापमज्यात्रिगुणाभिघातइसादिना द्वितीयापमः अत्र ग्रहो विषुवभागात्मकोदृग्ग्रहएवबोध्यः तस्मादपमादुत्पन्नयाज्यया गुणिता त्रिज्या चतुर्विंशतिभागानामुत्पन्नयाज्यया भक्ता फलस्य धनुर्भागाः साधितदृग्ग्रहस्य प्रथमचरणे आयनदृग्ग्रहः स्यात् द्वितीयतृतीयचतुर्थचरणे क्रमेण षड्राशुद्धः षड्युतः द्वादशराशिभ्यः शुद्धः अत्र साजात्येनयोगांतराभ्यामर्थसिद्धं धनुषोराश्यादिकरणे परमयनां २९४

शसंस्कृतः सिद्धातो विपरीताश्चयननागायस्यैतादृशः कार्यः स आयनदृग्ग्रहभोगः स्यात् ॥९२॥ अत्रोपपत्तिं पद्याभ्यामाह अत्रोपपत्तिः प्रतिभागजीवासंजातभागोदयरीतिसिद्धं तयोपपन्नाविषुवांशाकास्तद्दृक्कर्मचापेन सुसंस्कृताश्च ॥९३॥ जायैकभावेन भवंति दृष्टिखेटा दृग्भावे षुवहृन्नलग्नाः एभ्यो द्वितीयापमजीवयादो विलोमतस्त्वायनदृग्ग्रहोस्य इति अत्र अस्मिन्नायनदृग्ग्रहनयने उपपत्तिः प्रतिभागज्याभिः संजाताः प्रतिभागानामुदयास्तेषामानयनप्रकारेण प्रागुक्तेन फलिता कथमित्यतो विशदयति तयेति तयोदयरीत्या प्रसंशजीवास्त्रिगुणदृग्भोग्यांशु हताः स्वस्वदिनज्यपासां चापानीतया पराक्रांशाएव विषुवद्वृत्तांशाः अहोरात्रवृत्तस्य विषुवद्वृत्तानुरूपत्वात् परंग्रहस्य प्रथमचरणस्य अन्यचरणेषु भुजारंभस्थानाद्विषुवांशाकाग्रहस्थानपर्यंतं भवेत् ततः परांते क्षेत्रकालांशयोः समानत्वात् क्रांतिवृत्तस्य मेषादितो ग्रहभागावधि विषुवांशसिद्ध्यर्थं भुजवैपरीत्यमनुसृतं अतएवैषामंशानां विषुवद्वृत्तावधित्वादन्वर्थसंज्ञावेषुवाइति उपपन्नाः उपपत्तिसिद्धाइत्यर्थः दृक्कालांशात्मकं यद्दृक्कर्मणि चापं तेन जासा एकत्वेन एवजातित्वेन सर्वे ते ग्रहभोगविषुवांशाः उक्तदिगेवाभिन्नतानुरोधात् संस्कृताः संतो दृग्ग्रहभो

गजाः विषुववृत्तसंबंधिनोंशा भवंति। चकाराद्दुपपन्नाः। एभ्यः। आयनदृग्ग्रहभोगीयविषुवांशेभ्यः। पूर्वोक्तप्रकारेण द्वितीयापमस्तस्य जीवया। विलोमप्रकारेण। भुजज्याधनुर्द्वारा। आयनदृग्ग्रहस्य क्रांतिवृत्तस्थभोगात उत्पन्नो भुजः स्यादस्माद्भुजवेपरीत्येनायनदृग्ग्रहायनांशासंस्कृतार्थसिद्धावेव सुपपन्नं प्रागुक्तमिति भावः॥९५॥ ॥ननु दृग्ग्रहकालांशानीतद्वितीयापमात्तुतः क्रांतिवृत्तस्थायनदृग्ग्रहभोगीयभुजः सिद्ध्यति। हेत्वभावादित्यतो द्वितीयापमभुजयोः कार्यकारणभावं पद्याभ्यामुपपादयति। तत्रापि यद्दृष्टिषुवाख्यवृत्ताक्रांतिसंलग्नावेषुवभागजासा। पूर्वोक्तरीत्यापमवेषुवाख्यवृत्तांतरस्थासुकदंबसूत्रे॥९५॥ तस्याद्वितीयापमाग्रवमत्रध्रुवोन्मुखः स्यादपमांशजातः पूर्वापमस्तेन विलोमरीत्यामुक्ताद्वितीयापमजाभुजांशाद्इति। तत्र। निरूपितोपपन्नौ। अपि शब्दान्निरूपणीयं किंचिदवशिष्टमस्तीत्यर्थः। तदेवाह यद्दृष्टिति। विषुवाख्यवृत्ताक्रांतिवृत्तपर्यंतं। यद्वत्। दक्षिणोत्तरमंतरं ध्रुवाभिमुखं क्रांतिः। क्रांतिवृत्तस्थांशजाता। तद्वत्। वेषुवभागजाता। सा। क्रांतिः। प्रथमवेषुवाख्ययोर्वृत्तयोरंतरं दक्षिणोत्तरं। पूर्वोक्तरीत्या। आद्यावध्यः प्राथम्योत्तरमर्थः। कदंबप्रोतवृत्ताकारसूत्रे स्यात्। कदंबाभिमुखीभवतीत्यर्थः। तस्याः। विषुवभागोत्पन्नायाः। क्रांतेः स

कांशात्। महापमज्याचिगुणाभिघातइति पूर्वोक्तेन साधितापमः। अत्रः विपरीतकर्मणि। एवं। यथा क्रांतिवृत्तांशाजाद्दपमाद्द्वितीयापमः कदंबाभिमुखः सिद्ध्यति तद्वदित्यर्थः। ध्रुवोन्मुखः स्यात्। अतएवापक्रांतिवृत्तस्थांशाजातः प्रथमापमः सिद्धः। तेन कारणेन। विलोमविधौ। द्वितीयापमजाः भुजांशाउक्ताः। एतद्द्वितीयापमजज्यकाघ्नीत्रिज्यापरक्रांतिलवोद्धृतोर्ध्वा। भक्तापमापमिसंज्ञेन निरूपिताउपपन्नाः॥९६॥ ॥अथ नक्षत्राणां शायादिज्ञानार्थं ध्रुवकान्विवक्षुः प्रथमं तेषामश्विन्यादीनां रविवार्थं श्रीपतिमहोक्तस्वरूपनिबंधनपद्यत्रयमनुवदति। तुरगमुखसदृशयोनिर्वपुरांशुकरनिभमथ पुरस्यात्तमांगानतुल्यं। मणिगृहसारवत्राभानिशालोपमं भशयनसदृशमन्यच्चात्र पर्यंकरूपं॥९७॥ हस्ताकारमतस्त्रमौक्तिकनिभं चान्यत्प्रवालोपमं धि— तोरणवत्स्थितं बलिनिभं सकुंडलाभं परं कुंभ्यस्तेसरिविक्रमेण सदृशं शय्यासमानं परं चान्यत्तिविलासवत्स्थितमतः श्वगारकव्यक्तिवत्॥९८॥ त्रिविक्रमाभं वमरंगरूपं वत्तनतोन्यद्वमलदृयाभं। पर्यंकतुल्यं मुरजानुकारमित्येवदस्त्रादिभचक्ररूपमिति। अस्त्रमुखाकारं। अस्त्रविशेषरूपमित्यर्थः। अस्त्रशब्दपत्रस्वरूपं। इदमपि पूर्वत्रस्त्रातिरिक्तत्रस्त्रविशेषाकारं। नापितसुरसदृशं। शकटसमं। समचतुर्भु

जत्रिभुजोभयात्मकं हरिणमुखवत् इदंचपूर्वभिन्नत्रस्त्रविशेषाकारं माणिक्यवत् गरुडतुल्यं प्रायतचतुर्भुजाकार
मित्यर्थः वारसदृशं इदंचवसिष्ठसंहितायामुदयेंदुसममुक्तं तदर्थस्तु चंद्रप्रथमकलासदृशं सूक्ष्मत्रिभुजवदिति वृत्ता
कारं शालोपमं तणगृहविशेषविस्तारभित्तिविशेषः शालः प्रायतचतुरस्त्रत्रिभुजोभयसंबंधात्मकः प्रतएववसि
ष्ठसंहितायांप्राकारनिभमितिविशेषार्थतासर्वेणसम्यगुक्तं ननुशालागृहंतत्समभित्यर्थः वक्ष्यमाणपंचतारासंनि
वेशानुपपत्तेः एतेनमुहूर्तचिंतामणिकारेणभवनंचेत्तक्रमबाधादितिध्येयं शयनवत् स्वापविशेषास्तर्णासुप्त
नराकारमित्यर्थः अन्यत् तदग्रिमंनक्षत्रमुत्तराफाल्गुन्याख्यं चकारः समुच्चयः तेनेदंपूर्वनक्षत्राकारमेवत्यर्थः उ
भयोरभिन्नाकारत्वेसिद्धेतयोः संनिवेशविशेषतावगमार्थंस्वरूपसिद्धमाहत्रेति नक्षत्रद्वयस्वरूपं पर्यंकस्वरू
पंपर्यवसन्नमरयत्नचतुर्भुजाकारमित्यर्थः प्रतएवशय्यइतिद्विवचनेनोभयोः स्वरूपंशय्यतिवसिष्ठसंहितायामु
क्तंनतुप्रत्येकंशय्यति वक्ष्यमाणताराससंनिवेशानस्वरूपानुपपत्तेः एतेनमुहूर्तचिंतामणौशयनसदृशमन्यच्चात्र
पर्यंकरूपमित्यस्यस्वरूपद्वयबुध्यामंचः शय्यतिव्यस्तमुक्तमयुक्तमर्थानवबोधादितिध्येयं हस्ताकारं हस्तपंचा २९६

गुलीसंनिवेशस्वरूपमित्यर्थः मौक्तिकवत् विद्रुमसमं तोरणावस्थितंगृहद्वारबद्धाम्रादिपत्रपंक्तिसंनिवेशस्वरू
पं बलिसमं वैश्वदेवबलिहरणासंनिवेशाकारं सकुंडलाभं कर्णभूषणकुंडलसदृशं कुक्कुटसिंहपराक्रमविषयशा
रीरसंनिवेशनसमं शय्यासमं आस्तरणासदृशं प्रायतचतुर्भुजमित्यर्थः दंतिविलासवत्स्थितं दंतिनोगजस्यवि
लासः दंतद्वयोर्ध्वंशुंडादंडकरणांत दंडासंनिवेशं अत्रापिमुहूर्तचिंतामणौशय्यासमानंपरंचान्यदंतिविलासव
त्स्थितमित्यस्यविलासशब्देनदंतद्वयाग्रंगृहीत्वागजदंतमंचकाइतिमत्पयनोक्तपूर्वाषाढायाः स्वोक्तगजदंतानुरोधेनतारा
द्वयमुक्तमुत्तराषाढायास्तारद्वयमुक्तंतद्युक्तं उत्तराषाढापास्ताराभ्यांभवदुक्ताभ्यांभवदुक्तमंचकस्वरूपानुपपत्तेः पू
र्वाषाढायाः वसिष्ठोक्तचतुस्ताराभिर्भवदुक्ततारद्वयस्यविरोधाच्च शृंगाटकस्वरूपं समत्रिभुजमित्यर्थः त्रिविक्रमतुल्यं
त्रिपदं पदगमनपंक्तिवत् मर्दलस्वरूपं वृत्ताकारं तदनंतरमन्यत् नक्षत्रयुग्मं यमलद्वयाभं प्रत्येकंयमलाकारमित्यर्थः
अन्यथायमलाभमित्यनेनस्वरूपसिद्धाद्वयपदस्यवैय्यर्थ्यापत्तेः प्रतएवयमलयुग्माभमितिवसिष्ठोक्तिर्युक्ता उक्तनं
क्षत्रद्वयस्यस्वरूपयोर्विशेषावगमार्थमेकस्वरूपमाहपर्यंकतुल्यमिति तदुभयपर्यंकस्वरूपमायतचतुरस्रं नतुप्र

सेकं·नाराभ्यांपर्यंकस्वरूपानुपपत्तेः·अतएववरराध्यासदृशमितिवसिष्ठोक्तमयियमलयुग्माभमिसस्यविशेषणाम
नन्यगस्याभ्यपेयं·उत्तराभाद्रपदायास्तारादृयात्मिकायाः पर्यंकत्वानुपपत्तेः·अत्रापिमुहूर्त्तचिंतामणौतत्तान्यघमल
द्वयाभं·पर्यंकतुल्यमिसस्यअस्ययेनमंचकयेमाभेसक्रमसंगतमितिध्येयं·मृदंगाकारंरेवतीस्वरूपं·वसिष्ठेनतुफल
सदृशंमातुलिंगस्यसक्रमामातुलिंगफलवाअबीजपूरफलसदृशमिसक्रं·तथाचवसिष्ठसंहितायां·अश्वमुखसमा
नरूपंयोन्याकारंचनापितक्षुरवत्·सुरगृहसदृशंराश्वन्मस्तकसदृशंमृगस्यैव॥१॥मणिनिभमोकाःसदृशमुद्
यंदुनिभंकुलालचक्राभं·प्राकारनिभंराप्यहस्ताकारंचमौक्तिकार॥२॥रत्ननिभंतारणावहुलिसदृशंकुंडलाकारं·
केसरिविक्रमसदृशंराप्याकारंगजेंद्रवेलासं॥३॥मृगाटकत्रिविक्रममृदंगहस्तानियमलयुग्माभं·वरराध्यासदृशमतः
फलसदृशंमातुलिंगस्य॥४॥अश्विमुखतारलाणाकपितानीमानिचस्वरूपाणि·देवविदखिलंज्ञात्वासर्वंसम्यग्वदन्ति
यतमिति·इसक्रं·एवकाराडुक्तातिरिक्तस्वरूपनिरासः·दस्रादीनामश्विन्यादीनांभानांनक्षत्राणांचक्रंसमूहस्तस्यअ
वयवगतंस्वरूपं॥७७॥ ॥अथैकतारात्मकनक्षत्राणामुक्तस्वरूपासंभवात्तेषांनिरासार्थंस्वरूपसूचिताअश्विन्या

दीनांतारासंख्याः श्रीपतिभट्टोक्ताअनुवदति·वह्निक्षिषट्करणेंदुकृताग्निभूतबाणाश्विनेत्रशरभूकुयुगाग्निरामाः·रु
द्राब्धिरामगुणवेदशतद्विपुग्मदंताबुधैर्निगदिताः क्रमशोभतारा इति·अनुराधायावसिष्ठेनचतस्रस्ताराउक्तास्तदनुराध्यन
सुगाग्नीत्यत्रयुगाग्नीतियुक्तं·तथाचवसिष्ठः गुणागुणाश्चनुपवनगुणं·दुकृताग्निपवनशराः·द्विभुजशरेंद्विंदुयुगसुगाग्नि
रुद्राब्धिरामगुणाः॥१॥वेदशतद्विद्विरदस्रादीनांचतारकासंख्याः·हतनषादिषुकार्यतारकसंख्याः पुष्यस्यथरूपे
रिति·ज्योतिर्विदाभरणेपि·हुताशनाग्न्यंगशराग्निभूमयोयुगाग्निबाणाक्षयमायमेषवः·धरेंदुवेदार्णवशमशंभ
वोवार्ह्यग्निरामाश्विशतानिक्षिप्तदाइति·नक्षत्राणामेकतारानियमाभावादुक्तस्वरूपोपपत्तिःसुस्था·अत्राभिजितउ
त्तराषाढाश्रवणामध्यवर्त्तित्वात्तत्तारामितास्ताराइत्यर्थसिद्धमन्यथाभृगाटकाकारत्वानुपपत्तेरितिध्येयं॥१००॥
॥ ॥अथवक्ष्यमाणध्रुवकस्यानेकतारासंघटितसंनिवेशात्मकनक्षत्रीयत्वेबाधान्नक्षत्रतारास्वकतारीयत्व
वाच्यं·तत्रविनिगमिकायाः प्रधानतारायाश्चतुर्भिःश्लोकैःसूर्यसिद्धांतोक्तज्ञानंयत्तदनुवदति·फाल्गुन्योर्भाद्रपद
योस्तथैवाषाढयोर्द्वयोः विशाखाश्विनिसोम्यानांयोगतारात्तरास्तथा॥१॥पश्चिमोत्तरतारायाद्वितीयापश्चिमश्चि

ना·हस्तस्ययोगतारासोऽश्विविष्टायाश्चपश्चिमा॥२॥ज्येष्ठाश्रवणामैत्राणांबाहुस्यस्यमध्यमा। भरण्याग्नेयपित्र्याणांरेव
त्याश्चवदक्षिणा॥३॥ रोहिण्यादित्यमूलानांप्राचीसार्पस्यचैवहि·पथाप्रत्यवनेषाणांस्थूलास्याद्योगतारकेति·
दृश्लोकचतुष्टयंपितृचरणैः सूर्यसिद्धांतादिष्यणागूढप्रकाशसंज्ञेसम्यग्ज्ञातंतत्रैवद्रष्टव्यं॥४॥ ॥नक्षत्रा
णांध्रुवकांस्तेषांस्यष्टत्वंचेतिपंचभिः पद्यैराह·सूर्यैः खांबुधयोऽश्विभश्चकलिकास्तत्वानिनागाध्रुवोयाम्येहोत
भुजेशकानवगुणालिप्राद्यंब्रह्मभे·नागाब्धिप्रमितालवानवकलाः सौम्यकुषट्टाः शशीराद्रेपंचरसागजास्त्वदि
तिभेचकास्त्रिबाणास्ततः॥५॥ पुष्यस्यागदिशालवास्तकपिताः सार्पेनवाभेदवः प्रोक्तावेदकलोनिताश्चपित्र
भेनंदाक्षिचंद्रात्लवाः।भाग्येघत्रिभुवोंशकागजयुगान्यार्यमासंज्ञेध्रुवस्त्रशोनाः खशरंदश्चवश्चरविभेक्षासप्ष
योगीदवः॥६॥त्वाष्ट्रेभगजेंदवश्चखशराः स्वातौदिनागेदवः सिद्धाश्चाधिपकलोचनलवाः षड्गलिप्तान्विताः
मैत्रेवेदयमाश्विनोषदहनाः शक्रेखरामाश्विनोभागाबाणकलाधिकानिशतिभेचाश्विनः षड्गुणाः॥ ७॥ तोयवे
दशराश्विनोयुगगुणावैश्वेखतर्काश्विनोरूपाक्षीणितथाभिजिद्भवलवायुग्मागपक्षादिशः।खाष्टाक्षीणिगुणाध्रु

वस्तहरिभवेदांकपक्षालवामांशेडावसुभेनवेंदुदहनावेदेषवोबाहुणे॥८॥षड्वाध्रुवकस्त्वजेकचरणोभागाः कलाः
कुंभिनोहिबुध्नेगजवारिराशिदहनावेदाश्वयोलिप्तिकाः·पाप्तरवेंदुकलानभांशमितयोभागादिकामध्यमाएभ्यस्त्वाय
नध्रुवाः कपितवत्प्रोक्तायनांशात्स्फुटाइति·अंशाकलिकाइत्यनुक्तोयथायोग्ययोज्यं·षड्गाः षड्गुणात्·षड्गुणाः·षड्गुणा
त्·तथा·अंशाकलिकाइत्यर्थः·क्वचिद्भागोत्तरांकस्यकलात्वं·क्वचिच्चोत्तरांकस्यकलोत्तरापूर्वांकस्यभागत्वमितिसुबो
धं·एतेध्रुवाभागाद्याः मध्यमाः कालतोऽविकृताः स्थिराइतियावत्·लोकक्रांतिवृत्तमेपादितोध्रुवभोगस्थानेनक्षत्र
शरशलाकासदाप्रोताक्षीतिभावः एभ्यउक्तध्रुवेभ्यः प्रोक्ताः प्रागुक्ताः·येयनांशास्तेभ्यइतिजात्यभिप्रायेणैकवचनं·
तद्वशात्·कपितवत्·प्रागुक्तायनदृग्गतहरितस्यर्थः·आयनदृग्ध्रुवाः कार्याः·तेनावस्फुटाः विकृताः कालतः अतएवा
स्थिरानिबद्धाः·अत्रोपपत्तिः सिद्धांतसुंदरात्का·मध्याद्भकालेनिजयोगतारांशभाग्नविन्यस्तनलेनविद्धा·पूर्वोक्तवत्
नलिकापथनसूत्रंसमानीयसरावकर्णाः॥९॥ स्तंभासनातर्विवरेप्रभासान्निज्यागुणाभाश्रवणेनभक्ता·फलेस्यचापं
स्वनतांशकाः स्युर्ग्रहोक्तवद्ध्रुवकाः शशाः स्फुरिति·अस्यार्थः याम्योत्तरवृत्तस्थानक्षत्रयोगतारांशकुरूपस्तंभाग्र

विन्यस्तनलछिद्रेणावष्टब्धाविलोपतदानलमूलात्सूत्रं भूमिपर्यंतं नलाकारमार्गेणाधार्यं तत्सूत्रं छायाकर्णः कर्णसूत्रलग्नभूमिस्थानशंकुमूलस्थानयोरंतरं छायाभुजः शंकुः कोटिरिति सूत्रमतः छायाकर्णछायाभुजस्तदा त्रिज्याकर्णे कोभुजइसनुपातादृग्ज्यातद्धनुर्नतांशाः स्थूलाः यंत्रादिवेधेन सूक्ष्माः उन्नतदक्षिणाछायावशाद्दक्षिणोत्तराः एतेषां त्रैराशिकभिन्नदिग्वशादंतरिताभुक्ताः स्पष्टक्रांतिसंज्ञाभ्यस्तांशाधिकदक्षिणनतांशाद्दक्षिणाग्रन्यथोत्तराः अथ तत्कालेरात्रिघटीज्ञानात्सूर्यस्य रात्रिदलेन पट्टसूक्ष्मनतोन्नतं कृत्वा सूर्यादशामलग्नसाध्यं तदेवायनदृक्कर्मसंस्कृतानक्षत्रध्रुवः अस्माक्रांतिप्रसाध्यतया स्पष्टक्रांतिरर्कादिस्थंतरिताभिन्नदिशियुक्ताक्रांतिसंस्कारयोग्यः शरः रार्कदिक्के मध्यमक्रांतेरत्वेयथाशः अधिकत्वे विपरीतादिक् योगस्य स्पष्टक्रांतिदिक् अथमेवाग्रस्य स्पष्टत्वेनोक्तः अयं दृक्कर्मसंस्कृतो ध्रुवः स्पष्टाख्यास्मात्स्वानीतायनक्रांतांशाः स्पष्टशरानीतेर्लग्नमुक्तवे परीक्षेनक्षत्रध्रुवोत्तरक्रांतिवृत्तमेषादिभागात्मकोमध्ये मोस्माद्दृग्ज्यायनदृक्कालांशाः पूर्वशीतालग्नं मध्यमोध्रुवदृसंसकृत् शराग्रपिकदंबोन्मुखामध्यमाः स्पष्टशरभ्यासकृत्साध्याविपरीतकर्मणा तदेवं सूर्यसिद्धांतोक्तनक्षत्रध्रुवाश्रयनांशाभावकालिकायनदृक्कर्मसंस्कृतास्तात्कालिक

DR BHAU DAJI MEMORIAL

स्पष्टशराश्चतदुक्ताः एभ्योविपरीतकर्मणामध्यमाध्रुवाः शराश्च पूर्वगणकैर्नामदोषेः कृतास्तेनिबद्धा इति तत्त्वं ॥७॥ ॥
नुर्नुर्विनाशरनिरूपणास्फुटाध्रुवाः कथं स्फुटायनदृक्कर्मणः शरापजीवत्वादित्यतः प्रतिज्ञापूर्वकं नक्षत्रशरान्सप्तभिः श्लोकैराह स्वस्वपथनक्षत्रशराश्लेषाद्यान्मध्याध्रुवदास्त्रक्षकलानरद्वाः अर्कारसाक्षापमभेषवरावेदत्रयाहतभुजस्य शोभ्याः ॥१०॥ ब्राह्मस्य याम्यो त्रिलवाः खवेदाः सौम्यस्य काष्ठास्त्रिभुवस्तु याम्यः रौद्रस्य रुद्राग्निचलाहियाम्यः सौम्यादितेर्भस्य रसांशकाश्च ॥११॥ पुष्यस्य भूनं फणिभं गणांशा युगानि याम्यः पितृभे वियच्च भाग्यर्कक्षांबुधयो भुर्यमर्क्षे विश्वेक्षबाणा उभयोस्तु सौम्यः ॥१२॥ याम्यं करर्क्षः अतयोपरस्पं यमेषवो वह्निभे च याम्यः स्वातौ कुबेरा विशिखाश्च सौम्या याम्याहिदेवे विधुरक्षवर्गा ॥१३॥ मैत्रे शरीभूनयशास्त्रपंद्वे रामामहीभाश्च भुजोपमूले अंशा नवनंदजलेश्वतेसाद्विबाहवोपाक्षलवास्तु विश्वे ॥१४॥ अथोत्तरा बाहुरसालवाः कलापुरंदरः स्याद्धिभे च वेदवे भूनयागयोसाः शशिदिक्कवासवेतर्कागयः पंचयमाश्च वारणे ॥१५॥ याम्यस्त्रिभागोप्यकुबेरदिक्स्याद्भाद्रात्मकस्यात्स्तयोगतयश्च गजाश्विनोनागयमाद्वितीये भाद्रेतुपोक्षखमभीभशास्त्राइति अथ नक्षत्रमध्यमध्रुवकेनिबंधनानंतरं उक्तनक्षत्रयोगतारांशाः शरा

न्नवाद्यान्मध्यान्· क्रांतिसंस्कारायोग्यान्· कदंबाभिमुखानित्यर्थः· अत्राप्यनुक्तावंशकलिकाइतिध्रुवनिबंधनस्थयोज्यं·
सौम्याइतिप्रथमोक्तबहुवचनादश्विन्यादित्रयाणांशारादक्षिणानतुहस्तिकायाणवेतिसूचितं· पूर्वोक्तस्यलवोन्नतरा।
कस्यवलात्वं उभयाः फाल्गुन्याः· वर्द्धकिस्वष्टा· याम्याइतिबहुवचनाद्भरणीशारादिषड्डस्यशारादक्षिणाइत्यर्थः· अंशानंदा
इतिनिबंधनलाघवार्थं· गणितमार्गेणाकलान्यूनतिध्येयं· अक्षलवास्तत्रिभ्यइत्यत्रकलाधिकातन्मार्गेणाव· शशिदि
गुन्नरदिगित्यर्थः· शशिपर्यायसोमपदस्यकुबेरवाचकत्वात्· धनिष्ठाशारोपक्षन्नरश्वकारात्· त्रिभागइतिलाघवार्थं· गणि
तमार्गेणाकलाधिकराव· द्वितीय· उन्नरारयइत्यर्थः· ननुपूर्वैरेषामनुक्तः कथप्रामाण्यमित्यतआहअमीति· एतेउक्ता
ध्रुवाः शराश्च· प्रकर्षेणागणितमार्गेणपूर्वोक्तापेक्षयासमीचीनाः पूर्वोक्तास्त्वयनांशाभावकालसूक्ष्माअन्यथायनांशा
वशात्स्थूलाः· एतत्तुसरासूक्ष्मागणितसिद्धाश्चेतिप्रमाणांतरंनापेक्ष्यतइतिभावः॥१६॥ ॥इदमेवस्पष्टयति· एतेशा
रांशाः कथिताहिभानांकदंबसत्राश्रयिणाः स्थिरास्याः ध्रुवास्वसूत्राश्रयिणाः स्युरस्मान्नोक्तायतः कालवशाच्छरास्तइ
ति· स्पष्टार्थं॥ ॥अग्निभुक्तारायाध्रुवकंशारचाहअग्निभुग्ध्रुवकामध्याद्वाक्षांशाः अतपःकलाः उन्नरोष्टलवाः स्ते

२२०

षामनुलिप्तापिकास्पष्टेति· तपतिसमुच्चयार्थकं· शेषंस्पष्टं॥१८॥ ॥ब्रह्महृत्तारायाध्रुवशारावाहगजाक्षांशाश्चषड्गुणकलाः
स्याद्ब्रह्मतद्ध्रुवः· शारः सौम्योवियद्भागालवानरद्वयः कलाइति· स्पष्टार्थं॥१९॥ ॥ब्रह्मतारायाध्रुवशारावाहप्रजापतेः शा
रांशांशास्त्रिवाणाः कलिकाध्रुवः गजाग्नयोलवास्तिस्रास्तावत्यश्चशरास्तदिति· कलास्तावत्सोऽभिमतइत्यर्थः· शेषंस्पष्टं॥
२०॥ ॥लुब्धकस्यतारायाध्रुवशारावाहलुब्धकस्ययुगाक्षांशास्त्रिभाः षड्गुणसंमिताः विक्षेपस्तत्रियद्दलवायाम्योद्वयः क
लाइति· स्पष्टार्थं॥२१॥ ॥अगस्यतारायाध्रुवशारावाहअगस्तस्यशारोष्टौभागास्त्रिभास्तत्रयोध्रुवः सप्ताद्वयोलवायाम्यः
शारोष्टिकलिकायुताइतिस्पष्टं॥२२॥ ॥अयांवत्सापयोस्तारयोर्ध्रुवौशारौचाहअपांवत्सापयोर्मध्यौचित्राबहुवका
नुदक्· शराभागास्त्रयोत्रिभागजाश्चांकाः सदिक्कलाइति· आयतिसंज्ञा· अनयोर्मध्यौ· कदंबप्रातहृत्तस्वतारासत्रक्रां
तिवृत्तमेषादितोयस्मिन्स्थलेलगतितत्स्थानभागमानात्मकौध्रुवकौचित्राबहु· चित्राध्रुवतुल्यावित्यर्थः· एतेनब्रह्महृ
दादीनांध्रुवाः शराश्चमध्यमाउक्ताइतिस्पष्टीकृतं· आद्यंतयोर्मध्यपदस्थानात्· तयोरुदक्शरोपिमध्यमः कदंबवृत्ताश्रितः·
जात्यभिप्रायेणैकवचनं· शरावाहभागाइति· चांतःप्रथमस्य· दिक्कलायुक्तानवांशाद्वितीयस्येत्यर्थः॥२३॥ ॥अथ

ब्रह्मसिद्धांतप्रामाण्येन सप्तर्षीणामवस्थानचारौ प्रतिपाद्य तदुपजीवकमानयनमेषांशारभागांश्चतुर्भिः पद्यैराह नक्षत्र
चक्राधरपुष्कराख्यगोलेस्वशक्त्यामुनयोहिसप्त-ऋत्वादिकाः सोम्यकदंबतस्तेभितोल्पवृत्तेपमवृत्तराधात्॥२५॥ व्रजंति
वर्षेषु कलाग्रतोत्रग्रहोयजीव्यावृगणाः स्वखांगैः हीनाहिनिष्प्रस्तिथिभिर्विभक्तात्स्वादिकोजप्रमुखाऋतुः स्यात्॥२५॥
प्राग्भांत्रिभागैः पुलहः पुलस्त्यादंशांशकैरत्रिरतस्त्रिभिश्च-ततोंगिराग्रष्टभिरद्रिभागैस्ततोवसिष्ठोदशभिर्मरीचिः॥२६॥
मध्यार्कभागाक्षयुगांशलिप्तायुक्ताः स्वराग्रद्रभवाग्रपद्या-पंचाकदिग्वेदगुणाग्रखानाषष्टिः शराशाः क्रमशोब्जजोक्ताइ
ति-नक्षत्रचक्रं-लोहक्रांतिवृत्तनक्षत्रसंबंधात्तचक्रमिस्रपचर्यते-तदधाप-पुष्कराख्यगोलः शनिगोलादूर्ध्वमाकाशा
गोलः व्योमपुष्करमवरमित्यभिधानात्-सप्तर्षयः ऋत्वादयोमरीच्यंताः ते-ताराात्मकाः-उत्तरकदंबाद्भितः समंतात्-क्रां
तिवृत्तानुरोधात्-लघुभूतक्रांतिवृत्ते-अयमर्थः आकाशगोलक्रांतिवृत्तानुरुद्धक्रांतिवृत्तविभागकल्पितं-ततोयथाविषु
३६॥ ॥परिलेखार्थं विभास्वभपद्याभ्यामाहत्यकेंद्रसंशरागणाः सितांशुबिंबार्द्धनिघ्नस्त्रिभभागभक्तः सितंभ
वेत्तद्रहितंस्वबिंबगुंविशोषस्तनुरंडवर्गः ॥३०॥ ॥विशोषभक्तः फलमूनयुक्तंक्रमाद्विशोषणातदर्द्धकेस्तः
विभास्वभचंद्रविषाणजोच्चवोधोपयुक्तपरिलेखकेस्मिन्निति सूर्यवर्जितचंद्रस्यभुजीयभागसमूहः पूर्वोक्तगत
चंद्रबिंबांगुलानामर्द्धेनगुणितः त्रिराशीनांभागसंख्यानवत्याभक्तः व्यासार्द्धांतर्गतशुक्लमानंशृंगोपयुक्तंभवत्
साधारणांतदानयनंतुअर्कंद्वशरागणाः शुक्लपक्षेकृष्णपक्षेचंद्रार्कोशरागणाभुजांशास्थानेइतिविशोषावधानादुक्त
प्रकारेणैव तेन बिंबार्द्धांतर्गतशुक्लेनवर्जितंचंद्रबिंबांगुलार्द्धं विशोषसंज्ञंस्यात् तेनभक्तश्चंद्रबिंबार्द्धवर्गः फलं
क्रमेण विशोषणोनयुक्तंतदर्द्धक्रमेण अस्मिन्वक्ष्यमाणे परिलेखे निमित्तसप्तमी चंद्रशृंगोयोच्चताज्ञानोपयुक्तो
विभास्वभस्तः ॥३०॥ ॥त्रिभिः पद्यैः परिलेखमाहहिमांशुबिंबार्द्धमितांगुलैर्यद्वृत्तंसमस्थानगतंहिगंकं कृत्वात्रशु
क्लेवलनंजपकावस्याद्विस्तृतः पश्चिमतस्तकृष्णे ॥३१॥ देयंतदग्रानुगतासुरस्वाकेंद्राश्वरक्षाद्दहिरत्रकेंद्रात् दत्वा

विभामत्रचमध्यबिंदुमकल्पवृत्तांतरखंडमंतः॥५०॥कृत्वास्वभाव्यासदलेनपूर्ववृत्तात्पखंडाकृतिरिंदुरेवं॥दोर्भस्त
दिक्शृंगविषाणरूपोबिंबार्द्धशोभ्रप्रर्द्धसुवृत्तरूपइति॥समस्थानावस्थितं॥यच्चंद्रबिंबार्द्धमितकर्कटांगुलैर्व्यासार्द्ध
रूपैरभीष्टस्थानकेंद्रमारभ्यवृत्तंपूर्वोदितदिशितंकृत्वा॥अत्रवृत्ते॥शुक्लपक्षे॥प्राक्चिह्नात्॥कृष्णपक्षे॥पश्चिमचिह्नात्॥
उक्तमज्यांतरेणानेनेष्टस्वायामूलविष्कंभकृत्वावलनमर्द्धज्याकारंदेयं॥वृत्तमध्यस्थानमारभ्यवलनात्स्थानंलक्षीकृत्य
कृतारेखावृत्तार्द्धहिनैया॥केंद्रमारभ्यात्रवलनाग्ररेखायां॥विभादत्वा॥अत्र॥विभाग्रस्थाने॥मध्यकेंद्ररूपंबिंदुम
कल्पस्वभामितेनव्यासार्द्धेन॥अंतः॥लिखितचंद्रवृत्तमध्ये॥वृत्तांतरखंडंचंद्रवृत्तादन्यद्भंजतस्यैकदेशरूपं॥कृत्वा॥च
द्रवृत्तस्याल्पप्रमाणंयत्खंडमेकदेशरूपंतस्याकृतिः॥स्वरूपं॥एवं॥तदाकृतितुल्यश्चंद्रस्तत्काले॥भुजस्यविपरीतदि
शि॥उच्चश्रृंगतयारूपंयस्यतादृशः॥ननुबिंबार्द्धशोभ्रेविभास्वमयोरकरूपताचकथंप्राक्तदिशाचंद्राकारावगमइ
सतआहबिंबेति॥बिंबार्द्धशुक्लेभ्रर्द्धसुक्ते॥वृत्तार्द्धमिसर्पः॥तदाकारः॥सिद्धएवपरिलेखोनात्रदिशा॥लाघिलल्लाटत
टरूपधरः॥शशांकइतिलल्लोक्तेश्चतिभावः॥५१॥ ॥संगसर्पंप्रतिजानीते॥अत्रोपपत्तिरिति॥ ॥तत्रसित

स्वरूपकल्पनव्याजेनबिंबगोलेसाद्विपूर्वोक्तंपद्याभ्यांविशदयति॥गोलरूपरविगर्भतएतत्सूत्रमिंदुतनुगोलकपृष्ठ
यत्रलग्नमतएवसमंतात्तत्रवृत्तवशाद्दितगोलः॥५२॥सूर्यरश्मिफलनोज्वलइंदोः स्यात्ततोमनुजदृश्यविभा
गे॥पूर्णितोभवतिचोज्वलभागस्तादृगामलवपूर्वदिंदुरिति॥तेजोगोलात्मकसूर्यस्यमध्यगर्भरूपकेंद्रात्॥एतत्॥
चंद्रगोलगर्भावधिदृग्यनुज्ञातंसूत्रंचंद्रस्याल्पीभूतोयोजलगोलस्तस्यपृष्ठभागोयस्मिन्प्रदेशेलग्नंतत्प्रदेशादेवका
रस्तदितरप्रदेशावारणार्थः॥तत्र॥चंद्रगोले॥समंताद्दितगोलः॥सूर्यकिरणफलनादुज्वलः॥शुक्लवर्णः स्यात्॥त
तोहेतोः॥चंद्रगोलस्यमनुजदृश्यगोलार्द्धे॥उज्वलप्रदेशोयत्प्रमाणोभवति॥तादृक्॥तावन्मितः प्रदेशइंदुः॥प्रत्यक्षः॥आ
मलकीफलस्याग्रवद्दितरेखांतर्गतोभागोवप्रदृश्यते॥मुखशुभ्रगरेखाभिर्यद्दामलकेष्टिताः॥ऊर्ध्वाधःकृतरेखा
भिर्गोलेवप्राग्रकल्पयेदितिभास्कराचार्योक्तेः॥तद्वत्॥इंदुवृत्तद्वयोरंतः॥संयोगावच्छिन्नभागप्रत्यक्षानुमेयं॥५२
॥ ॥ननुतर्हिश्रृंगोन्नत्यापत्तिरित्यतः॥श्रृंगोपपत्तिंपद्याभ्यामाह॥दूरस्थतामंडलभागरूपोमनुष्यदृष्टोभवेंदु
रेषः॥सितांतरेखापरिधेः प्रदेशोभ्यांतवपंक्तिः॥राशिमंडलेया॥५४॥वृत्तांतरांशात्मधनुः॥स्वरूपातयार्द्धही

नाधिकशुक्लयोः स्तः॰ क्रमाद्दिषाशाशिनः सितस्यासितस्य विष्कंभवदर्द्धशुक्लेइति॰ दूरत्वादोषादेषावप्राकारो
पिचंद्रामंडलैकदेशात्मकोमनुष्यदृष्टः परिणतोभवति॰ मनुष्यमीडलैकदेशत्वेनचाक्षुषविषयीकृतइत्यर्थः॰
ननुतथापिधनुराकारेणाचंद्रकलानांकथंदर्शनमतआहसितांतेति॰ दूरत्वदोषाच्चंद्रदृश्यगोलार्द्धमंडलाकार
तयाप्रत्यक्षीभूतंतस्मिन्नाभंसममंडलेइत्यर्थः॰ सितांतरेखापरिधेः वप्राकारवद्दृसितांतरेखारूपचंद्रगोलप
ष्ठस्यपरिध्यर्द्धस्य॰ प्रदेशाभ्यः॰ अग्रबहिस्तत्वेनप्रतिप्रदेशाभ्यः॰ या॰ ऋजुसूत्रलंबानांपंक्तिः॰ चंद्रमंडलवृत्तप्रमा
णापेक्षयावृत्तांतरपरिधिस्तस्यैकदेशारूपंयदृजुस्तथाकारा॰ एतद्बुद्धिकल्पनानुभवैकवेद्यं॰ तया॰ लंबपंक्त्या॰ चं
द्रस्यार्द्धमंडलात्॰ हीनाधिकशुक्लयोः सतोः क्रमात्॰ शुक्लस्य॰ कृष्णस्य॰ शृंगस्तः॰ अर्द्धहीनशुक्ले॰ दृश्यचंद्रमंडलेश्वेतशृं
गेभवतः॰ अर्द्धाधिकशुक्लेदृश्यचंद्रमंडलेसूर्यकिरणाप्रतिफलनभागस्याकाशात्रमरूपस्यकृष्णस्यशृंगेभवतः॰ शृं
तशृंगयोरभावइतितात्पर्यार्थः॰ अर्द्धशुक्लेतुवृत्तेभासरेखावच्चंद्रमंडलेलंबपंक्तिरतः सूर्यकिरणाफलनाफलन
भागौचंद्रमंडलीयावर्द्धमंडलाकारावतएवशृंगयोः कुंठतेतिध्येयं॥५५॥ ॥अथस्वरूपमुक्तासाधनोपपत्तिवि

चक्षुः प्रथमंशुक्लानयनोपपत्तिमाहअस्मद्दृश्यगोलखंडेसितंतुनस्याच्चंद्रेसूर्यतुल्येयतोतः सूर्यांनेदोर्हलवभ्योनु
पीताशुक्लंसाध्यंशृंगबीजंसुधीभिरिति॰ यतः कारणात्॰ सूर्यभागतुल्यचंद्रभागेशाराभावे॰ अस्मदादिदृश्यगोला
र्द्धमंडलेश्वेतंतुकिंचिदपिनस्यात्॰ शारसत्वेकिंचिच्छुक्लमुत्पन्नमप्यलक्ष्यत्वाच्छृंगोत्पत्तयनुपयुक्तं॰ कृष्णभागभ्रमरूपा
लकंस्यादेवसूर्यग्रहणप्रत्यक्षं॰ अतः कारणात्॰ सूर्याच्चंद्रस्यविप्रकर्षेश्वेतोत्पत्तेरित्यर्थः॰ सुधीभिः॰ कल्पकैः॰ शृं
गयोरुपयुक्तंशुक्लं॰ बिंबार्द्धतत्रनमित्यर्थः॰ सूर्यरहितचंद्रस्यभुजभागेभ्यः॰ अन्यथादोरनुपपत्तेः॰ नवसंज्ञोर्बिंबा
र्द्धशुक्लंतदेषांशोः किमित्यनुपातात्साध्यंकृतं॰ सितसाधनमुपपन्नमितिभावः॥५६॥ ॥ननुशुक्लस्यचंद्रमंड
लेभासार्द्धरेखांतर्गतत्वेनाक्रमज्यारूपत्वाद्दिशीतकरांतरांशजीवाविपरीतांशांशिखंडताडिता॰ विहृतात्रिभ
जीवयासितंस्याच्छशलक्ष्मांगवदंगुलानितस्मिन्निति॰ लक्ष्मेत्यत्रज्यानुपातहेतुत्वात्स्थूलांशानुपातानादरणानस
क्ष्मंकथंनोक्तमित्यतआहयतः सूर्यतश्चंद्रचारात्सितस्यप्रचारोभवेत्तेनभागानुपातः॰ कृतोभास्कराद्यैस्तिथेःसा
धनोक्तावित्यामज्यायाः कृतंतत्रयुक्तमिति॰ यतः कारणात्सूर्यभागस्थानमारभ्ययच्चंद्रपूर्वगमनंतस्मात्स

र्यानचंद्ररूपांतरवद्रादिस्पर्शः॰श्वेतस्यप्रचारः वृद्धवृद्धात्मकोनवेत्॰सूर्यचंद्रयोर्गमनस्यतदाकाशवृत्तसंबंध
त्॰नहितयोर्गमनंक्रमज्यपयाक्रमज्यपयाबानुरुद्धं॰येनाक्रमज्यपयातदानयनंयुक्तं॰सितांतरस्वायाः क्रमसंपूर्णा
ज्याकाराभावाच्चापाकारस्वाच्चव्यासार्द्धांतर्गतसुक्ष्मारस्वायाउक्रमज्यात्वासंभवाच्च॰अप्यपाक्रमज्यपयातदानन
नापत्तेः॰तेनकारणेनभागानुपातोभास्कराद्यैः सूर्यादिभिर्भास्कराचार्यसिद्धांतसुंदरकारादिभिश्च॰तिथ्यानयन
युक्तयासूक्ष्मएवकृतः॰अन्यथातिथिसाधनस्यस्थूलत्वापत्तेः॰ज्यथातिथिसाधनोक्तपापत्तश्च॰ननुतर्हिलल्लेनाक्रम
ज्यथाकथमुक्तमित्यतआहविलोमज्यपयेति॰यैःलल्लश्रीपतिभट्टादिभिः॰उक्रमज्यपयाश्वेतानयनंकृतंतदयुक्तं॰उ
क्रमज्यानीतबलनवकल्पनानुपपन्नत्वात्॰एतेनप्रपंचसुक्ष्मरात्रौदिवासंध्ययोस्तदेकार्द्धमितिव्रस्तगुप्ताक्तवि
षयव्यवस्थापिपरास्ता॰निर्युक्तिकत्वात्॥५७॥ ॥परिलेखेबलनदानोपपत्तिंपद्याभ्यामाहस्वदिग्वशात्कल्पि
तदिग्विभागसूर्यंदुबिंबेमनुजप्रदृश्ये॰अतोभुजाभावदृनीयबिंबदिग्भिःसमाः स्फुटराशिमंडलाशाः॥५८॥दोः
सद्भावेसूर्यबिंबानुरोधादाशायास्ताश्चंद्रबिंबेस्वदिग्भिः॰ज्ञेयाः सुज्ञैर्बलनाख्यांगुलांतेतस्मादग्रंपूर्वपश्चात्तदत्रे

MEMORIAL LIBRARY

ति॰यतःस्वदिग्वशात्॰स्वदेशगोलाभुरोधेनयाः पूर्वादिदिशास्तदनुरोधात्॰कल्पितादिशांविभागायथोक्त॰सूर्यचंद्र
योर्मंडलेमनुष्याणांदृश्यभवतोतःकारणात्स्पष्टभुजाभावेतयोर्याम्योत्तरांतराभावात्सूर्यमंडलीयपूर्वादिदिग्भिश्च
द्रमंडलस्यपूर्वादिदिशाःसमाअभिन्नाः स्फुटभुजसत्वसूर्यमंडलदिगनुरोधाच्चंद्रमंडलेयादिशोभवंतिताश्चंद्रमंडल
दिग्भिःसकाशात्तःबालनोत्तांगुलांते॰बलनानयनक्रियायासन्नांगुलानितेषामंतेसुज्ञैर्ज्ञेयाः॰चंद्रबिंबेकल्पित
दिग्भिःसकाशात्तस्मिन्नेवचंद्रमंडलेसूर्यमंडलीयकल्पितदिगनुरोधादिशोबलनांतरणास्वदिशोभवंति॰बलनस्य
भुजोत्पन्नत्वेनतत्तद्दिगंतरस्वादितिभावः॰उपसंहरति॰तस्मादिति॰तस्माद्धेतोः॰अत्र॰लिखितचंद्रवृत्ते॰तद्बलनं॰पू
र्वपश्चात्॰पूर्वपश्चिमान्यतरचिह्नादुक्तरीत्यादग्रं॰तदग्रकेंद्रांतरस्वासूर्यपूर्वपश्चिमदिग्भेदवार्ष्णसिद्धं॥५९॥ ॥
अथविभास्वभ्योरुपपत्सूर्यक्षेत्रसंस्थानंपद्याभ्यामाहचंद्रस्यबिंबेधनुषःसितस्यवृत्तांतरांशास्यथदेवकेंद्रं॰तच्चग
योरंतरमत्रकर्णोवृत्तांतरव्यासदलेनतुल्यः॥५०॥वृत्तांतरांशात्सधनुर्गुणस्यपूर्णस्यबिंबांगुलकस्यखंडंभुजस्त
तःस्याच्छशिबिंबकेंद्राद्भातारकाकेंद्रांतरमत्रकोटिरिति॰चंद्रस्यमंडले॰सुज्ञास्यधनुषःधनुराकारायाःशुक्लांतरे

स्वाया:· वृत्तांतरैकदेशरूपाया: शुक्लसंधिगताया:· पतेंद्रं· तद्वृत्तमध्यभागः· एवकारात्सर्वमनिश्चितमपि
बुद्ध्याकल्पितसद्भावमित्यर्थः· केंद्रशृंगांतयोरंतरं· अत्र· परिलेखभूमौ· कर्णः· वृत्तांतरस्यव्यासार्द्धरूपः· वृत्तांतर
स्यैकदेशरूपसंपूर्णाधनुषोज्यायाः संपूर्णायाः· चंद्रमंडलव्यासांगुलमितायाः· अर्द्धं· बिंबार्द्धांगुलानि· भुजः· अ
नंतरं· चंद्रमंडलकेंद्रं· अज्ञाताख्यवृत्तकेंद्रं· अनयोरंतरं· अत्र· परिलेखभूमौ· कोटिः ॥५१॥ ॥कोटिकर्णा
योर्मानज्ञानार्थंकोटिकर्णयोरंतरमानंसहेतुकमाह· शुक्लानंचंद्रबिंबार्द्धंकोटिकर्णांतरंभवेत्· शुक्लांतवृत्ततत्केंद्रां
तरैकर्णायतः· स्पष्टं· तत्रैकदेशाद्दृष्टार्थः· शुक्लांतवृत्तं· तदेकदेशाद्दृष्टार्थः· शुक्लांतवृत्तस्यकेंद्रं· अनयोर्मध्ये· शेषंस्पष्टं ॥५२॥ कोटि
कर्णावेवविभास्वभासंज्ञावुक्तावितितदानयनोपपत्तिकथनेनाह· भुजाद्विगुणात्कोटिकर्णांतरात्संहिताकोटिक
र्णांतरेणोनयुक्तं· तद्दृक्क्रमात्कोटिकर्णौ भवतोविभास्वभासंज्ञकौ· परिलेखेऽस्मिन्· परिलेखभूमौ· अनेनप्र
कारेणविभास्वभानयनंपूर्वोक्तमुपपन्नमितिभावः· तदुपपत्तिस्तु भुजवर्गस्यकोटिकर्णयोर्वर्गांतरत्वादंतरभ
क्तोभुजवर्गः· कोटिकर्णयोर्योगः· वर्गांतरस्ययोगांतरघातसमत्वात्· योगांतराभ्यासक्रमणेनराश्योर्ज्ञानंसुलभं·

संक्रमणोपपत्तिः· योगांतरघातात्मकवर्गांतरोपपत्तीमत्कृतपाटिसारेतिस्पष्टं· योगांतरेणोनयुतोद्धृतस्तौराशीस्म
तंसंक्रमणाख्यमेतत्· योगांतरेणोनयुतः क्रमेणलघुर्महात्स्याद्द्विगुणोयतोतः ॥१॥ योगस्योभयात्मकत्वादंतरयु
तोनोलघुबृहद्राशीबृहल्लघुराशीस्तदितिप्रसः· वर्गांतरंतद्बृहद्राश्योः स्वाभ्यस्तयोरंतररूपमेव· महतोगुणाक
स्यखंडकैर्लघुरेकंपरमंतरंचतस्मात्· महतः प्रथमाख्यवर्गखंडैर्लघुवर्गेणविवर्जितेत्रजातं· उभयत्रलघोर्गु
णात्वतांतरनिष्पालघुस्त्रवर्गखंडमहदंतरघाततुल्यकंपरमाघयुतिभेदघातरूपमिति ॥५३॥ ॥विभास्वभयोः
परिलेखशृंगोन्नतिज्ञानार्थंसंस्थानमुपपादयन्नर्द्धदोःशृंगयोरनुसरूपपत्तिंपद्याभ्यामाह· विधोर्बिंबकेंद्रास्तितान्य
स्यभागविभाग्यसदावलनाग्रान्मुखयत्· तदंतोबहिर्वास्थितंतत्रवृत्तंस्वभाख्यनतखंडितंचंद्रबिंबं ॥५५॥ यथास्या
न्नपारोक्ताशृंगोन्नततद्विधोर्बिंबमुक्तं· वियत्सार्यवर्यैः· अथोक्तोखहारोयदाकोटिकर्णावनंतत्वतोनैवशृंगोदयं
दाविति· चंद्रस्योल्लिखितमंडलभागमारभ्यशुक्लसंबंधिचंद्रमंडलार्द्धातिरिक्तस्यचंद्रमंडलार्द्धस्यप्रदेशः· दृग्वल
नस्यांतंतदुन्मुखसूत्रेविभाग्ये· विभामितांगुलगणानयतितासर्यार्थः· स्थानं· सदा· कदाचिदपिविभाग्यवियो

गानुसन्नेः लिखितचंद्रमंडलांतर्गतं मंडलानंतर्गतं वा यद्भवति तत्रस्थानेमध्यबिंदुं प्रकल्प्य स्वभाख्येन व्यासार्द्धेन वृ
त्तं कार्यं तेन वृत्तेन छिन्नं लिखितचंद्रलग्नं यथा सिद्धं स्यात्तथा तत्सदृशं आकाशे तत् सूर्यकिरणप्रकाशितं चं
द्रस्य मंडलं शृंगाग्रशृंगमुन्नतं यस्य तादृशामर्थात्तदितरशृंगमवनतं आर्यवर्यैः उक्तं परिलेखान्नमुपपन्नमिति।
भावः अर्द्धशुक्लपरिलेखाविषयत्वे हेतुमाह अर्थेति उक्तो विभास्वभारूपो कोटिकर्णो यदा अर्द्धशुक्लकाले खं
दारौ शून्येन भजनस्याशक्यत्वात् अनंतत्वतः फलसंख्यायानियमाभावात् तदानादिनापरिलेखस्यासाध्यत्वं
अतएवार्द्धनंद्रसितांतरेखायामासाकारत्वेन धनुराकारासंभवाच्छृंगतीक्ष्णतेनैव भवतः किंतु शृंगयोः कुंठते
तिभावः॥५५॥ ॥स्यादेतत् परंतु सुकोटिः शृंगोन्नतौ भास्करकल्पितौ न्नतिकर्णसमंजसं भास्करोन्नस्य ब्रह्मगु
प्तोन्नसंवादेन प्रामाण्यात्तदुक्तकोटिभिन्नकोट्युक्तकर्णे रिस्पतोर्ब्रह्मगुप्तोन्नक्षेत्रं भास्करेणोवदूषयित्वा सन्नमि
तिवदन्नास्करोन्नदूषणास्यकेनचित्प्रतिपादितमुद्धारं प्रतिजानीते जात्यक्षेत्रं ब्रह्मगुप्तोदितं यत्र तु श्रीमद्भास्करे
णोक्तं सम्यक् दोषान्नांतरदर्शितं तत्र केचित्सिद्धांतज्ञा दोषमेवोद्धरंतीति जात्यक्षेत्रं न्यस्तं यत् दृग्भावर्णास्वात्वं प २४९

पक्षस्य वर्गविशोध्यपदं विभुतसहितरवींदोरेकान्यकपालसंस्थयोराद्यः रविशशिदृक्कांतरमन्योदृगादृश्यशं
कैकं आद्यान्यवर्गयोगान्मूलं पूर्वापराभुजाकोटिः। भुजकोटिकृतियुतिपदं तिर्यक्कर्णस्य चंद्रोन्नतइत्यनेन
नंत्यनन्नस्य गुप्तप्रतिपादितं अत्रस्वक्रांतिज्येन्दुज्यागुणाहतेवलंबकेन रविशशिनोः अग्रेपक्षस्वशंकु
तलतुल्यदिग्युक्तविदिग्विपुते पक्षगंतरसंयोगो भुजोपतो कोटिशीसमान्यदिशोरिति तदुक्तेपक्षपदं
नस्वस्वभुजः पदयोर्वियोगयोगावेकभिन्नकपालयोराद्यः स्यात् शंकुंतरैक्यपक्षोक्तमन्यः स्यात् आद्यान्यपा
र्वर्गैक्यान्मूलं पूर्वापराभुजरूपा कोटिः स्पष्टभुजकोट्योर्वर्गयोगात्पदं सूर्यचंद्रमंडलकेंद्रांतरं रविरश्मीनंकर्णः
अतएवास्याग्रचंद्रइतिनन्नोसर्यार्थः उपपन्निस्तु अक्षापिमरीचौ प्रतिपादिता दृष्टव्या तन्नु मूलं तु कारान्मल
तस्वनिरासंनापेक्ष्यतइत्यर्थः॥ अत्रहेतुमाह श्रीमदिति श्रीः गोलतत्वविचारक्षमता तद्वताभास्करेराचार्येण रा
वकारः श्रीपतिभट्टनिरासार्थं तेनतत्संस्थस्यवांगीकृतत्वेनादूषितत्वात् दोषणाभाप्तं सम्यगतिव्यक्ततया सिद्धां
तशिरोमणौ शृंगोन्नत्यधिकारे यो ब्रह्मगुप्तकथितो किलकोटिकर्णो ताभ्यां कृतेन परिलेखविधौ यथोक्तं नास्ती

वभातिममदृगाणितेवपमत्रशृंगोन्नतौसुगणकैर्निपुणैर्विलोक्यं. यत्राक्षोगसालवाः क्षितिजवत्रत्रापवृत्तेस्थि
तेमेषादाधुदयंप्रयातितपनेनक्रादिगंदर्दलं. याम्योदग्वलयेनखंडितमिवप्राच्यांसितंस्यान्नदानेतद्दलमत
स्यहिभगुणोबाहुश्चकोटिस्तथा. शृंगासमस्तोयदिबाहुभावऊर्ध्वाधरतेयदिकोणभावः. त्रिज्यासमोतस्यनुको
टिबाहुर्किंवाममानेननमोमरुद्भइतिग्रंथेनदर्शितं. प्रतिपादितं. एतदर्थस्तुमरीचावतिव्यक्ततयाविस्तरेण
प्रतिपादितोद्रष्टव्यः. ननुतर्हिक्वयातदुद्घाटनंविद्वांसोनुन्नपाकिमर्थंकृतमित्यतआहतत्रेति. ब्रह्मगुप्तक्षेत्रे. के
चिद्दानराजदैवज्ञाः दोषं. भास्कराचार्यांक्रे दूषणं. एवकारस्तदंगीकरणनिरासार्थं. भंग्यंतरेणभास्करोक्तस्यैव
स्वांतेपउक्तत्वात्. उद्धरंति. निराकुर्वंति. नन्वबोधेनसमुद्धारस्तदाभासइत्यतआहसिद्धांतज्ञाइति. अन्यथासि
द्धांतसुंदरकर्तृत्वानुपपत्तेरेवंदोषाभिप्रायावबोधं विनादूषणंपरिहर्तुमशक्यमितिभावः. तथाचसमु
द्धारस्यसदसत्त्वविचारार्थंमयातदुद्घाटनंकृतमितिसमुद्धारप्रतिज्ञायासूचितं॥५६॥ ॥सिद्धांतसुंदरस्यसमु
द्धारमनुवदति. यत्सिद्धांतशिरोमणौसमुदितंकोटरभावेभवेच्छृंगोर्ध्वाधरतेतिदर्शदिवसेचंद्रार्कयोगेकुजे.॥ २५०

तस्मिन्दर्शनमेवनास्तिशशिनः शृंगोन्नतित्वंकथंयद्वोर्ध्वाधरतानुजोपरिविधौकोटरभावः कुतइति. सिद्धांतशि
रोमणौ. यत्. कोटरभावेभवेच्छृंगोर्ध्वाधरतेति. जुर्ध्वाधरतेयदिकोणभावइतिग्रंथेनसमुक्तं. द्वयोरस्तयाभावात्का
र्यकारणाभावोनघटतइतिदूषणंवक्तुंस्वज्ञानाभिप्रायेणकोणभावस्थलमाहदर्शेति. दिवसपदंसाधारण
कालपरं. अमावास्यांतकाले. दर्शस्याभिधानोक्तमर्थंस्पष्टयतिः चंद्रार्कयोगइति. द्वारभावेसूर्यचंद्रयोरूर्ध्वा
धरकक्षान्यामंतरसत्वेपिपूर्वापरांतरभावाद्योगरूपे. भूगर्भस्थितिजसतिद्वयोः सांकारभावाच्छृंगोन्नतरूपयुक्त
कोटरभावः. इदंचमंदाबबोधार्थंक्रे. कुजातिरिक्तेप्यमावास्यांतकालद्वयोरूर्ध्वांकोः समत्वान्नदंतरेणकोण
भावसिद्धेः. अत्रशृंगोन्नतस्यभावेनतदूर्ध्वाधरत्वासंभवइत्याशंक्यनाहतस्मिन्निति. उक्तकोणभावसमये. चंद्र
स्यदर्शनं. एवकारः शृंगोन्नतसद्भावसंस्थापकात्मकमित्यर्थः. नास्ति. शृंगोन्नतित्वंकथंसंभवति. शृंगोन्नतित्वा
निश्चयाद्दूर्ध्वाधरभावस्याप्यसंभवः प्रमाणाभावादितिभावः. ननुकोणभावेशृंगोर्ध्वाधरभावस्यासंभवेपि
स्वाभिप्रायेणशृंगोर्ध्वाधरभावेनरयंकोणभावइतिविपरीतान्वयोस्त्वित्यतआहयत्रेति. अर्द्धांतर्गतमुक्ततया

२८.

दर्शनकलि॰ मितिजादूर्ध्वचंद्रे कुधीधरता॰ शृंगोन्नतिमात्रत्वरूपेणैवशृंगयोरूर्ध्वाधरभावः स्वाभिमतः प्रत्य
क्षसिद्धः॰ नतदभिमतः॰ तत्रस्थलेकोटेरभावः कुतः॰ कुसः॰ भवति॰ कोघभावोनास्तीत्यर्थः॰ सूर्यचंद्रयोरेक
स्थानाधिष्ठानाभावात्॰ तथाचविपरीतान्वयस्याप्यभावेनकोघभावाभावरूपकोटिसत्वेशृंगोर्ध्वाधरत्वाभा
वस्याभावाद्व्यतिरेकावेनापिकार्यकारणाभावोनघटतेइतिभावः॥५७॥ ॥अथाबोधेनहसंतोमांस्वतस्तु
ष्यंतुदुर्जनाइतिभास्कराचार्योक्तेपेवभास्कराचार्योक्तोन्नातकार्यकारणाभावमबुध्वैवेदंस्वबोधाभिप्रायेणकंचिद्दु
र्जनदूषणामदूषणामेवसाहइतितन्नसदेवपारिलेख्येसितचापाग्रभवोघरोर्ध्वभावः॰ परपूर्वजसूत्रेणैवसिद्ध्या
परमः कोटिविनाशातोहिसिद्धइति॰ इतिपूर्वोक्तभास्करोक्तदूषणसमुद्धाररूपंयन्नसंत॰ भावावबोधसंबंधि
दूषणानेवभवेत्॰ समुद्धारोऽसंलग्नइत्यर्थः॰ अत्रहेतुमाहपारिलेख्येइति॰ परिलेखक्रियायां॰ हि॰ यतः कोटिवि
नाशातः कोघभावात्॰ सितचापाग्रभवः श्वेतचंद्रकलारूपधनुषः शृंगयोः संबंधी॰ आघरोर्ध्वभावः॰ ऊर्ध्वाधर २५९
त्वमित्यर्थः॰ परमः॰ यस्मादधिकंशृंगयोरूर्ध्वाधरत्वंचंद्रमंडलदक्षिणोत्तरचिह्नाभ्यांनभवतितत्परमं॰ एतदेव

स्पष्टयति॰ परपूर्वजसूत्रेइति॰ सः॰ शृंगयोरूर्ध्वाधरभावः परमः॰ चंद्रमंडलपूर्वापरसूत्रे॰ एवकारादन्यदिक्सूत्र
निरासोर्थः स्यात्॰ भुजस्यपरमत्वेनपूर्वापरस्थानाभावद्दत्तेदक्षिणोत्तरस्थानेबलनाशंतद्रूपादक्षिणोत्तरा॰
तदनुकारिणोरंशयोर्विभागरूपकेंद्रस्थानात्वभयोत्पन्नत्वेनचंद्रमंडलेपूर्वापरस्थानेयोगाच्चंद्रस्यशृंगा
भवतः॰ तत्रभुजस्यपरमत्वेनकोघभावएवपरिणतः॰ अतस्तादृशोर्ध्वाधरभावोविनाकोघभावमनुपपन्नइ
त्यूर्ध्वाधरकोघभावयोः कार्यकारणभावः परिलेखसिद्धः॰ अन्यदिक्सूत्रस्थशृंगयोरूर्ध्वाधरभावोभास्कराचा॰
र्याभिप्रेतोनभवतीतितदभिप्रायेणसमुद्धारोनुचितएव॰ भास्करमतेभिमतशृंगोर्ध्वाधरभावः कोघभावेभव
त्येव॰ ब्रह्मगुप्तपक्षशृंगोर्ध्वाधरभावेभुजस्यपरमत्वेनसिद्धावपिकोटेरपिपरमत्वसिद्धातदुक्तपरिलेखविधि
नाशृंगयोस्तादृशाभिमतऊर्ध्वाधरभावः कोघभावाभावेनानुपपन्नइतितत्रकेंद्रः प्रतीकाराभावतयाफलितइ
तिभावः॥५८॥ ॥नन्वेवमप्यंतेकोघभावादूर्ध्वाधरत्वंभास्कराभिमतंचंद्रस्यादर्शेनपिपरिलेखगम्यंकुतोन॰
स्यादित्याशंक्यनाशंकानिराकरोति॰ नचदर्शेविरामकालएवस्वस्वारकोटिविनाशातःसितोऽत्रे॰ नकथंपरिलेखमा

न्नगम्यमवतस्तेभिमतेतथेतिवाच्यमिति · इति · एवमुक्तेनचकथनीयं · उक्तांशकोनेवकार्यस्यर्थः · इतीतिचिंतदाह
दर्शेति · एवं · उक्तरूपकार्यकारणाभावांगीकारे · दर्शनसमये · शाराभावे · कोपभावात् · सितोश्वे · सितशृंगे · ते · तवने
था · पूर्वापरसूत्रेऽर्द्धाधरत्वेन · अभिमते · अवाक्षुषअप्रि · परिलेखएवप्रत्यक्षे · कथं · केनहेतुनानस्यातां · तदा
परिलेखेपिशृंगानुत्पत्तातदूर्ध्वाधरभावः सुतरांनसंभवतीति कोपभावरूपकारणसत्वेशृंगोर्ध्वाधरतारूप
कार्योत्पत्तिः परिलेखेजायतामित्याक्षेपः ॥५७॥ ॥निराकरणाहेतुकार्यकारणाभावसमर्थनपद्योक्तसित
पदसूचितमुपपादयति · सितोत्पत्तभावादनुत्पन्नशृंगकथंस्तोर्ध्वाधरार्ध्वतथात्रापपातु · कुलाद्यभावेघटोत्पत्ति
रास्तांप्रदंडेनतस्मादुत्पत्तेवेति · अत्र · त्वदभिमतकोपभावस्थलेश्वतानुत्पत्तेः · अनुत्पत्तेशृंगाअपितथा · पूर्वापरसूत्रस्थेअधरार्ध्वकथंस्तः शृंगानुत्पत्तेवतदूर्ध्वाधरत्वाभावः · सितोत्पत्तावबवश्यंतदूर्ध्वाधरत्वं
स्यादेवतदेतिकारणांतरसांनिध्याभावादूर्ध्वाधरत्वानुत्पत्तेरभिमतकार्यकारणाभावेनक्षतिः उक्तानंगीकार
निषमाहअभ्यपेति · कोपभावेशृंगोर्ध्वाधरत्वानुत्पत्तिदर्शनेनकार्यकारणाभावानभ्युपगमेतु · प्रदंडेन · प्रकृष्टो

घटोत्पादकोदंडस्तेन · कुलालादीनांकारणांतराणांसानिध्याभावेघटोत्पादनमप्यास्तां · भवत्वित्यर्थः · प्रसिद्ध
घटदंडयोः कार्यकारणभावविलोपापत्तिरितिभावः · प्रसिद्धकार्यकारणभावेयत्समाधानंतदीत्येवास्मिन्कार्य
कारणाभावेसमाधानमित्यपसंहरति · तस्मादिति · कारणसत्वेकार्योत्पत्तिदर्शनात् · द्वयोः प्रसिद्धकार्यकारणा
भावोक्तकार्यकारणाभावयोः · अभेदः · एवकारोविशेषनिवारणार्थः ॥६०॥ ॥यत्रोर्ध्वाधरताकुंजापरिविधो
कारेरभावः कुतइतिस्वबोधाभिप्रायेणोक्तदूषणमपिकार्यकारणाभावसमर्थनपद्योक्तपरमपदेननिरस्तमि
तिवदन्समुद्धारदूषणमुपसंहरति · शृंगोन्नतिर्यत्रनुकोपभावोनेवास्तिचेत्सूर्यपराख्यसूत्रे · विवक्षितशृंग
नतोन्नतत्वेतेनोक्तदोषस्तदबोधहेतुरिति · यत्र · अंतर्गतशुक्लदर्शनसमये · शृंगोन्नमनंदक्षिणोत्तरसूत्रा
न्नवितरस्यतत्सूत्रादेवनमनमपिबोध्यं · तत्र · कोपभावानास्त्येव · कोपस्तत्रेतिपूर्वोक्तदूषणंचेदाक्षिप
सि · तर्हि · शृंगनमोन्नतत्वेहि · पूर्वापरसूत्रे · अपेक्षिते · नाम्नत्रसूत्रेइतिपूर्वोक्तेनेवनिरस्तं · कोपभावस्यन
तोन्नतत्वसाधारणकारणत्वासमर्थनेनोक्तदूषणस्याप्रसंगात् · उपसंहरति · तेनेति · पूर्वोक्तफलितेन ·

उक्तदोषः यत्सिद्धांतशिरोमणाविसाधकत्वोक्तस्तगुप्तपक्षस्यसमुद्धाररूपोभास्करोक्तस्पष्टपणात्मकः भास्करामि
मतभावानवबोधः कारणायस्यैतादृशः फलितइत्यर्थः॥६१॥ ॥उक्ताधिकारमुपसंहरति इसिद्धांततत्वार्थमु
नीश्वरकृतेभवत सिद्धांतसार्वभौमेस्मिन्पूर्णाभ्रंगोन्नतिः स्फुटति अस्मिन् परग्रंथानामुपमर्दकतयाप्रसक्तभू
ते स्फुट प्रसक्ता ननुवक्तभूता अंगोन्नतिः इतरभ्रंगस्यावनतिरपि अंगोन्नसवनसधिकृतिः पूर्णा प
रिपूर्तिमाप्तसर्थः॥३॥ ॥इतिश्रीसकलगणकसार्वभौमरंगनाथगणकात्मजगणकमुनीश्वरविरचिते
स्वकृतसिद्धांतसार्वभौमस्वाशयेभ्रंगोन्नसधिकारस्तृतीयः॥ ॥श्रीः॥ ॥श्रीसार्वभौमः स्वशयागतानां
हंसादिकानांभगनेचराणां युतेर्विभेदानपिकोतुकेननिरूपयसात्मधियाफलार्थी॥१॥ ॥तत्रयोगभेद
मस्तंतसंगादुदयंनवक्तुकामस्तदाख्यावांतराधिकारंसंगतिप्रदर्शनपूर्वकंप्रतिजानीते अथग्रहाणांयु
तिजंविवक्षुःसूर्येणयोगम्यखगोनदृश्यः अतोर्कसान्निध्यवशाद्ग्रहाणामस्तादयज्ञानमहंवदामीति अ
थ अंगोन्नसधिकारानंतरं अहं ग्रहाणां परस्परं योगानक्षत्रैश्चतिबोध्यं तदुत्पन्नंकर्म वक्तुकामः प्रथ

२५३

मं सूर्येण इतरग्रहाणांनक्षत्राणांचयोगे इतरग्रहेनक्षत्रंचयतोनदृश्यमतःकारणात्सूर्यनैकघानु
रोधात् योगास्सर्वमेवास्तसंभावनयोत्तरत्रचोदयसंभावनया ग्रहाणां चंद्रादीनांनक्षत्राणांच अस्तोदययो
र्ज्ञानप्रकारंनिरूपयामि॥१॥ ॥तत्रापिप्रथमंनित्योदयास्तनिरूपणसंगतिप्रदर्शनपूर्वकंप्रतिजानीते
तत्रप्रसंगाद्गुरुभाधिकारेसंसूचनाच्चान्यखगर्क्षकाणां अस्तोदयौप्रसक्तवायुयोगभ्रमोद्भवौतौप्रवदामिता
वदिति तत्र अस्तोदयाधिकारे निरूपणीये तावत्प्रथमं प्रसंगात् स्मृतस्योपेक्षानर्हत्वादित्यर्थः स्मरणो
कारणांतरमप्याहग्रहेति ग्रहनक्षत्रज्ञायाधिकारे अंगोन्नतिव्यवहितेनप्रागुक्तपरीक्षाधिकारांतर्गते संसू
चनात् निजनिजोदयलग्नसमुद्भवसमुदयइतिपद्येनतत्स्वरूपनिरूपणसूचनात् चः समुच्चये सूर्यस्यदिन
रात्रिव्यवहारेणतदुदयास्तयोःस्वतःसिद्धज्ञानात्तदनुरोधेनान्येषां चंद्रादिग्रहाणांनक्षत्राणांच अस्तोदयाव
नियतौ प्रसक्तवायुयोगभ्रमोद्भवौ प्रतिसूर्याहोरात्रं प्रवहवायोर्यानजनितपश्चिमदिगभिमुखभ्रमणानापर
पूर्वक्षितिजविभागयोः संजातौ यौ तावहं प्रकर्षेण सूक्ष्मतया तदाश्रितकालज्ञानप्रकारद्वारा कथयामि॥२॥

॥ ॥तत्राभीष्टकाले पूर्वोक्तरीत्या साधितयोरुदयोरुदयास्तलग्नयोः संकेतांतरमुदयस्य गतैष्यत्वज्ञानं च भास्करोक्तमनुवदति· प्राग्दग्रहः स्यादुदयास्यलग्नमस्तास्यकं पश्चिमदृग्ग्रहश्च· प्राग्दग्ग्रहोऽत्र यदीष्टलग्नादुन्नागमिष्यत्युदयं बहुश्चेदिति· उदयास्यलग्नं· पूर्वदृग्ग्रहः स्यात्· उदयस्य पूर्वदिक्संबंधात्· अस्तसंज्ञं प्राग्नतसाधितं लग्नं· पश्चिमदृग्ग्रहः· अस्तस्य पश्चिमदिक्संबंधात्· यद्यप्यस्तकालिकोदयलग्नस्य पश्चिमदृग्ग्रहत्वमनुचितं· अस्तकालिकास्तलग्नस्य तत्संकेतः साधुस्तथापि पूर्वमस्तलग्नस्यानुक्तेरस्तकालिकलग्नस्य तत्षड्भांतरत्वेपि तत्संज्ञोक्ता· अग्रेतक्रियायां पश्चिमसंबंधस्य पूर्वसंबंधेनोक्तश्चोभयथा निर्वाहान्नक्षतिः· अत्राभीष्टकाले· प्राग्दग्ग्रहाभीष्टलग्नात्साधितात्· यदि न्यूनस्तर्ह्युदयं गतः उदयकालागतश्चेद्बहुरधिकस्तर्ह्युदयं गमिष्यति· उदयकालएष्यः॥३॥ ॥अस्तस्य गतैष्यत्वमनुवदंस्तत्कालानयनमाह ऊनाधिकः पश्चिमदृग्ग्रहश्चेदस्तं गतो यास्यतीत्येवं· स्वदृग्ग्रहाभीष्टविलग्नमध्येनाड्यो गतैष्या ग्रहसावनीया इति· यदीष्टकालिकलग्नात्· पश्चिमदृग्ग्रह ऊनाधिकस्तदा क्रमेणास्तं गतास्तमेष्यति· गतास्तकालएष्यास्तकालइत्यर्थः· इति· एवं· निजनिजोदयलग्नसाधि

२५४

नासोपपत्तिर्ज्ञेया· उदयास्तान्यतरसंबंधी दृग्ग्रहः· अभीष्टकालिकलग्नमनयोरंतरालसमये· ऊनस्य भोग्याः समयाद्राशयधिकस्य भुक्ताः समयाद्राशयश्चेत्तयोर्युतिर्हीनकपुष्टमध्यभागादयांशैः सहितांगभक्तेति पूर्वोक्तरीत्या गतैष्यघटिका गतैष्यलक्षणा ग्रहसावनसंबंधिन्यः· नक्षत्राणां नाक्षत्राणि· तत्सावनस्य भिन्नत्वेनालक्ष्यत्वात्॥५॥ ॥नाक्षत्रापेक्षायामाह तत्कालितान्मध्यग्रहमात्स्फुटोदयस्तस्मात्स्वदेशोदयवच्चरोनरीत्या· निजोदयास्तनतइष्टलग्नात्कालघ्ननाक्षत्रकइष्टकालादिति· ताभिः· सावनघटीभिः पूर्वोक्तप्रकारेणानीतान्मध्यग्रहादुक्तविधिना यः स्पष्टो भवति· तस्मात्पूर्वोक्तरीत्या· उदयास्तान्यतरसंबंधेनाभिमतो दृग्ग्रहोऽयं यावांश्चोदयकालेस्तकालेभवति· तत्प्रानीतादृग्ग्रहात्· इष्टकालिकलग्नाच्च· उक्तरीत्या यावत्कालो भीष्टकालादुदयास्तान्यतरस्य गतैष्यान्यतरो नाक्षत्रएव भवति॥५॥ ॥ज्ञाताभ्यां भूगर्भसंबंधेनोदयास्ताभ्यां भूपृष्ठीयोदयास्तावाहकुलन्नसूत्रोन्नितनांकुजाभिर्घटीभिरूर्ध्वप्रथमक्रमात्तः· भूगर्भस्थयोरुदयास्तकाभ्यां कुपृष्ठभागस्थभोदयास्ताविति· स्पष्टार्थं॥६॥ ॥निसोदयास्तज्ञानविधिमुक्ताधिकारप्राधान्येन प्रतिज्ञातयोरुदयास्तयोर्दिग्विय

मभाहदूनादल्पगोल्योग्रहः प्रागुदेति प्रतीच्यस्तमेत्यल्पगोयोधिकः सः॰ ततोनल्पगोल्योभवत्प्रागदृश्योधिकोनल्प
गः पश्चिमायामुदेतीति॰ सूर्यभोगात्सूर्यगत्यल्पगतिर्ग्रहोल्पश्चेत्प्रागुपंप्राप्नोति॰ सूर्यगतिन्यूनगतिर्ग्रहोयः सूर्य
भोगादधिकः सग्रहः पश्चिमास्तंप्राप्नोति॰ एवंचभौमगुरुशनयः सदासूर्यादल्पगतयः प्राच्यामुदिताः पश्चिमदि
ग्रस्तमिताः॰ बुधशुक्रौतुवक्रत्वेन्यूनगतित्वात्पूर्वोदयंपश्चिमास्तंचप्राप्नुतः ततः सूर्यात्॰ अधिकगतिर्ग्रहोल्पः सू
र्यभोगान्नदाप्रागस्तमितः सूर्यगत्यधिकगतिर्ग्रहः सूर्यभोगादधिकश्चेन्नदापश्चिमदिग्रफदयंप्राप्नोति॰ एवंचचंद्रः
पूर्वदिग्यस्तंपश्चिमदिग्फदयंनियतंप्राप्नोति॰ बुधशुक्रौतुमार्गत्वेधिकगतिसंभावनयाप्रागस्तंपश्चिमोदयंचग
च्छतः॥ ७॥ ॥अस्योपपत्तिसूचनार्थमस्तोदयस्वरूपमाह यस्यान्वहंदर्शनमस्तिसूर्यनैकघतस्तस्यनदर्शनं
चेत्॰ अस्तोपतस्यास्तमितस्य सूर्यादूरत्वतोदग्यदिचोदयः स्यादिति॰ अन्वहं॰ प्रत्यहं॰ यस्यग्रहादर्दर्शनया
ग्यत्वमस्ति॰ तस्यग्रहादेः सूर्यनिकटस्थत्वादर्शनंनभवतिचेन्नदास्तः॰ अतएवपूर्वंप्रागदृश्यदस्फकं॰ तस्य॰ ग्र
हादेः॰ अस्तंप्राप्तस्य॰ यदिसूर्यात्॰ दूरत्वतः॰ पूर्वापरांतरस्यबहुत्ववशात्॰ दृक्॰ दर्शनयोग्यत्वमुदयः स्यात्॰ तथा २५५

चाल्पगतिग्रहस्यसूर्यादल्पत्वेग्रहोदयानंतरंसूर्योदयसंभवादुन्नरोन्नरमधिकविप्रकर्षाद्रात्रिशेषेप्राच्यां
दर्शनसंभवः सूर्यास्तात्पूर्वमेवतस्तात्पश्चिमदिशिनदर्शनासंभवात्॰ सूर्यादधिकत्वेतुसूर्योदयानंतरंतदु
दयात्प्राग्यातदर्शनेपिसूर्यास्तानंतरंतदस्ताद्दुन्नरोन्नरंविप्रकर्षाभावात्पश्चिमदिशितदर्शनसंभवोरात्रिमु
खे॰ सूर्यादधिकगतिग्रहस्याल्पत्वेग्रहोदयानंतरंसूर्योदयाद्दुन्नरोन्नरंविप्रकर्षाभावात्पूर्वदिशिरात्रिशेषेतद
स्तसंभवः॰ ग्रहास्तोन्नरंसूर्यास्तात्पश्चिमदिशितदस्तासंभवात्॰ अधिकत्वेतुसूर्योदयानंतरंग्रहोदयात्पूर्व
दिशिदर्शनासंभवात्सूर्यास्तानंतरंग्रहास्ताद्दुन्नरोन्नरंविप्रकर्षात्किंचिद्रात्रिगतेदर्शनसंभवइत्यपपन्नमि
नादिस्यादि॥ ८॥ ॥उदयास्तोपयुक्तकालांशानयनाभाहदस्तंदवः शैलभुवश्चशक्राः रुद्राः खचंद्रास्तिथ
यः क्रमेण॰ चंद्रादितः काललवानिरुक्तान्नभुक्तयोर्वक्रगयोर्दिनाइति॰ पूर्वग्रंथप्रवर्त्तकैः सूक्ष्मत्वेनोक्तावु
धशुक्रयोः पूर्वोक्तः कालभागाश्चतुर्दशादशाहाभ्यामूनाः संतोवक्रगयोर्बुधशुक्रयोर्द्वादशाष्टौनिरुक्ताः॥ ७॥
॥ ॥कालांशास्वरूपमाह योगीश्वरश्चद्रसुखग्रहाणामस्तोदयारंभककालजाताः स्वदृग्ग्रहांतिरनादि

MEMORIAL

काश्चयास्ताः षड्गुणाः कालत्वानिरुक्ताइति·चंद्रदिनामस्तोदययोः॰अदर्शनदर्शनयोः॰प्रारंभककालजाताः प्रथ
मकालिकाः याः स्वदग्रहसूर्ययोरंतष्यस्ताः षड्गुणा योगीश्वरैः॰प्रतीष्टियष्टग्निः कालांशानिरुक्ताः॥१०॥ ॥
इसुक्रयोर्वक्रगयोर्दिहीनाइसन्नोपपत्तिमाहतसुक्रयोर्वक्रगयोर्महत्वाद्बिंबस्यसूर्योदयास्तकाले·प्रागुक्त
तोस्यांतरमेवयुक्तमतोद्दिहीनाः कथितालवास्तैरिति·बुधसुक्रयोर्वक्रगयोर्नीचासन्नत्वेबिंबस्यमंडलस्यमह
त्वात्·उदयास्तयोः दर्शनारंभादर्शनारंभयोः काले· सूर्याव· प्रागुक्तांतरतः॰अल्पांतरं· एवकारात्समांतरनिरा
सः· युक्तं·उचितं·एषुबिंबयोरल्पांतरेणादर्शनादर्शनयोः समुचितत्वात्·अतः कारणान्नेरंतीष्टियष्टग्भिर्योगी
श्वरैः प्रागुक्ताः कालांशाद्भ्यामूनाउक्ताः॥११॥ ॥अस्तोदययोर्ज्ञानार्थमभीष्टदिनीयाभीष्टकालसूर्यदृग्ग
होसाध्याविति भास्करोक्तमनुवदति·यत्रोदयोवास्तमयोतगम्यस्तदिग्नवोदग्धचरोरविश्च·॰अस्तोदयासन्न
दिनेकदाचित्साध्यस्तपश्चान्नरणिः सषड्इति·यत्र·यस्यां·पूर्वपश्चिमान्यतरदिशियस्यचंद्रादेः·उदयः·प्र
थमदर्शनं·॰अस्तमयः प्रथमादर्शनं·वा·ज्ञेयं·तद्दिवसंबंधीसदृग्ग्रहः॰अस्तोदयपोरासन्नदिवसे·सूर्यग्रह

योः कालांशामितभागांतरसंबद्धे·कदाचित्·पदाकदाचित्· ॰अभीष्टसमये·साध्यः सूर्यश्चसाध्यः·तुर्विशेष·
पश्चात्·पश्चिमदिवसंबंधे·सूर्यः सषड्वर्कत्वेनज्ञेयः·दृग्ग्रहस्यसषड्वत्वेनसिद्धेः॥१२॥ ॥॰प्रथष्टकालां
शानयनंतेभ्यउदयास्तयोर्गतेष्यत्वंचतत्कालज्ञानार्थंप्रसंगेलग्नेसाध्येइतिपद्याभ्यामाहस्वदृग्ग्रहार्को
तरजातनाड्योरसारुताः काललवास्फरिष्टाः·उक्तेभ्यउनाभ्यधिकायदिष्टाः खेटोदयागम्यगतस्तदास्या
त्॥१३॥ज्ञेयोग्रहास्तेविपरीतरीत्याप्यूर्वदृक्केवचरतोविलग्ने·प्रोक्तष्टकालोत्कलवस्तपश्चाद्दृक्केचच
रान्नैर्विपरीतलग्नेइति·स्वाभिमतोदृग्ग्रहः सूर्यश्च·॰अनयोः पूर्वोक्तरीत्यांतरालसंबंधिघटिकाः षड्गुणा
इष्टकालिकाः कालांशाः स्युः·उक्तकालांशाभ्य॰प्रागताः कालांशायदि·ऊनाधिकास्तदाग्रहोदयः क्रमेणाप्य
गतोभीष्टकालास्यात्·ग्रहास्तोग्रहोदयशीविपरीतत्वाज्ञेयः·उनाधिकक्रमेणागतेष्यत्स्यर्थः·इष्टकालां
शानामुक्तकालांशसमत्वेयहस्योदयास्तोवा·उदयसंबंधिनामिष्टकालांशानामूनाधिकत्वेग्रपूर्वंप्रोक्तसम
त्वावश्यंभावाक्रमेणाप्यगतत्वमुदयस्य·एवमस्तसंबंधिनामिष्टकालांशानामूनाधिकत्वेपूर्वमग्रप्रोक्तस

मत्वावश्यंभवाक्रमेणागतेष्यत्वमस्तस्येतिसुगमात्रोपपत्तिः॥ इष्टप्रोक्तकालांशयोरंतरस्यक्षेत्रांशासिद्ध्यर्थताभ्यांलग्नकार्यंहस्ताहक्प्रपइति॥ प्राग्दृग्गतहृतः प्रोक्तकालांशेरिष्टकालांशैश्च पूर्वोक्तप्रकारेणाक्रमलग्नसाध्ये॥ पूर्वसंबंधेनकालांशायोर्ग्रहदिनगतीयत्वात्॥ पश्चिमदृग्गतहृतात्॥ तैः प्रोक्तकालांशैश्च विलोमलग्नेसाध्यपश्चिमसंबंधेनकालांशायोर्ग्रहदिनशेषीयत्वात्॥१५॥ ॥पद्यत्रयेणोदयास्तकालज्ञानप्रकारमाह॥ प्रभिन्नदिग्जातविलग्नपार्थाविषोगलिप्ताविहृताः कलाभिः॥ ग्रहार्कयोर्भुक्तिवियोगजाभिर्वक्रानुभुक्तैपकयभवाभिराप्ताः॥१५॥ गतेष्यकाः स्फुटदिवसाग्रभीष्टकालाद्गतेष्यक्रमतोप्यसाध्यौ॥ दृक्क्षेत्रचरार्कावुदितप्रकारान्नाक्षालिकौवासरपूर्वमाभ्यां॥१६॥ पूर्वोक्तरीत्यागतगम्यरूपंद्वितीयकालादसकृच्च यावत्॥ प्रोक्तेष्टकालांशास्समानतास्यान्नावदसाध्यंस्फुटमंतिमंतदिति॥ अभिन्नयादिशाक्रमलग्नप्रकारेणाक्रमलग्नप्रकारेणवाजाते इतिस्वस्वपोक्तिः॥ येविलग्ने॥ तयोर्यांतरकलाः॥ ताः॥ ग्रहसूर्ययोर्गसांतरोत्पन्नाभिः कलाभिर्भक्ताः॥ गतांतरकलाभिरर्कदिनंतदालग्नांतरकलारूपकालांशांतरक्षेत्रकलाभिः कानीसमुपातः॥ अतएवग्रहस्यवक्रत्वेग्र

हसूर्ययोर्गसोयेगिकलाभिरर्कदिनंभवतोचक्रेग्रहेसतिगतियोगजाभिः कलाभिर्भक्ताः॥ प्राप्ताः दिवसाः सावयवाः प्रागुक्तगतेष्यक्रमात्॥ अभीष्टकालाद्गतेष्याः उदयस्यास्तवास्फः॥ अनंतरपूर्वोक्तप्रकारान्मध्यमयोः सूर्यग्रहयोश्चालनंदिनाद्यन॥ ततः स्फुटे॥ ततोग्रहस्ययथायोग्यमुदयलग्नमस्तलग्नंवाकार्यमेवंतात्कालिकोदग्ग्रहार्कासाध्यविस्पर्षः॥ आभ्यां॥ दृग्ग्रहार्कभ्यां॥ पूर्वोक्तरीत्यास्वदृग्ग्रहार्कांतरेस्पष्टया॥ गतेष्यरूपंदिनाद्यंसाध्यं॥ एवंद्वितीयकालादस्मादुक्तरीत्यातृतीयंदिनाद्यंसाध्यमेवं॥ पावेत्॥ प्रोक्तेष्टकालांशापोरभिन्नतास्यान्नावदसकृदिनाद्यंसाध्यं॥ अंतिमं॥ तत्॥ दिनाद्यं॥ स्फुटं॥ सूक्ष्मं॥ तेनावगतोदयास्तकालः सूक्ष्मइतिभावः॥१७॥ ॥ ॥विशेषंपद्याभ्यामाह॥ यदाकदाचिद्रविताधिकः स्यात्सादृग्ग्रहाद्वारसमान्वितार्कात्॥ न्यूनाभवेत्पश्चिमदृष्टिखेटस्तदेष्टकालात्स्थलवेस्तलग्नं॥१८॥ प्राक्पश्चिमादृग्ग्रहतोविलोमानुलोमतोपोन्नलवेर्यथोक्तं॥ ताभ्यांयथोक्तादिवसाः प्रसाध्यामुदृग्ग्रहास्तोदयजागतेष्याइति॥ यस्मिन्कस्मिन्नपिकालेसूर्यात्सादृग्ग्रहोधिकः स्यात्॥ पूर्वंपूर्वोदयास्तसंबंधिनोग्रहस्यन्यूनत्वान्नादृग्ग्रहस्यापिन्यूनत्वसंभवः॥ यदानुदृक्फलस्यधनत्वेकदाचित्सूर्याद्

ग्रहोऽधिकोऽपि संभवति · एवं पश्चिमोदयास्तसंबंधिनोग्रहस्य सूर्यात्पूर्वमधिकोक्तेर्दग्रहोऽप्यधिकः · दृक्फल
स्य बहुत्वे कदाचित्सूर्यादल्पोऽपि दृग्ग्रहः संभवति · अत्र सूर्यस्तु सप्तषड्सूर्यत्व · पूर्वोक्तः · वा · दिग्व्यवस्थार्थकः ·
अत्र भ्रमवारणार्थं रसभान्वितेति पुनरुक्तं · तदा प्रोक्तरीत्या यदृष्टकालांशास्तैः पूर्वदृग्ग्रहात्पश्चिमदृग्ग्रहदाक्षि
णोत्तरणाधनं लग्नं साध्यं · नतु क्रमणाधनं · तेषां पूर्वोक्तं · विशेषस्य सामान्यबाधकत्वात् · प्रोक्तकालांशैः प्रागुक्तं
धनं क्रमणात्लग्नं साध्यं · ताभ्यां · लग्नाभ्यां · यथोक्ताः · वियोगलिप्ताइत्याद्युक्ताः ग्रहास्तादयसंबंधिनोगतेष्या
यथायोग्यं · दिवसाः सावयवाः प्रसक्तसूक्ष्माः साध्याः ॥१७॥ ॥विशेषपक्षेऽपि विशेषांतरमाह अत्रापि पक्षे
वगतेष्टकालांशाकाः स्वकालांशामितेर्भवंति · यदा विकास्तत्र दिनादिकस्य गतेष्यतोक्तोक्तविलोमरीत्येति · वि
शेषस्थले · ज्ञातायदृष्टकालांशास्तु · स्वप्रोक्तकालांशामानाद्यदाधिकाः स्फुटास्तत्र · तस्मिन्काले तदेत्यर्थः · प्राग
तदिनादिकस्य · उक्तविलोमरीत्या · उक्तगतेष्यतात्क्रमाद्विपरीतक्रमेणेत्यर्थः · गतेष्यता · प्रोक्ता · न्यूनत्वे यथोक्त
मेव गतेष्यत्वमित्यर्थसिद्धं ॥२०॥ ॥अस्य विशेषस्य भास्कराक्तत्वेऽपि सिद्धांतसुंदरकृदपेक्षया मंदज्ञाताप्रामा २५८

णमपरिहरति · सिद्धांतसुंदरकृतः प्रथमं विशेषमुक्त्वा भास्करकृतं तु विशेषमेनं · संतत्यजुः स्वतदबोधवशा
न्नतत्वादेवं निरूपितमिदं सुधियामरीचाविति · प्रथमं विशेषं · यदा कदाचिदित्याद्युक्तं · प्राग्यदा समधिकः ।
खलु दृष्टिस्फुटः स्वल्पोऽपि बावरुणादिकवचरः स्वरांशाः · उक्तेष्टकाललवयोगमितैरित्यादिना ज्ञानराजदैवज्ञाउ
क्तानंतरं · एनं · अत्रापि पक्षे इत्याद्यात्मकं विशेषांतरं · भास्कराचार्यकल्पितं · तथा यदृष्टकालांशाः प्रोक्तेभ्यो भ्य
धिकास्तदा · अस्य यथा गतेष्यत्वे ज्ञेयाः सुधियाखल्विति सिद्धांतशिरोमणौ तदुक्तेः · एतेन प्रथमविशेषो भास्कर
कल्पितो नेति सूचितं · स्वतदबोधवशात् · स्वस्य तद्विशेषाज्ञानात् संतत्यजुः · सक्तवंतो नुक्तवंत इत्यर्थः · तत्वात् · त
त्त्वज्ञानात् · अर्थायं विशेष इति ज्ञानात् · नानुक्तवंतोऽपि अर्थत्वप्रदर्शनापत्तेः · एवमुक्तप्रकारेण · इदं · भास्करो
क्तविशेषप्रामाण्यं · मरीचौ · सुधियां · तत्वबुद्ध्या · निरूपितं · सुधियेति पदेनोक्तमुपपत्तिसिद्धत्वादिति भावः
॥२१॥ ॥संगतार्थप्रतिज्ञानीते · अत्रोपपत्तिरिति · अत्र · उदयास्तयोर्गतेष्यदिवसानयने इत्यर्थः ॥ ॥पथा
भ्यां प्रतिज्ञातामुपपत्तिमाह स्वदृग्ग्रहार्कांतरजातनभ्यः खेटक्षयातेष्यभवाः स्वकाले · नसावनाबाभभवाय

तोऽत्रतात्कालिकार्कोनविलग्नतुल्यः॥२२॥सूर्योदयास्तनचताभवंतितात्कालिकार्कोऽत्रनलग्नतुल्यः॰ अतोऽत्रता
धिप्रभवानिरुक्ताः स्युस्तामुहुः सूक्ष्ममतः प्रसिद्धेरिति॰ तात्कालिकाभ्यांदृग्ग्रहार्काभ्यांमंतरासत्राघघोग्रह
स्यपूर्वापरसंबंधक्रमेणादिनसंबद्धाः गतेष्यसंबंधिनः॰ पूर्वंनिर्णीताः॰ स्वाभीष्टकालो॰ सावनानाक्षत्रावान
भवंति॰ हेतुमाहयतइति॰ अत्राभीष्टकाले॰ तात्कालिकसूर्यस्तात्कालिकलग्नतुल्यान॰ सूर्योदयकालिकसूर्यस्य
सूर्योदयकालिकलग्नसमत्ववदभीष्टकालिकसूर्यस्यतात्कालिकलग्नत्वाभावादभीष्टकालेसावनानभवंतन
एवाभीष्टकालेनाक्षत्राअपिनभवंति॰ दृग्ग्रहस्यस्वोदयास्तकालिकत्वाभावाच्चेतिभावः॰ ननुसूर्यतुल्यलग्नग्रह
णात्सूर्योदयास्तान्यतरकालिकाघघइसतआहसूर्योदयास्तइति॰ ताः॰ तात्कालिकदृग्ग्रहार्काभ्यांसाधिताः घघः
सूर्योदयास्तान्यतरकालेसावनानाक्षत्रावानभवंति॰ चेः समुच्चये॰ दृस्यात्॰ नहितात्कालिकः सूर्यः सूर्योदया
स्तकालिकः सूर्योभवितुमर्हति॰ सूर्योदयास्तकालिकलग्नस्याग्रहात्तदृग्ग्रहाद्ग्रहाच्चनसावनाः सूर्योदयास्तका
ले॰ ग्रहोदयास्तकालिकदृग्ग्रहाग्रहादुक्तदोषाच्चनसूर्योदयास्तनाक्षत्राइतिभावः॰ अतः कारणात्॰ ताः॰ स्वा

२५९

भीष्टकालिकसूर्यदृग्ग्रहाभ्यांसाधिताघघोऽत्रसूर्योदयास्तान्यतरकाले॰ सूर्यतुल्यलग्नग्रहान्नाक्षत्राउक्ताः॰ प
रंतुसूर्योदयास्तकालिकसूर्यग्रहोदयास्तकालिकदृग्ग्रहाभ्यामसाधनात्स्युस्ताः॰ अतः कारणात्॰ नाक्षत्रघटि
नांस्युस्तात्॰ मुहुरसकृत्सूक्ष्मदिनौघंप्रसिद्धेत्॰ यावद्रविरोषरूपकालांशासाम्येकालांशास्वरूपस्यसूर्योदया
स्तसंबंधनग्रहस्यदिनगतशेषरूपस्यैवसिद्धेस्तथाकालांशासमतानुपपत्तेरितिभावः॥२३॥ ॥अथोक्त
स्वरूपसिद्धौतथाप्रतीतिभावादसकृदुपपत्तिप्रकारांतरेणाबहुप्रथमतोऽसकृत्क्रियानिरासंशंकते॰ सूर्योदया
स्तरविरेवसाध्यः स्वदृग्ग्रहः स्वोदयकालकाले॰ तदंतरोत्थघटिकाः सकृत्स्युः सूक्ष्माभजास्तालवसाधनार्थमिति॰
सूर्योदयास्तान्यतराभीष्टकालेसूर्यसघट्टसूर्यान्यतरः स्वाभीष्टः साध्यः॰ एवकारात्सूर्योदयास्तकालिकोदृग्ग्रहोन
साध्यः॰ सकृत्साध्यइसतआहस्वदृग्ग्रहइति॰ ग्रहोदयास्तान्यतरस्वाभीष्टकालेऽवस्वाभीष्टोदृग्ग्रहः साध्यः॰ त
योर्मध्योत्पन्नाघटिकाः सकृत्प्रथममेव॰ सूक्ष्मानाक्षत्राः स्युः॰ उक्तानुपपत्तेभावात्॰ ताः सूक्ष्माः घटिकाइष्टकालां
शानयनार्थंसमुचिताइतिशेषः॥२४॥ ॥उक्तांशांकानिराकृत्यांशांकांतरमनूद्यतन्निरासाक्तासकृत्क्रियांस

मर्थयन्नपेक्षाह इतिचेन्न तथाग्नि चोक्तरीत्यादिवसाधकुतइत्यनिश्चयात्॥ अथवासनयार्वजोदयास्तादितिचेत्सत्य
मिदं दिनादिकं तु॥२५॥ स्थूलसिद्धेस्यष्टगत्योः सदैवमेकात्मत्वाभावतोतासकृच्च॥ युक्तं तेभ्यपि द्वितीयाक्षनाड्यः स्थू
लाएवातोसकृद्युक्तियुक्तमिति॥ इतिपूर्वोक्तं चेदाक्षिपसितर्हितथ्यक्तं न॥ अत्रहेतुमाहतथापीति॥ यत्रोदयास्तमयो
वगम्यइत्यत्रसूर्यग्रहयोरभिन्नकालिकत्वप्रतीतेर्दूषणांतरानपेक्षायामप्यभ्यपेतदूषणांतरमस्तीतिभावः॥
आनयनप्रकारेणायद्दिनाद्यसिद्धेतत्कुतः कस्मादवधेरागतमित्यस्यकालद्वयोक्तासंदिग्धत्वात्॥ नियामकं विना
निर्णानुमत्वाभावात्वाच्च॥ एकावधिमात्रांकते॥ अपीति॥ कालांत्रायोः सूर्योदयास्तकालिकत्वस्यपूर्वं निर्णीतत्वान्नदुपप
त्तासूर्यविषयकोदयास्तान्यतरादभिमतादागतं दिनाद्यंगणप॥ एवं चेद्दृश्यसि॥ तर्हि तत्रयतिः ससमिति॥ अवधेरं
गीकारेपिसकृदुक्तिर्नघटतइत्यर्द्धांगीकारइतिभावः॥ तदाहइदमिति॥ उक्तरीत्यागतं दिनाद्यनुकालांत्रायोः सूक्ष्म
त्वेपिस्थूलसिद्धेः हेतुमाहस्यष्टगत्योरिति॥ सूर्यग्रहयोः स्यष्टगत्योः सदांतरकाले॥ एवं॥ कालांत्रायोः क्षेत्रांशां
तरेणैकस्वरूपत्वाभावात्॥ अयंभावः॥ लग्नयोरंतरांशानांग्रहचारानुसमातद्योगांतरप्रमाणानुपातेन दिना

नयनमनुचितं॥ ग्रहचारसंबंधांगीकारेपितन्मध्येस्यष्टगत्योर्मध्यगतिवदेकस्वरूपासंभवेननियतैकानुगतविषया
नुपाताप्रवृत्तिरिति॥ अतः॥ हगदंगीकृतानुपातेन दिनादेः स्थूलत्वसिद्धेः सूक्ष्मत्वार्थमसकृत्साधनमपिसमुचितमि
त्यर्थः॥ ननुपूर्वोक्तासकृदुपपत्तिर्नसिद्धेत्यत्राहतेनेति॥ द्वितीयोपपत्तिसिद्धासकृत्प्रकारेण॥ अपिशब्दात्प्रथमप्र
कारप्रथमानीताः कालघटिकाः स्थूलाः द्वितीयाः कालघट्यः स्थूलाः सूर्योदयास्तकालिकत्वाभावात्॥ एवंकारात्सू
क्ष्माभ्यः प्रथमाभ्यो द्वितीयाः सूक्ष्मानसिद्धाइत्यर्थः॥ अतः कारणात्सूर्वयुक्तेवासकृत्कर्मयुक्तियुक्तमुपपन्नं॥२६॥
॥ ॥विशेषस्योपपत्तिमाहविशेषतुरोषतनाड्योग्रहस्यरजन्यामिनास्तोदयेस्फर्यतोतः॥ कृतलग्नमुक्ताद्दिलोमं
सुधीभिः स्वबुद्ध्यावधेयावशेषोपपत्तिरिति॥ यदाकदाचिद्रवितोधिकः स्यात्सागग्रहइत्यादिश्लोकद्वयोक्तविशेषतु
ग्रहस्यरात्रौक्रमेणपूर्वपश्चिमदिक्संबंधेनशेषागताश्चकालनाड्यः॥ अस्तोदयइतिशेषानुरोधादुक्तस्यक्रमोनकिं
तुपथायोगमन्वयोबोध्यः॥ सूर्योदयास्तपूर्वोक्तरीत्यायतः स्थः॥ प्रोक्तकालघट्यस्तेदिक्क्रमेणसूर्योदयास्तग्रहदिन
गतशेषात्मिकाः॥ अतः कारणान्नदुक्तकालांत्रायोर्वैजात्यादंतरांशानांयोगः॥ तस्यांत्रांशाः साध्याः॥ अतएवप्राग्द

मतरश्चेदधिकोरवेः स्यादूनोथवापश्चिमदग्गतश्च · प्रोक्तैष्टकालांशयुतेः कलाभिः साध्यास्तदानीं दिवसागतेष्टा इति
भास्करोक्तं · मत्रलग्नयोरंतरेणैवतादृशकालांशायोगक्षत्रांशासिद्ध्यर्थं राशिशेषगतसंबंधेनकालांशैर्विपरीतक्र
मलग्नक्रमेणोचित · प्रोक्तकालांशास्तत्क्रमेणक्रमविपरीतलग्नेप्रागुक्तेउचित · तयोरंतरांशाः कालांशायोगक्षत्रा
शा इति · उक्तान · उक्तात् · विपरीतलग्नकृतं · नन्वेतद्विशेषांतर्गतस्यविशेषांतरस्यगतेष्यतोक्तोक्तविलोमशीत्यस
स्योपपत्तिर्नोक्तेस्यतत्प्राहसुधीभिरिति · सुबुद्धिभिर्गोलगणितत्वज्ञैः · प्रवशेषस्य · विशेषांतरस्योपपत्तिः स्वबु
द्ध्याज्ञेया · तथाहि · दिनगतशेषात्मकेभ्यः प्रोक्तकालांशेभ्योरात्रिशेषगतात्मकाइष्टकालांशाः अधिकाऊनावाभवं
ति · तदोदयास्तयोः क्रमेणाभविष्यगतत्वं · इष्टकालिकपूर्वपश्चिमदृग्गतयोः क्रमेणसूर्यसंषड्भसूर्याभ्यामधिकऊन
त्वेनोदयास्तान्यतरकालेपूर्वापरक्रमेणऊनाधिकत्वावश्यंभावात् · परंतुपूर्वोक्तगतगम्यशीत्याधिकपक्षेउदया
स्तयोः क्रमेणागतगम्यत्वमुपपत्तिविरुद्धमतोधिकत्वेउक्तरीतेर्वैपरीत्यमुक्तं · पूर्वविशेषस्यपलभाधिक्यवशे
नोदयास्तमध्येतरासन्नदिनेकदाचित्संभवः · एतत्संभवेउदयास्तासन्नदिनेषुविशेषांतरस्यापिसंभवइत्यनयोर

MEMORIAL

प्रसिद्धिर्नोरांतरा ॥ २० ॥ ॥ अथप्रसंगान्नक्षत्राणामुदयास्तौवक्तुकालांशानिवक्षुः प्रथममेषांकालांशानाहअ
गस्त्यलुब्धकब्रह्महृदयाभिजिदिंदुभे · चित्रादित्यानितस्त्वेचकालांशाविश्वसंमिताइति · स्पष्टार्थं ॥ ॥ अन्येषामेषा
मारभगार्यमाश्विनीद्वित्रामघाधातृभवासवे · हस्तश्रवणयोर्भागाः त्र्यंशाः स्युः सूर्यसंमताइति · पूर्वाफाल्गुनी · उत्त
राफाल्गुनी · द्वित्रांविशाखा · वासवं · धनिष्ठा · सूर्यसंमतात्मनेनग्रहनक्षत्रकालांशामानेसूर्यसिद्धांतः प्रमाणं ॥ २०
॥ ॥ अन्येषामेषामाहअश्विरुद्राहिमित्रांबुवैश्वदेवतमूलभे · तिष्येशाः स्युः पुष्यमृगपमभानांनुमूर्छनाइति · मि
त्रमनुराधा · वैश्वदेवतमूलराधाशः पंचदशकालांशाः · पुष्यमृगनीर्षभरणीनक्षत्राणामेकविंशतिकालांशाः
॥ ३० ॥ ॥ शेषनक्षत्राणांकालांशानन्वदन्नक्षत्राणामुदयास्तार्कावस्तोदयदिशौचपद्माभ्यामाहशेषभानांघनाः
कालभागास्तैः स्वोदयांगतः लग्नंस्वोदयभानुः स्यात्स्वास्तलग्नाद्विलोमतः ॥ ३१ ॥ लग्नंसषड्भमस्तार्कः स्यादये
षांनुतोक्रमात् · पूर्वापरदिशोर्गतिभावात्सप्तमुनेस्तथेति · शेषनक्षत्राणांसप्तदशकालांशाः · तेः · स्वस्वकालांशैः ·
प्रागुक्तविधिनासाधितंस्वोदयलग्नंतस्मात् · साधितंक्रमलग्नंतस्यनक्षत्रस्योदयार्कः स्यात् · प्रागुक्तविधिना

साधितंस्वास्तलग्नं तस्मात्कांशैर्विपरीतप्रकारेणलग्नं षड्राशियुक्तं तस्यनक्षत्रस्यास्तार्कः स्यात् अनंतरं एषांन
क्षत्राणां गतप्रभावात् स्वतोगतप्रभावात् सप्तमुनेः सप्तर्षीणामित्यर्थः जातप्रभावाणां वचनं तथा गतप्रभावा
सन्नंशैकविकलारूपप्रसहगतेरभावकल्पत्वात् गतस्वल्पत्वादित्यर्थः तावुदयास्तौ सूर्यसांनिध्यात्सन्नौ पूर्वापर
दिशोः क्रमात्तः युक्तंचैतत् पूर्वनिरूपणात्कालांशोः स्वोदयलग्नास्तलग्नप्राच्यादिनगतत्वाक्रामिकमुदयसंबंधीन
क्षत्रभवः एवं पश्चिमदिशिदिनेशषत्वादिपरीतंलग्नंनक्षत्रास्तकालिकास्तलग्नादस्तसंबंधीनक्षत्रभवः पूर्वम
स्तकालिकास्तलग्नात्तुक्रेरस्तकालिकोदयलग्नंक्रमश्चस्वास्तोदयलग्नादिपरीतंलग्नंषड्रांतरितनक्षत्रास्तभवइत्य
र्थः षड्राशियुक्तोभवः अनयोर्भवयोः सूर्यभागसमत्वेनोदयास्तव्यंजकत्वात्सूर्यसंज्ञत्वमुक्तं ॥३२॥ ॥उदयास्तार्क
योः स्वरूपपूर्वकमुदयास्तकालज्ञानमाह स्याद्दुःखमोनिजतिजोदयभानुतुल्यसूर्यस्तभास्करसमस्तमयश्चभानां अ
त्राधिकोनकस्तिकारविभुक्तिभक्तायातैष्यवासरमितिर्ग्रहवन्मुनीनामिति नक्षत्राणांस्वोदयसूर्यसमेसूर्ये तत्
कालेउदयः स्यात् अस्तार्कतुल्यर्के तत्कालेस्तमयः स्यात् मयपदेनभवहवशास्तनिवारणंस्फुटं न्यूनाधिकत्वेदि २६२

नाद्यानयनमाह अत्रेति अत्रसूर्ये उदयार्कादस्तार्काद्य यथायोग्यमधिकाद्युनायाः कलास्तारविगतसाभक्ताः गतैष्य
दिनादिमानंक्रमणाभवति मुनीनां सप्तर्षीणां ग्रहवत् सप्तर्षिगतसूर्यगतप्रभक्ताइतिफलितं अत्रेदमवधेयं
आगतयातैष्यदिनेमध्यमसूर्यप्रचालस्फुटंकृत्वास्पष्टगतिंचमसाध्यपूर्वरीत्यादिनाद्यमेवमसकृद्यावत्साधित
स्पष्टसूर्योदयास्तान्यतरार्केणस्वाभीष्टेनसमइति तत्सूर्यकालः सूक्ष्मउदयास्तकालः सप्तर्षीणांग्रहवरभयारी
त्यादयास्तोसूक्ष्मोसाध्यावसकृत् ॥३३॥ ॥अत्रविशेषमाह यस्योदयार्कादधिकोस्तभानुः पलप्रभासाम्यशरातिरे
ष्यात् स्यात्तस्यभस्यार्कवशान्नवास्तोयक्षोत्तरयाम्यवशानुयाम्यइति पलभोत्तरशरयोरतिमहत्त्वाद्दुःखरीसाय
स्यनक्षत्रस्योदयार्कादस्तसूर्याधिकः स्यात्तस्यनक्षत्रस्य अवशात् सूर्यसांनिध्यादस्तानेवस्यादस्तासंभवइस
र्थः इदमुक्तंनिरक्षादुत्तरभागे दक्षिणभागेप्याह याम्यवशादिति निरक्षादक्षिणभागे पलजादक्षिणशरयोरति
महत्त्वाद्यस्यनक्षत्रस्योदयार्कादस्तार्काधिकस्तस्यनक्षत्रस्यार्कसंनिधिवशादस्तासंभवइत्यर्थः ॥३४॥ ॥अत्रो
पपत्तिमाह सूर्यांशुलुप्तास्तमयनुभानांगतेरभावाद्रविरेवहेतुः अतस्तदस्तोदयसूर्ययोः स्यान्न्यूनाधिकत्वं

कृष्णमन्यथातावित्ति·नक्षत्राणांसूर्यकिरणालुप्तमंडलत्वेनास्तमयेनिजगम्यभावात्सूर्यएवकारणंननक्ष
त्रे·अतः·यतोनक्षत्रस्यस्थिरत्वेनसूर्यचारणावास्तोदयोभवतइसर्थः·नक्षत्रास्तोदयार्कयोः क्रमेणाधि
कत्वं·अस्तोत्तरमुदयनियमात्·अन्यथा·नक्षत्रास्तोदयार्कयोः क्रमेणाधिकन्यूनत्वे·तावस्तोदयो·कर्पस्तः त
थाचास्तोदयार्कावेवमभिचरितावुदयास्तासंभवेनतदर्कयोरप्रसिद्धेः·गणितेनपारिभाषिकतत्सिद्धेरुपयो
गाभावाच्चेतिभावः॥२५५ ॥अधिकारमुपसंहरति·इतिसिद्धांततत्वार्थमुनीश्वरकृतेभवत·सिद्धांतसार्वभौ
मेयंग्रहभास्तोदयागमइति·ग्रहनक्षत्राणामस्तोदयस्तानाधिकारइसर्थः·यद्यपिवक्ष्यमाणान्यत्राधिका
रासमाप्तेरतस्यमनुवितंतथापिप्राचीनानुसारेणशिष्यजनमनः प्रसादार्थं विश्रामोक्तिसंसूचकमेतत्स
यमितिध्येयं॥१॥ ॥श्रीः॥ ॥अथग्रहयोगंसप्रयोजनंप्रतिजानीते· अथप्रवक्ष्येराशिपूर्वकाणांदि
वौकसांखेचरधिष्ण्यपोश्च·योगंस्वभेदैः सहितंजनानांशुभाशुभादेशनिमित्तहेतुमिति·अनंतरं·चंद्रादीनां
सूर्यभिन्नानांग्रहाणांपरस्परंयोगं·चंद्रादिसूर्यभिन्नग्रहनक्षत्रताराबिंबयोः·चः समुच्चये·योगं·निजभे

२६३

दैर्वक्ष्यमाणैः सहितंजनानांशुभाशुभफलादेशयोर्निमित्तकारणीभूतंसूक्ष्मत्वेनाहंवक्ष्ये·सूर्यकृतयोगेना
स्तोदयोप्रागेवोक्तो·तथाचफलादेशार्थंग्रहान्नसाध्यपरीक्ष्यचयोगकथनमावश्यकमितिभावः॥१॥
॥ ॥चतुर्भिः पद्यैर्युतिकालज्ञानप्रकारमाहसूर्यभिन्नखचरोयुतियोग्याविष्टकालजनितोगदितोत्तया·
साधितोस्फुटतराबनयोर्यांतरालकलिकाविहृतास्ताः॥२॥ ॥स्पष्टस्वगत्योः कलिकांतरणाभागस्प
योर्वक्रगयोश्चकार्याः वक्रीयदेकागतियोगभक्तास्तदाफलंद्वेदिवसैर्युतिःस्यात्॥३॥ मार्गस्थयोरल्पगतोवि
हीनेमार्गग्रहाद्वक्रगतोवहीने·मदागतास्याद्धिकेतुगम्यावक्रस्थयोर्व्यस्तमतः स्वकालात्॥४॥ तद्योग
कालेखचरोस्फुटातोताभ्यांपुरावृद्धिवसादिसाध्यं·मुहुर्मुहुर्यावदिमौसमौस्तस्तत्कालराबग्रहसंयुतिःस्यादि
ति· सूर्यातिरिक्तोदयहोयुतस्पर्ययोग्यो·पयोर्युतिः संभाविताविस्पर्यः·इष्टकालजनितो·इष्टकालिकाबि
स्पर्यः·पूर्वोक्तग्रहानयनरीत्या·स्फुटतरोयोक्तो·रानंतरदक्संस्कारोनिरस्तः·अनयोर्ग्रहयोर्यांतरकलास्ताः
मार्गस्थयोर्वक्रगयोश्चयोर्वार्थे·ग्रहयोर्गत्योः कलयोरंतरणभक्ताः कार्याः·विशेषमाहवक्रीति·यदेकस्त

रेकतरः स्त्रीभवति·तदागतिकलायोगेनभक्ताः कार्याः··प्राग्वं·भागहारविधिना प्राग्वयस्फलं तन्मितैः सा
वपवर्दिनैर्द्वयोर्युतिः स्यात्·सर्वमग्रवत्पतग्राहमार्गस्थयोरिति·मार्गगतिग्रहयोर्मध्येल्पगतिग्रहस्वे
तरादल्पे सति·यार्गग्रहादृक्रगतिग्रहे ल्पे सति·चोवार्थे·तदोभयत्र· स्वकालात्· साधितग्रहसंबंधिका
लादाप्तदिनाद्यनगतायुतिः स्यात्·प्रागुक्ताद्दृक्तात्प्रागुक्तग्रहेधिके सत्येष्यायुतिः वक्रयोर्द्वयोर्मध्येल्पगति
ग्रहस्यन्यूनाधिकत्वक्रमेण·उक्तं·गतगम्यत्वं·विपरीतं·गम्यागतायुतिर्ज्ञेया··अतोनंतरं·तस्मिन्योगकाले·तो·
युतिविषयकोग्रहोग्रवरीस्यास्फुटा· ताभ्यां·ग्रहाभ्यां·पुरावत्·अनयोर्योइत्यादिपूर्वोक्तविधिना·दिनाद्यंसाध्य
मेवंमुहुर्मुहुः··असकृत्·यावत्·इमौ·युतिविषयकोग्रहौतुल्यौस्तः·समग्रहाभ्ययीभूतेकाले·एवकारात्पूर्वो
गतयुतिकालनिरासः··द्वयोर्ग्रहयोर्योगः स्यात्·वासनातुवक्रगयोर्मार्गगयोर्वा गसंतरणकंदिनं·एकतरवक्रे
गतिपागतुल्यनांतरणकंदिनं··अतस्तदनुपातादंतरदिवसायुतिज्ञानार्थं·मार्गगयोरल्पगतेर्न्यूनत्वेग्रयो
गासंभवेन·मार्गग्र[illegible]हादृक्रस्यन्यूनत्वेप्यग्रयोगासंभवेनोभयत्रगतेवाधिकत्वेत्वेष्या·

२६४

शीघ्रस्यपश्चात्स्थत्वेनाग्रे योगोस्त्रेः·वक्रयोर्मध्येल्पगतिग्रहस्यन्यूनत्वेइतरग्रहस्यवक्रत्वादुन्नरोन्नरमधि
कपश्चाद्गमनेनाग्रेयुतिः··अधिकत्वेनुतस्यागमनात्पश्चात्स्थस्याधिकगमनादग्रयोगासंभवाद्गतेव·स्पष्टगते
रेकरूपत्वाभावेनानुपातस्यस्थूलत्वात्सूक्ष्मार्थंपूर्वरीत्या मुहुर्युतिदिनानयनंसुक्रमेव॥५॥ ॥ननुग्रहबिंब
योर्योगाभावदर्शनात्कथंयोगइत्यतआहएवंयुतिः पूर्वपरांतरस्याभावाद्दृक्तग्रहबिंबयोः स्यात्·दुर्ध्वाधरा
वस्थितयोः कदंबसूत्रांतरेणार्थमतामतामेइति·एवं·पूर्वोक्तयुतिसमये·दुर्ध्वाधरकक्षास्थितयोर्ग्रहबिंबयो
रेकत्रावस्थानस्यकल्पावश्यसंभवेनयोगासंभवेपिक्रांतिवृत्तेपूर्वापरांतरस्य·ग्रहभोगांतररूपस्याभावात्·
ग्रहयोर्भोगाभेदादित्यर्थः·कदंबसूत्रे·क्रांतिवृत्तयाम्योत्तररूपेणांतरतुल्यांतरद्वयोः प्रत्यक्षेसत्यपि·प्रायेण
णांगीकृतायुतिः मे·मम·मता·संमता·अन्यथाफलादृग्गोग्रहयोगफलकथनस्यव्यर्थत्वापत्तेरित्यर्थः॥
६॥ ॥युतिकालांतरमाहतात्कालिकोसायनदृक्फलेनसुसंस्कृतोतद्ग्रहयोर्वियोगः··ततः पुरावद्दिवसाद्युद्ध्व·
यावत्समोदृक्फलसंस्कृतोस्तइति·युतिकालिकोस्फुटोसमोनिजायंदृक्फलेनसुसंस्कृतोकार्यो·तयोस्तादृग्

योर्ग्रहयोरंतरं ततोऽतरात् पुरावत् अनयोर्यादृसादिनादिवसामुहूर्त्तः समुच्चये यावत् दृक्फलसंस्कृतावुक्त
रीत्यासमोस्तः तत्कालोपियुतिकालइत्यर्थः यद्यपि दृक्फलसंस्कृतयोरंतरादिवसानयनंगतिसंबंधनायुक्तं दृ
क्फलस्यगतिसंबंधेनानुसन्नः शास्त्रेननदुसन्नेश्च तथापिमुहूः साधनेतस्फूलत्वस्यापगमाद्दृग्ग्रहासमत्वानु
सन्नेर्नक्षतिः ॥७॥ ॥इयंयुतिः केनापिनोक्तसतोस्याः प्रसिद्धिं दर्शयन्निरासंवाहरावयुतिः पूर्वपरांतरस्याभा
वाद्रवेद्रास्करसमतात्र ध्रुवाख्यसूत्रेंतरदर्शनेपिनसाभवेत्तध्रुवयोरयोगादिति एवं द्वितीयप्रकारेणावगा
तसमये अत्र क्रांतिवृत्तेपूर्वापरांतरस्याभावात् प्रायनदृक्फलसंस्कृतग्रहभोगयोरभेदादित्यर्थः विषुव
वृत्तयाम्योत्तररूपध्रुवाख्यसूत्रेद्वयोर्ग्रहबिंबयोरंतरदर्शनेसत्यपियुतिर्भास्कराचार्यैरंगीकृता भवत् तथाचसि
द्धांतशिरोमणौ दिवाकसोरंतरलिप्तिकोपाद्दृग्योर्वियोगनहताघदेकः वक्रीतदेवनदिनेरवाप्तपर्यातयोः
संयुतिरत्यभुक्तौ वक्रेथवास्यूनतरेन्यथैष्याद्द्वयोरनज्वोर्विपरीतमस्मात् दृक्कर्मकृत्वायनमत्रभूयः साध्येनिता
स्तालिकयोर्युतिर्यत् एवंकृतेदिविचरौध्रुवसूत्रसंस्थौस्यातांतदाविषतिसेवयुतिर्निरुक्ता दृक्कर्मणायनभवे २६५

ननसंस्कृतौचेत्सूत्रेतदात्वपमग्रहजयाम्यसौम्येइति रानांनिरस्यति नेति सेयमुक्तायुतिर्नयुक्तेत्यर्थः हेतुमाह
भवृत्तध्रुवयोरिति क्रांतिवृत्तध्रुवतारयोः संबंधस्यानौचित्यात् नहिविषुवद्वृत्तग्रहभोगायनद्वयोर्ध्रुवसूत्राव
स्थानायोगः समुचितः अतएवग्रहतारयोः कदंबसूत्रावस्थानेनकेवलदृक्सिद्धांतरांतरदर्शनप्रतीतेः कदंब
तारयोरभावाद्भावेपिसंबंध स्याचितत्वादर्थांगीकृतायुतिः समंजसा ॥८॥ ॥पद्माभ्यांग्रहनक्षत्रबिंबयुति
माहग्रहभध्रुवयोर्वियोगलिप्ताग्रहभुक्तावहताः फलाहमिप्ता गतगम्ययुतिस्तयोर्ग्रहस्याधिकोनेनजुगतु
गम्ययाता ॥९॥ तात्कालिकस्पष्टग्रहेनसाध्यायुतिर्मुहूर्यावदसौध्रुवास्यात् श्रीभास्करस्यापिमतेयनारब्धदृक्कर्म
संस्कारखगध्रुवाभ्यामिति महाभीष्टकालिकः नक्षत्रध्रुवोग्रहछायाधिकारोक्तायुतियोग्यः नक्षत्रगस्भावाद्
ग्रहगतिरेवप्रमाणं फलदिनसंख्यायाः तयोर्ग्रहनक्षत्रबिंबयोरभीष्टकालात् गतेष्ययुतिर्ग्रहेधिकोनेध्रुवास्तति
क्रमेणास्यात् विशेषमाहअनजुगेइति वक्रग्रहेधिकोनेसतिक्रमेणागम्ययातायुतिः युतिकालिकस्पष्टग्रह
णामुहूरुक्तरीत्यायुतिः साध्या यावदसौयुतिरचलास्यात् श्रीभास्कराचार्यस्यमते अपिशब्दान्मुहूर्युतिः अथनास्ये

दक्कर्मसंस्कारोपयोरेनादृश्यायोर्ग्रहनक्षत्रध्रुवयोस्ताभ्यां सकाशात्साध्येसर्थः॥१०॥ ॥पंचभिः पद्यैर्ग्रहलग्नगुप्तम
तमनूद्यनिराकरोति॥आर्यागीतिकृतखचरेक्षसमयलग्नंप्रसाध्यंतत्पाप्राग्ग्रामचरांतयोर्दिनगतेयस्यालिका
हर्मितिः तस्याहर्गतमन्यखेचरदिनग्रंस्वाहभक्तंफलंन्यूनानल्पमितान्यवासरगतादृष्यागतातद्यतिः॥१९तद
तरंचेष्यगतांकितंस्यादाद्यांपूर्वग्रहयोगकालात्॥फलेष्टनाडीभिरितेष्ययोगवशाध्यांखचरोस्फुटोतो॥१२प
र्वोक्तरीत्याघइहान्यसंज्ञस्ताभ्यांगतेष्यांकितउक्तरीत्या॥प्राग्यान्ययोरर्कविभिन्नजातौविंयोगयोगौक्रमशोविध
यौ॥१३॥प्राग्यातृताः पूर्वफलेष्टघट्यांतरेणयोगानहृताः क्रमेण॥प्राक्संयुतेराद्यवशाद्यतिः स्यात्पूर्वंचपश्चात्फल
नाडिकाभिः॥१४॥एवंमुहूर्यावदभावमासोपरोभवेज्जिष्णुजसंमतासा॥याम्योत्तरस्वक्षितिजेक्षसूत्रदृष्टाप्यनेक
त्ववशादयुक्तेति॥आर्याभिमतग्रहयोगकालेलग्नंसाध्यं॥तथा॥समुच्चये॥पूर्वग्रहोतात्कालिकोसाध्यो॥तयोर्ग्र
हयोर्दिनगतेसाध्ये॥दिनमानेचसाध्ये॥ततस्तयोर्मध्ये॥यस्यग्रहस्यदिनमानमल्पंतस्यग्रहस्यदिनगतमितर
ग्रहस्यदिनमानेनगुणितं॥निजदिनमानेनभक्तं॥अल्पदिनमानेनतत्संबंधिदिनगतंतदामहद्दिनमानसंबंधे

डॉक्टर भाऊ दाजी लाड म्युझियम
DR. BHAU DAJI MEMORIAL

नकिमित्यनुपातात्॥फलमितरग्रहस्यदिनगतं॥एतत्पूर्वसाधितग्रहदिनगततुल्यंतर्हितत्समयेग्रहद्युतिः॥क्षि
तिजयाम्योत्तरवृत्तसंपातद्वयप्रोतमल्पवृत्तेसममंडलीयथाम्योत्तरग्रहबिंबयोरवस्थानात्॥अतएवद्युत्यभावेत
त्तेमंतभवतीतीतरग्रहदिनगताद्यनुपातसाधितदिनगतमूनाधिकंतदाक्रमेणस्वाभीष्टकालाद्ग्रहद्युतिरप्यागतास्या
त्॥तयोरनुपातपूर्वसिद्धयोर्दिनगतयोरंतरमेष्यगतान्यतरसंबंधनचिह्नितमाद्यसंज्ञः स्यात्॥अनंतरप्रमाणाज्ञा
नार्थंस्वाभीष्टकालोकालांतरगतेष्यरूपंग्राह्यः साध्यः॥अतः स्वेष्टयानुपातागतग्रहदिनगततुल्यकालेग्रहोसा
धितो॥तेनफलेष्टनाडीभिरिसाधइहपूर्वोक्तरीत्यैवचसत्कं॥इहाभीष्टकाले॥ताभ्यां॥ग्रहाभ्यांतात्कालिकलग्नाद्दि
नगतेसाध्ये॥ततोनुपातेनदिनगतमानीयोक्तरीत्यादिनगतांतरेणान्यूनानल्पक्रमेणेष्यगतांकितग्राद्यासंक
रार्थमन्यसंज्ञः॥वक्ष्यमाणानुपातार्थंप्रमाणानयनमाहग्राह्यान्ययोरिति॥जातिरन्यगतत्वेनेष्यत्वेन॥एकान्यजा
तिक्रमादंतरयोगकार्यौ॥युक्तंचैतत्॥उभयकालेएकलक्षणग्राह्याभावरूपोयुतिकालस्तदंतरप्रमाणानुरूप
उभयकालादेकतरस्मिन्भवति॥भिन्नलक्षणेनुतउभयकालमध्येयुतिकालेन्यथाभिन्नलक्षणानुपपत्तेरितिह

योयोगमितांतरमुभयकालयोर्मध्येप्रमाणमिति· एतत्प्रमाणेनफलमिताघटिकास्तदाघतुल्यांतरेणाकाइस्य
नुपातादाघाहताइस्याघर्ष्टमुक्तं· फलघटीभिः· आर्याभिमतयुतिकालात्· आघवशात्· गतेष्वचिरानुरोधात्क्रमे
णापूर्वकाले· पश्चादुत्तरकालेयुतिः स्यात्· एवमुक्तप्रकारेणासकृत्· यावदपरोन्यः· प्रभावे· शून्यतांप्राप्तोभव
ति· युतिकालेवस्तुभूतज्ञातदिनगतानुपातावगतदिनगतयोरंतराभावसिद्धेः· आर्यागीकृतयुतिकालातिरि
क्तकालिकांतरस्याघरूपस्यान्यसंज्ञत्वाच्च· इयंयायुतिर्ब्रह्मगुप्तसंमतासायाम्योत्तरस्वभूगर्भस्थितिजवृत्त
योर्योगद्वयसूत्रेवृत्ताद्रूपेग्रहबिंबद्वयसंबंधादृष्टाप्रतीतिविषयापीत्यर्थः· प्रतिदेशमेककालिकत्वासंभ
वाद्गतेरुत्तरीत्याभिन्नत्वेनयुतिकालानामनेकत्वतद्देशादयुक्ता· फलादेशोपजीव्ययुतेरेकस्याएवोचितत्वात्·
अन्यथायुतिभेदफलेपरिगणितदेशानांनानात्वोक्तेरसमंजसत्वापत्तेः· नह्येकदेशादृष्टयुतेः फलमनेकदेशा
नाशः संभवति· अन्यथाकतरद्देशायुतिप्रामाण्येनफलादेशोवक्तुंशक्योविनिगमनाविरहात्· किंच· सम
वृत्तेग्रहभागाभावान्नद्याम्योत्तरसूत्रस्थग्रहबिंबदर्शनरूपयुत्यंगीकारोमुचितएव· योग्यसंबंधाभावादतए

२६७

वकदंबसूत्रेसर्वाभिप्रायिकैकायुतिः फलादेशोपयुक्तार्यागीकृतासमंजसेतिपूर्वोक्तमेवेतिभावः॥९५॥ ॥
आर्याभिमतयुतौद्वयोर्ग्रहबिंबयोः कदंबसूत्रेंतरज्ञानमाहतत्कालजातस्फुटखेटयोर्योशरोतयोरेकविभिन्न
दिक्के· वियोगयोगौक्रमशः कदंबसूत्रेंतरंस्याद्ग्रहयोर्लंबाग्रमिति· आर्यसंमतयुतिकालेजातोस्पष्टग्रहोसमो
तयोरुत्तरीत्यायोशरोभागाद्योज्ञातोतयोः शरयोः एकभिन्नदिक्केसतिक्रमेणांतरयोगौ· ग्रहबिंबकेंद्रयोरंशा
द्यमंतरंयाम्योत्तरकदंबप्रोतस्फुटवृत्तरूपसूत्रेस्यात्· क्रांतिवृत्तग्रहभागस्थानाद्ग्रहबिंबकेंद्रस्यकदंबप्रोतवृत्तं
तरस्यशरत्वादेकदिशिशरांतरंग्रहबिंबकेंद्रयोरंतरयाम्योत्तरं· भिन्नदिशिशरयोगएवग्रहबिंबकेंद्रयोर्याम्योत्त
रमंतरंगोलेस्पष्टं॥९६॥ ॥ग्रहयोरधिष्ठितदिग्ज्ञानमाहयाम्योत्तरस्थितावत्रखेटस्वशरादि· स्थितौ· तुल्यदि
क्केल्पबाणोयः सविलोमदिशिस्थितइति· अत्र· युतिकाले· ग्रहौ· बिंबात्मकौ· निजशरादिस्थिताविति स्वरूपो
क्तिः· याम्योत्तरस्थितौभवतः यस्यदक्षिणशरः सदक्षिणदिशि· यस्योत्तरशरः सउत्तरदिशीत्यर्थः· द्वयोः शरयो
रभिन्नदिक्केन्यूनशरोग्रहोयः सशरदिग्यस्तदिशिस्थितोज्ञेयः· स्पष्टंचैतत्· अधिकशरादिकस्यग्रहादल्पशरादि

ग्रो॰भिन्नदिक्केपिविपरीतदिक्कत्वात्॥१७॥ ॥ननुग्रहयोरूर्ध्वाधरांतरत्वेनदृष्टुर्भूपृष्ठगत्वाच्चसूर्यग्रहणावस्तसे
कंनतिरुसम्यते॰तत्संस्कारः शरयोराव श्यकोन्यथासूर्यग्रहणेपिनस्यादत्रानुपपन्नेरित्यतोंतरार्थंनतिसंस्कृतोशरो
कार्याविसभिप्रायेणानवीनमतंपद्यत्रयेणाहनव्यास्तुदृग्योस्वचरोस्वयोगकालयदातत्समयोस्थलग्नं॰त्रिभोन
मस्पष्टगतंविलग्नात्तस्मान्नरत्नस्यचरज्यकाधः॥१८॥तद्दृग्ज्यकासूर्यमुखेनिरक्षोदृक्क्षेपणावार्कमुखग्रहाणां॰सौ
म्येपमेत्रिभजेधिकेक्षात्सौम्योन्यथादक्षिणएवदेधः॥१९॥स्वकुण्डलसूत्रग्रदृक्क्षेपमानंत्रिभज्याप्तमेतद्धनुस्तन्न
तिस्यात्॰लग्नाद्यासुदृक्क्षेपरिक्षस्कृतः स्यात्तयपुः स्फुटबाणएवंवदंतीति॰नग्याः गोलतत्वज्ञास्त्वेवंवदंतीसन्नयः
एवंकिंतदाहदृग्योविति॰ग्रहोनिजयोगकालेयदादृग्योर्दर्शनयोग्योवुक्तरीत्यानिर्णीतो॰तात्कालिकंलग्नंत्रिराशिभि
रूनंकार्यं॰अस्यत्रिभोनलग्नस्यविलग्नादिनगतंसाध्यं॰तस्माद्दिनगतात्तस्यत्रिभोनलग्नस्य॰चरज्याधरूपकरणेः
शंकुःसाध्यः॰तस्यशंकोर्दृग्ज्या॰सूर्यादिसप्तग्रहाणां॰सूर्यादिभिरार्षैः दृक्क्षेपउक्तः॰एवकाराच्चरकृतोविशेषोनांगी
ल्यं॥५८ तत्सूत्रयो: पूर्वपरांतरस्थाभांबारतो वित्रिभलग्नतुल्ये· खेटे भवेन्नैव विलंबनंतत्त्रिभे परंस्यादपस्व
स्यमध्ये॥५९ खेटेनतिर्लंबनकंचनैवतत्सूत्रयोरैक्यवशाधरानु· दृग्वृत्ततुल्यापममंडलस्थाद्भूहस्यचिह्नं
क्षितिगर्भभूजे॥६० कुलग्नसूत्रेणसमाज्यकास्यादृग्लंबनोत्थापरमातदानी· तदाखमध्येत्रिभहीनलग्नंयतता

२९२

स्यत्रिगुणोनरः स्यात्॥६१ सानेनचेत्त्रिभहीनलग्नोत्थाभीष्टांकोपरमापवृत्ते· त्रिभोनलग्नग्रहभेदबाहुज्य
यात्रिभज्यासमयेयमेव॥६२॥तदातयाभीष्टकयाभवेत्ताभीष्टाज्यकालंबनजोपपन्ना· इतिस्वकक्षावशतोप
मात्यग्रहस्यानुरोधाद्भूहलंबनंस्यादिति· अत्र· लंबनानयने· उपपत्तिं· लंशृणु· उपपत्तिं वदामीत्यर्थः तत्र लंब
नस्वरूपबोधार्थं लंबनक्षेत्रनिरूपणिभूगर्भपृष्ठसूत्रयोर्गोलेसंनिवेशमाह भूमिगर्भादिति· भूमिगर्भमा
रभ्यमूर्त्तमियन्नावच्छिन्नपरिमाणाधिकरणक्रांतिवृत्तं· तत्रसंस्थायस्येतादृशं· ग्रहभोगस्यचिह्नं प्रति· स्वकक्षा
वृत्तेस्थितंयद्भूहभोगचिह्नं तत्स्वसूत्रंभूगर्भदृग्पंनयेत्· भूगोलस्यपृष्ठमारभ्यान्यद्द्वितीयंसूत्रं· तत्र· मूर्त्तक्रांति
वृत्तस्थग्रहभोगचिह्नं· एवकारादन्यस्थाननिरासः· नेयं· ग्रहकक्षायामाकाशगोलरूपायांभूपृष्ठसूत्रात्· अ
धः एवकारात्कदाचिदप्यूर्ध्वासंभवः· चिह्नं· कक्षावृत्तस्थग्रहभोगचिह्नं भूगर्भसूत्रसक्तं भवति· लंबनक्षेत्र
माह अतइति· उक्तकारणात्· स्वस्यग्रहबिंबस्य· आश्रयभूतआकाशात्मगोलस्तस्मिन्· ग्रहभोगचिह्नीयदृ
ग्वृत्ते· भूगर्भपृष्ठसूत्रयोरंतरस्थिता: कला: ग्रहस्यदृग्लंबनोत्पन्ना: कर्णा:· कक्षास्वदृग्वृत्तप्रदेशाविशेषयामे

प्यभागस्थाः कदम्बसूत्रेनसाख्याः कलाभुजः ग्रहाकाशगोलेभ्यष्टदक्सूत्रंयत्रलग्नंतत्स्थलेकदंबप्रोतवृत्तंस्थ
पमानीयकक्षावृत्तेयत्रलग्नं तत्स्थलयोस्तद्भुजांतरंनतिर्भुजइतिस्पष्टं तस्याः नसाग्रंग्रहकक्षावृत्तस्थग्र
हभोगचिह्नं प्राभ्यामुत्पन्नमध्यमंतरालंतत्संबंधिन्योयाः ग्रहस्फुटलंबनोत्पन्नाः स्पष्टाः कलास्ताः कोटिकला
ग्रहकक्षायां ताः कलाः कोटिरिति दृग्लंबनकर्णरूपमध्यमं कक्षास्फुटलंबनंकोटिरूपंस्पष्टमितितात्पर्यं स्पष्टमध्य
मयोर्लंबनयोरभेदात्क्षेत्रानुसन्निस्थलमाह दृग्मंडलाकारत्वयेति यस्मिन्कालेक्रांतिवृत्तंदृग्वृत्तत्वेनपरिणतं
तस्मिन्कालेतयोरभेदस्तेनत्वसूत्रांतरस्यपाम्योत्तरत्वाभावेनैकरेखारूपत्वान्नसन्तेः क्षेत्रादर्शनं भुजकर्णा
योरभेदेनापिक्षेत्रानुसन्निरित्याहत्रप्यति त्रिभोनलग्नस्यपरदृग्वृत्तंततस्यैवकदंबप्रोतवृत्तं एतद्दृक्तुल्यंत्रभिन्न
त्वेनपरिणतइत्यर्थः नतिलिप्तानामाभास्वरूपंयस्यैतादृशायाभुजस्तेनदृग्लंबनं एवकारात्स्फुटलंबननिरा
सः समंस्यात् हेतुमाहसूत्रयोरिति भूगर्भएषसूत्रयोः पूर्वापरांतरस्यस्फुटलंबनस्यकक्षावृत्तस्थस्याभावा
त् अनुसन्तेः क्षेत्रादर्शनंफलितं इदमुक्तंस्पष्टलंबनस्याभावस्थानार्थमिसाहत्रप्यतइति यतस्त्रिभोनलग्नीय

२९३

यदृग्वृत्तस्यक्रांतिवृत्तंयथाम्योत्तररूपकदंबप्रोतवृत्तत्वसिद्धौस्फुटलंबनाभावः परिणतोनोहेतोरित्यर्थः त्रि
भोनलग्नसमग्रहभोगेबिलंबनं स्फुटलंबनंनस्यात् एवकारःप्रार्थयतेमध्याद्भूलंबनाभावस्योक्तस्त्रिभो
नलग्नतुल्यग्रहभोगेलंबनोत्पत्तेस्तदभावोनेत्यस्यनिवारणार्थकः प्रसंगात्स्फुटलंबनस्यपरमोत्पत्तिस्थलमाह
तदिति तस्मात् त्रिभोनलग्नात् त्रिराशिस्थाने प्राग्गपरत्र लग्नात्सलग्नयोर्ग्रहभोगेपरमंलंबनंस्यात् अथै
कतरस्याभावेनक्षेत्रानुसन्निंप्रतिपाद्योभयोरभावेनक्षेत्रानुसन्निमपवाभुजकोट्योः एषकएषगभावंप्रतिपा
दकर्णाभावेनभुजकोट्योरभावंयौगपद्येनाहत्रप्यति स्वस्य भूगोलोर्ध्वस्वसंबंधिनप्राकाशस्य मध्ये स्वस्व
स्वस्तिके ग्रहभोगसंबंधिनिक्रांतिवृत्तप्रदेशविशेषसति नतिर्लंबनं चः समुच्चये इयमित्यर्थः नस्यात्
एवकारःभयाभावस्थलाप्रसिद्धिशंकानिरासार्थः हेतुमाहतत्सूत्रयोरिति भूगर्भएषसूत्रयोः एकावशात्
अंतराभावेनाभिन्नतावशादित्यर्थः सूत्रांतरस्यकर्णस्याभावाद्भुजकोट्यभावइतिभावः लंबनानयनार्थंप
रमलंबनंविवक्षुः प्रथमंदृग्लंबनस्यपरमत्वमाहपरात्विति दृग्वृत्ताभिन्नक्रांतिवृत्तेग्रहभोगस्यचिह्नं भूगर्भ

क्षितिजेस्यात्तदंनीकुछन्नसूत्रेणाक्षस्पर्शाणानतुल्यादृग्लंबनोत्पन्नापरमाज्यास्यात्· एवंत्रिभोनलग्नदृग्वृत्ताकार
क्रांतिवृत्तेग्रहभोगस्यक्षितिजस्यत्वेपारिभाषिककुछन्नसूत्रतुल्यादृग्लंबनज्यापरमेति· स्फुटलंबनस्यपरम
त्वज्ञानार्थमनुपातोपजीव्यंप्रमाणमाहतदेति·परमदृग्लंबनज्याकालेखमध्येत्रिभोनलग्नंपतः स्यात्ततः का
रणात्·अस्य·त्रिभोनलग्नस्यांकुस्त्रिज्यामितःप्रत्यक्षः स्यात्·स्फुटलंबनस्यपरमत्वमाहसति·अनेनत्रि
ज्यातुल्यांकुना· सा·पारिभाषिककुछन्नसूत्रतुल्यापरमदृग्लंबनज्यायदिभवतितदात्रिभोनलग्नासन्नाभीष्टां
कोकास्यादित्यनुपातोल्लेखात्·दृग्वृत्ताकारमिन्नक्रांतिवृत्तेभूगर्भक्षितिजवृत्तस्यग्रहभोगपरमास्फुटलंबन
ज्या·अथाभीष्टलंबनज्याज्ञानार्थमाहत्रिभोनलग्नेति·त्रिभज्यातुल्ययात्रिभोनलग्नग्रहयोरंतरभुजज्यया·
इय·स्फुटलंबनपरमज्या·एवकाशपरमान्यलंबनज्यानिरासः·तदाभीष्टया·तया·त्रिभोनलग्नग्रहयोरंतर
भुजज्ययाकेनानुपातोल्लेखालंबनोद्भवाज्यापूर्वोक्ता·त्रिभोनलग्नस्यसादित्रिज्याभक्तेइसंतंनिरूपितोपपन्ना·
नतुसूर्यग्रहणोपयुक्तलंबनंनसिद्धमेवेसतेआहइतीति·मूर्तक्रांतिवृत्तानुरोधाद्भूस्पकक्षावृत्तस्यक्रांतिवृ

२९४

त्तवशादुक्तरीत्याग्रहलंबनंभवति·तथाचग्रहलंबनरीत्यासूर्यचंद्रयोः प्रत्येकंलंबनेउक्तेसूर्यग्रहणोपयु
क्तलंबनज्ञानार्थमितिभावः॥६३॥ ॥अथसूर्यग्रहणोपयुक्तलंबनोपपत्त्यर्थंप्रथमंपौर्णमास्यंतेचंद्रमध्य
ग्रहणपूर्णिकालवदर्शांतेसूर्यमध्यग्रहणपूर्णिकालोनस्वादितिपद्याभ्यांप्रतिपादयति·एवंसूत्रेणाद्यबिंबाव
धीदंभूगर्भास्याच्छादकांकस्यगव·भूपृष्ठाधस्सूत्रमर्कावधीत्वंतस्मादिंदोः कक्षिकायांस्वचिह्नं॥६५॥अथो
भवसूत्रद्वियोगकालेदर्शांतरूपेत्रांशिबिंबमर्के·संछादयत्येवकुगर्भदेशोलंबितत्वान्नतुभूमिपृष्ठइति· य
थाभूगर्भासूत्रंमूर्तक्रांतिवृत्तावधिनीतंतथासर्पः·अत्र·दर्शांते·भूगर्भासूत्रं·छाद्यबिंबावधि·प्रकृतेसूर्यमं
डलकेंद्रपर्यंतंयत्स्यात्तदिदंसूत्रंछादकांकस्यक्· प्रकृतेचंद्रमसः स्वकक्षायांस्वभोगचिह्नंस्पृशति· चंद्रकक्षाया
तदस्यत्रभागेनस्पृशतीत्येवकारार्थः·एवं·यथाभूपृष्ठान्मूर्तक्रांतिवृत्तावधिसूत्रंतथातस्मिन्नेवकाले·भूपृष्ठा
धस्सूत्रमर्कमंडलकेंद्रावधि·तस्मात्सूत्रात्·चंद्रकक्षायां·चंद्राकाशगोलेस्वचिह्नं·चंद्रभोगचिह्नं·हि·यतोधोभ
वत्यतः कारणात्·सूर्यचंद्रयोर्योगकालेपूर्वाधिकारावगतदर्शांतरूपे·चंद्रबिंबकर्णे·सूर्यमंडले·भूगर्भस्था

ने॰ तदभिप्रायेणासंछादयति॰ एवकारान्मानैक्यार्द्धाधिकारसंबंध्यमांतनिरासार्थः॰ तदा भूपृष्ठेन तु छाद
यति॰ भूपृष्ठस्थनांसूर्यदर्शनेचंद्रः प्रतिबंधकोनस्यादित्यर्थः॰ हेतुमाह अधोलंबितत्वादिति॰ भूपृष्ठस
त्राच्चंद्रभागचिह्नस्याधोलंबितत्वात्तत्रस्थचंद्रबिंबंनप्रतिबंधकंकिंपुनस्तद्याम्योत्तरांतरस्थंचंद्रबिंबंप्रति
बंधकंस्यात्॰ विनाभूपृष्ठसूत्रैकसूत्रसंबंधमाछादनासंभवादितिभावः॥६५॥ ॥एतदेवस्पष्टय॰ सू
र्यग्रहणेपयुक्तलंबनमुपपन्नमितिसूचयति॰ भूपृष्ठसूत्रेवयदेंदुबिंबंतदाकुपृष्ठविपुरर्कबिंबं॰ सं
छादयत्येवकुगर्भयोगकालाद्भूलंबनजातरेतदिति॰ यदा॰ भूपृष्ठसूत्रेभूपृष्ठमारभ्यसूर्यबिंबकेंद्र
पर्यंतंयद्दृक्सूत्रंतच्चंद्रकाशागालेयत्रकक्षावृत्तप्रदेशाद्याम्योत्तरांतरस्थानलग्नंतस्मिन्निसर्पः॰ चंद्रभा
गचिह्नंस्वकक्षास्थमपिप्रवापरांतराभावाद्भवति॰ चंद्रबिंबंतुनतितुल्यचारविभिन्नदिक्केभवति॰ तदा॰ भू
पृष्ठेचंद्रबिंबः सूर्यबिंबमाछादयति॰ एवकारान्मानैक्यखंडाधिकारेछादनासंभवः चंद्रस्याछादकत्व
तुछाद्यदर्शनेप्रतिबंधकत्वे॰ ननुकदाप्रथमचरणात्कस्यादित्यतआह कुगर्भेति॰ भूगर्भयोगकालात्पूर्वं २९५

निश्चितादमांतात्॰ सूर्यचंद्रयोर्घट्यात्मकेलंबनेताभ्यामुत्पन्नांतरकाले॰ घट्यात्मकंलंबनयोः कलात्मकयो
र्जातमंतरं॰ प्रागुक्तघट्यादिलंबनं॰ गसंतरकलाभिः षष्टिघटिकास्तदालंबनकलांतरकलाभिः कादत्सनुपातो
सन्नेतस्मिन्निसर्पः॰ पूर्वमपरत्रत्तणाद्यनलंबनक्रमेण॰ तत्॰ भूपृष्ठसूत्रेचंद्रभागचिह्नंस्यात्॰ भूपृष्ठ
सूत्राद्गर्भसूत्रस्याधःस्थत्वेनत्रिभामलग्नस्थानाद्दीनाधिकग्रह॰ भोगस्यक्रमेणपश्चिमपूर्वस्थत्वाल्ल
बनांतरकालेनाग्रेमपूर्वकालयोः क्रमेणभूपृष्ठसूत्रस्थत्वावरूपंभावात्॰ अतएवलंबनघटीसंस्कृतो
मांतकालस्तत्कालत्वेनपरिणतःसूर्यचंद्रांतरासन्नत्वेनैकजातित्वात्॥६६॥ ॥असकृत्कर्मार्थंहेतुमा
हलंबनकालेनरवगागतएवातएवदर्शांतात्॰ लंबनकालेप्यसमोचंद्रार्कौनैकसूत्रस्थाविति॰ लंब
नकालेनग्रहोमंदशीघ्रोद्वापिस्वकक्षापांस्वस्वाग्रागतः॰ एवकारोलंबनकालपर्यंतंशीघ्रएवस्वस्वाग्रागा
छति॰ मंदस्तत्रयथास्थितएव॰ पिनद्योर्योगसंभवइत्यर्थस्यनिरासार्थकः॰ गणितानुपपत्तेः॰ अतः द्योर्ग्र
हयोः स्वस्वाग्रागमनरूपकारणात्॰ एवकारणतदतिरिक्तकारणनिरासार्थकः॰ दर्शांतात्॰ दर्शांतमारभ्य

लंबनांतकालेयथायोग्यं पर्वभवस्त्रवा॰ अपिशब्दाल्लंबनस्यसूत्रांतरत्वेनतत्कालेद्वयोरेकसूत्रस्थत्वसंभा
वनायामपितदसंभवइत्यर्थः॰ भूगर्भसमयोरेकसूत्रस्थत्वंभूपृष्ठत्वसमयोरित्यसमत्वरूपकारणाप्येक
सूत्रस्थताभावइतिसूचनार्थमसमाविति॰ अत्राप्यपिशब्दान्वयः सूर्यचंद्रावेकसूत्रस्थौ॰ भूपृष्ठसूत्रस्थौ
नभवतः॥६०॥ ॥सूक्ष्मार्थमसकृल्लंबनंसाध्यमित्याहकुपृष्ठैकसूत्रास्थितिंवर्जयित्वारविंचंद्रमाःसंपि
धत्तेकथंनु॰ अतोलंबनंसंस्फुटंकिंचिदाभ्याममांतान्मुहुः॰ सूक्ष्ममेवेतिबोध्यमिति॰ नु॰ वितर्के॰ रविचंद्रयोः
कुपृष्ठैकसूत्रास्थितिंविना॰ चंद्रबिंबः सूर्यबिंबंकथमाछादयति॰ यतोलंबनस्यैकसूत्रस्थत्वेनसूक्ष्मत्वेसि
द्धेसाधितंलंबनंस्थूलमनइत्यर्थः॰ आभ्यां॰ लंबनसंस्कृतदृग्गतिकालिकसूर्यचंद्राभ्यां॰ प्रोक्तरीत्या॰ लंबनं॰ अ
मांतात्॰ अमांतमारभ्यागतंलंबनं॰ अमांतावधिकंलंबनमितियावत्॰ किंचित्॰ पूर्वलंबनापेक्षया॰ स
म्यक्स्फुटं॰ तत्संस्कृतदृग्गतिकालिकार्कचंद्राभ्यामेवंमुहुरसकृद्यावदविरोधः॰ लंबनंसूक्ष्मं॰ भूपृष्ठैकसू
त्रसूर्यचंद्रस्थितिकालिकं॰ एवकारात्तादृग्गतिस्थभावकालिकत्वांशकानिरासार्थः॰ सुधीभिर्ज्ञेयं॥६८॥ ॥ २९६

ननुचंद्रग्रहणेपिभूगर्भपृष्ठसूत्रयोर्भेदादंतरकालात्मकलंबनमनिवार्यंकथंनोक्तमतआहभूपृष्ठदृशोपिस
मोनुभेदऊर्ध्वाधराभावतएकसूत्रे॰ मनुष्यदृशोभवतोतएवनलंबनंगीतकरग्रहेस्यादिति॰ समावपिकुभा
चंद्रौ॰ भूपृष्ठदृशौ॰ कक्षयोरूर्ध्वाधरांतराभावादेककक्षास्थौ॰ अभिन्नसूत्रमनुष्यदृशोभवतः याभ्यांत्तरांतरंतुलं
बनानुपयुक्तं॰ ऊर्ध्वाधरांतरत्वाभावात्॰ अन्यथासूर्यग्रहणेपिचंद्र चिह्नचंद्रबिंबावस्थानकालेयाभ्यांत्त
रांतराभावाल्लंबनानुपपत्तेः॰ अतः॰ एकसूत्रस्थत्वाभावस्यलंबनहेतोरनाबादित्यर्थः॰ एवकाराद्भूगर्भ
पृष्ठयोरूर्ध्वाधरांतरालंबनमन्यथाभूगर्भलंबनोत्पत्त्यापत्तिरितिकारणांतरनिरासः॰ चंद्रग्रहणेलंब
नंनस्यात्॥६९॥ ॥आर्षाभिप्रायानभिज्ञानांमतमन्यथाभ्यांदूषयति॰ केचिन्नुदग्वृत्तभवृत्तयोर्या
त्तरांतरामुक्तनतिंभुजाख्यां॰ कदंबसूत्रावगतामुपेक्ष्यसमाख्यसंप्रातकवृत्तसंस्थ॥ ७०॥ भुजंसमाद
स्यतदग्रस्वरविक्रांतरेलंबनमार्षमाहुः॰ तन्नैवयुक्तंस्वविलंबनोत्थभुजस्वरूपावनतेरयुक्तेरिति॰ केचि
त्॰ आर्यभटादयोज्ञानराजदैवज्ञाताः चंद्राकारागोलस्थदृग्वृत्तभूपृष्ठसूत्रसक्तप्रदेशक्रांतिवृत्तयोर्या

म्योन्नतांतररूपांत्रिभोनलग्नदृक्क्षेपादृक्स्पर्शाणानतिंपूर्वोक्तोपपन्नाभुक्तनतिंभुजसंज्ञिकां· कदंबसूत्रस्थत्वेन
ज्ञातामुपेक्ष्यानंगीकृत्य· कदंबप्रोतवृत्तस्थाने· क्षितिजयाम्योन्नतवृत्तसंपातरूपसमाख्यदृग्संप्रोतंश्लथंवृत्तं
कल्पितं· तत्रवृत्तेसंस्थायस्यैतादृशंभुजंसम्यक्प्रकारेणागीकृत्य· तादृशभुजस्याग्रंकक्षावृत्तस्थग्रहचिह्नं· अ
नयोरंतरंकक्षावृत्तविभागेलंबनं· ननुक्रांतिवृत्तेतद्दक्षिणोत्तरस्थत्वेनभुजस्यमुक्तत्वात्समाख्यप्रोतवृत्तस्यसम
वृत्तदक्षिणोत्तरत्वेनवैजात्यादाहतभुजानुरोधेनलंबनमयुक्तमंगीकृतमिसतआह्ग्रार्षमिति· स्वतंत्रेणस्यनि
योगानर्हत्वात्सूर्यादिभिर्वैजात्यभुजसंबंधेनकोटिरूपलंबनस्योक्तंरार्षत्वेनांगीकृतमितिभावः· आहुः· भास्कराचा
र्योक्तमार्षविरुद्धमयुक्तमित्यभिप्रायेणास्वपक्षमभ्यर्हितंमानयंतीत्यर्थः· तथाचतद्वाक्यं· पर्वांतसायननतुज्यक
याजिनांराजीवाहताथविहतानिजलंबमो र्या· लब्धंनिजोदयगुणोत्रस्वमध्यलग्नक्रांत्यंशकाक्षलवसंस्कृति
ज्ञाननज्या· सासंहतोदयगुणोनहतात्रिमौर्वीतद्भुक्तवर्गनतभागगुणोऽलवर्गो· विश्लेषितोपरमतोभवतीह
दृष्टिक्षेपस्तनत्रिभगुणोद्भववर्गयोर्यत· विश्लेषमूलमिहदृग्गतिसंज्ञकुर्हाशभवेत्रिभगुणाद्धृतिनेरासा·

मध्याद्भलग्नतपनांतरमौर्विकाहारेणालब्धमिहलंबननाडिकाः स्युः· दर्शेविलंबनमिदंस्वपणांविधेयंभूनाधिके
सतिषिवस्वतिमध्यलग्नात्· राशित्रयोननतुभानुविशेषजीवावेदाहताभिगुणाहलूघुलंबनंयत्· तद्धित्रिभोद्भ
वसमुन्नतमौर्विकाघ्नंत्रिज्याहतंस्फुटमितिप्रवदंतिकेचिदिति सिद्धांतसुंदरेतिव्यक्तं· अत्रभास्करोक्तलंबनान
यनोपन्यास· विचिभराहेनत्रिभोनलग्नं· तद्दृक्क्षेपयदुन्नतं· दृग्वृत्तेऽन्नतांशास्तेषांज्यया· विचिभलग्नत्राकुनेसर्वः
ननुत्रिभोनलग्नस्यदिनार्द्धजातेनतोन्नतज्येयदिवासुखार्थं· दृक्क्षेपत्राकुप्रविकल्प्यसाध्यंस्वल्पांतरंलंबन
कंनतिश्चेतिभास्करोक्तपात्रिभोनलग्नस्यक्रांतिलंबांशसंस्काररूपमध्योन्नतांशानांज्यपेत्यर्थः· स्थूलत्वात्·
अन्यथासुखार्थमित्यस्यव्यर्थत्वापत्तेः· एतदुपपत्तिस्तत्रैवव्यक्ता· दर्शांतोदयलग्नकापमगुणादग्रानुपात
दृग्यासंचाराद्दृग्यज्यकेतिगदितादृग्ज्यास्वमध्योदयात्· त्रिज्यायामुदयज्यकामितभुजस्तत्किंभवेद्दृग्ज्यपालब्धं
दोरपदृत्तपूर्वपरयानन्मध्यलग्नज्ययोः यद्दर्शांतरतः पदंनिगदिताकोटिः सदृक्क्षेपकस्तत्कर्णस्त्रिगुणास्तयो
रप्यभुजः सादृगतिः शंकुवत्· मध्याद्भोदयभास्करांतरगुणात्त्रिज्यामितेलंबनंवत्वारः किमभीप्सितेप्ययदि

तन्त्रिज्यामितादृग्गतिः॰ इष्टायांकिमितित्रिराशिकयुगेत्रिज्याहरोतद्धृतिर्वेदैरप्यपवर्त्तितैकभवनज्याव
र्गतुल्यः पुनः॰ दृग्गस्याप्यपवर्त्तितात्रभवतिष्ठराहूयलब्धतामाध्यार्कांतरमौर्विकास्फुटमिदंनाड्यादिकंलब
नमिति॰ तदेतदुक्तंसूर्यसिद्धांते॰ मध्यलग्नसमभानोर्हरिजस्यनसंभवः॰ प्रसादृग्ज्यभक्तांतिसाम्यनावनतेरपि॰
लग्नंपर्वविनाडीनांकुर्यात्स्वेरुदयासुभिः॰ तज्जांसापक्रमज्याप्तीलंबज्याप्तोदयाभिधा॰ तदालंकोदयलग्नंमध्यसं
ज्ञंयथोदितं॰ तत्रांसक्षांशसंयोगादिक्साम्यंतरमन्यथा॰ रोषनतांशास्तन्मौर्वीमध्यज्यासाभिधीयते॰ मध्योदयज्य
यान्यस्तात्रिज्याप्तावर्गितंफलं॰ मध्यज्यावर्गविश्लिष्टंदृक्क्षेपः शेषतः परं॰ तत्त्रिज्यावर्गविश्लेषान्मूलंशंकुः सदृग्
तिः॰ नतांशाबाहुकोटिज्येस्फुटदृक्क्षेपदृग्गतीः॰ एकज्यावर्गतः॰ शेषलब्धंदृग्गतिजीवया॰ मध्यलग्नार्कविश्लेषज्या
शेषेनविभाजितान्नवीद्वेनंज्ञेयंप्राक्पश्चाद्दृष्टिकादिकं॰ मध्यलग्नाधिकेभानौतिष्यंतास्त्रिराशयः॰ धनमू
नेसकृत्कर्मयावत्सर्वेस्थिरीभवेदिति॰ एतदेवसमभिहितंसर्वार्षग्रंथे॰ तदेतन्मतंदूषयति॰ तदिति॰ प्रतिपादि
तंमतं॰ नयुक्तमेवकारात्केनापिप्रकारेणोपपन्नंकर्तुमशक्यं॰ हेतुमाह स्वविलंबनोत्थभुजस्वरूपावनतेरिति॰

२९८

स्वशब्देनतन्मतप्रतिपादितंलंबनंतस्माद्रूपपन्नायाभुजस्वरूपानतिस्तस्याः॰ अनुक्तेः॰ उक्तभावात्॰ यथालंब
नंतथातत्संबद्धक्षेत्रानुरोधेननतिप्रतिपादनापत्तेरितिभावः॰ नचनतांशाबाहुकोटिज्येस्फुटदृक्क्षेपदृग्ग
तीस्तद्वापूर्वमध्यलग्नस्यैवनतांशानांधनात्तदृग्ज्यायाएवनतिसाधनेदृक्क्षेपत्वेनांगीकारपक्षेस्वाभिमत
लंबनसंबद्धक्षेत्रीयभुजत्वेननतिसिद्धेरुक्तदोषानवकाशादितिवाच्यं॰ पूर्वोक्तमुख्यदृक्क्षेपसाधनाशक्तौलाघ
वादक्षेत्रानस्फुलनसंगीकारेणद्वितीयपक्षोद्घाटनात्॰ अन्यथाप्रयासंसधितपूर्वदृक्क्षेपस्यानुक्तित्वापत्तेः॰
कोहिनामंदेतिलाघवेनसूक्ष्मसिद्धौगौरवप्रकारसिद्धस्थूलनिरूपणोपायसक्तः कथमपिभवेत्॰ किंच॰ ए
तस्यद्वितीयप्रकारस्यसूक्ष्मत्वेसर्वप्रकारसिद्धलंबनस्यानुक्तापत्तिः॰ अंगीकारेपिसिद्धांतसुंदरेमध्यलग्न
नतांशज्यायाःदृक्क्षेपानुक्तालंबननतयोःस्थूलत्वापत्तिर्महादूषणंअथपूर्वोक्तदृक्क्षेपदृग्गयोरुपपत्तास्त्रि
भोनलग्नदृग्ज्यांशकुत्वाभ्यांसिद्ध्योरेवसूक्ष्मत्वं॰ नचदृग्ज्यांशकुत्वाभ्यांतयोरसिद्धिः॰ प्राग्वोक्तदृग्गतिदृक्क्षेपा
भ्यांक्रमेणांशकुदृग्ज्ययोर्न्यूनाधिकत्वावश्यंभावादितिवाच्यं॰ दृक्क्षेपस्यत्रिभोनलग्नदृग्ज्यांशकुत्वेपित्रिज्या

नुरुद्धत्वाभावेनफलवर्गोनत्रिज्यावर्गापदस्पविलक्षणावृत्तध्यासार्द्धप्रमाणसिद्धत्वात्·दृग्ज्यायास्त्रिज्या
नुरुद्धत्वेनत्रिज्यावृत्तपरिणामपूर्वदृक्क्षेपतुल्यत्वाच्च·प्रस्याउक्तप्रकारेणादृग्गतेः शाकुरूपत्वाच्चेतिक्रिया
शेषस्यस्वल्पातरेणापेक्षितत्वात्·तथाचपूर्वदृक्क्षेपदृग्गतेसार्वात्मवेनतिलंबने·मध्यलग्नदृग्ज्याशाकतुद
क्क्षेपदृग्गतीस्फुटे·युक्तंचैतत्·यतः शारस्यकदंबसूत्रस्थत्वेनसाजासेनयोगांतरेस्पष्टशाराबस्यमाणउप
पन्नः मध्यलग्नदृग्ज्यारूपदृक्क्षेपान्नतध्रुवेजासात्स्पष्टशारार्थंतद्योगांतरानुपपत्तिरिति·अतएवज्ञानराज
दैवज्ञैर्मध्यलग्नदृग्ज्याशाकदृक्क्षेपदृग्गतित्वाभ्यामनुक्तावितिचेन्न·त्रिभोनलग्नदृग्ज्याशाकादृक्क्षेपदृग्गतो
रुपपत्तिसिद्धत्वेत्रिभोनलग्नांतरतएवलंबनोत्पत्तेरुचितत्वा [illegible] ·न·एवंतदृग्ज्यायानस्फुटसंज्ञोचित
त्वात्साजासात्·अन्यथामध्यलग्नतोलंबनोत्पत्तेर्नतेर्वैजासेनदृक्क्षेपदृग्गत्योः प्रथमयोरनुचितत्वापत्तेः·अ
तएवास्मन्नातचरणोः सूर्यसिद्धांतगतार्थप्रकाशकेमध्यलग्नपदलग्नयोरुदयास्तलग्नयोर्मध्यंकदंबसूत्रेण
त्रिभोनमितिव्याख्यातंतत्प्रदर्शितांधपरंपराव्याख्याननिरासपूर्वकंयुक्तियुक्तं·तेनद्वितीयदृक्क्षेपदृग्गा

MEMORIAL DR BHAU DAJI

त्योर्लंबननतसानयनेस्फुटत्वंस्फुटलाघवादुक्तं·तथाचसूर्यसिद्धांताद्यार्षोक्तलंबननतसानयनंतत्वार्थतया
ज्ञानराजदैवज्ञादिभिरनंवबुद्धमितिगम्यते·कथमन्यथास्मन्नातकृतव्याख्यानेतद्दृग्यारूढराकवाकाताप
न्नत्रिभोनलग्नतोलंबनानयनंस्वग्रंथेपरमततयोपन्यस्तंयुज्यतेसलंपल्लवितेन॥ ७२॥ ॥अथनतसान
यनमाहत्रिभोनलग्नस्यतुमध्यकालजातस्यदृग्ज्यात्रिभजीवयाप्ता·कुज्ञत्रसूत्रेणाहतारवींदुस्तज्ज्यापविश्लेष
कलानतिःस्यादिति·पूर्वंसाधितायोमध्यग्रहणकालस्तत्रजातस्यत्रिभोनलग्नस्य·पूर्वंतत्साध्यमिसक्तेः·यो
क्तप्रकारेणदृग्ज्यादृक्क्षेपाख्यात्रिज्यायाभक्ताः सूर्यचंद्रयोः कुज्ञत्रसूत्रेणास्थानद्वयेगुणितातयोः फलयोर्द्वि
नुषीतयोरंतरमंशात्मकंतस्यकलाः नतिः स्यात्॥ ७२॥ ॥अथत्रिभिः श्लोकैर्नतिदिशमुपपत्तिंचाहत्रि
भोनलग्नापमसौम्यभागाः स्वाक्षांशकेभ्योभ्यधिकायदिस्फः·सौम्यानतिर्वीक्षतउत्तरेस्याद्याम्यानयथाप्योय
मभागकेतु॥ ७३॥ त्रिभोनलग्नापमयाम्यभागाः स्वाक्षांशकेभ्योभ्यधिकायदिस्फः·याम्यानयथासौम्यनति
स्त्रिभोनलग्नस्यदृग्ज्यारसपद्धलांशे॥ ७४॥ त्रिज्यासमास्यात्रिभहीनलग्नंकुजस्यवृत्तेपमवृत्ततुल्ये·प

रानतिस्तत्रततोनुपाताद्दाताननतिस्त्वार्षमिदंसुतत्वमिति·निरक्षदेशादुत्तरदेशे·त्रिभोनलग्नस्यक्रांतेरत्त
रांशाः स्वदेशाक्षांशोभ्योधिकास्तदोत्तरानतिः·अन्यथा·उत्तरक्रांत्यंशास्तत्तोन्यूनाः क्रांत्यंशादक्षिणावात
दादक्षिणानतिः·अनंतरंनिरक्षदेशादक्षिणदेशेनु·एतद्रूपरीत्या·तदेवत्रिभोनेत्यादिनतिरित्यंतंस्पष्टं·
नत्यानयनंकथमुपपन्नमित्यतआहत्रिभोनलग्नस्येति·षड्राशिपलांशादेशे·त्रिभोनलग्नस्यदृग्ज्या·।
त्रिज्यायातुल्यास्यात्·हेतुमाहत्रिभहीनलग्नमिति·क्षितिजवृत्तेक्रांतिवृत्ताभिन्नेसतिसर्वराशीनांक्षितिजस्थ
त्वेनत्रिभोनलग्नंक्षितिजस्थं·तत्र·त्रिज्यातुल्यदृक्क्षेपेपरमानतिः·यत्राक्षांगरसालवाः क्षितिजवृत्तात्राप
वृत्तेस्थितेइत्यादिसिद्धांतशिरोमणौव्यक्तं·ततोहेतो :·अनुपातात्·त्रिज्यातुल्यदृग्ज्यपाकुछन्नसूत्रतु
ल्यानतिज्यातदेष्टदृक्क्षेपणकेसनुपातोल्लेखात्·नतिज्येतयोर्धनुषोरंतरंनतिर्ज्ञाता·आनयनमुपपन्न
मितिभावः·इदंप्रतिपादितं·आर्षे·सूर्यसिद्धांतादिग्रंथाविरुद्धं·सुतत्वं·यथार्थमित्यर्थः सूर्यचंद्रयोः राशां
तरितत्वेपिचिह्नयोरभेदोर्ध्वाधरांतरत्वान्नतिरसन्ना·दृक्क्षेपाभेदात्त्रिभोन लग्नस्याभिन्नत्वाच्च·राशां

तरितत्वेनतोनविरोधः त्रिभोनलग्नदृग्ज्यायासदृक्क्षेपोद्वयोरपीतिगोलाध्यायेग्रहणवासनायांनतरूपप
त्रोभास्कराचार्यैः समर्थितमितिभावः॥७५॥ ॥त्रिभिः पद्यैर्ग्रहणप्रमतमाह·त्रिभोनलग्नस्यभवेत्तुदृ
ग्ज्यासेवात्रदृक्क्षेपइनस्यबोध्यः नतरूपदिक्तस्यधनुस्त्रिभोनलग्नस्वरूपंहिपुसंस्कृतंयत्॥७६॥एत
ज्जीवाचंद्रदृक्क्षेपकः स्यात्संस्काराशाः स्वीयदृक्क्षेपनिघ्नं·कु छन्नाख्यंप्रोक्तसूत्रंत्रिभज्याभक्तंचापलब्ध
योस्तत्कलेये॥७७॥तेनसाख्यस्तः स्वदृक्क्षेपरिक्तयोगाभेदोभिन्नतुल्याशायोश्चयोगोषकस्यवासूर्य
दिक्सास्पष्टेदोश्चयस्तदिक्कानतिः स्यादिति·अत्र·सूर्यग्रहणे·पूर्वोक्तात्रिभोनलग्नस्यदृग्ज्या·सा·दृग्ज्या·
एवकाराद्दृश्यमाणचंद्रदृक्साम्ययोगस्यबोध्यः·सूर्यस्यदृक्क्षेपोज्ञेयः·नतरूपदिक्·नतिदिग्नीस्या
दिग्ज्ञेयेत्यर्थः·तस्य·सूर्यदृक्क्षेपस्यधनुर्भागाद्यं·त्रिभोनलग्नस्वरूपायश्चंद्रभागस्तस्यचंद्रेपातग्रहणान
पूर्वोक्तशीतायः शाशांशाद्यः·तेनसंस्कृतंयद्भवति·सपातत्रिभोनलग्नगोलवशाद्दिक्·एकदिग्योगो
भिन्नदिग्यंतरमितिशीतासंस्कृतमित्यर्थः·एतस्य·संस्कृतस्य·ज्या·चंद्रस्यदृक्क्षेपः संस्कारदिक्कः स्यात्·

सूर्यचंद्रयोः कुष्ठन्नसंज्ञप्रोक्तसूत्रं·भ·सूर्यचंद्रान्यतरकुष्ठन्नसूत्रयोर्धनुषोरंतरस्यात्मकमित्यर्थः·स्वीयदृ
क्क्षेपेणगुणितं·त्रिभज्यपाभक्तं·फलयोर्धनुषीभागाद्येतयोर्यैकले·तत्कलात्मकेसूर्यचंद्रयोर्नत्याख्येस्वदृ
क्क्षेपदिक्कृतः·भिन्नैकदिग्यायोस्तयोश्चः क्रमार्थे·योगांतरं·स्पष्टनति :कलाद्यास्यात्·तस्याः दिग्ज्ञानमा
ह्ययोगइति·योगे·सूर्यस्यदृक्क्षेपस्योपधासूर्यदृक्क्षेप दिक्·सा·स्पष्टनतिः·यदिचंद्रस्यदृक्क्षेपस्योपधे·दृक्क्षेप
दिग्विपरीतदिक्॥१८॥ ॥दृक्क्षेपोपपत्तिमाहसूर्यस्यविक्षेपविवृत्तसंभवाभावत्रिभोनोदयदृग्ज्यका
समः·दृक्क्षेपइंदोस्तुतयोः प्रसिद्धितस्त्रिभोनलग्नेंदुविवृत्तदोर्ज्यइति·विक्षेपः शरः·विवृत्तं·विक्षेपवृ
त्तं·अनयो·संभवउत्पत्तिस्तस्याभावात्·त्रिभोनलग्नस्यदृग्ज्यातुल्यः सूर्यस्यदृक्क्षेपः चंद्रस्यतु·तयोः·
शरशारवृत्तयोः·प्रसिद्धेः·अनिवार्यत्वादित्यर्थः·त्रिभोनलग्नरूपचंद्रभोगीयशारसंबंधेनविक्षेपवृत्तप्रदे
शसंबद्धोदृक्क्षेपः·त्रिभोनलग्नदृग्वृत्तस्यदृक्क्षेपवृत्ताख्यस्यचंद्रलसंबंधिविक्षेपवृत्तसंबंधेनखमध्याद
वगतप्रदेशास्यतत्वात्·चंद्रमंडलकेंद्रभूपृष्ठसूत्रभूगर्भसूत्रैः पूर्वोक्तचंद्राधिष्ठिताकाशगोलेलंबनक्षे

३०९

त्रोसन्नेः प्रसक्तत्वेनतत्क्षेत्रबद्धभुजस्यनतिरूपस्यतदृक्क्षेपोपजीवकत्वाच्च·त्रिभोनलग्नशारसंस्कृतत्रिभो
नलग्ननतांशानांज्यायाश्चंद्रदृक्क्षेपत्वसिद्धं·राशीनांक्रांतिवृत्तएवानुगमांगीकाराद्विक्षेपवृत्तेतरभावाद्वि
क्षेपवृत्ताभिप्रायिकंचंद्रलंबनंनोक्तं·अन्यथासूर्यचंद्रलंबनयोर्भिन्नवृत्तस्थत्वेनवैजात्यात्तत्संस्काराजुपपत्तेः
द्वयोर्दृक्क्षेपयोरेकवृत्तस्थत्वेनसाजात्यात्तत्संस्करणायुज्यतएव·नस्यानयनोपपत्तिरूपूर्वरीत्यासुगमा·नति
संस्कारजात्यग्रहणोपयुक्तनरूपपत्तिरूचंद्रस्यविक्षेपवृत्तेभ्रमणाद्भूपृष्ठसूत्रंचंद्रमंडलसमसूत्रस्थन
क्षत्राकाशगोलस्थप्रदेशविशेषगतंचंद्रबिंबकेंद्रगतचंद्रगोलस्थदृग्वृत्तेयत्रलगतितत्रचंद्राकाशगोलस्थ
कदंबप्रोतश्लथवृत्तमानीयतद्वृत्तेविक्षेपवृत्तदृग्वृत्तांतरंचंद्रनतिः·सूर्यनतिरूप्राग्वत्तैव·तत्रार्कचंद्र
योः खार्द्धदृक्दिङ्गतत्वेतयोर्नत्यांतरमेवतयोरं तरंस्पष्टनतिः·भिन्नदिङ्गतत्वेतुनत्योर्योगएवतयो
रंतरंस्पष्टनतिः यद्यपिसूर्यचंद्रयोः शरमूलाद्याधिष्ठितत्वेनशरांतरितयोर्नत्योरेकदिग्यवस्थानाभावादंत
रयोगरूपस्यस्पष्टनतेरदर्शनात्तथापिचंद्रबिंबानुरुद्धचंद्रगोलस्थभूपृष्ठसूत्रप्रदेशस्थानेसूर्यबिंबा

नुरुद्धसूर्यगोलस्य भूपृष्ठसत्रप्रदेशागतभूगर्भसत्रसंबद्धचंद्रगोलाकाशप्रदेशास्यनंतपोरंतरस्यस्पष्ट
शरस्यचंद्राकाशगोलस्यस्यगणितागतमध्यमशरनतिद्वयसंस्कारेणसिद्धेर्लाघवेनप्रथमंन
सोरेवसंस्कारागीकाराद्युक्तमेव·तथाहि·दृक्क्षेपोद्धपार्यदिदक्षिणास्तत्रचंद्रशरोदक्षिणाश्चेत्तदास्य
स्पष्टशरज्ञानार्थंबिंबांतरस्यमध्यमशरेचंद्रनतिहीनासूर्यनतिर्योज्यतिसिद्धेचंद्रनतेरधिकत्वात्सूर्यनतस
नचंद्रनतिहीनेतिदक्षिणानसोरंतरदक्षिणामपिभिन्नदिग्यंतरमितिसंस्कारानुगमार्थंनतांतररूपस्य
स्पष्टनतिरुत्तराकल्पिता·चेदुत्तरशरस्तदासूर्यनतिहीनाचंद्रनतिर्योज्यातस्तदंतररूपस्यस्पष्टनतिर्यदिसूर्यस्य
तदादक्षिणत्वादुत्तरशरेहीना·यदिचंद्रस्यतदादिगेकपोगादृतिसंस्कारानुगमार्थमुत्तरास्यस्पष्टनतिःकल्पिता·
अथयदिद्वयोर्दृक्क्षेपउत्तरस्तत्रचेद्दक्षिणशरस्तदाशरसूर्यनतिहीनाचंद्रनतिर्योज्येत्तरनतांतररूप
स्यस्पष्टनतिर्यदिसूर्यशरोपातदादक्षिणशरहीना·यदिचंद्रशरोपातदेकदिक्सिसंस्कारानुगमार्थंस्पष्टनतिर्दक्षिणा
कल्पिता·यदिशरउत्तरस्तदाशरसूर्यनतिर्योज्याचंद्रनतिहीनेतिचंद्रनतेरधिकत्वात्सूर्यनतसूनचंद्रनतिरू

३०२

पोत्तरस्यस्पष्टनतिर्भिन्नदिग्यंतरमितिसंस्कारानुगमार्थंदक्षिणाकल्पिता·अथद्वयोर्भिन्नदिग्दृक्क्षेपद्वयोर्ननी
भिन्नदिशोशरहीनेस्यस्पष्टशरार्थंकार्यइतितथोगरूपंस्पष्टनतेरकदिक्त्वियमाभावेपिभिन्नदिग्यंतरमितिसं
स्कारानुगमार्थंशरदिग्भिन्नदिक्कल्पनेत्रसूर्यदृक्क्षेपदिक्कंफलितमितिसंक्षेपः॥ ७७॥ ॥एतन्मतमु
पसंहरन्नुपपयति·इतिब्रह्मगुप्तोक्तमेतन्नयुक्तंयतःप्रत्यक्षाणभूतेनशीस्यात्·अतस्तत्रतस्यार्कशीतिःसुयुक्ता
त्रिभानांगवाणान्नसिद्धाभवेत्सति·इति·पूर्वंप्रतिपादितं·ब्रह्मगुप्ताचार्यकल्पितं·दृक्क्षेपमंडलेयुक्तेप
मंडलेनभानोश्चंद्रस्यबिंबमंडलेनयुत इतिस्फुटब्रह्मसिद्धांतोक्तः·तदनुयामीश्रीपतिरपि·त्रिगुणहरहित
लग्नाद्याभ्यसोम्यपुणानुधनुरधिकविहीनंदक्षिणस्यांनतौतु·रहितयुतमुदिच्यांसिंजिनीतस्यदृग्ज्यादृ
सभवतिहिमरश्मेरिति·एतत्·ब्रह्मगुप्तमतं·नसत्·अत्रहेतुमुपपादयति·यतइति·शराभावेचंद्रबिंबक्रां
तिवृत्तेयस्मात्स्यादतोहेतोस्तत्र·चंद्रशराभावे·तस्य·चंद्रबिंबस्य·सूर्यनतिप्रकारायुक्तियुक्तोगोलसिद्धः सू
र्यस्यशराप्रसिद्धाक्रांतिवृत्तस्थत्वात्केवलदृक्क्षेपात्सूर्यनतिर्गोलसिद्धातथाचंद्रस्यशराभावेक्रांतिवृत्तस्थ

त्वेनसूर्यवद्रविशेषाकेवलदृक्क्षेपान्नसानयनंगोलयुक्तिसिद्धमितिभावः॥अतःफलितंहेतुमाहत्रिभोनां
गबाणादिति॥सा॥सूर्यरीत्यभिन्नागोलयुक्तिसिद्धाचंद्रनतिस्त्रिभोनलग्नद्वारसंस्कृतदृक्क्षेपात्॥निष्पन्ना
नस्यात्॥चंद्रद्वाराभावेभवदुक्तचंद्रनतिर्भभिन्नरतीतिभावः॥८॥॥ननुचंद्रस्यद्वारसत्वेभवदुक्तरीतिः॥द्वारा
भावेचसूर्यरीत्यैवचंद्रनतिरितिमंदानामपिसुज्ञेयत्वान्नोक्तदोषइत्यस्वरसादूषणांतरमाहकिंचत्रिभोनां
गद्वाराप्रसिद्धोभवत्प्रकाराद्रपिसूर्यरीतिः॥सागोलसिद्धाद्वाद्विबाणसत्वेनजायतेचिंत्यमिदंहिसुज्ञैरिति॥
त्रिभोनलग्नस्यद्वारसंबंधिन्यप्रसिद्धिः॥द्वाराभावइत्यर्थः॥भवदुक्तविधेः॥प्रार्थरीत्याद्योरकदृक्क्षेपान्नसा
नयनसिद्धिरस्तीत्यपिद्वार्थः॥सूर्यरीतिर्भवति॥सा॥चंद्रस्यसूर्यरीतिः॥चंद्रद्वारसत्वे॥गोलयुक्तिसिद्धानभ
वति॥तत्रद्वारोसुसासूर्योद्विन्नदृक्तस्यत्वेनैकदृक्क्षेपात्मसक्षसिद्धनत्यसंभवइतिभावः॥दूषणमुपसंहर
ति॥चिंत्यमिति॥हिउक्तदूषणात्॥त्रिभोनलग्नद्वारस्यगोलयुक्तिसिद्धचंद्रनतावन्वयव्यतिरेकाभ्यांसंबंधा
भावोपपादनेनाहेतुत्वप्रतिपादनरूपात्॥सुतरां॥गोलपदार्थतत्वाभियुक्तैः॥इदं॥ब्रह्मगुप्तोक्तं॥चिंत्यं॥विचा ३०२

रणीयंसदसद्धेतुतस्माद्विक्षेपदृक्साधिदृक्क्षेपदृक्तेचंद्रदृक्क्षेपांगीकरणमनुचितमेव॥केचित्सपातदृग्गं बजे
पुणोक्तिसंस्कृतंतदसदित्यार्यभटोक्तं॥ननुबंभास्कराचार्यैःसिद्धांतशिरोमणौसूर्यग्रहणाधिकारेचापी
कृतस्यास्यतुसंस्कृतस्यत्रिभोनलग्नोत्थद्वारेणजीवा॥दृक्क्षेपइंदारिस्पनेनकथमुक्तं॥तैःसर्वत्रपदार्थतत्वस्यगो
लयुक्तयानिर्णीतत्वादितिचेन्न॥ब्रह्मगुप्तपक्षेणात्रंथनिर्माणाद्भोपतिवत्तथोक्तेर्नतुवस्तुस्वरूपस्थित्या॥कथ
मन्यथातैःसिद्धांतशिरोमणिभाष्यस्वरचितमिताक्षरासंज्ञे॥द्वाभ्यांदृक्क्षेपार्थंयद्दिनिभलग्नेषुणाचसंस्करणं॥
जिष्णुजमतंनदुक्तंनतन्मतंबभियुक्तिमिदं॥यत्राक्षोजिनभागाल्लग्नार्कदृतुलादिमाबुदयेपातः किलगदृष
दूसमंमंडलवत्तदापदृक्तंस्यात्॥अर्कोल्लंबितचंद्रोनजहासपमंडलंस्वविक्षिप्तः॥त्रिभद्वारसंस्काराल्लतिरत्रा
यातिसाम्यर्थसक्तंसंगतेन॥८१॥ ॥ब्रह्मगुप्तोक्तस्यदूषणविशेषावधानोक्तपासमुद्धरति॥अथास्मिन्मते
दर्शमध्यग्रहेंदुः॥द्वारायोगलिप्तानतौसंस्कृताश्चेत्॥विलोमंस्फुटास्यान्नतिर्वेदुबाणास्त्रिभोनांगबाणास्तपस्या
त्रबोध्यइति॥अथानंतरं॥समाधानविचारणे॥अस्मिन्ब्रह्मगुप्तोक्तमते॥दर्शमध्यग्रहेंदुः॥क्षमांतकालिकचं

द्रभागसहत्साधितमध्यग्रहणकालिकचंद्रयोः योरारोनयोरंतरकलाः ततो ब्रह्मगुप्तोक्तप्रकारानीतचंद्रन
तोकलात्मिकायां विलोमं त्रिभोनलग्नरारसंस्कारवैपरीत्येनेत्यर्थः यदि संस्कृतात्सदा चंद्रनतिः स्फुटा गो
लसिद्धास्यात् अत्र रारांतरमेकदिक्के विभिन्नदिक्के रारयोर्योगरावांतरमितिध्येयं अत्र बध्यानगौरवात्समा
धानांतरमाहवेति पक्षांतरे त्रिभोनलग्नीयरारमुपेक्ष्यक्का अत्र त्रिभोनलग्नरारस्थाने चंद्ररारणवदृक्षेप
संस्कारार्थं बोध्यः तेनपूर्वोक्तगौरवनिरासः अत एव त्रिभोनलग्नोत्थरारेणोत्पस्यसिद्धांतशिरोमणिमरी
चौ मया त्रिभोनलग्नमुक्तमुसन्नं यस्मादिति बहुधा हेत्वसदनसूर्योपस्थितावपितत्प्रसिद्धादर्शनकालि
कसूर्यचंद्रयोः समत्वाच्चंद्ररारदृग्पर्यारगमाख्यातः ॥८२॥ ॥एतत्समाधानं भास्करोक्तिस्वात्मभाणमिवा
पितत्वनिर्णयाद्दूषयति समाधानमेतत्कृतं भास्करार्यैः परं त्वत्र युक्तिं न पश्यामि गोले यतः क्रांतिवृत्ताद्दि
गंतरवाल्लिप्तरात्राख्यवृत्तस्य परिसारारणेति एतत्पूर्वपद्योक्तं समाधानं भास्करश्चात्सावार्यश्च भास्करपंडि
तैः भास्कराचार्यैः कृतं मिताक्षरासंज्ञे भाष्ये उक्तं तथाहि यद्ब्रह्मगुप्तनविमंडलकक्षावृत्तप्रकल्पनतिरानी

MEMORIAL

तासापियुक्तियुक्ता किंतु साधिमंडलावधिरापातानकक्षामंडलावधिरनोलंबनकालेनचालितस्य विधो
र्यावान्विक्षेपो यावांश्चदृग्गतिकालिकस्तयोरंतरं त्रिभोनलग्नरारसंस्कृतार्वदृक्षेपरूपचंद्रदृक्षेपानीतचं
द्रनतौ त्रिभोनलग्नरारयुतोनक्रमेणानयुतं कार्यमितिविशेषश्चंद्रनतौ ज्ञेयः अथवा त्रिभोनलग्नरारस्था
नापन्नं चंद्ररारस्वदिक्कं सूर्यदृक्षेपधनुषि संस्कुर्यात् तज्जाचंद्रदृक्षेपोत्साडुक्तदिग्गानतिश्चंद्रस्यसंस्कास
न्नतिर्ज्ञेयं ग्रहणारस्याल्पत्वेन सूर्यसिद्धांताधार्थग्रंथेस्वल्पांतरादयं विशेषउपेक्षितइति एतत्समसूर्या
स्तत्रैवतैरवोक्ताः लंबनकालजरारांतरमस्यांबस्तंनतौ यदि क्रियते स्पष्टैवस्यारणवा चंद्रस्यरारणासंस्कृ
स भानोर्दृक्षेपधनुः साध्यास्वल्पांतरानतिस्तस्मात् ग्रहणास्वल्परारत्वात्स्वल्पांतरतानतेर्यस्मात् तस्मान्ने
दं पूर्वैरर्कोन्नाधेस्तथाकृतं कर्म आसप्रतिभासो वामयोदितः किंजगद्विरोधेनेति इदं दूषयति परं त्विति भा
स्करोक्तावपीत्यर्थः अत्र समाधाने गोलयुक्तिं नाहं पश्यामि गोलयुक्तिसिद्धं समाधानमिदं नेत्यर्थः प्रथमस
माधाने गोलयुक्त्यभावे पि द्वितीयसमाधाने चंद्ररारसंबंधमान्वयव्यतिरेकाच्च गोलयुक्तिसिद्धत्वमेवास्यतो

हेतुमाह यतइति · क्रांतिवृत्ताद्विक्षेपवृत्तं · चारतुल्यांतरेणाहोरात्रवृत्तरीत्या · यथा विषुवद्वृत्ताक्रांत्यंतरेणसर्वे
तो लग्नमहोरात्रवृत्तानितद्दिस्पर्शः · गोलेनैवास्ति · येनदृक्क्षेपमंडलेत्रिभोनलग्नस्थानाद्विक्षेपवृत्तैकदेशाच्चंद्र
चारेणांतरितः स्यादितिचंद्रचारेणोक्तचंद्रदृक्क्षेपउपपन्नः · किंतुयथा विषुवद्वृत्ताक्रांतिवृत्तंतथाक्रांतिवृत्ता
द्विक्षेपवृत्तमतोदृक्क्षेपमंडलेत्रिभोनलग्नस्थानाच्चंद्रविक्षेपांतरेणविक्षेपवृत्तेनैव · तेनचंद्रचारसंस्कारेणाचं
द्रदृक्क्षेपः स्थूलः · अतएवसाध्यास्वल्पांतरानतिस्तस्मादितिभास्कराचार्यैरेवसम्यगुक्तं · तस्माच्चंद्रदृक्क्षेपः
स्यानिर्वचनीयत्वादिदंचंद्रनतिसाधनमयुक्तमेव ॥ २३ ॥ ॥ अथस्वमतेनदृक्क्षेपानयनार्थंप्रथमंगोलेत
त्स्वरूपंदर्शयति · अत्राभातिविलग्नपद्भुतलग्नास्यप्रदेशाद्ध्येक्रांतास्यवलयश्लथंसुवलयंप्रोतंभवेद्यच्चलं ·
तल्लग्नराशिबिंबकेंद्रगमिदंदृक्क्षेपवृत्ततः स्वार्द्धांतंत्विहयेलवागणितजास्तज्जेंदुदृक्क्षेपकइति · अत्र · व्रसगु
णाप्तंगीकृतचंद्रबिंबानुरूपनक्षत्रजीमदृक्क्षेपविषये · मम · आभाति · गोलतत्स्वरूपंसमनंतरोक्ततत्त्वविचारवि
षयंभवतीत्यर्थः · आभातीत्यनेनचंद्रचिह्नाभिप्रायिकनसम्यक्पगमेनपूर्वोक्तमार्षमतमेवसम्यक् · प्रसक्त

३०५

चंद्रबिंबानुरोधेननतिविचारस्तेनदितिभावः · तदाहविलग्नेति · क्रांतिवृत्ते · भूगर्भक्षितिजवृत्तपूर्वापरभा
गैकदेशलग्ने · तत्स्थानदृश्येयत् · सुवृत्तंश्लथंचंचलंप्रोतंभवेत् · तत् · इदंचंचलंवृत्तं · चंद्रबिंबकेंद्रसंक्तं · दृक्क्ष
पवृत्ते · त्रिभोनलग्नीयदृग्वृत्तेपत्रलग्नं · ततः · तत्स्थानमारभ्यसर्पः स्वार्द्धांतं · स्वमध्यपर्यंतं · इह · दृक्क्षेपवृत्ते ·
येंदोस्तेषांज्याचंद्रदृक्क्षेपः · तेषामंशानांज्ञानंकथंस्यादतोंशाविशेषणामाहगणितजाइति · वक्ष्यमाणागणि
तविधिनोत्पन्नाइत्यर्थः ॥ २४ ॥ ॥ तत्रचंद्रदृक्क्षेपज्ञानार्थंसूर्यदृक्क्षेपांशानांसंस्कारयोग्यंशरविशेषंपथा
भ्यामाहभत्रयोस्थगुणावर्गतः राशीषुज्यकाकृतिविहीनतः पदं · तत्तलग्नरहितेंदुकोटिजज्या त्रिराशिगु
णासंगुणाहृता ॥ २५ ॥ ॥ योलब्धवर्यत्रिगुणोस्त्वर्गोतदंतरान्मूलमनेनभक्ताः त्रिज्याशरज्याहतिरत्रस्त्र
चापभवेत्संस्करणार्थमेतदिति · त्रिज्यावर्गात् · चंद्रविक्षेपज्यावर्गोणाहीनान्मूलंग्राह्यं · लग्नोनचंद्रस्यभुज
द्वाराकोटिस्तस्याहसन्नाज्या · त्रिभज्यया संगुणाः तेन · पूर्वानीतेनमूलेनभक्ता · फलवर्गात्रिज्योत्पन्नवर्गोयो
स्तस्तयोरंतरान्मूलंग्राह्यं · त्रिज्याशरज्ययोरभिहतिः · अनेन · द्वितीयेनाग्रवर्तिमूलेनभक्ता · लब्धस्य

नुर्भागाद्यं यस्यात्तदेतत्· चंद्रशाराद्युत्पन्नं· अत्र· चंद्रनतानयने संस्कारणार्थं· चंद्रदृक्क्षेपसिद्ध्यर्थं· त्रिभो
नलग्ननतांशानां संस्कारनिमित्तभावेन· अनेन चंद्रशारदिक्कनतांशानां संस्कारः कार्यस्तन्मा· चं
द्रदृक्क्षेपइत्यर्थः· तथा च त्रिभोनलग्नं दिक्षितिपूर्वोक्तपारिभाषिकं नक्षत्रगुणाभिमतं योगार्थकमित्यर्थी
कृतं॥२६॥ ॥लाघवेनैतद्दृक्क्षमाणामत्र सूचयति· त्रिज्याशारज्याहतिरंगहीनशीतांशुदोर्ज्याविस्तास
वापं· स्थूलं भवेत् संस्कारणार्थमस्य सुवासनास्यष्टतरामरीचाविति· त्रिज्याशारज्ययोरभिहतिर्लग्नानचंद्र
स्य भुजज्यया भक्ता फलस्य धनुश्चंद्रशारदिक्कं त्रिभोनलग्ननतांशानां संस्कारार्थं स्यात· नन्वेवं पूर्वोक्तं गुरुभूतं
व्यर्थमिसत आह स्थूलमिति· सूक्ष्मासन्ने· तथा चातिसूक्ष्मापेक्षया पूर्वोक्तं· सुखार्थं त्वेतदिति भावः· अस्याप्रमाणा
त्वं निरस्यति· अस्येति· चंद्रशारोत्पन्नस्य संस्कारपदार्थस्योक्तस्य· सुवासना· आनयनोपपत्तिः मत्कृतसिद्धांतशि
रोमणौ मरीचौ· अस्यतमभिव्यक्ता· अस्मिन्नंथे तद्दृक्निरूपणं विस्तरभयात· तथा चोपपत्तिसिद्धस्यना
प्रामाण्यमिति भावः· तदुक्तोपपत्तेः सार स्तु चंद्रदृक्क्षेपस्वरूपस्य प्रागर्थितत्वात्क्रांतिवृत्तस्थत्रिभो ३०६

नलग्नस्थानाल्लग्नास्तलग्नप्रोतचलवृत्तदृक्क्षेपवृत्तसंपातपर्यंतं यो दृक्क्षेपवृत्तभागश्चंद्रशाराधिकोपि
चंद्रशारदिक्कस्त्रिभोनलग्ननतांशेषु संस्कृतः कार्य इति स साध्यः स तु क्रांतिवृत्तं विषुववृत्तं ग्रहबिंबकेंद्र
सक्तालग्नास्तलवृत्तं क्रांतिवृत्तं शरं क्रांतिं पाक्प्रतिपादितसंस्कारयोग्यदृक्क्षेपवृत्तभागं परमक्रांतिं प्रक
ल्प्य कल्पितक्रांतिवृत्तेग्रहबिंबकेंद्रलग्नास्तलग्नान्यतरासन्नयोरंतरालं भुजं प्रकल्प्य षड्भुजज्यया भीष्टशार
ज्यानुरूपक्रांतिज्यातदालग्नास्तलग्नान्यतरस्थानदृक्क्षेपवृत्तांतरस्थितकल्पितक्रांतिवृत्तप्रदेशस्थितनवत्यं
शाज्यारूपत्रिज्यया केसतुपातलब्धपरमक्रांतिज्यायाश्चापरूपः· यद्यप्येतत्कल्पितक्रांतिवृत्तस्थषड्भुजज्याज्ञा
नाभावादनुचितं तथापि कीदृशदिशयंत्रजकोटिजीवास्त्रिज्यागुणाः स्वस्वदिनज्यया स्युरिति सिद्धांतशिरो
मणिकर्तृवेपरीत्येन तत्कृतानात· तथाहि· यथा कीदृशदिशयंत्रकोटिजीवाः क्रांतिवृत्तस्थाः स्वधराक्षवृत्तव्यासार्द्ध
प्रमाणेन धराक्षवृत्ते जीवास्ताउक्तानुपातेन धराक्षवृत्ते क्रांतिवृत्तव्यासार्द्धरूपत्रिज्याप्रमाणेन कृतास्तथा
प्रकृते पि कल्पितविषुववृत्तस्थलग्नग्रहबिंबांतरभुजकोटिज्या कल्पितविषुववृत्ते कल्पितक्रांतिवृत्तव्यासा

ईरूपत्रिज्याप्रमाणेन· साद्वारज्यारूपेक्रांतिज्यावर्गोनत्रिज्यावर्गपदरूपक्रज्याप्रमाणेनपरिणता
कल्पितविषुववृत्तेतद्ध्रुवज्याव्यासार्द्धप्रमाणेनसिद्धासैवत्रिज्यापरिणताकल्पितक्रांतिवृत्तेग्रहबिंबकें
द्रकल्पितक्रांतिवृत्तदृक्क्षेपवृत्तसंपातयोरंतरभुजज्या· तेनप्रथमपद्योक्तमुपपन्नं· तद्वर्गोनत्रिज्याव
र्गमूलंलग्नग्रहबिंबकेंद्रांतरभुजज्याकल्पितक्रांतिवृत्ते· अनयापूर्वानुपातेनपरमक्रांतिज्यायाध्यनु
दृक्क्षेपवृत्तभागइतिद्वितीयपद्योक्तमुपपन्नं· द्वितीयानयनोपपत्तिस्तु विषुवद्वृत्ताक्रांतिः क्रांतिवृत्तस्थ
ग्रहभोगेनसाधितात्पाक्रांतिवृत्ताच्छरोविक्षेपवृत्तस्थग्रहभोगप्रमाणेनसाध्यान्यथाक्रांतिसाध्य
नस्यविषुववृत्तस्थग्रहभोगप्रमाणेनसाधनोपपत्तेः· अतोयथाक्रियागौरवात्तदपेक्षयालाघवाक्रां
तिवृत्तस्थग्रहभोगेनैवशरसाधनमंगीकृतंतथात्रापिवस्तुभूतक्रांतिवृत्तस्थलग्नग्रहचिह्नांतरज्य
यैवोक्तानुपातेनदृक्क्षेपवृत्तखंडमानीतंस्थूलं· कल्पितक्रांतिवृत्तस्थभुज ज्याया अग्रहात्· परिचरार्धी
नांक्रांतिवृत्तस्थत्वात्तत्प्रमाणग्रहभोगप्रामाण्येनशरक्रांत्यादिसाधनंसमुचितंन विक्षेपवृत्तस्थग्रह ३८७

भोगादिना· अन्यथाशरलंबनादेर्विक्षेपवृत्तस्थग्रहभोगात्साधनापत्तेस्तदानुद्दि तीयानयनमेवपू
र्वग्रंथपरीक्षातिसूक्ष्मगणितेस्थूलाप्रसंगादितिध्येयं॥२०॥ ॥अथसूर्यग्रहणक्रियोपयुक्तंस्पष्टशर
माहमध्यग्रहाभेहसिचंद्रबाणोनतैकभिन्नाराकयाक्रमेण· युतोविमुक्तः स्फुटबाणाद्वसंस्कारदिक्कार
विसंग्रहार्थमिति· पूर्वोसकृत्साधितमध्यग्रहणकालेचंद्रस्यशरः पूर्वरीत्यायः स्यात्स एकभिन्नदिशया
स्पष्टनत्याक्रमेणयुतोतिरितश्चस्पष्टशरः· एवकारात्तस्याः संस्कारीत्यासंस्कारनिरासः· संस्कारदिक्कः· योगे
पूर्वशरदिक्· अंतरेनुशरशेषशरदिक्· नतिशेषनतिदिगित्यर्थः· सूर्यग्रहणगणितक्रियानिमित्तंस्या
त्· अत्रोपपत्तिः· आर्षमतेभूपृष्ठसूत्राच्चंद्रचिह्नस्यनतंतरेणायाम्योत्तरयोर्नतत्वाच्चंद्रचिह्नाच्चंद्रबिं
बकेंद्रस्यशरांतरेणसत्वात्तत्संस्कारेचंद्रगोलेभूपृष्ठसूत्राच्चंद्रबिंबकेंद्रपर्यंतंस्पष्टशरात्मकंयाम्योत्तरमंतरंस
र्यचंद्रयोर्दर्शनयोग्यं· ब्रह्मगुप्तमतेतुचंद्रगोलेसूर्यक्रांतिवृत्तस्थभोगागतभूपृष्ठसूत्रस्थानंचंद्रबिंबकेंद्रगतभू
गर्भसूत्रस्पष्टलोहगोलस्थानगतभूपृष्ठसूत्रस्थानंचंद्रगोले· तयोः स्थानयोरंतरस्यचंद्राकाशगोलस्थस्यया

म्योन्तरस्यस्पष्टत्वेनस्पष्टनस्पर्शनतिसंस्कारोपपन्नोप्रतिपादनादतिव्यक्तोपपत्तिर्निरूपितैव ॥८८॥ ॥
अपास्यत्वारस्यस्पष्टत्वंसूर्यचंद्रयोर्बिंबेचपूर्वोक्तरीत्याप्रसाध्यचंद्रग्रहणागणितोक्तिवद्भासःस्थित्यर्द्धम
र्द्धैकवारंकार्यइत्याहचंद्रग्रहोक्तरूपमपिप्रसाध्यःस्पष्टस्तनोर्कंदुतनूस्फुटत्वेनाभ्यःखरांशाःपिहि
तंपुरावत्सकृद्विध्यस्थितिमर्द्धखंडइति·चंद्रग्रहणाग्रंथांतर्गतविधिनिरूपणेन·द्वारो क्रमज्याक्रमजीव
यारित्यादिना·अयं·प्रतिपादितोनतिसंस्कृतःद्वारःस्पष्टःसाध्यः·नतिसंस्कृतस्यैवात्रस्पष्टत्वात्सर्वप्रकार
णास्पष्टोनसाध्यइत्यारंकायानिवारकोपिराहः·तेनस्पष्टःस्पष्टोतिस्पष्टःसाध्यइत्यर्थः·द्वितीयस्यंत्वमर्द्ध
ज्याकारस्यसपूर्णज्याकारत्वं·अतएवानंतरंसूर्यचंद्रयोर्बिंबेत्रिप्रश्नाधिकारोक्ते·चंद्रग्रहोक्तया·बिंबस्यलिप्ता
युगभागजीवेत्यादिपद्येनस्पष्टसाध्ये·चःसमुच्चये·अत्रस्पष्टत्वंबिंबस्यभासाकारत्वं·एभ्यः·अतिस्पष्टत्वा
रसूर्यचंद्रस्पष्टबिंबेभ्यः·चंद्रग्रहोक्तया·संछाद्यसंछादकबिंबयोगखंडमित्यादिना·सूर्यस्यग्रासोविध्यः·पु
रावत्·चंद्रग्रहणोक्तया·मानैकखंडस्येत्यादिसार्द्धपद्येन·मानांतरार्द्धस्येत्यादिसार्द्धपद्येनच·स्थितिमर्द्धयोः

३०८

खंडेक्रमेणायथासंभवंकार्यं·परंतुसकृदेकवारं·निष्पंनकालादित्यादिपद्याभ्यांनासकृत्साध्ये·अत्रानयो
स्तदभ्यरीत्यावश्यमाणायेवासकृत्साधनावश्यकत्वात्॥८७॥ ॥स्पर्शकालज्ञानमाहस्थित्यर्द्धोनामांततोलं
बनंयत्तत्रकालस्पष्टबाणोद्भवेन·स्थित्यर्द्धोनामांतक्रनेथनर्णंकार्यंपवंस्पर्शकालोसकृत्यादिति·स्थित्य
र्द्धोनादर्शांतासर्वरीत्यालंबनंतत्·स्थित्यर्द्धहीनदर्शांतकालिकस्पष्टतरद्वाराद्भुतस्तेनप्राग्युक्तरीत्यास्थित्यर्द्ध
नहीनदर्शांतेधनमथवायथोक्तंकार्यंस्पर्शकालः·एवमभयारीत्या·स्पर्शकालिकंलंबनंस्पर्शकालिकस्प
ष्टतरद्वारोत्पन्नेनस्थित्यर्द्धनहीनदर्शांतिकालेधनर्णंकार्यमितिरूपया·असकृत्·स्पर्शकालः सूक्ष्मःस्या
त्·अत्रोपपत्तिः·स्थित्यर्द्धनोमध्यग्रहणकालः स्पर्शकालस्तत्रस्पर्शमध्यग्रहणकालिकयोर्लंबनयो
र्भेदान्मध्यग्रहणकालिकलंबनसंस्कारसिद्धेः स्पर्शकालिकलंबनसंस्कारस्यसूक्ष्मस्यासिद्धेश्चप्रथमं
स्पर्शकालाज्ज्ञानात्स्थित्यर्द्धनादर्शांतकालोलंबनासंस्कृतःस्पर्शकालःस्थूलःकल्पितस्तत्कालिकंलंब
नंपूर्वलंबनासंस्कृतस्पर्शकालस्यापिस्पर्शकालिकस्पष्टतरद्वाराद्भूतस्थित्यर्द्धभावात्स्थूलत्वेनतंस्य

र्शकालमुपेक्ष्यस्वकालिकस्पष्टतरज्ञारोद्भूतस्थित्यर्द्धेनदर्शांतकालेलंबनासंस्कृतस्पर्शकालरूपेसंस्कृतंसूक्ष्मास्त
नः स्पर्शकालस्तत्तदुक्तरीत्यामुहुः सूक्ष्मः स्पर्शकालः स्यात्॥९०॥ ॥अथोक्तरीतिंसूक्ष्ममोक्षसंमीलनोन्मील
नकालज्ञानार्थमतिक्लिष्टांस्तदभिप्रायिकेस्थित्यर्द्धमर्द्धाद्ग्राहस्थित्यर्द्धाधिकदर्शांताभवतियः प्रागुक्तयुक्तरी
त्यामुहुर्मोक्षःकालइत्यर्थमर्द्धजदलनेवमुहुः स्तः स्पुटदर्शांतात्सुगमोपपत्तिसहितेसंमीलनोन्मीलनतन्मध्य
ग्रहकालजांतरमितेस्थित्यर्द्धमर्द्धाद्भुक्तेइति॥ स्थित्यर्द्धयुक्तदर्शांतकालात्॥ पूर्वोक्तरीत्या॥ लंबनंस्वकालजस्पष्ट
तरज्ञारोद्भूतस्थित्यर्द्धाधिकदर्शांतकालेधनर्णांकार्यमोक्षकालइतिरूपया॥ मुहुर्यः कालः स्थिरः सइह॥ सूर्य
ग्रहणेमोक्षः कालः सूक्ष्मः॥ अनंतरं॥ मर्द्धाद्भुक्तेन॥ एवं॥ हीनपुतादर्शांतकालात्॥ प्रागुक्तरीत्याप्रसंकमसकृद्योका
लौतयोः॥ स्पुटसूक्ष्म॥ संमीलनोन्मीलनेस्तः॥ नन्वत्रोपपत्तिर्नोक्तेतिकथमुक्तरीतेः प्रामाण्यंतेयमित्यत्रा
कायाउत्तरमेतद्विशेषणकथनव्याजादाहसुगमोपपत्तिसहितेइति॥ सुगमास्वतोज्ञेयायोपपत्तिस्तयायुक्त
एते॥ एतद्विशेषणमुपलक्षणात्स्पर्शमोक्षकालयोरप्यभिन्नरीतिरितिध्येयं॥ तथा चोपपत्तिनिरूपणंसुग

MEMORIAL LIBRARY BHAU DAJI

मत्वाद्दपेक्षितमितिभावः॥ तत्॥ स्पर्शमोक्षौसंमीलनोन्मीलनेवा॥ मध्यग्रहणं॥ अनयोर्यौर्कलौताभ्यांजातमं
तरंतत्प्रमाणक्रमेणास्थित्यर्द्धमर्द्धाद्भुक्तेभवतः॥ एतदुक्तंभवति॥ स्पर्शमध्यग्रहकालयोरंतरकालः स्पर्श
स्थित्यर्द्धं॥ मोक्षमध्यग्रहकालयोरंतरकालोमोक्षस्थित्यर्द्धं॥ संमीलनमध्यग्रहणकालयोरंतरकालःस्प
र्शमर्द्धाद्भुक्तेः॥ उन्मीलनमध्यग्रहणकालयोरंतरकालोमोक्षमर्द्धाद्भुक्तेमिति॥ ९१॥ ॥अभीष्टग्रासज्ञानो
पजीव्यभुजेविशेषमाहसूर्यग्रहस्पष्टज्ञारोद्भवेनस्थित्यर्द्धकेनाभिहतोभुजःसः॥ तन्मध्यविश्लेषकरूप
सूर्यस्थित्यर्द्धकासः स्फुटबाहुरत्रेति॥ अत्र॥ सूर्यग्रहणीयेष्टकालिकग्रासानयने॥ चंद्रग्रहणेऽक्तरीसा
योभुजः स्यात्सभुजः सूर्यग्रहणीयांतिमस्पष्टतरज्ञारात्सन्नेनांतिमस्वस्थित्यर्द्धेनगुणितः गृहीतस्थि
त्यर्द्धानुरूपस्पर्शमोक्षान्यतरमध्यग्रहणकालयोरंतररूपायःकालस्तदात्मकंय त्सूर्यग्रहणीयस्थित्य
र्द्धेनभक्तः फलं॥ स्फुटबाहुः सूर्यग्रहणीयाभीष्टग्रासानयनोपजीव्योभुजइत्यर्थः॥ ननुपूर्वोमतोभुजस्तद
पयुक्तः॥ अ त्रोपपत्तिः॥ तन्मध्यांतररूपप्रत्यक्षस्थित्यर्द्धांतर्गतेष्टकालाद्भुजः प्रत्यक्षस्थित्यनुरूपः॥ ग्रा

सस्कर्णांतररूपः कर्णांतरं तु भुजाधीनं · भुजस्तु क्षेत्रानुरोधाद्गणितागतस्थित्यर्द्धानुरूपेण · कथम
न्यथा शरकोटिस्थित्यर्द्धोपजीव्यो भुजः प्रानीतः संगच्छते · न च द्वयोः स्थित्यर्द्धयोस्तुल्यत्वमिति वाच्यं · स्य
र्ग्रामोक्षान्यतरर्कलिकमध्यग्रहणकालिकयोर्लंबनयोर्योगांतरान्यतरणाद्द्वयोः सदांतरितत्वात् · नहि क्षे
त्रलंबनसंबद्धयेनतदंतरानापत्तिः · अतः प्रत्यक्षस्थित्यर्द्धप्रमाणेनायं भुजस्तदागणितागतस्थित्यर्द्धप्र
माणेनकदृत्यनुपातेनागतस्पष्टभुजस्य क्षेत्रसंबद्धत्वं युक्तमित्यपपन्नं ॥७२॥ ॥एवमभीष्टग्रा · सा कां
लानयने विशेषं पद्याभ्यामाह ग्रासास्वकालानयनार्थमाह तन्मध्यभेदस्थितिखंडनिघ्नं · स्फुटेषुजस्वस्थि
तिखंडभक्तं तन्मध्यभेदस्थितिखंडशुद्धं ॥७३॥ कालो भवेत्तत्समयस्फुटेषुजातस्वकालानयनोपजीव्यात् ·
फलाद्यथोक्तं मुकुरेवमत्र सत्येष्टकालः सुगमोपपत्तिरिति · इष्टग्रासास्वेष्टकालानयननिमित्तं · चंद्रग्रह
णोक्तग्रा · ग्रासांगुलाद्यः स्वहरेण निघ्नस्तद्बिंबैकदलेन स्वकर्णः · तन्मध्यकालेषुजवर्गभेदान्मूलं षडघ्न
परसेर्ततघ्नं · त्रिभज्यया तद्धनुरभ्रसूर्यैर्निघ्नं जवांशांतरहृत्फलेन यदाप्तं फलं · तत् · तन्मध्यकालांतररूपप्र

त्यक्षस्थित्यर्द्धेन गुणितं · स्पष्टतरशरोत्सन्नांतिमस्थित्यर्द्धेन भक्तं · फलं · तन्मध्यकालांतररूपप्रत्यक्षस्थित्यर्द्धा
शुद्धमिष्टकालः स्यात् · नाकालिकस्पष्टतरशरजातात् · प्रागुक्तरीत्या फलात् · स्वकालज्ञानोपजीव्यभूतात् · यथोक्तं
तन्मध्यभेदस्थितिखंडनिघ्नमित्याद्युक्तं कर्मकार्यं · एवमुक्तरीत्या यावद्विशेषावध्यसकृत् · अत्र सूर्यग्र
हणासूक्ष्मइष्टकालः स्यात् · कथं सूक्ष्मत्वं निर्णीतमित्यतः कालविशेषणमाह सु गमेति · सुगमोपपत्तिर्य
स्यार्थः तथा चोपपत्तासूक्ष्मत्वं निर्णीतमिति भावः · अत्र तदप्रतिपादने सुगमेति हेतुभूतं · तथा हि · चंद्र
ग्रहोक्तग्रा · फलं स्पष्टतरशरोत्सन्नस्थित्यर्द्धांतर्गतं · न प्रत्यक्षस्थित्यर्द्धांतर्गतं · अतो गणितागतस्थित्यर्द्धप्रमाणे
नेदं फलं तदा प्रत्यक्षभूततन्मध्यकालांतररूपस्थित्यर्द्धेन किमित्यनुपातेन फलमिष्टोनस्थित्यर्द्धं · तेन हीनं
प्रत्यक्षं स्थित्यर्द्धं कालो यं स्थूलस्तात्कालिकस्पष्टतरशराज्ज्ञानेन मध्यकालिकस्पष्टतरशरग्रहणात् · अत
एव तत्कालिकस्पष्टतरशरादुक्तरीत्या कालः सूक्ष्मासन्नइत्यसकृत्सूक्ष्मः कालः ॥७४॥ ॥अथोक्तग्रहणा
योः परिलेखनिरूपणं सहेतुकं प्रतिजानीते · सूर्यग्रहस्यानवलोकनोक्तेरनिष्टचंद्रग्रहणस्यचाहं · ग्रहद्व

यस्य स्थितिदर्शनार्थं राज्ञो मुदे वक्ष्ये च परिलेखमिति · सूर्यग्रहणस्य · अनवलोकनोक्तेः · नोपरक्तं रविमी
क्षेत्तेऽनेन दर्शननिषेधात् · अनिष्टफलसूचकं यच्चंद्रग्रहणं तस्य · चः समुच्चये · तेन दर्शननिषेधात् · अहं · मु
नीश्वरो ग्रहणाद्द्वयस्य स्थितिदर्शनार्थं · राज्ञः संतोषार्थं च · परिलेखविषयं कर्म · निरूपयामि ॥ ९५ ॥ ॥ तत्र
ग्रास्यस्याक्षवलनानयनोपयुक्तं नतमाह्यग्रहस्य घटगतं दिनार्द्धात्वा पुरावन्नतमानयेच्च · स्पर्शादिका
लेस्वनिशोनयेयात्स्थानं स्वराग्रार्द्धमिदं नतं स्यादिति · सूर्यग्रहणे सूर्योग्रास्यश्चंद्रग्रहणे चंद्रः सचासौ ग्रहश्च
तस्य सूर्यः · स्पर्शादिकाले · स्थितिमध्यमोक्षकालेषु · दिनगतं प्रागुक्तरीत्या ज्ञात्वा · दिनार्द्धं च ज्ञात्वा · पुरावत् · त्रि
प्रश्नाधिकारोक्तप्रकारेण स्थाद्दिनगतं घटगतं रूपकयोर्यदल्पं तेनोनितं दिनदलं नतसंज्ञकं घटनेन गणकेन
नतमानयेत् · कुर्यादित्यर्थः · ननु त्रिप्रश्नाधिकारे दिननतोक्तेः रात्रौ तत्कालेऽपि नतं कार्यमित्यतः प्राह स्वनिशो
नयेयात्स्थानमिति · स्वशब्देन ग्रास्य स्तस्य राग्रार्द्धं ग्रास्यनिशायास्तत्कालयोर्गतमध्यं तयोर्मध्ययदल्पं तेनोनि
तं · इदं शोधनं तं स्यात् · दिनपदस्योपलक्षणत्वेन नतसिद्धिरिति भावः · उपपत्तिस्तु दिनग्रहयोर्याम्योत्तरवृत्तांतरम ३११

होराग्रवृत्तस्थं नतं तथा रात्रौ ग्रहतदासन्नयाम्योत्तरवृत्तप्रदेशांतरमहोरात्रवृत्तस्थं चोन्नतमपि राग्रानुरोधान्न
तसंज्ञमुक्तमिति रूपपन्नं ॥ ९६ ॥ ॥ चतुर्भिः पद्यैर्दिग्वलनं प्राचीनमतेन वदन् स्वमतेन कल्पितं विशेषं च प्रतिजानी
ते · ग्रास्यग्रहाग्रान्तलोत्थबाहुलदोर्गहीनाक्षिभमौर्विकायाः · वर्गासदंतेन हृतारसघ्नतात्मभागोत्थभुजस्य
मौर्वी ॥ ९७ ॥ स्वाक्षांशाजीवागुणिता प्रचापं राग्रार्द्धतः सौम्यमहर्दलांतः याम्यं दिनार्द्धाद्दजनीदलांतो व्यक्षांशरे
भस्तमतो हि याम्यं ॥ ९८ ॥ वलनमाक्षमिदं लवपूर्वकं स्वस्वचरायनवालनसंस्कृतं · भवति बिंबदलेक्षगुणो
हृतस्त्रिभगुणेन गुणोऽस्य फलं स्फुटं ॥ ९९ ॥ वलनसंस्कृतिदिग्वलनं मतं राशिरविग्रहयोस्तु पुरातनैः · मम
मतेऽपि तु रविग्रहे पराशिनोग्रहणे प्रवदाम्यहमिति · ग्रास्यग्रहस्याग्राग्रांकुतलाभ्यां संस्कारेण सन्नायो
भुजस्तस्य वर्गोनाहीनाक्षिज्यायावर्गोन्मूलं ग्रास्यं · षड्गुणितनतघट्यात्मकभागेभ्यउत्पन्नभुजस्य भागात्मकस्य
ज्या · एतेन स्वांकाहतं स्वघटदलेन भक्तं स्पर्शादिकालोत्थनतलवाः स्फुरिति भास्करोक्तानतांशास्तेषां ज्येति रीति
रत्र निरस्ता · अहोरात्रवृत्तस्थानतांशज्यापाग्रहणावश्यकत्वात् · अतएव नतासुरोर्ज्ययेत्यनेन ग्रहणा

वासनाधिकारेस्याएवांगीकारोनास्कराचार्यैः समुचितः कृतः भास्करोक्तग्रहणाधिकारीयनतांशास्तुसमवृत्त
स्थाग्रनुपातास्फुटाः गणितसुखार्थं स्वदेशाक्षांशज्यया गुणिता तेनमूलेनभक्ता प्राप्तफलस्यधनुराक्षं
वलनं राश्यर्द्धमारभ्यदिनार्द्धमध्येस्वेष्टकालेउत्तरदिक्कं दिनार्द्धमारभ्यरात्र्यर्द्धमध्येस्वेष्टकालेदक्षिणदिक्कं
निरक्षदेशादुत्तरभागे दक्षिणभागेतुविपरीतमस्यात् उक्तकालक्रमेणदक्षिणोत्तरं इदमाक्षवलनमंशादि
कं स्वाहनग्राघः ग्रास्यग्रहस्यग्रहणायाधिकारोक्तप्रकारेणायनवलनमानीयतदीयांकेनैकदिशियोगोभि
न्नदिशियंतरमितिरीत्यासंस्कृतं अस्य संस्कृतांकस्यज्या मानार्द्धयोगेनगुणितात्रिज्यया भक्ता फलंस्यधंवलनं
वलनसंस्कृतिदिक्कं चंद्रसूर्यग्रहणयोः पुरातनैर्ग्रंथकारैः स्वीकृतभवति मममुनीश्वरस्यपक्षेतुगणितंपूर्वोक्तं
सूर्यग्रहणे नचंद्रग्रहणे अनंतरंसमनंतरमित्यर्थः चंद्रस्यग्रहणेदृग्प्रकर्षेणासूक्ष्मत्वेनवदामि ॥१००॥ ॥
त्रिभिः पद्यैः प्रतिज्ञातंवदंस्तदुपपत्तिंप्रतिजानंश्चरवलनोपपत्तिरायनवलनोपपत्तिरीत्यासुगमेत्याहस
पातेंदुकोटिजकाचंद्रबाणोक्रमज्यानराशित्रयज्याविभक्ता हतेंदोः परेणरामोर्योग्रचापलवाद्यंशरीयंभवेद्

३१२

तनंतत् ॥१ पातात्यंद्रायनदिक्कंतेपांशरायनाक्षोद्भववालनाभां संस्कारभागज्यकयाविनिघ्नंमानेनवारखंडं
त्रिभजीवयाप्तं ॥२॥ संस्कारदिक्कंवलनं स्फुटंस्यादत्रोपपत्तिंक्रमणुयांप्रवक्ष्ये तत्रापिचंद्रायनवालनोक्तरीत्यैव
बोध्यात्रारवालनस्येति पातयुक्तचंद्रस्यकोटिज्या चंद्रस्यपरमशरांशज्यया गुणिता चंद्रस्यपूर्वागतस्यशरा
स्योक्रमज्यया हीनत्रिज्यया भक्ता फलस्यधनुर्भागाद्यंशरीयंवालनंस्यात् तत् शरवलनं पातयुक्तचंद्रस्याय
नदिक्कंचस्यात् तेषामानीतानांशरायनाक्षोत्पन्नवलनांकानांसंस्करणायंशास्तेषांज्यया मानेनवारखंडगुणितं
त्रिज्यया भक्तं संस्कारदिक्कंस्फुटंवलनंस्यात् उपपत्तिनिरूपणेप्रतिज्ञानीते अत्रेति वलनविषये पातुपपत्तिंप्र
कर्षेणावदामि तांहेश्रोतः सावधानतया त्वंशृणु तत्र उपपत्तौनिरूपणीये अपिशब्दस्तिनशरवलनस्यो
पपत्तिकथनेप्रावश्यकेत्यर्थः चंद्रस्यायनवलनोपपत्तिकथनरीत्या एवकारादन्यरीतिव्यवासः शरवलन
कर्मणाउपपत्तिर्ज्ञेया तथाहि विषुवद्वृत्तप्रान्तादिदिक्कः क्रांतिवृत्तप्रान्तादिदिग्यावतांतरेणावलतितरायनंवल
नंतस्यपरमत्वंविषुवत्क्रांतिवृत्तसंपातयोस्तत्रिभयनसंध्योरभावस्तथाक्रांतिवृत्तप्रान्तादिदिक्कोयावतांतरेण

विक्षेपवृत्तमाद्यादिदिग्भवतितच्चरवलनं ग्रहबिंबस्य विक्षेपवृत्तस्थत्वात् । अन्यथा पातवलनानुपपत्तेः । तस्य
त्वं विक्षेपवृत्तक्रांतिवृत्तसंपातयोस्त्रिभांतरे सपातग्रहायनसंध्योस्तद्भावः । अतस्तद्दीप्तासपातग्रहको
टिज्यात्रिज्यानुल्यापरमशरज्यानुल्यं वलनं तदाभीष्टयासपातग्रहकोटिज्यया किमित्यभीष्टशरवलनज्या
क्रांतिवृत्तानुकारशरोत्पन्नाहाराग्रवृत्ततः शरज्यावर्गोनात्रिज्यावर्गान्मूलेनयासाद्दृनेदृशरवलनं तदात्रि
ज्याभ्यासहृद्दृत्तेकिमितिविक्षेपवृत्तसबद्धं । यद्यपि विक्षेपवृत्तस्थग्रहभागेनैतदानयनं समुचितं तथापि रा
शीनां क्रांतिवृत्तस्थत्वेन तत्स्थग्रहभागादेवतदुपपत्तिः । अन्यथा क्रांतिवृत्तस्थग्रहभागाच्छरसाधनस्यानुपपत्ते
रिति ॥३॥ ॥ अथाक्षवलनोपपत्त्यर्थं समाख्यमाह सर्वतः समवृत्ताच्च याम्योदक्कुजसंगमे । यस्मिन्तिर्यग्गतसूत्रा
णां योगः ससमसंज्ञक इति । समवृत्तात्सर्वप्रदेशेभ्यः दक्षिणोत्तरक्षितिजवृत्तयोः संपाते उभयत्र । तिर्यगतवृ
त्ताकारसूत्राणां यो योगः ससमाख्यः समवृत्तसंबंधात् । समवृत्तदक्षिणोत्तरस्थं समसंज्ञकमित्यर्थः ॥४॥
॥ ॥ सार्द्धश्लोकेनाक्षवलनस्वरूपं गोलेप्रदर्शयन्नेतदार्थार्थमेव सार्द्धश्लोकाभ्यां पूर्वापरयोर्वलनस्वरूपं प्रद

३१३

र्शयन्वलनदिग्उपपत्तिं प्रतिपादयन्नेवं श्लोकचतुष्टयमाह समभ्रवप्रोतवृत्तेन येषूपतयासुधीः । कक्षावृत्त
स्थखेटांकतस्थलात्स्वांकभागयोः ॥५॥ तद्भांतरकविद्याद्दक्सजं वलनदिशां । अथवापरितः खेटचिह्नात्स्वां
कांशकेन्यसेत् ॥६॥ त्रिज्यावृत्तं कुजेतस्मिन्विषुवत्समवृत्तयोः । अंतरं चाक्षजं सौम्ययाम्यं विषुवमंडलं ॥७॥
समवृत्ताद्भवत्स्वपूर्वापरकपालयोः । अतः पूर्वापरनतसौम्ययाम्यक्रमाद्भवेदिति । समयोः प्रोतवृत्तं । भ्रव
योः प्रोतवृत्तं तद्वृत्तगोलपतनपरिभाष्य । कक्षावृत्तस्थखेटचिह्नं प्रतिसुधीः नयेत् । चिह्नस्थस्थपवृत्तसं
पातस्थलात्स्वांकभागयोः नवसंतरितस्थानयोः । तयोः । स्थपवृत्तयोस्तिर्यगंतरं । अक्षासन्नं वलनदिशां
विद्यात् । जानीयात् । दर्शितं वलनं याम्योत्तरयोरेवः परंतु तत्तुल्यमेव पूर्वापरयोः पूर्वादिदि शानियतत्वात् ।
अथवेति । ग्रहभागचिह्नमारभ्य समंतात् । नवसंख्यस्थले । त्रिज्यावृत्तं गोलेन्यसेत्कुर्यात् । तस्मिन्वृत्तेग्रहक्षि
तिजाख्ये । विषुवद्वृत्तसमवृत्तयोरंतरमाक्षं वलनं । चः पूर्वोक्तेन समुच्चयार्थकः । अत्र । वलनस्थाने । पूर्वभा
गे । पूर्वापरकपालयोः । क्रमेणा समवृत्ताद्विषुवद्वृत्तं । उत्तरदक्षिणं भवति । एवं पश्चिमस्थाने समवृत्ता

MEMORIAL

द्विषुवद्वृत्तं दक्षिणोत्तरदिगभिमुखं · परंतु पूर्वस्थानादुत्तरदक्षिणदिशोः क्रमेणासव्यसव्यत्वेन स्थितत्वा
त्पश्चिमभागात्तत्क्रमेणोत्तरदक्षिणदिशोर्दक्षिणोत्तराभिमुखत्वेन परिणतत्वात् · एवमुत्तरदिक्तः पश्चि
मपूर्वयोः क्रमेणोत्तरदक्षिणदिक्कं · दक्षिणदिक्तोपि पूर्वपश्चिमयोरुत्तरदक्षिणदिक्कमतः कारणात्सर्वा
परनेतत्क्रमादुत्तरदक्षिणवलनं भवदिति पूर्वोक्तमुपपन्नं ॥८॥ ॥ नन्वेतावतातदानयनं नोपप
न्नमित्यतः सार्द्धश्लोकाभ्यामानयनोपपत्तिं संक्षिप्तां वदन्नदतिस्पष्टकथनं प्रतिजानीते तत्रोपयुक्तांस
मवृत्तनतज्यामुपपत्त्या सार्द्धचतुर्भिः श्लोकैः प्रतिपादयन्नेवं सप्तश्लोकानाह समाख्यकेद्रादक्षांशोर्यत्तद
क्षांशमंडलं · तत्र ध्रुवात्समप्रोतं चलवृत्तं यदंशकैः ॥७॥ तज्जुगतत्राक्षवलनज्याग्रह घ्नज्यकावृत्तो · ग्र
हक्षितिजवृत्तानुकारिण्यात्रिभजीवया ॥१०॥ परिणामात्कुजेसास्यादथस्पष्टं निरूप्यते · नतकालभुजज्या
तु घ्नज्यावृत्ताश्रितायतः ॥११॥ ग्रतस्त्रिज्यानुरूपासा घ्नज्यथापरिणामिता · विषुवद्वृत्ततोयद्घ्नज्यावृत्तानि
संतिवै ॥१२॥ तथासमाख्यवृत्ताद्भुजचापलवांतरे · भुजत्रिज्यावर्गभेदमूलव्यासार्द्धमंडलं ॥१३॥ उप

वृत्तं तद्घ्नरात्रयोगाग्योर्बहुसूत्रकं · तदर्द्धनतकालज्या घ्नज्या रद्वयमेव च ॥१४॥ उपवृत्तेभिजव्यासदलरु
द्धात्रिभज्यया · परिणामादियं पूर्वापरवृत्तेनतज्यकेति · प्राग्वत्समस्वरूपकेद्रमारभ्य गोलक्षांशोरुत्सस्प
मानवृत्तव्यासार्द्धमितज्या याथमुर्भागरूपेयं वृत्तमुभयतः · तद्वृत्तद्वयं · ग्रक्षांशासंज्ञवृत्तं · तत्र · ग्रक्षां
शावृत्ते · ध्रुवस्थानमारभ्य · समद्वयप्रोतं श्लथवृत्तं चलग्रहचिह्नसक्तं · येरंशोः स्यात्तेषामंशानां · ग्रस
ज्यारूपव्यासार्द्धसूत्रादक्षांशावृत्तपूर्वोक्तचलवृत्तसंपातपर्यंतं तिर्यक्सूत्रमर्द्धज्या · तत्रस्वदेशे · ग्राक्षव
लनज्या · ग्रहचिह्नघ्नज्यावृत्ते भवति · घ्नज्याप्रमाणेनस्यादिसर्थः · ननु यत्रोक्षवलनज्यादर्शितातत्र ग्रह
संबंधाभावात्कथमाक्षवलनज्याक्षज्यापरिणतनतज्यास्वरूपापि ग्रहघ्नज्याप्रमाणेनकथसिद्धसतो ग्रहघ्न
ज्यकावृत्तेर्विशेषणमाह ग्रहक्षितिजवृत्तानुकारिण्यामिति · ग्रहचिह्नाद्ध्रुवप्रोतवृत्ते ध्रुवपर्यंतं घ्नज्याचा
पांशकासे ग्रहचिह्नस्थानात्सर्वतोयद्वृत्तं तदेकतरासन्नध्रुवसंज्ञं ग्रहचिह्नक्षितिजवृत्तानुकारि · तस्मि
न् · ध्रुवस्थानात्समप्रोतवृत्तं यदंतरेणालग्नं तद्राज्यातस्मिन्नहोरात्रवृत्तसमवृत्ते ग्राक्षवलनस्वरूपा

निष्पन्नेतितात्पर्यार्थः॥ अतएवत्रिभज्यापरिणामाद्भूहचिद्भूक्षितिजवृत्तेध्रुवसमदृग्प्रोतवृत्तयोरंतरा
लप्रदेशाज्याग्राक्षवलनज्यास्यात्॥ तथाचाहोरात्रवृत्तस्थनतज्यात्रिज्यानुरूपाक्षवृत्तपरिणता॥ नता
क्षज्ययोर्घातस्त्रिज्याभक्त इतिस्वरूपाक्षवलनज्याहोरात्रवृत्तेतादृग्घटज्याप्रमाणेनयंतक्षत्रिज्याप्रमा
णेनकेसनुपातेनत्रिज्ययोः समगुणाहरयोर्नाशादक्षनतज्ययोर्घातोग्रहघटज्याभक्त इक्षवलनज्या॥
ग्रहक्षितिजवृत्तस्थासिद्धेरुपपन्नमानयनमितिभावः॥ नन्वनयोपपत्तोक्तानयनंतथाप्यनुपपन्नं॥ उ
पपत्तिसिद्धग्रहघटज्यात्मकहरस्यानयनेनुक्तेः॥ किंच॥ समकीलकयोः प्रोतंतथायाम्योत्तरंचलं॥ एतत्वे
नपरिस्फुटयेरंशोः स्वार्द्धतोनतं॥ समवृत्तेक्षवृत्तेचैतरेवस्यान्नतंध्रुवात्॥ समवृत्तनतांशाज्याक्षज्यापरिणा
ताक्षजं॥ घटज्याग्रेवलनंप्राग्वत्त्रिज्याग्रेपरिणाम्यते॥ उपपन्नानयासम्यक्समवृत्तनतांशजमितिसिद्धांत
शिरोमणौगोलाध्यायग्रहणवासनाधिकारेभास्कराचार्योक्ता॥ समवृत्तेग्रहबिंबसक्तंसमप्रोतचलवृत्तं
यत्रस्वमध्याघटंशैर्लग्नंतदंशाज्यासमवृत्तनतांशाज्या॥ इयमक्षवृत्तेक्षज्ययापरिणताध्रुवात्समप्रोतवृत्तंत

दंशैरेवलग्नमतस्तदंशाज्या॥ वलनज्याघटज्याग्रे॥ एवमनयोपपत्तोक्तमहोरात्रवृत्तस्थानतभुजज्याक्षज्याप
रिणतघटज्रूपाभवितुमर्हति॥ अहोरात्रवृत्तस्यसमवृत्तानुकारत्वाभावात्॥ अतएवसिद्धांतशिरोमणौचं
द्रग्रहणाधिकारेवाकाहतंस्वघटदलेनभक्तंस्पर्शादिकालोत्थनतलवाः स्फुटाः॥ तेषांक्रमज्यापलसिंजिनी
भीघटमौर्व्ययालद्रुफलस्यचापं॥ प्रजायतेप्राग्गपरेनतेक्रमाद्दृग्यमांशावलनंपलोद्भवमितिदिनार्द्धतु॥
ल्पनतघटीभिः समवृत्तनवतिनतांशाग्रतदेष्टनतघटीभिः केइसनुपातेनसमवृत्तस्थानतांशाग्रतेषांज्या
नतज्यातयोसादितमस्मासर्वोक्तात्सूक्ष्ममपिनयुक्तं॥ अहोरात्रसमवृत्तयोरेकसंबंधाभावेनतन्नतात्स
मवृत्तनतांशसिद्धेमानाभावोदिसतउक्तानयनोपपत्तिंपुनः प्रतिजानीते॥ अथेति॥ अनंतरं॥ पूर्वोपप
त्तिसिद्धमाक्षवलनानयनंनोपपन्नमाशंकसेतर्हीत्यर्थः स्पष्टं॥ तदानयनंयथोपपन्नंस्यात्तथेत्यर्थः॥ नि
रूप्यते॥ पूर्वोपपत्तिभावनिरूपणमुच्यते॥ अत्रपूर्वोक्तघटज्यायाः स्वाभिमतघटज्यात्वेनविवरणासिद्धेरि
तिभावः॥ समवृत्तनतज्यासूक्ष्मामाहनतकालेति॥ यतोहेतोः॥ नतकालभुजज्या॥ घटुणितनतघटीरू

पनतकालांशानांनवसूनत्वेतेषामेवभुजांशत्वं·नवसधिकत्वेशीतसधिकशातेभ्यः शोधितानांतेषामेवभु
जांशत्वं·तस्यज्याग्रहाधिष्ठिताहोरात्रवृत्तांतर्गतात्रिज्याप्रमाणेन·अतःकारणात्·सानतभुजज्याप्रमाण
सिद्धा·कज्यया·ग्रहकज्यापरिणामिताकार्या·नतभुजज्याग्रहकज्ययागुणात्रिज्ययाभक्तेतिसिद्ध
सर्पः·अस्याःगोलेस्वरूपंदर्शयति·विषुवद्वृत्ततइति·यथाविषुवद्वृत्ताक्रांतंतरेणसमंतात्·लघूनिवृ
त्तानिक्रज्याव्यासार्द्धवृत्तानिगोलेनिःसंशयंप्रवहांशभ्रमवृत्तान्यहोरात्रवृत्तानितिष्ठंति·तद्वत्·अस्य
संशयं·समसंज्ञकपूर्वापरवृत्तात्·दक्षिणोत्तरयोरग्रांशकुतलसंस्काररूपभुजस्यधनुरंशांतरे·भुजव
र्गोनात्रिज्यावर्गान्मूलरूपव्यासार्द्धसंबंधिवृत्तमुपवृत्तंसमीपत्वात्·भवति·तत्·उपवृत्तं·अहोरात्रवृत्तं·
द्वयोःस्वगोलवशात्तिर्यक्त्वाद्याम्योत्तरवृत्तासूर्वापरविभागयोर्योगइस्कभयतोयोगस्थानयोर्बद्धसूत्रत
स्यार्द्धनतकालज्याकज्यानुस्यूता·अहोरात्रवृत्तस्थत्वात्·इयंकज्यापरिणतानतज्या·एवकारादन्यप्र मा
णनिरासः·चः समुच्चये·तेनैकस्याःवृत्तद्वयावस्थानमविरुद्धं·उपवृत्ते·भुजवर्गोनत्रिज्यावर्गमूलरूपमा ३१६

सार्द्धप्रमाणसिद्धाइयं·नतज्या·उपवृत्तव्यासार्द्धप्रमाणेनतदासमवृत्तव्यासार्द्धरूपत्रिज्यायाकेत्यनुपातेन
परिणामात्सिद्धासमवृत्तेनतज्या·उपवृत्तस्यसमवृत्तानुसृतत्वात्॥१५॥ ॥अस्याःबलनज्यास्वरूप
माहअक्षवृत्तेत्वियंयासाकज्यावृत्तानुसारतः·साग्रहक्षितिजेकार्याबलनज्यास्फुटाभवेदिति·इयंपूर्वोक्ता
नतज्या·समवृत्तस्था·नतज्यात्रिज्याकज्यागुणा·त्रिज्योपवृत्तव्यासार्द्धभक्तेतिस्वरूपसिद्धा·अक्षवृत्ते·पूर्वो
पपत्तिप्रतिपादिते·अक्षांशाज्याप्रमाणेन·या·यत्स्वरूपाभवति·नतज्यायाःकज्यात्रिज्यापलांशाज्यागुणाः·
त्रिज्योपवृत्तव्यासार्द्धत्रिज्याहराइतिस्वरूपायासिद्धा·सा·बलनज्या·कज्यावृत्तानुसारतःसिद्धा·कज्याप्रमा
णेनसिद्धेत्यर्थः·एतत्सर्वमेवप्रतिपादितं·अतः सा·बलनज्या·ग्रहक्षितिजवृत्तेकार्या·कज्याप्रमाणेनेयंत
दात्रिज्याप्रमाणेनकेत्यनुपातेनाक्षबलनज्या·सूक्ष्मा·पूर्वसिद्धस्वरूपायाःबलनज्यायास्त्रिज्यागु
णाकज्याहरइतिस्वरूपसिद्धाभवेत्॥१६॥ ॥ननुतथाप्यक्षतानयनं नोपपन्नमित्यतआह·अत्रत्रिभ।
ज्यागुणाहारसाम्यनाद्वाद्याकज्यकयोश्चसाम्यात्·नाद्याद्गुणाच्छेदकयोःप्रकाराद्दाक्षंहिसिद्धंबलनंसुस

समिति॰ अत्र॰ निरूपितवलनानयनस्वरूपे॰ त्रिज्यामितौ योगगौहारौ तयोः समत्वान्नात्रानंतस्यद्वयं॰ एक
दात्रिज्ययोर्गुणाहरयोर्नाशः पुनरप्यवशिष्टयोर्गुणाहरयोस्त्रिज्ययोर्नाशादनिष्टं॰ तस्मात्॰ घज्ययोर्गुणाहरयोः
साम्यान्नात्रात्॰ समत्वंनाशहेतुः चः समुच्चये॰ प्रकारात्॰ पूर्वोक्तात्॰ आक्षवलनं॰ प्रतिसूक्ष्मगोलसिद्धसि
द्ध मुपपन्नमिसर्पः॥१७॥ ॥केनचित्कल्पकेनास्मादानयनाद्दुरभूतवलनानयनमुक्तं चंद्रग्रहणाधि
कारोक्तं पलवलनं भास्कराचार्यैः सम्यङ्नकृतं स्थूलत्वादितिदूषितं तद्दूषणानेस्फुरति॰ चंद्रग्रहाक्षवलनं कि
लभास्करोक्तं दृष्ट्वा स्वबुद्धिवशातोनसदृतदिलं॰ यः प्राहतन्नविमलं चयतस्तदुक्तसिद्धांतजोत्तरदलं सकलं नि
रुक्तमिति॰ यः कल्पकः सुबुद्धिः॰ भास्कराचार्योक्तं॰ सिद्धांतशिरोमणीयचंद्रग्रहणात्तर्गताक्षवलनं दृष्ट्वा॰ स्व
बुद्ध्यनुरोधात्॰ गोलाध्यायानुपस्थितेरिसर्पः॰ एतत्॰ भास्करोक्तं पलवलनं॰ नयुक्तं॰ एवं॰ प्राह॰ तत्॰ उक्तं॰ चः स
मुच्चये॰ तेनतदुक्तमाक्षवलनं गौरवान्नयुक्तं॰ मलवत्वात्॰ अत्रहेतुं मलमाह यतइति॰ तेनभास्कराचार्येणानि
रूपितोयः सिद्धांतशिरोमणिस्तज्जातयदुत्तरार्द्धं गोलाध्यायरूपं तस्मिन्॰ सकलं॰ स्वकलाचातुर्येणास

रितं निरूपितं॰ चंद्रग्रहणाक्षवलनं स्वोक्तं स्थूलमिति प्रतिपादितं॰ सूक्ष्माक्षवलनं चोक्तं॰ तथाच गोला
ध्यायेग्रहणवासनायां वलनवासनोपक्रमे तद्वाक्यं॰ नतंखाकाहतं भक्तं घटलेनाप्तभागकैः॰ क्रमज्या
स्त्रज्ययाक्षुण्णास्थूलं वाघज्ययाहतेति॰ सूक्ष्माक्षवलनसाधनवाक्यं च॰ वलनं स्यात्तथावस्थे स्वाहोरात्रन
तादपि॰ अग्रान्तलयोर्योगः समदिक्कन्यथातरं॰ तत्त्रिज्यावर्गविश्लेषपदभक्ताक्षसिंजिनी॰ नतासुदो
र्ज्ययाक्षुण्णावलनं पलजं स्फुटमिति॰ तथाच भास्करेणगणितार्थं स्वल्पांतरेणास्थूलमुक्तं॰ तत्र विचारेतुसू
क्ष्मं स्वोक्तस्थूलदूषणोद्घाटनं चोक्तं॰ तेनतस्यतदूषणोद्घाटनेनदूषणदानं सुज्ञोपहासकमयुक्तमितिभा
वः॥१८॥ ॥नन्वाक्षवलनार्थं ग्रहस्यनतकालोभुजम्बग्राह्यस्तत्रायनवलनं ग्रहभोगादानीतं तथाग्र
हभोगचिह्नान्नतकालभुजोग्राह्यावुतग्रहबिंबस्यनतकालभुजोग्राह्यावित्यतोनिर्णयमाह वलनमा
क्षमिदं ग्रहचिह्नजान्नततएवभवेदृषिसंमतं॰ भवतिनममतेग्रहबिंबजाद्यतइष्टुवलनकल्पनमि
ति॰ इदमुक्तमाक्षवलनं ग्रहचिह्नीयान्नतकालात्॰ एवकारादिदीयनतनिरासः॰ नततइष्टपलक्षणं॰ ग्रह

चिह्नीयभुजादपि· अत्रापि ग्रहबिंबभुजनिरासः स्यात्· ननु ग्रहबिंबोपेक्षया ग्रहचिह्नादरणं न युक्तमित्य
त आह ऋषिसंमतमिति· सूर्यसिद्धांतवसिष्ठार्षार्यभटयोरायनवलनं ग्रहचिह्नादुक्तमाक्षवलनं त्वनुग्रह
चिह्नादेव युक्तं· अन्यथा शरवलनकल्पनापत्तेः· तस्मादार्षमते वलनं ग्रहचिह्नीयमेव· ततः परिलेखशर
दानेन ग्रहबिंबसंबंधसिद्धेरिति भावः· नन्वमते दृग्माक्षवलनं ग्रहबिंबजात्यतादुजाद्वयुक्तं· अत्र हेतुमा
ह यत इति· शरोसन्नवलनकल्पनं तेषामते· अतो ग्रहबिंबसंबंधेन वलनांगीकारादाक्षवलनं ग्रहबिंबसं
बंधाधिक्यतरमन्यथा शरवलनकल्पनानुपपत्तेरिति भावः॥१९॥ ॥सूर्यस्य स्पष्टवलनस्वरूपमाह क्रां
तिमंडलदिशोः समवृत्तोसन्नदिग्भ्यइहयदिशियेन· अंतरेणागतं वलनं तत्तुल्यमर्कविषये स्फुटसंज्ञमि
ति· इह· गोले· समवृत्तजात दिशाभ्यां यस्मिन्भागे दक्षिणोत्तरान्यतरे· यन्मितेनांतरेण· क्रांतिवृत्तस्य दि
शो भवंति· तेनांतरेण समं· सूर्यविषये· स्पष्टसंज्ञवलनं स्यात्· सूर्यस्य सदा क्रांतिवृत्तस्थत्वात्· तथा चाक्षा
यनवलनयोः संस्कारोसन्नं वलनं सूर्यस्य गोले प्रत्यक्षमिति भावः॥२०॥ ॥अथ चंद्रादीनां स्पष्टवलनस्वरू

३१८

पमाह विक्षेपमंडलदिशोः समवृत्तदिग्भ्यो येनांतरेणाप्यत एव भवंति तद्दिक्· तद्वलनं स्फुटतरं राशिपूर्वका
णां भेदत्रयात्मकमिनस्य तु तद्विधोक्तमिति· समवृत्तदिशाभ्यो यन्मितेनांतरेण विक्षेपवृत्तदिशो यस्मिन्भा
गे भवंति तद्दिक्· एवकारोन्यथा गम्यव्यवच्छेदार्थः· तत्· अंतरं· वलनं· वलनसमाहारात्मकं· चंद्रादीनां ग्रहाणां स्फु
टतरं स्यात्· तेषां विक्षेपवृत्तेस्थितत्वात्· स्फुटतरमित्यत्र हेतुगर्भविशेषणमाह भेदत्रयात्मकमिति· आ
क्षायनशरवलनानीति भेदत्रयं· तथा चंद्रादीनां वलनत्रयसंस्कारमितं वलनं गोले प्रत्यक्षमत एव स्फुटत
रमित्युक्तं· सूर्यस्य· तत्· स्पष्टवलनं द्विधा· आक्षायनवलनात्मकं· प्रागुक्तं॥२१॥ ॥अथ ग्रहणसंस्कारा
नार्थं परिलेखं विवक्षुः प्रथमं वृत्तद्वयमाह समस्थले संकृतबिंदुतो यद्ग्राह्यग्रहस्य स्पष्टवपुर्दलेन· मानेक खंडे
नवृत्तमेवमभिन्नकेंद्रं कृतदिग्पुगंतदिति· समस्थले· समीचीनकृतबिंदुमारभ्य· ग्राह्यग्रहस्य स्पष्टबिं
बकलानामर्द्धमितेन व्यासार्द्धेन यद्वृत्तं· ग्राह्यग्राहकयोः स्पष्टबिंबकलेवार्द्धमितेन व्यासार्द्धेन· चः समुच्चये·
तेन वृत्तं· कस्मात्स्थानात्कार्यमित्यतो वृत्तविशेषणमाह अभिन्नकेंद्रमिति· अभिन्नमेकस्थलं केंद्रं मध्यभागो

DR BHAU DAJI MEMORIAL

ययोर्वृत्तयोस्तथा च बिंदुस्थनाद्द्वितीयं वृत्तं कार्यं एवकारात्स्थलांतरे द्वितीयवृत्तं न कार्यं तत् वृत्तद्वयं कृतं दिग्गं दिशोर्द्वयं पूर्वापरादक्षिणोत्तरे तिसृपं कृतं ययोर्वृत्तद्वये दिशोर्वा इत्यर्थः ॥२२ द्वितीयवृत्तस्पर्शमोक्षमध्यकालिकवलनानां संनिवेशं पद्याभ्यामाह वा सेत्र वृत्तवलनं ज्यकावत्साद्विकृतः स्पर्शभवेदिमांशाः सव्यापसव्यं खलु याम्यसौम्यं मोक्षं तथा पश्चिमतश्च दृश्यं ॥२५॥ रवेस्तु ते स्पार्शिकमोक्षिके त्रिमासरांशा द्रदिगंकतोपः इंदोः शरांशाविपरीतदिक्तो माध्यं रवेस्तच्छरदिक्तएवेति अत्र परिलेखस्थले बाह्ये बहिःस्थवृत्ते मानैकखंडोत्पन्नवृत्ते चंद्रस्य स्पार्शिकं वलनं स्पष्टं पूर्वदिशः कृतविकृतात् ज्यकावद्दृज्यारीत्या पूर्वापरसूत्रात् याम्योत्तरं क्रमेण सव्यमसव्यं दिक्क्रममार्गेण विपरीतदितदिक्क्रममार्गेण वेद्यं मोक्षकालिकं स्पष्टं वलनं पश्चिमदिक्कृतात् पूर्वापरसूत्रादृज्याकारेण याम्यसौम्यं सव्यापसव्यं उत्तरदक्षिणदिक्कृताभिमुखं दृश्यं सूर्यस्य ते स्पष्टवलने स्पर्शकालिकमोक्षकालिके क्रमात् पश्चिमदिक्कृतात् पूर्वदिक्कृतात् पूर्ववद्दृश्ये अथ स्पर्शमोक्षकालिकवलनदानानंतरं चंद्रस्य मध्यग्रहणकालिकं स्पष्टवलनं शरदिशो याम्यस्तदिक् दक्षिणात्शर

श्चेदुत्तरदिक्कृतादुत्तरशरश्चेद्दक्षिणदिक्कृतात् मानैकखंडवृत्तस्थात् दक्षिणोत्तरसूत्रादृज्याकारेण दक्षिणदिशः सव्यासव्यं पश्चिमपूर्वाभिमुखं उत्तरदिशः पूर्वपश्चिमाभिमुखं दृश्यं सूर्यस्य ग्रहणे चंद्रशरदिक्कृतात् एवकारोन्ययोगव्यवच्छेदार्थः मध्यग्रहणकालिकं स्पष्टं वलनं यथोक्तं दृश्यमित्यर्थः ॥२५॥ ॥ग्रहणसंस्थादर्शनार्थं मंडलत्रयोल्लेखनमत्र शरदानपूर्वकं पद्याभ्यामाह स्पर्शमोक्षवलनाग्रगाविकृतात्स्पष्टबाणासमपूर्णगुणाः स्वः व्यस्तदिक्शरिणा एवमिनस्य स्वाशाकाभिमुखतोपमध्यजः ॥२५॥ केंद्रतः स्ववलनाग्रसन्मुखो दृश्यगतदिशुजाग्रबिंदुषु ग्राहकस्फुटतनूरुखंडजमंडलं एषगितित्रयं भवेदिति स्पर्शमोक्षदृत्तवलनस्याग्रस्थविकृतस्मात् स्वः स्पर्शमोक्षकालिकः स्पष्टशरतुल्यसंपूर्णज्यारूपः शरश्चंद्रस्य व्यस्तदिक् दक्षिणश्चेदुत्तराभिमुखः उत्तरश्चेद्दक्षिणाभिमुखः सूर्यस्य ग्रहणे एवं संपूर्णज्यात्मकस्य स्पष्टशरश्चंद्रीयः स्वदिक्सन्मुखः मानैकखंडवृत्तेदृश्यः अनंतरं मध्यग्रहणकालिकः स्पष्टशरः संपूर्णज्यात्मकः केंद्रतः समस्थलकृतबिंदोः सकाशात् स्वमध्यकालिकवलनं तस्य दृत्तस्याग्रं तत्सन्मुखो दृश्यः केंद्रमध्यवल

नाग्रावधिसूत्रमार्गे केंद्राष्टरः स्पष्टोदयः ॥ एतदिष्टजाग्रबिंदुषु दृग्नरारणां स्पर्शमोक्षमध्यकालिकानां
संबंध्येनाग्राणि तत्स्थितबिंदुषु ग्राहकस्पष्टबिंबकलोत्पन्नमर्द्धेनभासार्द्धेनजातं वृत्तं ग्राप्यक प्रसेक
एवं बिंदुकेंद्रकृत्वाग्राहकार्द्धेन स्थानत्रये मंडलत्रयं भवेत् ॥२६॥ ॥ग्रहणसंस्थामाहस्पर्शमोक्ष
भववृत्तयुगं यद्ग्राघवृत्तद्वयदिग्विलग्नं तत्रतोग्रहणकादिविरामोत्तोपमध्यवलये पिहितं तदिति स्प
र्शमोक्षजातवृत्तद्वयं यत्तद्वह परिलेख कृतं तत ग्राघमंडलेयस्मिन्दिग्विभागे लग्नं तत्र तस्मिन्ग्राघवृ
त्तदिग्विभागे यथायोग्यं ग्रहणस्यारंभसमाप्तीस्पर्शमोक्षरूपेस्तः ॥ अनंतरं मध्यग्रारामस्थानकेंद्रके ग्रा
हकवृत्ते ग्राघवृत्तं यत्रविष्टं तत्तावत्प्रमाणग्रासस्वरूपं ॥२७॥ ॥ अथ पद्याभ्यामिष्टग्रासंस्थाज्ञान
माह ग्राघस्य केंद्राद्भुजइष्टकालेस्ववलनाग्राभिमुखः प्रदेयः ॥ भुजाग्रतः स्पष्टग्रारो विलोमदिक्स्वाग्राकम्ब
दूरविग्रहतु ॥२८ केंद्राष्टराग्रावधिकर्णाग्रतघोगाद्भवेद्ग्राहकखंडकेन वृत्तं तदंतः स्थितवृत्तरूपछन्नस्वका
लेसुधियावबोध्यमिति ग्रास्यवृत्तस्य केंद्रात् इष्टकाले स्पर्शमोक्षस्थितसन्यतरांतर्गते भुजः स्ववलन

३२०

संबंध्यग्राभिमुखः देयः स्पर्शस्थितसंतर्गतेष्टकालिको भुजः केंद्रात्स्पर्शवलनाग्रसूत्रे मोक्षस्थितसंतर्गतेष्ट
कालिको भुजः केंद्रान्मोक्षवलनाग्रसूत्रे देयइत्यर्थः ॥ चंद्रार्कयोर्ग्रहणक्रमेण भुजाग्रमारभ्य स्पष्टग्रारः स्व
ष्टकालिकोभ्यस्तदिग्स्वदिग्वदेयः ॥ केंद्रात् दृग्नराराग्रपर्यंतं कर्णाइष्टकालिकोदयः ॥ एतयोः ग्रारागकर्णाग्रयो
र्योगस्थानरूपकेंद्राद्ग्राहकबिंबार्द्धेनवृत्तं यद्भवेत्तद्वृत्तमध्यास्थितग्राघवृत्तभागरूपमिष्टछन्नमिष्टकाले
सुधियाज्ञेय ॥२७॥ ॥ उक्तरीत्यासंमीलनोन्मीलनसंस्थितीवदन्परिलेखमुपसंहरति निमीलनोन्मीलन
कालजातभुजादिभिः प्रोक्तविधेर्भवतां संमीलनोन्मीलनसंस्थितीचुनीलांबरेसर्वमिदं विलेख्यमिति नीलव
स्त्रेइदं परिलेखोक्तसर्वं सुधियागणकेनराज्ञ्यमस्कारासादनार्थमुल्लेखं प्राकाशस्यनीलभ्रमविषयत्वादि
तिभावः ॥२०॥ ॥ ग्रहणवर्णज्ञानमाह धूम्रः कृष्णः कृष्णरक्तः पिशंगोग्रासवर्णः पादवृद्धिक्रमेण चंद्रस्यग्रा
सप्रमाणेरवेस्तु कृष्णोभूभाचंद्रयोः छादकत्वादिति चंद्रमंडलस्यग्रासे पादवृद्धिक्रमेण उक्तोवर्णः स्या
त् सूर्यस्यग्रासमात्रे मात्रपदेनाल्पाधिकग्रहणविनागानपेक्षणं कृष्णोवर्णः तथाचैरिलेखेग्रासविभा

गास्तत्तद्वर्णानोल्लेखइतिभावः॥ अत्रनिशामकंहेतुमाहभूभाचंद्रयोरिति॥ चंद्रसूर्यग्रहणयोः क्रमेण॥ भूछायाचंद्र
बिंबयोराछादकत्वात्॥ उक्तंचवृद्धकल्पसंहितायां॥ अध्यांतत्वाद्विधोः सूर्यग्रहणंकृत्स्नमेवतु॥ ध्यांतंछादकमि
दार्यद्विधोपास्तिविधौततः॥ धूम्रकृष्णंक्रमात्कृष्णंकृष्णताम्रंविनिर्दिशेत्॥ किंचिदूनाधिकैः पादैः छन्नंकपि
लमेवतदिति॥ एतत्तात्पर्यंतु॥ चंद्रबिंबस्यभूभाबिंबंछादकमंधकारात्मकमतश्चंद्रस्यतत्रवशेनखंडितभाग
स्यसूर्यकिरणासन्नत्वेनविरलत्वामस्यस्वल्पस्यैतत्चंद्रबिंबवृद्धभागज्योत्स्नयामिश्रितत्वादभिभूतत्वाच्चध्
मवर्णाचंद्रपं॥ ततोयथायथाप्रवेशात्तथातथार्कं किरणासन्नत्वाभावाद्दिवभागस्यततोगाढछायाप्रविष्ट
त्वाद्धूसरवर्णोपचयः कृष्णवर्णोपचयश्चेति पादाधिकग्रासेकृष्णवर्णाधिक्यात्किंचिद्धूसरदर्शनेपिकृ
ष्णत्वमंगीकृतमेवमर्द्धग्रासेज्योत्स्नांधकारयोर्बिंबतुल्यत्वेनान्योभिभूतत्वाभावात्कृष्णएववर्णः॥ परंतु
ज्योत्स्नयाछायाविरलत्वसंभवेनखंडितभागस्यदर्शनंसंभवति॥ एवमर्द्धाधिकेज्योत्स्नायान्यूनत्वेनकृष्णव
र्णाधिक्यंछायाविरलत्वेनबिंबदर्शनंच॥ परंतत्रसूर्यकिरणतप्तभूभागानांस्वल्पज्योत्स्नात्वेनदर्शनसंभ

३२०

वादारक्तवर्णस्यापिचिरणापर्यंतंकिंचिद्दर्शनं॥ तदधिकग्रासेतुज्योत्स्नायाःप्रतिदुर्बलत्वेनसूर्यकिरणात
प्तभूभागानांव्यक्तंदर्शनं॥ एवंसंपूर्णबिंबग्रासेछायायाः सूर्यानुकारत्वेनचंद्रकक्षास्थभूछायावृत्तपरिधि
सन्नसूर्यकिरणानांसर्वतश्चंद्रबिंबपरिध्यासन्नस्थत्वेनछायानैरंतर्याच्चंद्रबिंबस्थतेजोभागानामणूनांत
प्तभूभागानांजलभागस्थशुक्लरूपाणांचसत्वाशुक्लपीतारुणकृष्णवर्णासपातासिद्धांगवर्णाः॥ परंतुरश्मिमा
क्रांतोज्योत्स्नायाःप्रभावात्॥ मोक्षारंभकालात्तुखंडितभागस्यतत्रवर्णेनैकरूपंदर्शनं॥ यतोभूछायायाथपो
त्तरंचंद्रबिंबनिःसरणंप्रतिफलितार्करश्मीनांप्रकाशश्च॥ एवंतत्तद्वर्णास्यतत्रतत्रग्रासेसिद्धत्वाच्चरणा
नुक्रमेणतत्कथनमयुक्तमपिसंहितोक्तफलादेशार्पणंचरणानुक्रमेणतद्वर्णासन्नस्वोक्तमन्यथाफला
देशानुपपत्तेः॥ फलादेशोपजीव्यवर्णोक्तमध्यग्रहणकालिकएवनेतरः॥ सूर्यस्यतुचंद्रमंडलमाछादकमत
स्तत्कलेतस्यैकरूपत्वेनतद्रूपमवश्यामग्रहणादृश्यतइतिसंक्षेपः॥ ३१॥ ॥ग्रहणयोरनादृश्यादृश्यत्व
ज्ञानमाहइंदोर्भागोदृश्यः खंडितोपितेजः पुंजछन्नभावान्नलक्ष्यः॥ तेजस्तैक्ष्ण्यात्तीक्ष्णगोर्नंद्रभागस्यादृ

रूपोतोधिग्रहोबुद्धिमद्भिरिति·चंद्रबिंबस्यहृदृश्यांशाग्राछादितोपिशाद्वाकिंपुनः स्पष्टः भूस्थजनेनदृश्यः
हेतुमाहतेजः पुंजछन्नभावादिति·तेजसांसमूहेन·ग्राछन्नोग्रासस्तस्यभावस्तेजः पुंजछन्नत्वंतस्मात्
प्रकाशाप्राबल्येनग्रासस्याछादितत्वादित्यर्थः·सूर्यबिंबस्यनवमांशाःछादकेनाछादितोपिभूस्थजनेनदृ
श्यः·अत्रहेतुमाहतेजस्तेक्ष्णादिति·सूर्यबिंबकिरणानातीक्ष्णत्वादसह्यमानत्वात्प्रतिहतनयनेलोकैर्द्रष्टुं
नशक्यइतिभावः·तीक्ष्णगोरित्यनेनमहतस्तद्ग्रासस्यचतुर्थांशात्मकस्यदर्शनेमहान्प्रयासः किंपुनरत्रेतिसू
चितं·चकारादस्मादल्पग्रासः सुतरामदृश्यइत्यर्थः·अतः·अस्मादधिकः·ग्रहः·ग्रहणं·बुद्धिमद्भिरादृश्यं·बु
द्धिमद्भिरितिहेतुगर्भं·तेनगणितावगतग्रासमानमदृश्यदृग्गणावर्जितमादृश्यमितिसिद्धं॥३२॥ ॥ननूद
यकालेर्कादीनामतिव्यक्ततयामहद्बिंबदर्शनंखमध्येणुबिंबदर्शनंप्रागुपपादितमतःकथमेकरूपमदृश्यत्व
मन्यथाचंद्रसूर्यपारकरूपोत्पापत्तिरितिउक्तस्यकालनियमंवदन्नुदयकालिकमदृश्यत्वमाहखमध्यस्थि
तेबोध्यमेतत्कुजस्थक्रमादृष्टिभागार्कभागावदृश्यौ·यतस्तत्रबिंबांशावाभूमिरुद्धान्दृष्टिप्रघातास

मर्थाभवंतीति·एतत्·पूर्वोक्तमदृश्यं·खमध्यस्थितेचंद्रेसूर्येवागणकेनज्ञेयं·नसर्वदा·क्षितिजवृत्तस्थेचं
द्रेसूर्येवा·उदयास्तकाले·चंद्रसूर्यक्रमात्·षोडशभागद्वादशभागौभूस्थजनेरदृश्यौ·ननुवैपरीत्यंकुतोन
स्यादित्यतोहेतुमाहयतइति·तत्र·क्षितिजासन्नकाले·बिंबकिरणाः भूमिगोलनिरुद्धाः भूस्थजनदृष्टिप्रतिघा
तार्थमसमर्थाभवंति·तथाचोदयास्तकालेन्यूनभागस्यादृश्यत्वंखमध्यस्थकालेत्वधिकभागस्यादृश्यत्वंयुक्तं·न
वैपरीत्यविरोधादितिभावः·अत्रस्वस्थत्वाद्द्वादशांशोपिग्रस्तइंदोर्नदृश्यतइतिसूर्यसिद्धांतोक्तं·इंदोर्भागाः।
षोडशाःखंडितोपितेजःपुंजछन्नभावान्नलक्ष्यइत्यार्यमतेनभास्करोक्तं·अनयोर्विरोधादेकवाक्यतार्थसू
र्यसिद्धांतोक्तंखमध्याभिप्रायिकं·भास्करोक्तंचक्षितिजसन्नकालाभिप्रायिकमतोद्वयोरविरोधः·अनयेव
रीत्यातेजस्ते क्ष्णात्तीक्ष्णगोर्द्वादशांशाइतिभास्करोक्तमुदयास्ताभिप्रायिकं·तेनखमध्येधिकादृश्यता
र्थंचंद्रवीत्यानवमांशाः सूर्यस्यसम्यगुक्तः·एतदभिप्रायसूचकंवृद्धवसिष्ठसिद्धांतवचनं·अस्तंशांक
स्यकलाद्वयंचेत्कलात्रयंभानुमतोनलक्ष्यं·तत्किंचिदूनंस्वदृश्यास्तकालेलक्ष्यंयतस्तोकरगुफहीनाविति

तत्वं॥३३॥ ॥इष्टकालेऽप्रदृश्यग्रासज्ञानमाह॥अलक्षितग्रासवियोगनिघ्नः शंकुस्त्रिभज्याविहृतः फलेन॥
युतः कुजस्थोभवतीष्टकालेऽलक्षितोग्रासइदं स्वबोध्यमिति॥अलक्षितग्रासयोः पूर्वोक्तयोश्चंद्रग्रह
णेचंद्रबिंबद्वादशांशषोडशांशयोः॥सूर्यग्रहणेसूर्यबिंबनवमांशाद्वादशांशयोरित्यर्थः॥अंतरेणागु
णितस्तात्कालिकः॥स्वशंकुः॥त्रिज्यया भक्तः॥फलेन॥क्षितिजसंस्थकालिकादृश्यग्रासः॥चंद्रसूर्यबिंबयोः
षोडशाद्वादशांशरूपोयुतइष्टकालेऽप्रदृश्यग्रासः स्यात्॥इदं पूर्वग्रंथेनोक्तंकथमस्य प्रामाण्यमतऽआ
हइदमिति॥निरूपितंस्वनज्ञेयं॥त्रिज्यातुल्यशंकुनाऽप्रदृश्यग्रासांतरंतदेष्टशंकुनाकिमिसनुपातानी
तंफलंक्षितिजस्थादृश्यग्रासेयुतमभीष्टकालिकादृश्यग्रासइत्यपपत्तिः सुगमास्वतः प्रमाणमत्रेति
भावः॥३५॥ ॥अथैतत्प्रसंगाद्दृगोचरोस्पर्शमोक्षकालावन्यरिलेखोपपत्तिंप्रतिजानीते॥अलक्ष्य
भागावगतेष्टकालयुतोनितोस्पर्शविमुक्तिकालौ॥दृगोचरोतत्समयोभवेतामथोपपत्तिंश्रृणुपारिले
ख्येइति॥अदृश्यभागसंबंधिग्रासात्पूर्वोक्तप्रकारेणावगतेष्टकालेनयुतोनितौ॥स्पर्शमोक्षकालौप्रा

३२१

गवगतौक्रमेण॥तत्समयौ॥स्पर्शमोक्षसमयौदृग्विषयौस्यातां॥दृगोचरस्पर्शमोक्षकालयोः पूर्वावगत
स्पर्शयोक्षकालाभ्यांक्रमेणानंतरपूर्वकालत्वात्॥अथानंतरं॥परिलेखविधौ॥उपपत्तिंश्रृणु॥एतदुक्तया
हंतांबध्नीतिप्रतिज्ञाभ्यज्यते॥३५॥ ॥तत्रवलनदानोपपत्तिंपद्याभ्यामाह॥पूर्वाभिमुखोगच्छत्कुछायां
तःशशीविशति॥तेनप्राक्प्रग्रहणेपश्चान्मोक्षोस्यनिःसरतः॥३६॥पश्चाद्भागाज्जलदवदधोवस्थितोभ्ये
त्यचंद्रोभानोर्बिंबंस्फुरदसितयाछादयत्यात्ममूर्त्या॥पश्चात्स्पर्शोदक्दिशितोमुक्तिरस्माद्यथोक्तंदत्तंपू
र्वंवलनमुदितंमानयोगार्द्धवृत्तेइति॥भूछायामध्येपूर्वाभिमुखश्चंद्रोगच्छन्सन्प्रविशति॥तेनकारणेनास्य
चंद्रस्यपूर्वभागे॥प्रग्रहणंस्पर्शः॥भूभातोनिर्गतस्यचंद्रस्यपश्चिमभागेमोक्षः॥सूर्यस्यपश्चिमभागात्सूर्यादध
ःकक्षास्थितश्चंद्रोमेघवदागत्य॥स्फुरदसितया॥प्रत्यक्षकृष्णवर्णया॥आत्मनोजलगोलस्वरूपयामूर्त्या॥
सूर्यबिंबमाछादयति॥ततःकारणात्सूर्यस्यपश्चिमभागेस्पर्शः॥इंद्रदिशिः पूर्वभागेमोक्षः॥अस्मात्कारणा
त्॥याघवृत्तपूर्वादिदिग्ज्ञानार्थंमानैकाखंडवृत्ते॥स्वसमवृत्तानुस्यतत्तद्दिग्मस्तकास्तवदिशोवलनांतरे

णतिमानैकखंडवृत्तेवलनंप्रसाधितंपूर्वपरिलेखविधौयथोक्तमुपपत्तिसिद्धं वृत्तं· यदास्पर्शमोक्षौतदाग्रा
सग्राहककेंद्रयोर्मानार्द्धयोगमितांतरावत्रंभावाद्ग्रासवृत्तपरिधेः समंताद्ग्राहकार्द्धेनयोवृत्तपरिधिस्तस्मि
न्नवत्रंयग्राहककेंद्रंस्पर्शमोक्षावसरेभवतीतिमानैकखंडवृत्तंग्रास्यवृत्ताभिन्नकेंद्रमुल्लिखितं·तत्रवल
नदानेनग्रासंगमनमार्गरूपपूर्वापरानुरोधेनदिशोवगताः·ग्राहककेंद्रंतत्पूर्वापरसूत्रेतत्रज्ञातंशराभा
वे॥३७॥ ॥अथशरसंबंधतत्स्थानान्मानैकखंडवृत्तेशरांतरेणग्राहककेंद्रंग्राह्यग्राहकयोर्याम्योत्तरां
तरस्यशरत्वादतस्तन्निमित्तंसूर्यग्रहणेयथाशः शरश्चंद्रग्रहणेव्यस्तदिक्कः परिलेखविधावुक्त इति·त
दुपपत्तिमाहसूर्याच्चंद्रः स्वेषुदिक्कोयतः स्याद्भाणः स्वाशोर्कग्रहेसम्यगुक्तः· चंद्राद्भूभाबाणदिग्व्यस्तदि
क्कोव्यस्ताशः स्याद्भाणइंदुग्रहेसइति·यतः कारणात्सूर्याद्भाद्याच्चंद्रोग्राहकः स्वशरदिक्कः स्यादतः कार
णात्सूर्यग्रहणेचंद्रशरः स्वदिक्कोयथागतदिक्कः सम्यक्परिलेखविधौकथितः चंद्राद्भाद्यात्·भूछायाग्राहिका
शरदिग्व्यस्तदिक्का·अतः कारणात्·चंद्रग्रहणे·सः स्पष्टश्चंद्रशरोविपरीतदिक्कः परिलेखविधौसम्यगुक्तः

डाक्टर भाऊदाजी दस्तावेज संग्रहालय
DR BHAU DAJI MEMORIAL

अन्यथाभूछायावृत्तकेंद्रज्ञानानुपपत्तेः॥३८॥ ॥परिलेखोक्तशरदानस्योपपत्तिंस्पष्टीकुर्वन्निष्टग्रासप
रिलेखोपपत्तिंचसूचयन्वृत्तादिकरणोपपत्तिः सुगमैवत्पपसंहरन्पद्यद्वयमाहस्पर्शमोक्षसमयेवलना
ग्रेबिंबयोगदलमंडलमंडलेभवेत्·ग्राहकावगतबिंबकेंद्रकंभूमबाणइषुसंभवेपुनः॥३९॥ मानैकखं
डवलयेवलनाग्रतस्तत्रस्युष्टेषुसमपूर्णगुणाग्रके स्यात्· ग्रास्यस्यकेंद्रतदंग्रवणाग्रकेतएवंनिजे
ष्टसमयेसुगमंतुशेषमिति·स्पर्शमोक्षकाले· मानार्द्धयोगवृत्तेवलनाग्रस्थाने· शराभावे·ग्राहकस्यज्ञा
तबिंबकेंद्रंभवेत्· शरोत्पत्तौपुनः· तत्·ग्राहककेंद्रं·तत्र· परिलेखे·मानार्द्धयोगवृत्ते· वलनाग्रमारभ्य
स्पष्टशरतुल्यपूर्णज्याग्रेस्यात्· अतः कारणात्·ग्राह्यमंडलस्यकेंद्रात्· मानैकखंडमितकर्णाग्रे·इदं·
ग्राहककेंद्रंस्यात्·एवमनयाशिया·स्वेष्टकाले·कर्णाग्रेग्राहककेंद्रंस्यात्·अतएवेष्टकालेक्षेत्रंज्ञात्वापरि
लेखवृत्तं·मध्यग्रहणकाले·ग्राह्यकेंद्राष्टशराग्रांतरेग्राहककेंद्रंस्यादतः शरोमध्यवलनाग्राभिमुखोग्राह्य
केंद्राद्वृत्तः· शेषंग्राहकवृत्तादिकरणं·सुगमं॥४०॥ ॥अधिकारमुपसंहरतिः इतिसिद्धांततत्वार्थसु

नीश्वरकृतेभवत·सिद्धांतसार्वभौमेस्मिन्पूर्णग्रहणाकृष्यमितिः स्पष्टं॥३॥ ॥उदयास्ताधिकाराद्यतदधिका
रांतग्रह युसधिकारइतितात्पर्यं॥४॥ ॥इतिश्रीसकलगणकसार्वभौमरंगनाथगणकात्मजगणकमुनी
श्वरकृतेस्वरचितसिद्धांतसार्वभौमस्याद्यायाख्यविवरणोग्रहयुसधिकारश्चतुर्थः पूर्णः॥ ॥श्रीः॥ ॥पू
र्वाधिकारसंपन्नबलंत्रीक्ष्याग्रतः स्वयं·सार्वभौमइदानीतुपरपातार्थमुद्यतः॥१॥ ॥तत्रसंगतिंप्रदर्शयंस्ते
निरूपणप्रतिजानीते·धर्मसाधकरविग्रहणोनतुल्यमर्कत्रिजापमसाम्यं·प्राहुराद्यमुनयस्तत एनंतत्स
संगतइहप्रवदामीति·आद्यर्षयः अर्कशशिभ्यांजातावपमौ·तयोस्तुल्यत्वं·धर्मकारणीभूतेनसूर्यग्रह
णेनसमानमाहुः·ततः कारणात्·तत्संगतः सूर्यग्रहणनिरूपणाप्रसंगात्·ततः सूर्यग्रहणनिरूप
णानंतरं·इह·सार्वभौमग्रंथे·एनं·सूर्यचंद्रयोः क्रांतिसाम्याश्रयीभूतकालविशेषज्ञानसंपादकाधिका
रंसूक्ष्मत्वेनाहंवदामि॥१॥ ॥तत्रापिसूर्यस्यगोलायनसंधीनदुपजीव्योवदंश्चंद्रस्यगोलायनसंध्यानि
रूपणंप्रतिजानीते·अस्तायनांशैरविभंगभेचगोलस्यसंधिस्त्रिभनंदभेच·अस्तायनांशैयनसंधिरुक्तः

सूर्यस्यचंद्रस्यतुकल्प्यतेसइति·द्वादशराशौ·षड्राशौ·चः समुच्चये·अस्ताग्रयनांशायस्मिन्·पूर्वोक्तधनाया
नांशैसूने·पूर्वोक्तकर्णायनांशैर्युते·गोलस्यसंधिरमयत्रोक्तः·त्रिराशौनवराशौ·अस्तायनांशैयनसंधिरुक्तः·
चोगोलसंधिभ्यां समुच्चयार्थः·अयंकस्येसतः सूर्यस्येति·अत्रोपपत्तिः क्रांत्यभावस्थानंविषुवक्रां
तिवृत्तसंपातरूपदक्षिणोत्तरगोलयोः संधिः सतुल्यक्रांतिवृत्तस्थमेषादिस्थानाद्विपरीतायनांशासंस्कृ
तेद्वादशराशौषड्राशौचस्यात्·एवंपरमक्रांतिस्थानंगोलसंधितस्त्रिभयनयोः संधिः सतूक्तरीत्याविप
रीतायनांशासंस्कृतेत्रिराशौनवराशौचेति·सूर्यस्यशराभा वाक्रांतिवृत्तसंबंधेनसंधी·चंद्रस्यशरस
त्वेनविक्षेपवृत्तसंबंधेनसंधीएतद्भिन्नस्थानेभवतइतिचंद्रस्यसः·गोलायनयोः संधिः·जात्यभिप्राय
णैकवचनं·समनंतरमेवमयोच्यते॥२॥ ॥प्रतिज्ञातंपद्यचतुष्टयेनाह्यस्तायनांशाशशिपातलोदः
कोटिज्यकेअर्कदिनज्यया घ्नौ·त्रिभज्यकावर्गहृतेइष्टघंपरेषुजीवागुणितंफलज्या॥३॥दिग्दिनाभ्यंतरा
भीष्टांशानांशरभवज्यया·द्वितीयंगुणितंचाप मस्यतेनोमितासुताः॥४॥अस्तायनांशापातस्यायनेया

म्योत्तरेक्रमात्· पूर्वेषांशाक्रांतिभागास्तज्ज्याभक्ताफलज्यका॥५॥ पूर्वेष्टभागज्यकयाहतातच्चापांशायुक्तोनि
तसूर्यसंधिः·तस्मात्तयाम्योत्तरगोलयोः स्याच्चंद्रस्य संधिः खलुभास्करोक्त इति·॥अयनांशाव्यस्तसंस्कृताच्चं
द्रपाताद्भुजकोट्योर्ज्ये·त्रिराशिष्वज्ज्यायागुणितत्रिज्यावर्गेणभक्ते·इष्टास्यांक्रियायां·आद्यं·भुजोत्पन्नंफलं·प
रमचंद्रशरज्ज्यायागुणितंफलज्यास्यात्·दशापंचदशायामध्यानीषांशानांशरोत्पन्नज्ज्या·अभीष्टांशाराव
सपातचंद्रभुजांशास्तेषांप्रागुक्तरीत्याशरज्ज्या·द्वितीयं·कोट्युत्पन्नंफलं·गुणितं·॥अस्यधनुरंशात्मकं·तेनां
शादिना·व्यस्तायनांशसंस्कृतचंद्रपातस्यदक्षिणोत्तरेयनेसतिक्रमात्·पूर्वकल्पितषांशानांपूर्वरीत्याये
क्रांसंशास्तेहीनायुताः पूर्वसिद्धाफलज्या·पूर्वकल्पितषांशानांज्ज्याभक्ता·व्यस्तायनांशसंस्कृतचंद्रपातद
क्षिणोत्तरगोलयोः सतोः फलस्यधनुरंशैः·क्रमात्·युक्तोनश्चासौसूर्यसंधिः चंद्रस्यगोलायनयोः संधिः
खलुनिश्चयेनस्यात्·नतुपूर्वग्रंथेषूतदनुक्तेः कथमस्यप्रामाण्यमतआहभास्करोक्त इति·सिद्धांतशिरोम
णौपाताधिकारेपूर्वाचार्याणांभ्रमस्यशोधनार्थंसूर्यचंद्रयोर्गोलायनसंध्योरानयनमुक्तंभास्कराचार्यैः· ३२४

चक्रेचक्रार्द्धेवयनांशैर्कस्यगोलसंधिः स्यात्·एवंत्रिभेचनवभेयनसंधिर्मयनभागेस्य·॥अयनांशोनितपा
ताद्दोः कोटिज्येलघुज्यकोस्ये·तेगुणासूर्यैरष्टैर्गुणितेभक्तेहृतेः सूर्यैः·॥अयनांशोनितपातेमृगकर्कादिस्थि
तेदिषड्भागैः·कोटिफलयुतविहीनेबाहुफलंभक्तमाप्तांशैः·मेषादिस्थगोलायनसंधीभास्करस्योनौ·तौचंद्र
स्यस्यातांतुलादिषड्भस्थितेतुसंयुक्तावित्येतद्रीत्यासोपपत्तिकत्वेनप्रामाण्यमितिभावः॥६॥ ॥॥अथचंद्र
स्यगोलायनसंधीसूक्ष्मौवक्ष्यदृग्गणितमाहचंद्रोत्थायनसंधिनुल्यविधुतः स्यष्टापमज्यातयाभक्तस्त्रिज्यकया
हृतः फलगुणोलब्धस्यचापांशकैः·हीनाद्योरविसंधिरक्तवदसौचंद्रस्यसंधिर्मुहुः स्यष्टश्चैवहिगोलसंध्ययनसं
ध्योरंतरालंपरमिति·चंद्रसंबंधीयायनसंधिरवगतस्तत्तुल्यचंद्रादुक्तरीत्यास्यष्टक्रांतिज्यासाध्या· फलज्याप्रा
गुक्तात्रिज्ययागुणितातयास्यष्टक्रांतिज्ययाभक्ता·लब्धस्यधनुरंशैः·उक्तवत्·व्यस्तायनांशसंस्कृतपातोत्तरसि
णोलयोरिसर्वः सूर्यस्यगोलायनसंधिहीनयुक्तः·॥असौसिद्धश्चंद्रस्यसूक्ष्मोगोलायनसंधिः स्यात्·चः समु
च्चयार्थः·उक्तरीत्यामुहुरतिस्यष्टाएवकारादतिमस्यैवसंधेः प्रामाण्यंनान्येषामित्यर्थः·गोलसंधिमारभ्याम

वहितायनसंधिपर्यंतं विषुवपदं त्रिराशिमितं अयनसंधिमारभ्याव्यवहितगोलसंधिपर्यंतं त्रिराशिमितं युग्मपदं हि निश्चयेन केवलसूर्यचंद्राभ्यां पदं नज्ञेयमितितात्पर्यं॥ ७॥ ॥चंद्रस्य स्पष्टमध्यक्रांतेः पदमवस्थामाह चंद्रस्य शापमपदं पदेनानेन संभवेत् चंद्रमध्यापमपदं सा धारणापदात्स्फुटमिति अनेन उक्तचंद्रगोलायनसंध्यंतरेणापदप्रमाणेन स्पष्टक्रांतेः राशिसंस्कृतक्रांतेः पदं संभवेत् स्पष्टक्रांतेः पदं चंद्रगोलायनसंधिभ्यां ज्ञेयमितितात्पर्यार्थः चंद्रस्य मध्यक्रांतेः राशिसंस्कृतायाः पदं साधारणापदात् सूर्यगोलायनसंधिभ्यां ज्ञेयं स्फुटमित्यनेनोपपत्तिरत्र व्यक्तेति सूचितं॥ ८॥ ॥संगत्यर्थमुपपत्तिं प्रतिजानीते अत्रोपपत्तिरिति अत्र गोलायनसंध्यानयने॥ ॥चंद्रस्य गोलायनयोः संधिस्वरूपमाह विक्षेपविषुवद्वृत्तयोर्मोक्षगोलसंधिकौ ताभ्यां त्रिभचायनस्य संधिर्विक्षेपमंडलेऽति चंद्रस्य विक्षेपवृत्तं भ्रमणात्तद्वृत्तस्यार्द्धं विषुवद्वृत्तावध्यक्षरमुत्तरगोलः दक्षिणं दक्षिणगोलस्तत्संधीतद्वृत्तयोः संपातौ ताभ्यां सकाशात्त्रिराशेरंतरेन्वेः समुच्चये विक्षेपवृत्तप्रदेशोयनस्येति जात्यभिप्रायेणैकवचनं अयन

योः संधिरित्यर्थः यतस्तत्स्थानेचंद्रस्य परमदक्षिणोत्तरान्यतरगमनपरिपूर्णात्तदितरगमनस्यारंभः॥ ९॥ ॥विक्षेपवृत्तराशीनामभावाक्रांतिवृत्तराशिभोगाणितव्यवहाराच्च क्रांतिवृत्तस्य राशिप्रमाणेनतत्संधिस्वरूपमाह कदंबप्रोतवलयं संधिस्तु क्रांतिमंडले राश्याश्रयेयत्रलग्नं स संधिर्मेषतो भवेदिति संधिस्तु विक्षेपवृत्तसंधिस्थानसक्तं राश्याश्रयभूते क्रांतिवृत्ते यस्मिन्भागे लग्नं स प्रदेशो लोहक्रांतिवृत्तस्य मेषादिमारभ्य यत्संख्याकस्तन्मितः संधिः स्यादित्यर्थः॥१०॥ ॥अथ तदानयनोपपत्तिं विवक्षुः प्रथमं पद्याभ्यां भूमिकामाह सूर्याद्यगोलसंधीतश्चंद्रबाणसमः स्फुटः चंद्रापमश्चंद्रगोलसंध्योरुपचयात्मकः॥११॥ अतस्तत्क्रांतिभागानां भुजांशाः सूर्यचंद्रयोः गोलसंध्यंतरं तच्चायनसंध्यंतरं भवेदिति सूर्यप्रथमगोलसंधीतसंधितुल्यचंद्रस्य शरतुल्यः स्पष्टश्चंद्रस्यापमः क्रांत्यभावात् चंद्रगोलसंधिस्थानमारभ्योपचयांतर्गमः स्यात् अतः कारणात् तादृशास्पष्टक्रांतिभागानामुक्तरीत्या भुजांशाः सूर्यचंद्रयोर्गोलसंध्योरंतरं तत् तत्तुल्यमेव सूर्यचंद्रयोरयनसंध्योरंतरं चः समुच्चये॥१२॥ ॥भुजांशानार्थं स्पष्टक्रां

तिभोग्यखंडमावश्यकं तदर्थमिष्टांशानां क्रांतयः साध्या इति तदिष्टांशानां स्पष्टशराद्यखंडं चाहस्पष्ट
क्रांतिः स्वोत्थखंडेन हृद्धृतस्मान्मध्याद्दृष्टभागापमांशाः दृष्टांशेषु ज्या त्रिभघ्नज्यकाप्ती त्रिज्याप्ता स्यात्स्प
ष्टबाणाद्यखंडमिति स्पष्टक्रांतिभागानां भुजांशाः स्वगोलसंधितस्त्रिभांतरे स्वायनसंधौ स्पष्टापमांशा
नामनिपतानाम ज्ञानान्नक्रांतिज्यया त्रिज्याभुजज्यातः स्पष्टक्रांतिज्यया केतनुपातात् भुजज्याधनुरिति
विधिना तत्साध्याः अतः स्पष्टक्रांतिः स्वोत्थखंडेन स्पष्टक्रांतिखंडेनेत्यर्थः हृद्धृत उपचितेति मत्वेतत्प्र
कारेणासुसाध्याभुजांशाः तस्मात् स्पष्टक्रांतिभोग्यखंडसाधनहेतोः रविगोलसंधौ मध्यमक्रांतेरभावा
त्प्रथमं मध्यमक्रांतिखंडमिष्टांशेष्ववश्यं साध्यमस्मादित्यर्थः दृष्टकल्पितांशानां क्रांतयः पूर्वं रीत्या मध्या
शरासंस्कृताः तेनुदयोत्तरं पंचदशावधीष्टांशाकल्पने युक्ताः तदंशैर्भुजांशानयनानुपातस्यावश्यवश्यक
त्वादल्पभागकल्पने उपचयाल्पत्वानेनतत्प्रमाणेनोपचयासंभवादनुपातानुपपत्तेः अत्यधिकांशाक
ल्पने तूपचयस्य स्थूलत्वात्सूक्ष्मकलस्यानुपातेनासिद्धेश्च दृष्टांशासाधितक्रांतयः परमं मध्यक्रांतेर्भोग्य

३२६

खंडं प्रथमस्पष्टक्रांतिभोग्यखंडार्थं स्पष्टशरभोग्यखंडं साध्यं तदर्थं स्पष्टशरप्रथमखंडमाह दृष्टांशेषु ज्यपति
कल्पितेष्टांशानां शरज्या सत्रिराशिगतघ्नज्यानिघ्नत्रिज्योद्धृतः शरः स्फुटसौक्रांतिसंस्कारेणेति भास्करोक्तेष्टां
शानां सूर्यगोलसंधितो गतत्वात्स्वल्पत्वाच्चेष्टांशेभ्यस्त्रिराशिस्थानीयघ्नज्यावास्तवाभुपक्षलाघवात्स्वल्पांतर
त्वाच्च सूर्यगोलाघसंधितस्त्रिभस्थानीयघ्नज्यैव स्थूलागतेति अग्रे सूर्यगोलसंधिस्थशरस्य
स्प५ ष्टत्वार्थं तस्यापि घ्नज्यायाश्चक्रत्वादेकोक्तिलाघवाच्च त्रिराशिघ्नज्यया गुणिता तत्र बुद्ध्या दृष्टांशेभ्यस्त्रिभस्था
नीयघ्नज्यया गुणितेत्यर्थः त्रिज्यया भक्तं फलं स्पष्टशरज्यायाः प्राग्खंडं परमभोग्यखंडरूपं स्यात् ॥९३॥ ॥शर
भोग्यखंडं वरं तत्संस्कारेण स्पष्टक्रांतिप्रथमखंडं चपद्याभ्यामाह चेत्त्रिज्यया ज्यात्मकमेतदर्कादिगोलसंध्याघटिमां
शुपातात् कोटिज्यया किं स्फुटबाणजीवाभोग्यात्मखंडं धनुरस्य चेत्तत् ॥९४ लवात्मकं स्पष्टशरस्य खंडं तेनाघटिमा
स्तउदग्यमांशो सपातसंध्यंतरयनेन्नमेणाप्यष्टापमांशाघटलंलवाद्यमिति त्रिज्यया कोटिज्यया ज्यारूपं एतत् स्प
ष्टशरज्यायाः परमं भोग्यखंडं चेत्तदार्कादिगोलसंधियुक्ताच्चंद्रपातात् कोटिज्यया किमिति सनुपातोल्लेखात्स्फुटशर

ज्यायाः भोग्यरूपं खंडं। अत्र द्वितीयार्कगोलसंधौ चंद्रपातयोजने अस्यायनांशाच्चंद्रपातादिस्फुटं नोत्पद्यते· किंतु
सप्तद्वात्तस्मादितिन्यायेन भुजकोटिज्ययोरभयत्राभिन्नत्वाल्लाघवाद्यस्यायनांशाच्छिरःपातनतइस्फुटं· कोटिज्या
स्वस्यांतरेणत्रिराशिघ्नज्यया गुणितात्त्रिज्यावर्गेणभक्ता· फलद्वितीयंद्विगुणितमभ्यंतराभीष्टांशसंबंधिज्यारज्यया
गुणितमिस्फुटपद्यं· यद्यपि भोग्यखंडानयनानुपपत्तेस्पष्टारप्रथमखंडानुरोधेन स्पष्टारज्याभोग्यखंडसूक्ष्मा
सन्नसिद्धेनसूक्ष्मं· अन्यखंडेषु सन्निभग्रहणानां भिन्नत्वात्तद्विषयकानयनस्यानुपपत्तिसिद्धत्वात्तथापि त्रि
राशिघ्नज्याग्रहणेनैवस्थूलत्वसिद्धेतरत्रुक्तौ सूक्ष्मासन्नत्वसिद्धेनक्षतिर्गणितक्रियायामेतदंतरस्यासिद्धेस्त्र· अ
स्य· स्पष्टारज्याभोग्यखंडस्य· धनुः एतद्भागाद्यंस्पष्टारस्यभोग्यखंडंचः समुच्चयार्थः· तेनेष्टांशाक्रांतसंज्ञायपाक्रां
तोग्यखंडतपदमपीसर्थः· यद्यपिस्पष्टारज्याभोग्यखंडस्यमध्यसूत्रावधित्वाभावान्नाच्चापमुक्तरीत्यानयनं· किं
तुस्पष्टारज्याप्रथमखंडचापंस्पष्टारप्रथमखंडं ततउक्तानुपातेनस्पष्टारस्यभोग्यखंडमंशात्मकंयुक्तं तथा
प्यस्मात्सूक्ष्मासन्नसिद्धत्वमनंतरंधनुरक्तंनवस्तुस्वरूपोक्तया· स्पष्टक्रांतिप्रथमखंडमाहतेनेति· स्पष्टारखं

डेन· ते· दृष्टक्षितांशसंबंधिनः क्रांतयः सपातगोलाघसंधेः· अयने· षड्रात्मके· उत्तरदक्षिणदिक्के· क्रमेणपुक्तहीनाः
स्पष्टक्रांतयः सानाप्रथमखंडभागाद्यं· अतएवव्यस्तायनांशापातस्यायनेथाम्योत्तरक्रमादिस्फुटमुपपन्नं· द्वितीयार्कगो
लसंध्यभिप्रायेणायनयोर्वैपरीत्यावश्यंभावान्नदुरदक्षिणायनयोः क्रमेणानयुताइस्फुटपद्यमतोनक्षतिः· नहि
षड्रांतरेणकायनसंभवोयेनानुपपत्तिः· षट्स्यत्रिराश्या तत्वेननियतत्वाच्च॥१५॥ ॥ननुयद्यानयनेउक्तं
तथैवोपपत्तिरुपक्रमेउक्तं· नक्षतावतोत्तरदक्षिणायनयोर्युतोनक्रियायांनियामकमु· पन्यस्तमतस्तदुत्तरसूर्य
चंद्रयोः संध्योरंतरांशानयनार्थमनुपातंचारुक्रमेणोपपत्तिरुक्तमयामरीचौप्रोक्तावध्येयासुधियातत्तत्त्वं· तज्जीव
येष्टांशगुणोयदातत्संधिस्फुटक्रांतिगुणोनकः स्यादिति· अत्र· उत्तरदक्षिणायनवशादृणत्वे· उपपत्तिः· तुकारा
त्त्रसिद्धं· मयासिद्धांतसार्वभौमकर्त्रा· मरीचौ· पाताधिकारेनिरूपिता· सा· सुधिया· ज्ञेया· त पाहि· अर्कायनसंधिस्थ
स्पष्टक्रांतिश्चतुर्विंशतिभागाधिकातदार्कगोलसंधिस्थस्पष्टक्रांतेः शरभोग्यखंडयुतक्रांतिपरमखंडेनोपचयः यदा
त्वर्कायनसंधिस्थस्पष्टक्रांतिश्चतुर्विंशतिभागेभ्योन्यूनातदाशरभोग्यखं ड हीनक्रांतिपरमखंडेनोपचयः· अ

MEMORIAL

र्कगोलसंधिस्पष्टक्रांतेर्यथोत्तरमुपचयेनैवार्कायनसंधिस्पष्टक्रांतेः संभवात्· तत्र सूर्यस्योत्तरायणसंबंधिक्रां
तिवृत्तप्रदेशास्पंदुपातेयनसंधिस्थस्पष्टक्रांतिश्चतुर्विंशतिभागाधिकैवेति पातस्य विलोमगत्वेप्युत्तरायणास्थत्वो
पपत्तेः क्रांतिप्रथमखंडारंभोग्यखंडयुतं स्पष्टक्रांतिखंडं भवतीत्ययनांशोनि पातस्योत्तरायणास्थत्वे· दक्षिणाय
नस्थत्वे तु चतुर्विंशतिभागेभ्योन्यूनैवायनसंधिस्पष्टक्रांतिरिति तारभोग्यखंडं न हीनं क्रांतिप्रथमखंडं स्पष्टक्रां
तिखंडं भवति· सषड्पाते तु वैपरीत्यमनयोरिति· ततः स्पष्टक्रांतिखंडज्ञानानंतरं· यदा· तस्य· स्पष्टक्रांतिखंडस्य
प्रथमस्यांशात्मकस्य ज्या भीष्टकल्पितांशानां ज्या लभ्यते तदा सूर्यगोलसंधिसमचंद्रस्पष्टक्रांतिज्या का स्यादिति
नुपातोल्लेखाच्चंद्रपातस्थानात्सूर्यगोलसंधियाम्योत्तरसंस्थविक्षेपवृत्तप्रदेशावधिविक्षेपवृत्तांशा लेषां ज्या स्या
त्॥१६॥ ॥अनुपातोक्तेष्टायाः स्वरूपं निरूपयन्संध्यंतरांशानयनमुपपन्नमित्याह तत्संधीषुज्यात्रिभघज्यका
घ्नीत्रिज्याप्ता स्यात्स्पष्टबाणज्यकेयं· स्पष्टक्रांतिज्याफलज्या निरुक्ता लब्धा चापं तद्द्वयोः संधिभेदइति· सूर्यगोलसंधि
संबंधिक्रांतिवृत्तप्रदेशास्पंदुदारज्या· अस्तायनांशाच्चंद्रपातभुजज्या परमशरज्यया गुणितात्रिज्यया भक्तेति रूपा

त्रिराशिघज्यया गुणितात्रिज्यया भक्ता स्पष्टशरज्या· भुजज्यात्रिराशिघज्यया गुणितात्रिज्यावर्गेण भक्ता
फलं परशरज्यया गुणितमिति रूपयं स्पष्टशरज्या· स्पष्टक्रांतिज्याया अभावात्· इयमेव फलज्या निरुक्ता· फ
लज्यात्वेनोपपन्नेत्यर्थः ततोस्या अनुतालब्धं चापात्मकं तस्माच्चापं यत्· तत्· द्वयोः सूर्यचंद्रयोः संध्योः गो
लसंध्योरयनसंध्योश्च· भेदांतरं· चंद्रगोलसंधियाम्योत्तरस्थक्रांतिवृत्तप्रदेशात्सूर्यगोलसंधिप्रदेशापर्यंतं
क्रांतिवृत्तांशा गोलसंध्योरंतरं· एतत्तुल्यमेव क्रांतिवृत्तेयनसंध्योरंतरमित्यर्थः॥२०॥ ॥अंतरांशा संस्कृ
तार्कसंधिश्चंद्रसंधिरित्यत्रोपपत्तिमाह संधिस्थबाणायमसौम्यदिक्कोऽर्कसंधितः शीतगुसंधिरग्रे·
पश्चादतांशोर्युतहीनसूर्यसंधिर्भवेच्छीतगुसंधिरुक्तइति· सूर्यगोलसंधिस्थचंद्रशरे दक्षिणोत्तरदिक्के
सति· सूर्यसंध्येः सकाशाच्चंद्रसंधिरग्रे पश्चाच्च क्रमेण राशिमार्गरीत्या भवेत्· अतः कारणात्· सूर्यचंद्रसं
ध्योरंतरांशोः क्रमेण युतानार्कसंधिश्चंद्रसंधिर्निरूपितउपपन्नो भवेत्· दक्षिणोत्तरशरस्य सपातचंद्रगोल
वशात इत्येतच्छरस्य दिशा अस्तायनांशपातमोलनियम्यत्वात्तदनुरोधेनांशसंस्कारस्योचितत्वात्· गोलायन

संध्योस्त्रिभांतरितत्वेन सूर्यगोलसंधेश्चंद्रगोलसंधिर्यदंतरेणाग्रेपश्चात्तदंतरेणानक्रमेणो वार्कायन
संधेश्चंद्रायणसंध्योचित्वाच्च॰ अतएव चंद्रायणसंधिस्थस्यस्पष्टक्रांतिज्यया चंद्रगोलायनसंध्यंतराग्रा
ज्यात्रिज्यामितात्तदा सूर्यगोलसंधिस्थस्यस्पष्टक्रांतिज्यया फलज्यामितया केत्यनुपातावगतज्यायाधनुरं
शाः सूर्यचंद्रयोः संध्यंतरांशास्तद्धातचंद्रायणसंधिस्पष्टक्रांतिज्ययोक्तविधिनांतरांशाइत्यसकृच्चंद्रस्य
गोलायनसंधीसूक्ष्मौ गोलस्थितिसिद्धौ निरंतरौ स्त इति॥१८॥ ॥॰ अथ क्रांतिसाम्यरूपयोतस्यसंभवा
संभवज्ञानमाह स्वायनसंधिसमे दोः क्रांतिस्तत्कालभास्करक्रांतेः॰ ऊनायावत्तावत्क्रांत्योः साम्यं तयोर्ना
स्तीति॰ स्वायनसंधितुल्योयश्चंद्रस्तस्यस्पष्टक्रांतिः यदा स्वायनसंधितुल्यश्चंद्रस्तत्काले वगतसूर्यस्यक्रां
तेः सकाशादल्पायत्कालपर्यंतं तत्कालपर्यंतं॰ तयोः सूर्यचंद्रयोः क्रांत्योः क्रमेणामध्यस्पष्टक्रांत्योः सम
त्वं नास्ति॰ अन्यूनाचेत्तद्धातत्कालाभ्यंतरे क्वचित्तत्क्रांतिसाम्यसंभवः॰ पूर्वमपरत्रवातत्कालात्॰ संभवे॰ व
क्ष्यमाणानयनमसंभवे तद्धानार्थं वक्ष्यमाणानयनगणितं न कार्यं प्रयासवैयर्थ्यादिति सूचनार्थमेत ३२९

दुक्तं॰ अत्रोपपत्तिः॰ चंद्रस्य स्वायनसंधौ स्पष्टक्रांतितुल्यं परमं विषुवद्वृत्ताद्दक्षिणोत्तरं गमनं भवत्यस्मा
दग्रेष्टेवा विक्षेपवृत्तेभ्रमतश्चंद्रस्य क्रांतिर्न्यूनैव संभवति॰ अतः स्वायनसंधिस्थचंद्रकालिकसूर्य
क्रांतिः स्वायनसंधिस्थचंद्रस्पष्टक्रांतेरधिका तदेष्टचंद्रक्रांतेर्न्यूनत्वेनाधिकसूर्यस्पष्टक्रांत्योः समत्वानुप
त्तिः सूर्यस्य चंद्रात्पगमनात्तत्क्रांत्यपचयस्यापि चंद्रक्रांत्यपचयोत्पत्वसंभवात्॰ सूर्यक्रांत्यपचयेनुसु
तरां॰ तथा च द्वितीयरविगोलसंध्यासन्ने चंद्रपाते स्वायनसंध्यासन्ने सूर्ये च तदसंभवः कियंति दिनानीति
यावत्तावदुक्तमन्यत्र तत्संभावनेति गोलयुक्त्या फलितं॥१७॥ ॥॰ अथ एतत्क्रांतिसाम्यकालज्ञानार्थं तदासन्न
मध्यमक्रांतिसाम्यकालज्ञानमाह दर्शांतपूर्णिमांते च सूर्यक्रांत्योः समो यतः॰ चंद्रमध्यापमस्तस्मान्मध्यपा
तः सदा भवेदिति॰ अमावास्यांते॰ पूर्णिमांते च॰ समुच्चये॰ उभयत्रेत्यर्थः यतः कारणाच्चंद्रस्य राशिसंस्कृतो
पमः सूर्यक्रांत्योः संख्यया तुल्यस्तस्मादत्र सदा॰ अमवहितं॰ पक्षसंधिमात्रेइत्यर्थः॰ मध्यपातो भवेत्॰ ए
तेन क्रांतिसाम्यस्य पातत्वं निरूढं॰ एवं पातशब्दाभिधानात्॰ अत्रोपपत्तिः॰ अमांते सूर्यचंद्रयोराश्यादि

भोगसाम्यान्तक्रांतिसाम्यमनिवारितं· पौर्णमास्यंतेनयोः षड्रांतरत्वाद्भुजाभेदेनक्रांत्योरभेदः॥२०॥ ॥
योगयोर्विशेषकालंतदासन्नमध्यमक्रांतिसाम्याश्रयमाह त्रिघ्नायनांशानखभाजितास्तेहीनाश्चसार्द्ध
त्रिभुवोद्विपक्षाः धनेयनांशास्यधनेतुयुक्तास्तुल्ययुत्योर्गतयोश्चसस्यादिति· त्रिगुणितायनांशाविंश
तिभक्ताः· तैः· तत्कर्मविशिष्टायनांशैः सार्द्धत्रयोदशहीनाः सप्तविंशतिहीनाः वः समुच्चये· इदमुक्तमय
नांशोधनेसति· ऋणायनांशेतुत्रयोदशसप्तविंशतिः तैर्युताः· प्रागतांकसमविष्कंभादियोगयोर्गतयोः
सतोः· चः समुच्चये· सः मध्यक्रांतिसाम्यरूपोमध्यपातः स्यात्· अत्रोपपत्तिः· अयनांशासंस्कृतयोः सू
र्यचंद्रयोर्भुजसाम्यमपेक्षितं· तत्तुतयोर्योगेषड्राशयस्तदैव· तथाहि· तयोर्विषमसमपदस्थत्वास
दगतेष्वयोस्तुल्यत्वाद्भुजतुल्यत्वंरविगोलायनसंधिस्थयोस्तुक्रांत्यभावपरमत्वेइतितद्योगयोः षड्राश
मितयोर्यथाक्रमंसत्वाक्रांतिसाम्यंसहजतइति· तत्रद्विगुणायनांशैरूनायुताः षड्राशावाराशयः सूर्य
चंद्रयोगोभवतितदाक्रांतिसाम्यंहि· अतः षड्राशयोर्विष्कंभादियोगोसार्द्धत्रयोदशसप्तविंशतिमि ३३०

तावेतौद्विगुणायनांशेभ्योद्वादशराशिभागैः सप्तविंशतिर्योगास्तदाद्विगुणायनांशैः केदृस्तनुपातेनाय
नांशानांगुणाहरयो५४।२६०रष्टादशापवर्त्तनेनत्रिगुणितायनांशविंशत्संगमितयोगेनधनर्णायनांशाक्र
मेणोनोयुतोक्रांतिसाम्यकालिकोविष्कंभादिगतयोगोसावयवोस्तः॥२१॥ ॥अनुयोगारंभादवगतयो
गगतघटीकालेसाधितार्कचंद्राभ्यांमध्यमक्रांतिसाम्यंपश्चिमितयोगसर्वघटीनांसद्भावेभवत्यन्यत्रन
भवतीवगतघटीनांविशेषंवदंस्तत्रमध्यक्रांतिसाम्यंनियतमित्याहपरंतुपातोद्भवयोगघटयस्तत्स
र्वनाडीगुणिताविभक्ताः· षष्ट्यास्युरः स्फुटघटिकारवांद्वोस्तत्रापिमध्यावृपमोसमोस्तइति· अवगत
योगघटीविषयेविशेषोस्तीतिपरंत्वित्यस्यार्थः· क्रांतिसाम्यकालोसन्नयोगयोरधःस्थितोघटयः पंचां
गपत्रस्थिताभिः पातसंबंधियोगस्यसर्वघटीभिर्गतियोगप्रमाणसिद्धाभिर्गुणिताः षष्ट्याभक्ताः फ
लंतद्योगस्यस्फुटाः पंचांगपत्रप्रमाणसिद्धागतघटिकाः· अवगतयोगगतघटिकागतिसंबंधाभावा
त्तद्विप्रमाणसिद्धाद्यत्यनुपातेनयोगसर्वघटीप्रमाणेनयुक्ताः· तत्र· तस्मिन्काले· अपिशब्दाद्दर्शांतपौर्णि

मास्यंतेनसमुच्चयार्थः सूर्यचंद्रयोः मध्यौः अपमौ सूर्यस्यैकैवक्रांतिर्मध्यास्यष्टा चंद्रस्यद्वारासंस्कृता
मध्याक्रांतिस्तावपमौतुल्यौस्तोभुजसाम्यात्॥२२॥ ॥अथमध्यपातसमयः स्फुटपातज्ञानायोपयु
ज्यैतइतितत्प्रतिज्ञयाहमध्यपातसमयेरविजातापक्रमंराशिनउक्तवदेव प्रस्फुटयपममवेसचसंधीन्व
चिपातसमयंस्फुटजातमिति अस्मिन्नुक्तेमध्यपातकालेसूर्याद्दुत्पन्नक्रांतिं चंद्रस्य उक्तरीसा एवका
राद्गोलसंधिनश्चंद्रभुजज्यायनसंधिस्पष्टक्रांतिज्यायानुपातेनक्रांतिज्यास्पष्टातद्भुजः स्पष्टक्रां
तिरितिरीतेर्निरासः स्पष्टक्रां तेरुपचयापचययोरतिविलक्षणतपानुपाताप्रसंगात् स्पष्टक्रांतिं
चः समुच्चये संधीन् प्रागुक्तसूर्यचंद्रगोलायनसंधीन् स्मृत्वा स्फुटक्रांतिजातं पातकालं अहं क
थयामि॥२३॥ ॥तत्रस्पष्टपातस्यगतेष्यलक्षणमाहप्रोज्झपदेदुक्रांतिर्महतीसूर्योपमाल्लघुः समजाः
यदिभवतितदाज्ञेयोयातः पातस्तदन्यथागम्यइति विषमपदस्थस्यचंद्रस्यस्पष्टक्रांतिः सूर्यक्रांतेर
धिका अथवा समपदोसन्नाचंद्रस्पष्टक्रांतिः सूर्यक्रांतेरल्पायदिभवतितदोभयत्र स्पष्टक्रांतिसाम्यस्य

३३१

१३१

पः पातोगतोज्ञेयः उक्तार्द्धपरीसे विषमपदचंद्रस्पष्टक्रांतिरल्पा समपदचंद्रस्पष्टक्रांतिरधिकातदोभयत्रै
ष्यःपातः अत्रोपपत्तिः विषमपदस्थाचंद्रक्रांतिरुपचयात्मिकासूर्यक्रांतेरधिकातदाग्रेसमत्वासंभवात्पूर्वं
समत्वावश्यंभावाच्चगतः पातः यदाल्पातदाग्रेसूर्यक्रांत्यासमत्वसंभावनयेष्यः पातः एवंसमपदचंद्रक्रांति
रपचितासूर्यक्रांतेरल्पातदाग्रेसमत्वासंभवात्पूर्वंसमत्वावश्यंभावाच्चयातः पातः यदाधिकातदाग्रेपचये
नसमत्वसंभवाद्ग्रेष्यः पातः॥२४॥ ॥अथस्पष्टपातकालज्ञानार्थमाद्यमाहतत्क्रांत्योरेकदिशोरंतरमेकंवि
भिन्नदिशोः कार्यंप्रथमपातेतदन्यथाद्वितीयस्यादिति मध्यपातकालिकसूर्यचंद्रयोः स्पष्टक्रांत्योरेक
दिशोरंतरंभिन्नदिशोरैक्यं प्रथमपाते दर्शांतपूर्वयोगसंज्ञकेक्रांतिसाम्यंग्राह्यः स्यात् द्वितीय पौर्णमा
स्यंतद्वितीययोगसंज्ञेक्रांतिसाम्ये तदन्यथा उक्तार्द्धपरीसं एकदिशोर्योगोभिन्नदिशोरंतरमाद्यः स्यात्॥
२५॥ ॥गतेष्यपातस्यकालानयनंपद्याभ्यामाहचंद्रस्पष्टापमज्यात्रिभगुणागुणितासिद्धभागज्यकाप्रा
लब्धाच्चापंलब्धंफलमधिकमिदंत्रिज्यकातोयदास्यात् त्रिज्योनाद्धस्तचापंनवतियुतमपस्याद्भुजस्त

तथैव षड्राद्दूनं सषड्रं रहितमिनभतः पूर्वपादक्रमेण ॥२६॥ व्यस्तायनांशांशारजाश्चंद्रः स्यात्तत्प्रसिद्धं दुवि
योगलिप्ताः चंद्रस्यागसा विहृताः फलं यद्दिनादिकं पातवशाद्धृतेष्यमिति चंद्रस्यस्फुटक्रांतिज्यात्रिज्यया गुणिता चतु
र्विंशसंशज्यया भक्ता फलाद्धनुरंशाद्यं यदा ऽदक्षिणक्रांतिफलं त्रिज्यातोधिकं तदा प्रस्मात्फलात् त्रिज्यया हीनाच्छेष
स्योच्चमधनुर्नवतियुतं धनुः स्यात् प्रथमचरणक्रमेण तद्धनुस्तथा यथागतं रावकाराद्दिकृतत्वमिशासः द्वि
तीयपादे षड्राशिभ्यः शुद्धं तृतीयपादे षड्राशियुतं चतुर्थपादे द्वादशराशिभ्यः शुद्धं विपरीताश्रयनांशायत्रतत्
शारजसंज्ञश्चंद्रः स्यात् सप्रागतशारजचंद्रः मध्यपातकालिकः प्रसिद्धश्चंद्रः अनयोरंतरकलाः चंद्रस्यस्फुट
गसाभक्ताः फलं यद्दिनादिकं तत् पातगतेष्यवशात् मध्यपातकालाद्धृतेष्यदिनादिकं स्फुटपातस्यस्यात् ॥
२७॥ ॥एतत्कालिकेसूर्यचंद्रयोः स्फुटक्रांतीसाध्येदसाहतेन प्रचाल्यारविचंद्रचंद्रतुंगोदुपाताः सुधियाप्तम
ध्याः ततः स्फुटाविंदुरवी प्रसाध्यौ प्राग्वत्स्फुटक्रांतिलवास्तथाश्चेति तेनदिनाद्येनगतेष्येण रविचंद्रचंद्रोच्चचं
द्रपाताः मध्यपातकालिकाः मध्यमाः पूर्वोक्तरीत्याप्रचाल्याः अनंतरं स्फुटौसूर्यचंद्रौप्रसाध्यौ तयोः सूर्यचं

DR BHAU DAJI MEMORIAL

द्रयोः पूर्वोक्तरीत्यास्फुटक्रांतिसंज्ञाभ्यां साध्याः ॥२८॥ ॥स्फुटपातस्यस्फुटगतेष्यदिनाद्यानयनार्थं सर्वसाधितस्य
स्फुटक्रांतिसंज्ञाभ्यां परंवदन्नाद्यान्ययोर्योगांतरान्यतरमुपयुक्तमाहताभ्यां गतेष्यापमसाम्यचिह्नांकिताद्यवद्यः पर
संज्ञकः स्यात् अभिन्नभिन्नांकितयोः क्रमेणापराद्ययोरंतरमेवपमत्रेति ताभ्यां साधितक्रांतिभ्यां गतेष्यपा
तचिह्नांकितोयःप्राद्यः पूर्वोक्तस्तद्वद्वीत्याद्यःप्राद्यः सपरसंज्ञः स्यात् अत्र स्फुटपातानयने पराद्ययोः अभि
न्नांकितयोः गतेष्यान्यतरांकितत्वेनैकस्वरूपयोः भिन्नांकितयोः भिन्नस्वरूपयोः क्रमेणांतरयोगः ॥२९॥ ॥अ
थ स्फुटदिनाद्यं सूक्ष्मादिनाद्यं चाहतेनोद्धृतं पूर्वदिनाद्यमाद्यगुणं स्फुटं तद्दिवसादिकं स्यात् गतेष्यमस्याद्यवशेनना
म्यवशान्मुहुः सूक्ष्ममतोपियत्तदिति पूर्वनिरूपितं गतेष्यदिनाद्यपूर्वोक्ताद्यगुणं तेन पूर्वसिद्धेनाद्यपरयोरंत
रयोगान्यतरेण भक्तं फलं स्फुटपातस्यदिनादिकं स्यात् अस्य स्फुटदिनादेः आद्यवशेन गतेष्यपातचिह्नां
किताद्यवशेन गतेष्यं भावप्रधानो निर्देशः अन्यवशात् अन्यसंबंधिपातगतेष्यवशात् गतेष्यत्वं नतत्वे
यं अतः स्फुटदिनादेः पूर्वरीत्यापरंप्रसाध्योक्तरीत्यादिनादिकं अपिनाद्यादप्यक्तरीत्यापरंप्रसाध्योक्तरीत्यादि

नाडिकमितिरीत्यामुद्धरसक्रयावदविशोधाघटिनादिकंतत्सूक्ष्मदिनाघंस्यात्॥३०॥ ॥अथस्फुटपातकालज्ञान
पक्षांतरमुद्धाम्यतत्र विशेषंद्वितीयपातंवासनांचेतिपद्यपंचकेनाहतेनस्फुटक्रांतिसमत्वरूपपातस्यकालः कि
लमध्यपातात्ज्ञेयोपचेसूर्वदिनाघभीष्टंतदायदाद्यादधिकः परः स्यात्॥३१॥तदागतेष्यविपरीततार्यम
तासुबोधात्रचबोध्यमेतत्योगप्रसक्तावपमांतरंवाघः स्यादथान्योपिविलोमरीत्या॥३२॥नाभ्यापुरोक्तादिवसे
गतेष्येःपातोद्वितीयोपचवासनातु एकघरात्राभिधवृत्तसंस्थोयदारवींदूव्यतिपातसंज्ञं॥३३स्याक्रांतिसा
म्यंविषुवाख्यवृत्तात्समांतरालेनयदार्कचंद्रौ भिन्नघरात्राभिधवृत्तसंस्थौस्यातांतदावैधृतसंज्ञमुक्तं॥३४॥
अतस्तयोर्मंडलकेंद्रयाम्योत्तरांतरात्प्रथमोपमाभ्यां उक्तप्रकारेणसुयुक्तियुक्तैस्त्रैराशिकार्थंपुनरेवम
म्यद्वति तेन सूक्ष्मगतेष्यदिनाघेन मध्यपातकालात् पूर्वोक्तात् स्पष्टक्रांतिसाम्यरूपमहापातस्यका
लोज्ञेयः अनंतरं यदिपूर्वदिनाघभीष्टमनियतं नरारजचंद्रान्निपतेष्टं तदा यस्मिन्काले आघाद
भिन्नलक्षणात् परस्तल्लक्षणात्मकः अधिकः अन्यूनः स्यात् तदा तस्मिन्काले स्पष्टपातस्यगतेष्य

विपरीतत्वंज्ञेयं गतलक्षणाघेआगतदिनादिनेष्यः पातः एष्यलक्षणाघेआगतदिनादिनागतः पा
तः अत्रदिनाघानयनमाघान्ययोर्योगमितरेणबोध्यं अन्यथाघान्ययोस्तुल्यत्वेआघान्ययोर
तरस्यशून्यत्वेनदिनानांरवहरतयानंतत्वापत्तेः तन्निरस्तमसंभवमेव एकलक्षणेआघादन्यस्याधि
कत्वासंभवादतएवभास्कराचार्यैरिदमनुक्तमतआहुआर्यमतादिति आघोत्तरयोः समानचिह्नयदाघ
डुनस्तत् व्यस्तयोर्नैष्यत्वंज्ञेयमध्यंसदोत्तराभावइतिलघ्वार्योक्तेरुक्तविपरीततासुज्ञेया तथाहि सू
र्यक्रांस्फुटचपापचयाभ्यांयदाचंद्रस्यस्पष्टक्रांस्फुटचययोर्न्यूनत्वंतदामध्यमपातकालादिष्टघटिकांतरे
पूर्वपातेकलक्षणापिसाधितक्रांत्योरंतरम् अधिकंतदापूर्वोक्तपातलक्षणवशादुत्तेष्यंस्फुटपातमध्यमसंभ
वेव तत्रक्रांत्यंतरस्योपचयापत्तेः पूर्वकल्पितगतेष्यकालविपरीतकालेतरंतरस्योपचयसद्भावात्स्य
स्पष्टक्रांतिसमत्वंभवतीतिप्रथमान्ययोर्न्यूनाधिक्ययेरेकलक्षणासाधितघटीभिसक्तलक्षणावैपरीत्येनपा
तमध्यंभवति भास्कराचार्यैस्तुकादाचित्कत्वेनायंविशेषउपेक्षितः इष्टकल्पनेएकलक्षणावाघान्योन्यूना

धिकौनभवतस्तपेषकल्पनावधानाद्दूति॰ अथविशेषांतरमाह॰ अत्रेति॰ पातानयने॰ चः पूर्वोक्तेनसमु
च्चयार्थः॰ एतत्॰ वक्ष्यमाणाज्ञेयं॰ तदाहयोगप्रसक्तावेति॰ क्रांत्योः पूर्वोक्तरीत्यायोगप्राप्ते॰ क्रा त्योरंतरं॰
वापक्षांतरे॰ प्राघः स्यात्॰ एतेनोक्तरीत्यापातस्यानयनमेकमनिवारितं॰ अन्यथायोगनाघानुपपत्तेः॰ द्वि
तीयंचैतत्॰ अनंतरं॰ अन्यः॰ विलोमरीत्यासाध्यः॰ अपिराघेनसमुच्चयार्थः॰ ताभ्यां॰ प्राघाभ्यां॰ पूर्वोक्तप्रका
रेणागतेर्दिनादिकैर्गतेष्वेर्द्वितीयः पातः॰ उक्तेगणितिरूपणे प्रामाण्यावगमार्थंवासनांप्रतिजानीते॰ अथ
ति॰ अनंतरमुपपत्तिः॰ चकाराद्युक्तस्य॰ मयोच्यतेइतिवार्थः॰ तामाहरवेति॰ यदात्वभिन्नाहोरात्रवृत्तस्थसूर्यचं
द्रौबिंबात्मकौतदाव्यतिपातारंभक्रांतिसाम्यंस्यात्॰ यदातुविषुवद्वृत्तात्समानांतरेणोभयतः सूर्यचंद्रौभिन्नाहो
रात्रवृत्तसंस्थौस्यातांतदावैधृतारंभक्रांतिसाम्यमुक्तं॰ अतः क्रांतिसाम्यस्वरूपोक्तेः तयोः सूर्यचंद्रयोर्मंड
लकेंद्रयोर्दक्षिणोत्तरांतररूपं॰ प्राघः॰ क्रांतिभ्यामुक्तप्रकारेण॰ तक्रांत्योरेकदिशोरंतरमित्यादिना॰ सुयुक्ति
सिद्धइत्यर्थः॰ एतस्योपलक्षणत्वेनवैधृतपातस्यव्यतीपातस्थितिवैपरीत्यादिषुवद्वृत्तादुभयतस्तुल्यांतरे

336

णतयोरवस्थानस्यापेक्षितत्वान्मध्यमक्रांतिसाम्यकालिकवस्तुभूतसूर्यचंद्रांतरस्थितिवैधृतिसूर्यचंद्रां
तरवस्तुभूतस्थित्योरंतरंक्रांत्योर्योगवियोगाभ्यामेकभिन्नदिशोर्नघटतीतितदन्यथाघोद्वितीयस्यादित्यस्फुट
पन्नं॰ अथैतस्यक्रांत्यंतरस्यापचीयमानस्ययदात्वभावस्तदाक्रांतिसाम्यं॰ तत्रस्पष्टक्रांत्यपचयापचययोरे
कस्वरूपाभावादिति विलक्षणाच्चतद्धानमत्राकथमतस्तत्कालाद्दृतेष्वलक्षणेनसामान्यतस्तद्धानादार्यभटाघाचा
र्यैरभीष्टदिनाघंगतेष्वपातवशात्स्वल्पतदिनाघेनसूर्यचंद्रोपातंचोक्तरीत्याप्रसाध्यसूर्यस्यक्रांतिंस्वदिक्स्थि
तांचंद्रस्यस्पष्टक्रांतिंचस्वदिक्स्थितांप्रसाध्योक्तरीत्याक्रांत्योरंतरमन्यः कल्पितः॰ अथवासूर्यसिद्धांताघनुसारेणा
चंद्रस्यस्पष्टक्रांतिज्यामेवमध्यमक्रांतिज्यांप्रकल्पचतुर्विरात्यंशाज्यातुल्यपरमक्रांतिज्यया त्रिज्याभुजज्यातदानयो
केसतुपातेनचंद्रभुजज्यात॰ त्वापंचंद्रभुजः॰ यदातुभुजज्यात्रिज्याधिकातदात्रिज्याधिकंयत्खलुतत्क्रमोत्थ
चापंसत्वांकंधनुरुक्रमंस्यादितिरीत्यात्रिज्याधिकस्योक्रमचापंसत्वांकंक्रमधनुरित्युक्तं॰ अस्माच्च
स्तरीत्याचतुर्षुपदेषुचंद्रोयनांशासंस्कृतइतिव्यस्तायनांशाश्चंद्रः स्पष्टमध्यक्रांत्योः शरांतरितत्वाच्छरजश्चंद्रो

न्यपापूर्वचंद्रभिन्नतापत्तेः द्वयोरनुल्पत्वान्तदंतरकलाभ्यश्चंद्रगत्यानुपातेनदिनाद्यंतसातवशाद्गतमेष्यंबा
नियतंकल्पितंतेनदिनाद्येनमध्यपातकालात्पूर्वकालेऽनंतरकालेवाद्वयोः क्रांतिसाम्ये तदंतरमन्यः कल्पितः
ततग्राह्यान्यकालयोः पातेकलक्षणा ग्राह्यान्ययोरंतरतत्कल्पितदिनादिकालसंबंधिक्रांत्यंतरस्यापचयरू
पं भिन्नत्वेनुप्रथम क्रांत्यंतरमपचीयमानमध्यत्वभावतां प्राप्यान्यकालेपुनरुपचितमतस्तत्राद्यान्य
योर्योगमितस्तत्कल्पितदिनादिकालसंबंधिक्रांत्यंतरापचयस्तत्तोनेनक्रांत्यंतरापचयेनेष्टदिनादिकंतदा
धेनुल्पक्रांत्यंतरापचयेनकिमिसनुपातागतदिनादिकेनमध्यमक्रांतिसाम्यकालात्पातगतेष्यतावद्गोनस्य
ष्टक्रांतिसाम्यकालइतित्रैराशिकार्थपुनरेवमन्यइत्यस्यार्थः ।।३५।। ।।द्वितीयपातेसूर्यसिद्धांतोक्तिमूल
कोपपत्तिवत्तथान्यप्रामाण्यमितितद्वचनानुवादेनाह विषुवत्संनिधौ क्रांत्योस्तुल्यतास्याद्यदातदा द्विःपा
तोद्विरितीनोक्तेर्द्वितीयोपिसुयुक्तिजइति अतीपातेविषुवद्वृत्तादुभयतस्तुल्यांतरेणसूर्यचंद्रयोरवस्थि
तावपिपातत्वंक्रांतिसाम्यादेवंवेष्टतेष्यकाहोरात्रवृत्तस्यत्वकालेपातत्वमितियोगप्रसक्तावंतरमपिक्रां

त्योः प्रथमंप्रसाध्यतद्वीस्तन्यंचव्यस्तंप्रसाध्योक्तदिशाद्वितीयपातानयनंयुक्तिसिद्धमेतदभिप्रायिकंसूर्य
सिद्धांतवचनमितितात्पर्यार्थः ।।३६।। ।।ग्रानयनोपपत्तिंपद्याभ्यांस्पष्टयति अन्यायदाशून्यमितस्तदास्याक्रां
त्योः समत्वतएवसुज्ञेः आद्यान्यजोक्रांतरसख्ययाचेदिष्टंदिनाद्यप्रथमेनकिंस्यात ।।३७।। एवंनिरुक्तंदिवसा
दिसिद्धमन्योद्वयादत्रमुहुः क्रियापि इत्यादिसंक्षेपतउक्तमत्रसविस्तरमुक्तंदितमरीचाविति अन्योयस्मिन्कालेशू
न्यतांप्राप्तस्तस्मिन्कालेक्रांत्योः समत्वे विनासमत्वंशून्यप्रमितान्यस्यानुपपत्तेः ततःकारणात् एवकारोन्ययोगव्य
वच्छेदार्थः सुज्ञैर्गोलगणितत्वज्ञैः यदि आद्यान्याभ्यासुसन्नेयदुक्रांतरयोगांतरान्यतरात्मकं तस्यसंख्यया
इष्टंदिनाद्यंलभ्यतेतदाप्रथमेनकिंलभ्यंस्यादेवमनुपातोल्लेखात् निरुक्तं अभिन्नभिन्नांकितयोरित्या
दितदिवसादिकंस्यादिसंतं दिनादिकंगतेष्यतिक्षुपपन्नं अत्रागतदिनाद्येकाले अन्योद्वयात् अन्यस्या
स्यतेः मुहुरसकृत्कर्म अपिः समुच्चये तेनोपपन्नमित्यर्थः प्रतिक्षणंक्रांत्योरतिवैलक्षण्यंकरूपत्वाभावान्न
कालेपुनरन्यंप्रसाध्यकालस्तत्तोप्यन्यमित्यसकृद्भावदन्याभावइतिभावः उपपत्तिमुपसंहरति इत्यादिति

अत्रसिद्धांतसार्वभौमीयपाताधिकारे. इत्यादि.आद्यादिपातगतेष्वदिनाद्यांतं. संक्षेपतः.उपपन्नमुपप
द्योक्तं.विस्तरेणाकुत्रोक्तमतआह सविस्तरमिति.मदुक्तेसिद्धांतशिरोमणौमरीचौ.विस्तरसहितमुक्तं.तस्मा
न्निष्कात्र्यात्रोपपत्तिरुक्तेतिभावः॥३८॥ ॥अथपातकालस्यस्थित्यर्द्धमाहस्पष्टपातसमयोरुरवीद्वोर्बिंबयो
गदललिप्तिकाहतं.सूक्ष्मवासरमुखंप्रथमामंतद्घटीमुखमिहस्थितिखंडमिति.मध्यपातकालात्स्पष्टपात
कालस्ययदसकृत्साधितमंतिमंसूक्ष्मंदिनाद्यं.स्पष्टपातकालोत्पन्नयोः सूर्यचंद्रयोर्बिंबेत्रिप्रश्नाधिकारो
क्ते.स्पष्टपातकालिकेसूर्यचंद्रबिंबेइत्यर्थः.तयोर्योगार्द्धकलाभिर्गुणितं.आद्येनभक्तं.तत्फलं.घट्यादि.इ
ह.पातकाले.स्थित्यर्द्धं.एतद्द्विगुणंपातकालः॥३९॥ अथग्रहणावदसमानयोः स्थित्यर्द्धयोः साधनार्थंक्रां
तीउभयत्रसाध्येइत्याहस्फुटपातकालजखगारविपूर्वाः स्थितिखंडकेनएष्यगत्रसुचालाः.परपूर्वमर्कत्रा
शिनोनुविध्येयोस्फुटकोस्फुटापमकलेचतयोर्यइति.स्पष्टपातकालोत्पन्नग्रहाः सूर्याद्याः मध्यमाः.अत्र.
पाते.उपयुक्ताः.स्थित्यर्द्धकालेन.परपूर्वे.स्वकालादुत्तरत्रपूर्वकाले.एषक्.प्रत्येकं.सुष्ठुचालिताः कार्याः ते

पांमध्येसूर्यचंद्रौनुस्फुटौकार्यौ.तयोः सूर्यचंद्रयोर्येस्फुटक्रांतिकले.तेचप्रत्येकंसाध्ये॥५०॥ ॥स्पष्टस्थित्यर्द्धं
आहप्रत्येकमाभ्यांप्रथमंविधायतेनोद्भूतेबिंबकत्वेकखंडं।स्थित्यर्द्धनाडीगुणितंस्फुटंस्यात्स्थित्यर्द्धमेवंमुहु
रत्रतेद्वइति.प्रत्येकं.एकमेकंप्रतीत्यर्थः.पूर्वकालिकाभ्यामुत्तरकालिकाभ्यांचेतियावत्.आभ्यां.सूर्यक्रांतिक
लाचंद्रस्यक्रांतिकलाभ्यां.उक्तरीत्या.आद्यं.कृत्वा.तेनाद्येन.बिंबकलयोर्योगार्द्धभक्तं.पूर्वानीतस्थित्यर्द्धघटीभिर्गु
णितं.स्पष्टंस्थित्यर्द्धंस्यात्.एवमुक्तरीत्यामुहुरसकृद्यावदविशेषः.ते.स्थित्यर्द्धेकले.अत्र.पातकाले.द्वेस्फुटेलग्नः.द्व
योः स्फुटयोः स्थित्यर्द्धयोर्योगः संपूर्णः पातकालइत्यर्थः.पूर्वकालिकस्पष्टस्थित्यर्द्धेनस्पष्टपातकालिकाः सूर्य
चंद्रचंद्रोच्चचंद्रपाताः पूर्वप्रचालसूर्यचंद्रौस्फुटयेकृत्वातयोः क्रांतीकलात्मकस्फुटकार्यं.ताभ्यामाद्यंकृत्वो
क्तरीत्यास्फुटस्थित्यर्द्धं.तेनाप्येवंयावदविशेषः.यातारंमस्थित्यर्द्धंस्पष्टंस्यात्.एवमुत्तरकालिकस्पष्टस्थि
त्यर्द्धेनस्पष्टपातकालादुत्तरत्रकालेसूर्यचंद्रयोः स्पष्टक्रांतीकलात्मकेप्रसाध्यताभ्यामाद्यंकृत्वोक्तरीत्यास्फु
टस्थित्यर्द्धं.तेनाप्येवंयावदविशेषः.पातांतास्थित्यर्द्धंस्पष्टंस्यादितितात्पर्यं॥५१॥ ॥अथपातस्याद्यंतका

लावाहपूर्वापरस्थितिदलेन विहीनयुक्तः स्पष्टाख्यपातसमयः क्रमशो भवेतां · स्पष्टापमांशासमतात्मकपात
जातारंभावसानसमयोग्रहवसुपुण्याविति · स्पष्टपातकालः पूर्वस्थित्यर्द्धेन · पातारंभसंबंधिना · अपरस्थित्य
र्द्धेन · पातसमाप्तिसंबंधिना · क्रमशः हीनोपुक्तः कार्यः · तौ · सूर्यचंद्रयोः स्पष्टक्रांत्योरंशानां साम्यंतदात्मकत्वे
नज्ञातोयः पातस्तस्यकालासूर्वज्ञातात् · जातौ · आरंभसमाप्त्योः कालौस्यातां · पूर्वं पातारंभः · उत्तरत्रपात
समाप्तिः · अर्थात्पातकालः पातस्यमध्यं · प्रयोजनमाहग्रहवदिति · सूर्यग्रहणवत् · सुपुण्योः सूर्यग्रहण
स्पर्शमोक्षकालौस्नानादिधर्मकृत्येवद्पुण्यकरौतथैमावपि · अर्थान्मध्यकालः सूर्यग्रहणमध्यका
लतुल्यः पुण्यः · एतेनाधिकारप्रारंभोक्तं स्पष्टीकृतं ॥५२॥ ॥ननुसूर्यग्रहणद्वयोर्बिंबयोर्योगादर्शना
त्स्पर्शमोक्षसमयौयथोमपन्नौतथात्रबिंबयोगासंभवाद्दृष्टतोचसुतरांस्पर्शमोक्षयोरसंभवात्कथं
तत्कालावुक्तावित्यतस्तदुपपत्तिं प्रतिजानीते · अत्रोपपत्तिरिति · अत्र · स्थित्यर्द्धनयने · मयोच्यते इति
शेषः ॥ ॥प्रतिज्ञातामेवाहयाम्योत्तरायणागसूर्यहिमांशुबिंबनेम्योर्यदागदितपातजलक्षणा प्राक् ·

MEMORIAL DR BHAU DAJI

तत्रादिरंतसमयश्च परत्रमध्ये बिंबांशयोर्नियमतश्चकयोरपीस्तमिति · दक्षिणोत्तरायणागतौसूर्यचंद्रौ ·
अयमर्थः · दक्षिणायनेस्थितौसूर्यचंद्रौ · उत्तरायणेस्थितौसूर्यचंद्रौ · दक्षिणोत्तरायणाक्रमस्थितौसूर्यचंद्रौ ·
उत्तरदक्षिणायनक्रमस्थितौसूर्यचंद्राविति · अयनसंधिस्थयोः परमांतरमध्येत्वल्पांतरमितिसूचनार्थ
मिदमुक्तंयाम्योत्तरगमनेनपातोत्पत्तेश्च · तयोर्मंडलयोर्नेम्योः · प्राक्ः यावन्मंडलप्रदेशाभ्यांपातलक्षणा
प्रागभावविनाशादिमक्षणे · उक्तपातयोर्व्यतीपातवैधृतारव्ययोर्जातेलक्षणं · एकघरात्रवृत्तस्थत्वे · वि
षुवद्वृत्तात्तुल्यांतरेणाभयत्रस्थितत्वेवा · यस्मिन्कालेभवति · तत्र · तस्मिन्काले · आदिः · पातारंभः · परत्र · पा
वन्मंडलप्रदेशाभ्यांपातलक्षणध्वंसादिमक्षणे · नेम्योः · पातलक्षणायस्मिन्कालेभवतितस्मिन्कालेपातांतः
चः समुच्चय · मध्ये · आरंभावसानकालभ्यंतरे · बिंबांतर्गतप्रदेशयोः कयोरपि · नियमतः · अवश्यं · इष्टं · पा
तलक्षणांतिष्टत्येव · तथाचयावत्कालपर्यंतंबिंबयोरंतर्गतैकदेशयोः पातलक्षणंतावत्कालपर्यंतंपातः · कं
द्वयोः पातलक्षणंपातमध्यं · आद्यंतकालाभ्यां पूर्वोत्तरकालयोश्चंद्रार्कबिंबांतर्गतप्रदेशयोः कयोरप्यक्षरस्थिति

तिथासंभवात्सूर्यचंद्रयोस्तपात्वासिद्धेः पाताभावइत्यादिकालमारभ्यांतकालावधिसूर्यचंद्रयोरेकदेशावछे
देनतपात्वात्सातस्थितिः॰ पातमध्यकालेक्रांत्यंतराभावः पातारंभतकालयोर्मानैक्यार्द्धतुल्यंक्रांत्यंतरं॰ तेन
तत्तुल्यांतरस्यापचयकालउपचयकालश्चाघंतस्थित्यर्द्धं॰ तद्धानेचाघतुल्यक्रांत्यंतरेणास्यघटिकादिघटि
कास्तदामानैक्यखंडतुल्यक्रांत्यंतरेणकलात्मकेनषष्टिभक्तेनांशात्मकेनाघजातीयेनकाइत्यनुपातावगतकालेनमध्यकालात्प्राक्कालेतदारंभोग्रिमकालेतत्समाप्तिरितिज्ञातकालः स्थित्यर्द्धं॰ परंस्थूलं॰ क्रांत्योः प्रतिक्षणमतिवैलक्ष्यात्॰ अतएवद्वयोः स्थित्यर्द्धयोस्तुल्यत्वमप्यनुपपन्नमतः स्थूलस्थित्यर्द्धेनमध्यकालात्प्रागुत्तरकालयोः क्रांतिप्रसाध्यपूर्ववदाघोक्ता॰ तदाघतुल्यापचयोपचयाभ्यांस्थित्यर्द्धघटिकास्तदामानैक्यखंडतुल्यापचयोपचयाभ्यांकाइत्यनुपाताभ्यामाघंतस्थित्यर्द्धसूक्ष्मासन्ने॰ पूर्वानुपातकालापेक्षयेतत्कालस्याल्पत्वेनतदनुपातस्यौचित्यात्॰ पूर्वस्थित्यर्द्धस्यस्थूलत्वाच्चाभ्यांप्रत्येकमसकृत्सूक्ष्मस्थित्यर्द्धमानैक्यखंडतुल्याघसंबद्धेभवतस्ताभ्यांमध्यकालात्प्रागुत्तरकालयोः पातारंभसमाप्तीसूक्ष्मे॥४३ 33८

॥ ॥ननुपातस्यक्रांतिसाम्यात्तन्मध्यकालएवपातत्वं॰ नस्थित्यंतर्गतत्वंपूर्वोत्तरकालयोः क्रांतिसाम्याभावादतस्तत्स्थित्यप्रसिद्धेतदुक्तमयुक्तमित्यतोभास्करोक्तमनुवदति॰ तावत्समत्वमेवक्रांत्योर्विवरैर्भवेघावत्॰ मानैक्यार्द्धानधिकंसाम्यादिवैकदेशाजक्रांत्योरिति॰ यत्कालपर्यंतंक्रांत्योरंतरंमानैक्यखंडादधिकं॰ तत्कालपर्यंतंक्रांत्योः समत्वमस्ति॰ एवकारात्तत्साम्याभावेपिसाम्यमंगीकार्यमन्यथासूर्यसिद्धांतोक्तपातस्थितिकालानुपपत्तिर्बाधात्तन्नहिसूर्यचंद्रयोः कियत्कालंतुल्यगमनंयेनतदुपपत्तिरित्याशयः सूच्यते॰ ननुतंतरसद्भावेसाम्यव्याघातात्कथंतत्वमंगीकार्यमन्यथातदधिकांतरेपितत्वापत्तेरित्यत आहसाम्यादिति॰ विवैकदेशाजक्रांत्योः॰ सूर्यचंद्रयोर्मंडलांतर्गतप्रदेशविशेषाभ्यामुत्पन्नक्रांत्योः साम्यात्॰ तथाचमुख्यक्रांत्योरतुल्यत्वेपितन्मंडलांतर्गतप्रदेशविशेषक्रांत्योः स्वमंडलसंबंधेनस्वीयत्वात्तत्समत्वेनक्रांतिसाम्यरूपपातस्यस्थितिर्नानुपपन्ना॰ तदधिकांतरेतुकयोरपितन्मंडलांतर्गतप्रदेशयोः क्रांतिसाम्यमसिद्धमितितदभावइतिभावः॰ अत्रोपपत्तिः॰ क्रांत्योरंतरस्यमानैक्यार्द्धानधिकत्वेपात

मध्यातिरिक्तकाले सूर्यचंद्रबिंबकेंद्रयोर्विषुवद्वृत्तानुल्पांतरेणावस्थानाभावे पिमंडलैकदेशायोस्तथात्वाक्रां
तिसाम्यास्तिरस्यपाग्रहणेपि केंद्रस्यर्ज्यस्यैवांगीकारेणतद्विलयापत्तिः॰ क्रांतांतरस्यमानैकार्द्धाधिकत्वेसू
र्यचंद्रयोर्मंडलैकदेशावछेदेनापिनतथात्वमितिपाताभावः॰ तथाचमानैकखंडानधिकक्रांत्यंतरत्वंपा
तत्वं॰ नक्रांतिसाम्यमात्रमितिफलितं॥५५॥ ॥मन्वेवंपातासंभवलक्षणेपिक्वचित्पातसद्भावापत्ति
रितिभास्करकल्पितविशेषकथनव्याजेनेष्टापत्तिरितिचतुर्भिरार्याभिराह स्वायनसंध्याविंदोः॰ क्रांतिस्त
त्कालभास्करक्रांतेः॰ ऊनातयोस्तविवरंमानैकार्द्धाधदाल्पकंभवति॥५५॥ इयंतदेवमध्यंपातस्यापक्रमांतरं
चाघः॰ प्राग्वत्सूर्वदिनाघांतरेणात्तस्मात्परंवपूर्वंचा॥५६॥ साध्यावन्यावाघापरयोः कलिकात्मयोर्भेदः॰ मा
नैकार्द्धाधकलांतरगुणिताः पूर्ववारमुखघघः॥५७॥ भेदघ्नाः स्थित्यर्द्धप्रसेकंस्तो मुरुच्चैवं॰ प्राग्वन्मध्या
त्ताभ्यामारंभांतौक्रमेणास्तइति॰ पातासंभवलक्षणे॰ तयोः क्रांत्योरंतरमानैकखंडाधस्मिन्काले संस्यात
स्मिन्काले पातस्यमध्यंज्ञेयं॰ ए वकारात्क्रांतिसाम्याभावकालस्यपातमध्यत्वाभावइत्यस्यव्यवछेदः॰ त

स्मिन्काले क्रांत्योरंतरमाघः॰ ननुयोगेन॰ तत्कालेचंद्रस्यघापमज्येसाद्दिपूर्वोक्तविधिनावगतपूर्वदिना
घांतरेणाः तस्मात्॰ कल्पितपातमध्यकालात्॰ अग्रिमकाले॰ पूर्वकाले॰ चः समुच्चये॰ अन्यावुक्तरीत्यासाध्या
कलात्मयोराघापरयोरंतरंकार्यं॰ पूर्वदिनादेवगतस्यघघः मानैकखंडाघयोर्याः कलास्तयोरंतरेणगु
णिताः॰ भेदेन॰ आघान्यांतरेणभक्ताः स्थित्यर्द्धस्तः॰ एवमाभ्यांमध्यकालाघघायोग्यप्रागुत्तरकालयोर
मंप्रसाध्याघापरकलयोरंतरं॰ तेनमानैकार्द्धाधकलयोरंतरगुणितस्वस्थित्यर्द्धभक्तंस्वस्थित्यर्द्धस्यादितिरी
त्या॰ प्रसकृत्॰ प्रसेकंस्थित्यर्द्धस्तः॰ ताभ्यांस्थित्यर्द्धाभ्यांसूक्ष्माभ्यां॰ यथायोग्यं॰ मध्यकालात्॰ प्राग्वत्॰ पूर्वापरस्थि
तिदलेनस्फुटरीत्या॰ पातस्यारंभसमाप्तीक्रमेणास्तः॰ आरंभस्थित्यर्द्धविरामस्थित्यर्द्धाभ्यांहीनयुतमध्यका
लौक्रमेणपातस्यारंभसमाप्त्योः कालौभवतइत्यर्थः॰ अत्रोपपत्तिः॰ यदास्वायनसंधिस्थचंद्रस्यस्पष्टक्रांति
स्तात्कालिकसूर्यक्रांतेरूनातत्कालात्पूर्वमपरत्रचंद्रक्रांतेः सुतरामूनत्वात्क्रांतिसाम्याभावस्तत्रार्कचंद्रक्रां
त्यंतरंमानैकखंडांतर्गतंयदितर्हिबिंबकेंद्रयोः प्रागुक्तस्वरूपाभावेपिमंडलांतर्गतप्रदेशविशेषयोस्त

स्वरूपसद्भावान्मंडलयोरपितथात्वासातनिवारणस्याशक्यत्वासातोस्त्येव तत्रतत्कालात्पूर्वमपरत्रक्रांसं
तरस्यततोधिकत्वेनायमेवपातमध्यकालः॥ अथपूर्ववसाताद्यंतकालिकक्रांत्योरंतरमानेवार्द्धमितमे
वेति मध्यकालिकक्रांसंतराराद्यंतकालिकक्रांसंतरणापचितमितिक्रांसंतरस्याद्यरूपत्वाद्यमाने।
कखंडयोरंतरमुपचितंभवत्यतएतदंतरापचयघटिकाः स्थित्यर्द्धे तदानयनार्थंपूर्ववत्प्रमाणसाध्यम
न्यथानुपपत्तिप्रवृत्तेरितिमध्यकालादिष्टघटीभिः पूर्वमपरत्रक्रांसंतरंसाध्यंतदपिमध्यकालिकाद्या
दधिकमन्यरूपं तदंतरतुल्यक्रांसंतरणेष्टा घटिकास्तदानेकखंडाद्ययोरंतरतुल्यक्रांसंतरापच
येनकाइतिस्थित्यर्द्धघटिकाः प्रतिक्षणक्रांतिवेलस्यास्थूलाग्रतस्तत्कालात्प्रागपरत्रयथायोग्यमभ्यसा
ध्यस्तत्तोपितदंतरणास्थित्यर्द्धघटिकास्तदानेकार्द्धांतरणकाइतिपूर्वापेक्षयाकिंचित्सूक्ष्माइयस
कृद्यावन्मानेकार्द्धतुल्यान्यः सिद्धेदितिसर्वमवदातं॥५८॥ ॥अधिकारमुपसंहरति॥ इतिसिद्धांत
तत्वार्थसुनीश्वरकृतेभवतःसिद्धांतसार्वभौमेयंक्रांतिसाम्याधिकारकइति॥ स्पष्टं॥५॥ ॥इतिश्री

३४०

सकलगणकसार्वभौमरंगनाथगणकात्मजगणकमुनीश्वरविरचितेस्वनिर्मितसिद्धांतसार्वभौ
मस्याशयाख्यविवरणेपाताधिकारः पंचमः॥ ॥अथादितएतदंतग्रंथक्रोडीकुर्वन्वस्तुनि र्दे
शात्मकंमंगलंनिबध्नाति॥ अयंजगत्सांग्रहतत्परीक्षाश्रृंगोन्नतिव्योमगयोगभेदात्॥ बलातिरेकात्परपा
तकर्त्ताश्रीसार्वभौमः सुतरांविभातीति॥ जगतां॥ पृथिव्यां॥ अयं॥ सिद्धांतग्रंथप्रभुसिद्धः॥ श्रीसार्वभौमः॥
अस्मग्रंथेभ्योतिविचारपदार्थसोदकरणाद्धिः शोभातयायुक्तः॥ सार्वभौमाभिधाग्रंथः निःपक्षपातेनतत्वा
तत्वविवेकसार्वभौमस्यशक्तत्वात्॥ सर्वभूमिप्रचचरणाद्वान्वर्थसंज्ञः॥ शक्तिमत्त्वमेवाहबलातिरेकादि
ति॥ पूर्वोक्तस्यपहलंसामर्थ्यंतस्याधिक्यात्॥ परउत्कृष्टायः पातः क्रांतिसाम्यरूपस्तस्यकर्त्तानिरूपकः॥ ब
लातिरेकविशेषणेनपूर्वोक्तविशदयति॥ ग्रहदृग्यादि॥ मध्यस्पष्टात्मकमविकारद्वयंग्रहधिषयत्वाद्ग्रहा
नयनाधिकारात्मकं॥ त्रिप्रश्नग्रहणाधिकारयोर्नलिकाबंधवेधद्वाराग्रहपरीक्षकत्वाद्ग्रहपरीक्षाधिका
रत्वं॥ शृंगोन्नतिरेकाधिकारः॥ उदयास्तग्रहयुतिग्रहणाधिकाराणांग्रहयोगाधिकारत्वं॥ एतेचत्वारोधिका

रामेदायस्येतादृशाद्बलाधिक्यादित्यर्थः॥ चतुर्भेदात्मकं बलमितितात्पर्यं॥ यद्यपिपातालाधिकारेशृंगोन्नति
ग्रहयोगाधिकारोक्तमनुपयुक्तं तथापिपातालाधिकारोपयुक्तसूर्यचंद्रयोसूत्रोपयोगाद्विपरीतान्वये
नसंबंधमात्रमुक्तं॥ सुतरामसंतंगणितस्कंधोनियंतत्वेनसर्वानाणितग्रंथान्त्रशास्त्राशोभते॥ श्लेष
णद्वितीयार्थः॥ श्रीयुक्तः सार्वभौमः॥ सकलायाः पाथमाः पतिः॥ प्रथं॥ प्रसिद्धः शाहजांहाभिधः सर्वोत्कर्षे
णास्ति॥ हनुगर्भे विशिनष्टि॥ बलेति॥ सैन्याधिक्यात्॥ परेषांबलानेराकादिदेशाधिपानांपातः पराभवस्त
स्यकारणीभूतः सैन्याधिक्यं विशिनष्टि॥ ग्रहेति॥ ग्रहोग्रहणं॥ इतस्ततोवस्थितानांकटकानामेकीकरणमि
त्यर्थः॥ सस्य॥ अश्वनरगजात्मकसैन्यस्यपरीक्षा॥ शृंगंपर्वतशिखरंतद्वदुन्नतिर्यस्याः साकेतुयष्टि
स्तस्याः व्योम॥ अंबरं॥ वस्त्रं॥ चिह्नं॥ मुक्तं॥ तत्रगतोयोगः॥ ध्वजइत्यर्थः॥ एतेजेदायस्मिन्बलातिरेके
तस्मादित्यर्थः॥१॥ ॥ननुयंत्रप्रश्नयोरेतद्ग्रंथेनिरूपणाभावाद्कथासमासः कथमत्रमंगल
निबंधनंयुक्तमित्यतआहइतिपूर्वार्द्धमिति॥ यंत्रप्रश्ननिरूपकाग्रंथस्यसिद्धांतसार्वभौमीयोत्तरा

र्द्धत्वादत्रग्रंथासामाप्तावपिग्रंथमध्यत्वात्पूर्वार्द्धसमाप्तेश्चमंगलनिबंधानंशिष्यशिक्षार्थंयुक्तमितिभा
वः॥ ॥श्रीः॥ ॥सिद्धांतसार्वभौमस्यस्वकृतस्यमुनीश्वरः॥ पूर्वखंडविवृतवानाद्यायनद्वतुष्ट
ये॥१॥स्थलेस्थलेसूक्ष्मविचारणात्रकृतामयारामगुरोः प्रसादात्॥ साकेवलंतीक्ष्णधियाभिमाम्या
मंदावगस्योपिबेदुप्रयासात्॥२॥ ॥इतिश्रीसकलगणकसार्वभौमरंगनाथगणकात्मजगणक
मुनीश्वरविरचितेसिद्धांतसार्वभौमाद्यायेपूर्वखंडंसमाप्तिमगमत्॥ ॥ग्रंथसंख्यासहस्रं ९९००
श्रीविश्वनाथायनमः॥ ॥शुभंभवतु॥ ॥कल्याणमस्तु॥ ॥ ६ ॥ ॥ ॥
॥ ॥श्रीगणेशायनमः॥ ॥श्रीसरस्वत्यैनमः॥ ॥श्रीगुरुभ्योनमः॥ ॥विघ्नेश्वरंगांचगुरुंप्र
णम्यमुनीश्वरः सुज्ञसुखाप्तिहेतोः॥ उद्दिष्टशेषस्यनिरूपकंस्वग्रंथोत्तरार्द्धंविवृणोमिकृत्स्नं॥१॥ ॥
शिष्याचारपरिप्राप्तमुत्तरार्द्धपरिसमाप्तिकामनयाकृतंमंगलंशिष्यशिक्षार्थंनिबध्नाति॥ विघ्नभूता
नवतिष्ठमानः पूर्णः परात्मेशकविस्वरूपः॥ प्रखंडबोधः सजयत्यखंडानंदोनिदानंजगतामलस्यइ

ति·सः·श्रुतिस्मृत्यादिषु वर्ण्यमानमहि·मत्वेन प्रसिद्धः·परात्मा·भगवान्नारायणः·जीवात्मादिभ्यो वृत्तये परेति·प्र
त्यात्कर्षार्थकेन जयति पदेन तं प्रणतोऽस्मीति व्यज्यते·अत्र परत्वं स्रष्टृत्वादिकर्तृत्वतत्त्वैकस्य विरुद्धमिति सतः प्राहुः
राकविष्णुरूपइति·कः·ब्रह्मा·तथा च परमार्थतोऽभिन्नस्यापि तस्य तत्तच्छरीराश्रयवशेन तत्तद्विचित्रकार्यकारि
त्वमतिरुद्धमिति भावः·तस्मिन्प्रमाणोपन्यासायाह निदानं जगतामिति·जगत्कारणं·तथा च क्षित्यादिकं सकर्तृकं
कार्यत्वाद्घटवदित्यनुमानमेवोपन्यस्तमिति भावः·तन्वेतदप्रयोजकं·कर्त्रजन्यत्वसाधकेन शरीराजन्यत्वेन सस्य
नि पक्षितत्वादतस्तत्रानुकूलतर्कोपन्यासायाह विष्टभ्येति·भूवानिपृथिवीजलतेजोवायूनि विष्टभ्य·धारणात्मकसं
योगसंबन्धेन संबध्यावतिष्ठमानः·सर्गादावपि विष्टभ्यमान इत्यर्थः तथा चाशरीरिणोपि विश्वधारणात्मकप्रय
त्नवत्कर्तृत्वस्याप्यविरुद्धतया कर्त्रजन्यत्वसाधकस्य शरीराजन्यत्वस्यैव प्रस्तुतप्रयोजकतया स्थापनानुमानेच
कर्तृत्वेन कार्यत्वेन कार्यकारणभावस्यैवानुकूलतर्कत्वादावश्यकीतस्सिद्धिरिति भावः·अत्र च भूतपदं क्षित्या
दिचतुष्टयमात्रवाचकमाकाशानुबहिरिद्रियग्राह्यविशेषगुणवत्त्वप्रयुक्तभानकमेव·तेनाकाशस्य विष्टंभासं

DR BHAU DAJI MEMORIAL

भवेपि न क्षतिः·यदेव भूतत्वं तदेव मूर्तत्वमिति नवीनमतेन भूतपदं मूर्तपरमित्यन्ये·यत्तु क्षित्यादिपंचकवाचकमे
व भूतपद· माकाशस्येश्वरानतिरिक्तत्वपक्षे संयोगरूपविष्टंभस्यापि संभवान्ननुपपत्तिरिति व्याख्यानं तदपि त
त्प्रतियोगिकसंयोगाभावासंदर्भाननुकूलमिव प्रतिभाति·प्रतियोगित्वांशाविवक्षायां तु यथाश्रुतमेव साधीय
इति बोध्यं·ननु कर्तृत्वहिकार्याणां नानात्वान्नैकविधमतस्तदुपपादकस्वरूपमाह पूर्णइति·अप्रतिहतेच्छइत्यर्थः
तथा च निखिलेच्छानन्यसाधारणीकर्तृत्वपदार्थइत्यभिप्रायः·नन्विच्छायाज्ञानादिनाऽविनिगम्यत्वान्नैकविधं कर्तृत्व
मीश्वरइत्यभिप्रेत्याह तिरेवाविवादाप्रमाणमिति सूचयति·अखंडबोधइति·अखंडानंदइति·निरस्तानोनिरसु
खश्च·निरस्तविज्ञानमानदन्नेत्यादिस्मृतेः·ईश्वरे निरस्तसुखत्वं यथादिमश्लोकव्याख्यायां संस्थापितं·ननु तादृगी
श्वरः कथमस्माद्दृशानां प्रत्यक्षीभवतीत्यत आह अलस्यइति·मंदबुद्धीनां संसारतिमिरमलिनितमनस्कानां योगा
दिसाधनोज्ज्वलचित्ततराणां लोकानामदृश्यइत्यर्थः·तथा च योगिप्रत्यक्षविषयत्वं तस्य ध्वनितं॥१॥ ॥सहेतु
कमभिधेयं प्रतिजानीते·मध्याधिकारवनिगोलउक्तलक्षणापितत्वस्थितियुक्तपत्तेः·शिष्यैः समीचीनतया नवु

द्रुलस्मादहंबचिधरासुगोलमिति·अहंग्रंथकर्त्ता·तस्माद्धेतोः·भूमेः सुष्ठुगोलं·कदंबाकारस्वरूपं·अवस्थानादिद्वा
राकथयामि·नमुपूर्वाधिकारावांतराधिकारावांतराधिकारभचक्रकंदुकंद्रायमित्यादिनाभूगोलनिरूपणास्मु
नस्तन्निरूपणानयुक्तमिसतस्तस्मादित्यनेनसूचितंहेतुमुपपादयति·मध्याधिकारइति·भूगोलस्थितिसिद्धांत
ज्ञानंविनादेशांतरादिफलोपपत्तिर्ज्ञातुमशक्यातोभूगोलः स्वस्थितिसिद्धांतसहितउक्तः·परंतु·तस्य·भूगो
लस्य·आकाशावस्थानेयुक्तीनामनिरूपणाद्यांतभिः सम्यक्तयानज्ञातस्ततः प्राधान्यनभूगोलंनिरूपयामीत्यर्थः
॥२॥ ॥तत्रोपोद्घातेनसृष्टिक्रमंविवक्षुस्तावदनिरुद्धोत्पत्तिमाह·श्रीवासुदेवादभवन्नरास्मात्संकर्षणाः कामतएव
तेन·जलंकृतंतत्समभून्नदीयन्नाम्नासुवर्णांडमतोनिरुद्धइति·मायावच्छिन्नेश्वरस्यजगदावासरूपत्वात्स्वतः प्रका
शवत्वाच्चवासुदेवस्तस्मान्नादयपएवसंकर्षणाख्याभवन्·तेन·संकर्षणेन·जलं·इत्थंयत्कृतं·आपोवाइदम
ग्रआसीदितिश्रुतेः·तत्·जलं·नदीयन्नाम्ना·संकर्षणाख्याडनिर्वचनया·सौवर्णमंडमभूत्·अतः स्वर्णांडा
दनिरुद्धाख्याभवत्॥३॥ ॥एतस्यावस्थानमाहहिरण्यगर्भोनिखिलांधकारविनाशकोयंसकलादिमत्तेः·म

तसस्सूर्यादतिरिक्त रूपोवेदप्रसिद्धोभ्रमतीहनित्यमिति·अपमनिरुद्धोमहत्तत्वात्मकोहिरण्यगर्भः सुवर्णांडं
गर्भउत्पत्तिस्थानंयस्यासौसुवर्णांडमध्येस्थितत्वात्सकलांधकारध्वंसकः·सकलानामुत्पत्तिस्थानं·अस्मत्प्रस
तसूर्यादन्यः सूर्यः वेदनिरूपितः·हिरण्यगर्भः समवर्त्तताग्रेभूतस्यजातः पतिरेकआसीदितिश्रुतिः·आदित्यवर्णं
तमसस्तुपारइतिश्रुतिश्च·इदं सुवर्णांडेसदाभ्रमति·एतदुक्तंसूर्यसिद्धांते·वासुदेवः परब्रह्मतन्मूर्त्तिः पुरुषः परः
अव्यक्तोनिर्गुणः शांतः पंचविंशत्यरोमयः·प्रकृतेंतर्गतोदेवोबहिरंतश्चसर्वगः·संकर्षणोपः सृष्टादौतासुवी
जमवासृजत्·तदंडमभवद्धैमसर्वत्रतमसावृतं·तत्रानिरुद्धः प्रथमंव्यक्तीभूतः सनातनः·हिरण्यगर्भोभगवा
नेषछंदसिपठ्यते·आदित्योद्यादिभूतत्वात्सूर्यउच्यते·परंज्योतिस्तमः पारसूर्यायंसवितेतिच·पर्येति
भुवनान्येषभावयन्भूतभावनइति·एतदाख्यानंपितृचरणनिर्मितेसूर्यसिद्धांतगद्यार्थप्रकाशादवगंतव्यं॥५॥ ॥
अथास्माद्धुलणाडसत्तितस्माच्चसूर्यचंद्रयोरुत्पत्तिंचाह·तस्माज्जगत्सृष्टिनिमित्तमिच्छावशादहंकारमयो विरं
चिः·अभूदतोलोचनतोर्कइंदुर्हृदः क्रमात्तेजसआप्यरूपइति·तस्मात्महत्तत्वात्मकानिरुद्धात्·जगत्सृजना

र्थं·स्वेच्छानोहंकारात्मा·ब्रह्मा·अभूत्·अतः ब्रह्मणानेत्रादर्कोहृदयाच्चंद्रः क्रमात्तेजोरूपोजलरूपोभवत्·त
थाचसूर्यसिद्धांते·सोहंकारंजगत्स्रष्टाब्रह्माणमसृजत्प्रभुः·तस्मैवेदान्वरान्दत्वासर्वलोकपितामहः·प्रति
ष्ठाप्यांडमध्येपस्वयंपर्यैतिभावयन्·अथसृष्ट्यामनश्चक्रेब्रह्माहंकारमूर्तिमत्·मनसश्चंद्रमाजज्ञेसूर्योरणा
स्तेजसांनिधिरिति॥५॥ ॥अथभौमादिनांसृष्टिंवह्निदंसिद्धभचक्रंप्रवहवायोस्थापितमितिश्लोकाभ्यामा
हभौमादयस्तारकाश्चनीरगोलास्ततः कृताः·क्रांतिवृत्तादशांशसप्तविंशांशकंचतत्॥६॥वासुगोलास्ततः
कृताप्रवहाख्यनभःस्थितिः·इदंसर्वंयथाक्रंचब्रह्मणाविनिवेशितमिति·भौमादयः पंचताराजलगोलाः ब्रह्मणाअनंत
रंकृताः·क्रांतिवृत्तंपूर्वोक्तंद्वादशविभागंकृतं·तद्वचसप्तविंशतिविभागंकृतं·अनंतरं·वायुगोलान्कृत्वाःप्रवहा
ख्यवायोः·इदंक्रांतिवृत्तादिसर्वंग्रहनक्षत्रजातं·यथाक्रं·स्वस्वाधिकारोक्तं·नियोजितं·तथाचसूर्यसिद्धांते·म
नसःखंततोवायुरग्निरापोधराक्रमात्·गुणोत्तरात्पंचैवमहाभूतानिजज्ञिरे·अग्नीषोमौभास्करेंदूततस्त्वंगा
रकादयःतेजोभस्वांबुवातेभ्यः क्रमशः पंचजज्ञिरे·पुनर्द्वादशधात्मानंविभजद्राशिसंज्ञकं·नक्षत्ररूपिणा

भूयःसप्तविंशात्मकंवदीति॥७॥ ॥अथभूगोलनिर्माणावस्थानेश्लोकाभ्यामाहवाघग्निपानीयविभागका
यतदेकातत्पावनिभागकाश्चनावमिलित्वावनिजंसुगोलंकृत्वास्यसंस्थाकनकांडगर्भे॥८॥ब्रह्माकरो
त्सर्वतएवतुल्यांतरत्वतोगोलतयाचतस्मात्·सर्वाधरीभूतकुगोलकोसौस्थिरोपतन्नेतदधोप्रसिद्धेरिति·
वायुतेजोजलानांभागाः यावन्मिताः स्फरत्वेषामेवतुल्याःपृथिवीभागाःचः समुच्चये·उक्तरीत्या·सर्वभागाने
कीकृतपृथिव्याःगोलंकृत्वा·अस्यभूगोलस्यसुवर्णांडमध्यभागेअंडस्यगोलाकारत्वेनसर्वप्रदेशेभ्यः समा
नांतरत्वादेवावस्थानंब्रह्माप्रकरोत्·नन्वाकाशेगुरुवत्तुनःप्रपातावश्यंभावाद्भूगोलस्थितेरत्रासंभवइत्यतउपसं
हरन्नाहतस्मादिति·उक्तावस्थानात्·असौ·सर्वाश्रयः सर्वाधरीभूतोयः पृथ्वीगोलः·अपतन्सन्·स्थिरोऽचलः
हेतुर्भवतीति·एतस्यभूगोलस्यस्वस्थानस्थितस्य·अधोभागाप्रसिद्धेः·तथाचसर्वाधःस्थितस्यभूगोलस्यस
मंतादधःप्रदेशाभावादपतनं·नत्वधःप्रदेशासिद्धेःकिंचिदपिवस्तुपतति·अधः प्रदेशोपतनयोग्यत्वात्·अं
बरसंस्थितभूमेःकोधोभागःकुतूर्ध्वउतपार्श्वेः·साकल्यनावधःस्यादितिलल्लाचार्यभट्टोक्तेरितिभावः·तथा

MEMORIAL

चसर्वसिद्धांते मध्येसमंतादंडस्य मृगोलोऽयोऽस्मिति ष्ठति विभ्राणाः परमांशक्तिं ब्रह्मणोधारणात्मिकामि
ति ॥७॥ ॥ अथ प्रसंगाद्भास्कराचार्याणामतमनूद्य सिद्धांतसुंदरदूषितं तत्र दूषणाद्वारार्थमनुवद
ति मूर्तेकुधर्तेरिभवेदनवस्थिकातः स्वाभाविकागुणाइति स्थिरतास्थिरायां औस्यथानलगुणाद्भवता
दकस्यैकत्रहिमास्करकृतौतदतोनयुक्तं ॥१०॥ गोत्रोचारधराः पुराणपठिताः शेषादयः संतुतेः कोदोषः
खचराद्युपंजरगतोवेदोदितास्तेयतः भूमोचेदचलत्वलक्षणगुणः किंनोतदंशेपुनस्तायांशाद्भवतायथान
लत्वे दाहत्वमित्यादिति भूमेराधारमूर्तेसति तस्याधारस्यांतरिक्षावस्थानार्थमन्यामूर्तेराधा
रआवश्यकइतिरीत्यासाधार भूमिपक्षेनवस्थादोषोभचक्रभ्रमणप्रतिबंधसंभवात्तद्भ्रमणानुपपत्ति
श्चातोहेतोः पृथिव्यांस्थिरत्वं इति वक्ष्यमाणदृष्टांताभ्यांस्वभावसिद्धोगुणः दृष्टांतावाहऔस्यमिति यथा
वह्नेः स्वभावगुणाउष्णत्वं जलस्यवास्वभावगुणाद्द्रवत्वं इति एवं हिः निश्चयेन भास्कराचार्यनिर्मितग्रं
थे सिद्धांतशिरोमणिनाम्नि मृगोलसंस्थावसरे उक्तं तद्यथा मूर्तोधर्तोचेद्धरित्र्यास्तदन्यस्तस्याप्य

३४५

न्योस्यैवमत्रानवस्था अंत्येकल्पाचेत्स्वशक्तिः किमाधेकिंनोभूमेः साष्टमूर्तेश्चमूर्तिः यथोष्णतार्कानल
योप्यशीतताविधौकुतिः केकहिनत्वमत्रमनि मरुच्चलोभूरचलोस्वभावतोयतोविचित्रा बतवस्तुशक्ति
यइति एतद्दूषयति तदिति भास्कराचार्योक्तमेतत् अतोवक्ष्यमाणदूषणात् युक्तंन अप्रसक्तिरित्यर्थः तत्र
प्रथममाधारपक्षभचक्रभ्रमणानुपपत्तिरितिभास्करकल्पितशक्तेराकृतेर्दूषयति गोत्रेति गोत्रायाः पृ
थिव्याः चारः आकाशोपोधागमनं तद्धारयंतीतिधराः धरणागमनप्रतिबंधकमितिरपृथिवीगमनप्रतिबंध
काः पृथिव्याधाराइतितात्पर्यार्थः पुराणानिरुक्ताः शेषकूर्मादयः तिष्ठंतेः अंगीकृताधारैः अत्र हनसत्रेच
क्रगतोकोदोषः नकोपिदोषइत्यर्थः यदनुपपन्नाधारानांगीक्रियंतेतस्याणवानुपपन्नराधारः स्वीकार्या
इत्यर्थः अतएवसिद्धांतसुंदरेतत्सधाग्रे धनवच्चसरीसृपोपिरुध्रः प्रहरेतिष्ठतिखेल्पवीर्यएवं गगा
नेनकथंसकर्मरूपः प्रतिकल्पध्वतभूरचित्यशक्तिरिसक्तं एतदभिप्रायस्तु आधाराणांसप्तमपुटपातालावस्थितत्वेनभवतगतत्वान्मर्वपेक्षयाधोभागावस्थितत्वेनग्रहाणांचतप्रदक्षणीकृतगाष्टतांतत्रनियो

गिनिर्यगवस्थत्वादेवमनहचारप्रतिबंधाशक्तत्वमिति·नन्वेवमाधाराणांभ्वंतर्गतत्वेनसिद्धेभूमेरेवतत्रस्थि
रत्वंपर्यवसन्नं·आधाराणांभूमेरपृथक्त्वादित्यतआहवेदादिताइति·यतोहेतो स्तत्राधाराधाराबदाक्ताः
भूमेरचेतनतयाब्रह्मांडमध्याकाशावस्थानासंभवेनपरमेश्वरःकूर्मावतारस्वरूपेणभूगोलमाविष्टभ्य
ब्रह्मांडमध्याकाशेस्थितइत्याधारस्यावश्यतयांगीकारइतिभावः·अपस्वमतंभवस्थूणभास्करमवस्थापि
तांभूमेःस्थिरत्वशक्तिंखंडयति·भूमाविति·यदिपृथिवीमांस्थिरत्वरूपोगुणःअस्ति·तर्हिपुनःतद्रा·पृथिव्याए
कदेशे·मसिंडादोःकथनंस्थिरत्वमस्ति·तथाचपृथिव्येकदेशेस्थिरत्वासंभवेनभूगोलेपिस्थिरत्वासंभवइति
भावः·ननुसर्वांशगुणोंशेनस्यादवातोभूमेःस्थिरत्वंसूपपन्नमित्यतआहतोयांशइति·यथामहाजलेद्रवत्वं
जलांशेद्रवत्वं·यथावाग्नेदाहत्वंतदंशेपिदाहत्वं·तथाभूमानियमानास्तीतिभूमेःस्थिरत्वशक्तिरनुपपन्नेति
भावः·इति·एवं·यत्·सिद्धांतसुंदरकाराज्ञानराजदेवज्ञाःकथयंति·अत्रयत्सदमग्निमपूर्वसंबंधार्थं॥११॥
॥ ॥एतन्मतदूषणेनभास्करोक्तंसमुद्धरति·तत्रैवसन्नियमतावयवोपमूर्तेःशक्तिर्लवेप्रभवतीतिचनैव ३४६

यस्मात्·कुंभादिकस्यसलिलाहरणादिशक्तिर्नस्यात्कपालमुखावमिश्रापिविद्धेति·यत्·पूर्वोक्तं·तत्·सत्·नै
व·हेतुमुपपादयति·नियमतइति·अवयविनःशक्तिरवयवेवश्येभवति·एवंव्याप्तिर्नवे·अत्रापिहेतुमाह
यः स्मादिति·घटपटादेःजलाहरणप्रावरणादिशक्तिःकपालादौ·घटशकलवस्त्रखंडादौनस्यात्·उक्तंप्र
कृतेयोजयति·एवमिति·उक्तरीत्याःइह·भूगोलतदवयवविषये·अपिःसमुच्चये·जानीहि·भूगोलीय
समुदायस्थिरताशक्तेर्मसिंडादावसत्वेपिनस्यातिः॥१२॥ ॥अथभास्कराचार्यभूमेःस्थिरताशक्तिंखंडयति
स्थिरशक्तिःकल्पितासाकिमर्थमित्यतःप्रकृतोपयोगंतस्याःप्राहुःदूषणाभ्यपगमेनकुगोलेभास्करणाजनसं
स्थितिहेतोःरक्षणायगदितास्थिरशक्तेश्चान्यकर्षणातपाकिलेशक्तिरिति·सिद्धांतसुंदरकाराक्तदूषणा
स्वीकारेण·मनसितदूषणाप्रतिसंधानेनभूगोलेजनसंस्थानकारणात्·तन्निमित्तमन्यपाथस्तिर्यग्भा
गावस्थितजनप्रपातप्रसंगादित्यर्थः·स्थिरत्वशक्तेः·सामर्थ्यमायान्यथाभूगोलस्यभचक्रमध्यस्थत्वानुप
पत्तेः·चः समुच्चये·भास्कराचार्येण·किल·निश्चयेन·अन्यकर्षणातथा·स्वांशजलयोः·कार्षणमाकर्ष

णतस्यभावः॰आकर्षणता॰तयेत्यर्थः॰शक्तिः॰आकर्षकत्वशक्तिरित्यर्थः॰उक्ता॰कल्पिता॰तद्भावश्च॰आकृ
ष्टिशक्तिश्चमहीतयापत्वस्वगुरुस्वाभिमुखंस्वशक्त्या॰आकृष्यतेतसततीवभातीति॥१३॥ ॥ज्ञानरा
जदैवज्ञोक्तेतद्दूषणमाहलघ्वाकृतावाकर्षणकंविलंबादाकर्षणंस्यान्महतोयतोत्र॰संदृश्यतेतद्विपरीत
मस्मात्सानात्रशक्तिस्त्विति सुंदरोक्तमिति॰यतोहेतोः॰आकर्षणविधौ॰लघुवस्तुनः शीघ्रमाकर्षणं॰गु
रुवस्तुनस्तु तिलंबात्॰आकर्षणंस्यादिति नियमः॰अत्र॰भूकर्तृकाकर्षणे॰तत्॰शीघ्रविलंबक्रमलघुगु
र्वाकर्षणं॰प्रसिद्धं॰विपरीतं॰लघ्वाविलंबेनाकर्षणं॰गुरोस्तुशीघ्रमाकर्षणं॰लोकेदृश्यते॰अस्माद्धेतोः
सा॰आकर्षणिका॰शक्तिः॰अत्र॰भूगोले॰नास्ति॰इत्येव॰सुंदरोक्तं॰सिद्धांतसुंदरग्रंथेप्यनिरूपितं॰तथाचत
दाह॰आकृष्टिशक्तिश्चमहीतिनस्याद्यतोघनंशीघ्रमुपैतिभूमिं॰आकर्षकंयातिलघुकृतंहिमहीस्थिरा
धारमतेकथंस्यादिति॥१४॥ ॥एतद्दूषणेनभास्करोक्तंसमुद्धरति॰आकर्षणेतिर्यगधःप्रदेशात्स्वदुक्त
रीत्यादिविधेसमाने॰ऊर्ध्वप्रदेशात्किलतद्विलोमंतस्मात्तदुक्तंनहिसम्यगेवेति॰तिर्यक्प्रदेशादधःप्रदेशा

द्वद्विविधेआकर्षणे॰त्वयोक्तारीतिस्तयासमे॰उभयत्रलघोः शीघ्रमाकर्षणं।गुरोस्तुविलंबेनाकर्षणमितित्व
दुक्तनियमः॰ऊर्ध्वप्रदेशात्॰तत्॰गुरुलघ्वाकर्षणं॰विलोमं॰शीघ्रविलंबक्रमेणाकर्षणं॰उपसंहरति॰तस्माद्दि
ति॰सिद्धांतसुंदरकारोक्तंदूषणंसम्यङ्नैव॰अस्मत्सक्षेतुनचारोकानचोत्तरं॰शक्यनंगीकारात्॰भास्कर
मतमेतत्समर्थितमितिमेतव्यं॥१५॥ ॥अथभूमेरंतरिक्षावस्थानेनसाधारत्वंनिरस्यबंदुकाकारत्वयु
क्तिमुपपादयति॰तिष्यंतकालेकिलभिन्नदेशायंत्रादिवेधाद्रविजोन्नतांशाः॰भिन्नायमादग्विषयेक्षका
श्चतस्माद्धरागोलनिभावगम्यति॰पूर्वापरभिन्नदेशेषु॰जास्यभिप्रायेणोक्तवचनं॰अभिन्नतिष्यंतक
काले॰यंत्रादिवेधाद्रविमंडलकेंद्रायाउन्नतांशाः॰भिन्नाः प्रत्यक्षाः॰अतः पूर्वापरयोर्विभागयोर्भूमौयथा
न्तरंगणितानुरोधेनोच्चावचत्वं॰तत्तद्वृत्ताकारत्वेनपर्यवसन्नं॰एवंदक्षिणोत्तरांतरितदेशेषुक्षांशाः भि
न्नाः॰अतोदक्षिणोत्तरयोर्विभागयोर्भूमौयथान्तरमुच्चावचत्वं॰तदपिवृत्ताकारत्वेनपर्यवसन्नं॰चःस
मुच्चये॰तस्मात्॰पूर्वापरदक्षिणोत्तरविभागाभ्यांभूपिंडस्यवृत्ताकारत्वसिद्धिरित्यर्थः॰एपिवीगोलस्वरू

पवसुधीभिर्नेया॰ अन्यथांशभेदानुपपत्तेः॥१६॥ ॥अथतत्परिधिप्रमाणमध्यमाधिकारावगतंभास्करोक्तोपप
त्तिपद्धानुवादेनप्रमाणयति॥ पुरांतरंचेदिदमुत्तरस्यात्तदक्षविश्लेषलवैस्तदा किं॥ चक्रांशकैरित्यनुपातयुक्ता
युक्तं निरुक्तं परि धेः प्रमाणमिति॥ ध्रुवोन्नतिवैषम्यादक्षांशज्ञानात्कयोश्चिद्देशयोर्दक्षिणोत्तरांतरिन्नयो
रक्षांशैर्ज्ञेयो॥ तद्देशयोर्योजनात्मकमंतरं ज्ञेयं॥ ततस्तद्देशाक्षांशयोरंतरभागैरिष्टांतपुरयोरंतर
योजनात्मकमंतरमुपलक्षणाद्दक्षिणेच॥ दक्षिणोत्तरांतरं यदि भवति॥ तर्हि चक्रांशैः॥ इत्तसंबद्धांशै
र्द्वांशैर्द्वादशाराश्यंशैः षष्ट्यधिकशतत्रयमितैः किमंतरं स्यादेवमनुपातोल्लेखरूपोपपत्त्या॥ निरुक्तं॥
मध्यमाधिकारोक्तं॥ भूगोलस्य परिधेः प्रमाणं युक्तं॥ एतदनुपातेन भूपरिधिः सिद्ध्यतीति तात्पर्यं॥ अ
त्र पुराणोक्तभूमाननिरासस्तात्पर्यादंशानुपातस्य स्थूलत्वेप्यक्षतिः॥१७॥ ॥अतएव भास्करोक्तमन्य
दप्यनुवदति॥ लंकापुराद्भूपरिधेर्नपांशो भवेद्वंतीगणितेन गम्या॥ तदंतरं षोडशसंगुणं स्याद्भूमा
नमस्मादधिकं न युक्तमिति॥ लंकादेशाद्भूपरिधेः षोडशांशो॥ उज्जयिनीगणितेनावगतो स्यात्॥ नि

३४८

रक्षदेशध्रुवोन्नत्यभावादुज्जयिन्यांस्वार्द्धद्वाविंशांशांशमितध्रुवोन्नतिरूपाक्षदर्शनात्॥ अस्माद्धेतोः
तयोर्लंकोज्जयिन्योर्योजनात्मकांतरं लोकप्रसिद्धं षोडशगुणितं भूगोलपरिधिमानं स्यात्॥ अस्मा
त्॥ षोडशगुणितांतररूपभूपरिधिमानात्॥ अधिकं॥ पुराणोक्तभूमानं युक्तं न स्यात्॥१८॥ ॥ननु
भुवो गोलाकारत्वे आदर्शाकारत्वेन दर्शनमनुपपन्नमित्यतआह॥ समोयतो भूपरिधेः खर्वाद्विभागो
स्ति पृथ्वी पृथिवीतनीयान्॥ नरश्चतस्य षष्ठगतस्य कृत्स्नासमेवतस्य प्रतिभासतः सति॥ भूपरिधेश्चतुः
शतांशाः समो दृष्टवद्भवति॥ तथाहि॥ भास्कराचार्यैः शतांशाः समो भागउक्तस्तेषां मतेप्यमज्ञाचापयोः
समत्वपादोनचतुरंशो॥ खंडानि चतुर्विंशतेरस्मन्मतेनवतिखंडानि॥ अतः शतपादोनचतुर्भिर्गुणि
तं समांशाः पादोनचतुःशतीहरणा॥ तत्रखंडानां सूक्ष्मत्वार्थं षष्ट्यावतिसंख्य पाकल्पितत्वेनचतुर्गुणि
तं शतंचतुःशतंहृत्तपरिधेः समभागज्ञानार्थं हरहृति॥ भूमिहसत्ति॥ मनुष्यातिशयेनाल्पः चः समु
च्चये॥ अतः कारणात्रयं पातात्॥ तासां पृथिव्याः षष्ठभागे वर्तमानस्य मनुष्यस्य॥ सा॥ पृथिवी॥ कृत्स्ना॥

संपूर्णा·समा·अप्रादर्शाकारा·इवसत्प्रेक्षा·वस्तुतोगोलत्वात्·प्रतिभाति·समांशाधिकदर्शनेगोलत्वेनदर्शनंसं
भवतितत्रभूपृष्ठस्थस्यसंपूर्णसमभागदर्शनाभावादेवयत्रकुत्रापिपृथिवीदर्शनंसमभागत्वेनभवतीति
भावः॥१७॥ ॥पृथिवीगोलेसमताज्जनादीनामवस्थानानुपपत्तिः·तिर्यगधःस्थानामपातावस्थाभावा
दितिमंदाशंकांपद्याभ्यांपरिहरति·योयत्रतिष्ठत्सवनीतलस्थामात्मानमस्याउपरिस्थितंच·समन्पतेतः कु
चतुर्थसंस्थामिथश्चतेतिर्यगिवामनंति॥२०॥अधःशिरस्काः कुदलांतरस्थानधादितीरप्रतिबिंबतुल्याः
अनाकुलास्तिर्यगधःस्थिताश्चतिष्ठंतितत्रवयंपथात्रेति·यामनुष्योभूगोलेयस्मिन्भागेतिष्ठतितस्मिन्प्र
देशेसमनुष्योभूमिंस्वाधःस्थांमन्यते·अस्याभूम्याउपरिस्थितमात्मानंचेःसमुच्चये·अतः· भूमेराश्रित
जनाधःस्थत्वसिद्धिरित्यर्थः· कुचतुर्थसंस्थाः·भूपरिधिचतुर्थांशांतरप्रदेशास्थितास्तेमनुष्याः मिथः·
परस्परं·तिर्यगिसव्ययं·तिरश्चीनमित्यर्थः·इवकाराद्उत्प्रेक्षा·वस्तुतआश्रितजनस्यस्वाश्रयभागेतिर्यक्त्वासं
भवात्·आमनंति·स्वीकुर्वंति·परस्परापेक्षिकंतिर्यक्त्वंनुपतनाहेतुकमवंतव्यूना धिकांतरेपिकिंचिदधि

कतिर्यक्त्वाभासःपतनाहेतुकइतिभावः·एवमधोवस्थितजनानांपतनासंभवमुपपादयति·अधइति·भू
गोले·कुदलांतरस्थाः·भूपरिध्यर्द्धांतरिताःमनुष्याः परस्परमधःशिरस्काः·नदीतडागादीनांतीरेषुप्रति
बिंबसमानाः·भांति·स्वाश्रयभागेभूगोलांतरिताधस्त्वाभावेनवस्तुतोधःशिरस्कत्वासंभवात्·पूर्वोक्तमु
पसंहरति·अनाकुलाइति·तिरश्चीनाः·अधःस्थाः·चःसमुच्चये·मनुष्याः·पतनचिंतायाअसंभवाद्
आकुलाःसंति·इदमेवसदृष्टांतमुपपादयति·तिष्ठंतीति·यथावयमत्र·स्वाश्रयभागेअनाकुलास्तिष्ठा
मस्तथा·ते·तिर्यगधःस्थाः·तत्र·तिर्यगधोभागेअनाकुलास्तिष्ठंति॥२१॥ ॥अतोभूगोलेसर्ववसति
रभितोस्तीतिसदृष्टांतमाह·तस्मात्कुगोलोनगराश्ववृक्षसरित्समुद्रामरदेसमर्त्यैः·आरामवाप्यद्रिव
येश्चितश्चयथाकदंबनिजकेसरोघैरिति·तस्मात्सतनत्राकानिरासात्·भूगोलः समंतादेतैरुक्तैः पदार्थैः
चितः·व्याप्तः·कदंबं·कदंबपुष्पमपिः·स्वकेसरसमूहैः·समंताद्व्याप्ता॥२२॥ ॥अथभूगोलेउत्तरदक्षि
णाभागद्वयं·दक्षिणाभामहीपसमुद्रावस्थानंतत्संनिवेशप्रतिज्ञांचेतिपद्याभ्यामाह·पुराक्तानिषड्याम्य

डाक्टर भाऊदाजी दत्तात्रेय संग्रहालय
DR. BHAU DAJI MEMORIAL

सौम्यस्य देशानि रिक्तानि चत्वारि संनिक्रमेण। कुवृत्ताब्धिभागांतरालानि सिंधोरुदक्तीरगाण्येभ्यएवोत्तर
स्थ॥२३॥ ॥जंबूद्वीपं भूमिगोलार्द्धं स्याद्याम्यस्थं यत्र षड्द्वीपसंस्था समानां स्यादर्णवानां स्थितिश्च
वक्ष्याम्येषां संनिवेशं क्रमेणेति पुरोक्तानि मध्यमाधिका रेखा कुमध्ययमकोटिरस्याइत्यादिना।
क्तानि पस्थानानि दक्षिणोत्तरदिक्स्थदेशाभ्यां वडवानलमेरुदेशाभ्यां रहितानि क्रमेण निरक्षदेशपरिधौ
पूर्वापरक्रमेण चत्वारि यानि स्थानानि परस्परं भूपरिधिचतुर्थांशांतरितानि लवणसमुद्रस्योत्तरदिक्स्थ
तीरस्थानि संति वर्तंते एभ्यः स्थानेभ्यः एवकारान्निरक्षदेशातिरिक्तदेशानिरासः उत्तरभागस्थितं भूगो
लस्यार्द्धं जंबूद्वीपस्यात् निरक्षदेशाभ्यां दक्षिणभागस्थितं यत् भूमिगोलस्यार्द्धं तत्र भूगोलार्द्धे षण्णां द्वी
पानां संस्थितिः समानां लवणादिसमुद्राणामवस्थानं चः समुच्चये स्यात् तथा च वृद्धवसिष्ठसिद्धांते जं
बूद्वीपाभुवोर्द्धं यदुदक्कं लवणार्णवात् प्रदेन्यस्मिन्याम्यभागे द्वीपाः स्युः शाकपूर्वकाइति ननु कथमनयोः
संनिवेशइत्यत्रप्रतिजानीते वक्ष्यामीति एषां द्वीपसमुद्राणां क्रमेण प्रसंकीर्णतयेत्यर्थः संस्थान

३५०

महारोमकोक्तरीत्यानिरूपयामि॥२४॥ ॥तत्र लवणसमुद्रावस्थानमाह निरक्षदेशाद्वडवावसानं भागाः
समंतान्नवतिः प्रकल्प्याः तत्राब्धिभागाः प्रथमानिरुक्ताः क्षारांबुधेर्विस्तृतिसंस्थितेर्ईरिति निरक्षदेशमा
रभ्य सर्वतः प्रतिनिरक्षदेशमारभ्येत्यर्थः वडवाग्निस्थानांतं यावत् दक्षिणभूगोलार्द्धे नवतिर्विभागाः
कल्पनीयाः प्रत्येकं रेखानवतिविभागांकिताः कार्याइत्यर्थः तत्र नवतिविभागांकितदक्षिणभूगोलार्द्धे
प्रथमानिरक्षदेशारंभाच्चत्वारो भागाः लवणसमुद्रस्यविस्तारस्थितेरभिज्ञैः कल्पिताः तदर्थं भूपरिधि
मितमर्थसिद्धं कथितं वलयसदृशाः समुद्रइतितात्पर्यं तत्रोत्तरतीरवृत्तं वृहद्दक्षिणतीरवृत्तमल्पं तीर
योरंतरं पद्मं चाराधोजनासन्नं विस्तृतिः ब्रह्मसिद्धांतेनुज्ञापिंडमध्यपरिधिः क्रमेण लवणार्णवः म
खलेवस्थितोधाम्नादेवासुरविभागकृत् योजनानां शतं त्रिंशाधिकं तस्यापि विस्तृतिरित्युक्तं तत्सर्व
द्वीपमानानुक्तोपेक्षणीयं॥२५॥ ॥शाकद्वीपदुग्धसमुद्रयोर्विभागस्थानमाह तत्त्रिभागोनशा
कांशमानं द्वीपस्य शाकस्य सुविस्तृतिः स्यात् प्रस्मात्त्रिभागाधिकवेदभागैर्दुग्धांबुधिः शीतकरो

पजीव्यइति·लवणासमुद्रानंतरं: चत्वारिंशत्कलायुताश्चत्वारोशाः· शाकद्वीपविस्तारः·तद्दैर्घ्यं
स्पष्टभूपरिधिस्वरूपसदृशं·समुद्राकारद्वीपमर्थसिद्धं·अस्मात्·शाकद्वीपादनंतरं·विंशतिकला
धिकलाधिकेश्वनुभिर्भागैर्दुग्धसमुद्रविस्तारणादैर्घ्यमपिस्पष्टभूपरिधिसदृशं·दुग्धसमुद्रसद्भा
वेप्रमाणमाहशीतकरेति·चंद्रोसादकः·तथाचचंद्रस्यप्रत्यक्षत्वेनतदुत्पादकत्वेनानुमानगम्यः
क्षीरसमुद्रइतिभावः॥२६॥ ॥शाल्मलद्वीपदधिसमुद्रकुशद्वीपानामवस्थानमाह·ततःशाकां
शोर्वलयाकृतीदस्याच्छाल्मलद्वीपमतः समुद्रः·दध्नोभवेत्सार्द्धयुगांशकेः स्याद्द्वीपंततः पंपलवैः
कुशाख्यमिति·दुग्धसमुद्रानंतरं·पंचभिरंशैः·इदं·पुराणप्रसिद्धं·शाल्मलद्वीपं·कामिनीशाय्यस्थि
तगजदंतजवलयानुकारंद्वीपं·अनंतरं·दध्नः समुद्रः सार्द्धचतुर्भिर्भागैः पूर्ववत्·अनंतरं·पंचभि
र्भागैः कुशसंज्ञंद्वीपं॥२७॥ ॥घृतसमुद्रक्रौंचद्वीपमाह·ततःशाकांशोर्वलयाकृतेः स्यात्तद्दध्यस्यां
तरमाज्यसिंधोः·ततःशाकांशोः सदलैर्भवेत्क्रौंचाख्यकंद्वीपमिलासुगोलइति·वलयाकारस्यघृत ३५१

समुद्रस्यतीरद्वयस्यदक्षिणोत्तरदिक्स्थस्यांतरं·मध्यभागः। पंचभिरंशैर्घृतसमुद्रविस्तारइत्यर्थः·
सार्द्धैः पंचभिरंशैर्भूगोलेक्रौंचद्वीपं॥२८॥ ॥अवशिष्टस्यसंनिवेशंपद्याभ्यामाहअमतोंगभागैर्व
लयाकृतीक्षुरसार्णवोस्माद्दधिषड्भवैः स्यात्·गोमेदकंद्वीपमतोष्टभागैर्मध्याद्विरस्मात्सदलांकभा
गैः॥२९॥ द्वीपंभवेत्पुष्करसंज्ञमस्माद्भूगोलशेषंबहवाग्निकेंद्रं·तिर्यग्घृतछत्रनिभंसमुद्रः स्वादूद
कोस्माद्विलवान्मितः स्यादिति·अनंतरं·षड्भिर्भागैर्वलयाकारइक्षुरससमुद्रः·अस्मादनंतरंषड्भि
र्भागैर्गोमेदकंद्वीपंस्यात्·अनंतरमष्टभिर्भागैर्मद्यसमुद्रः·अस्मान्मद्यसमुद्रानंतरं·सार्द्धनवभिर्भा
गैः पुष्करंद्वीपं·अस्मात्·उक्तादृविभागात्·भूगोलस्यावशिष्टंयत्·बहवाग्निस्थानंकेंद्रंमध्यभागोय
स्यतत्·विशेषतस्तद्वगमार्थमाहतिर्यग्घृतछत्रनिभमिति·तिरश्चीनत याथ तंयच्छत्रंतत्सद
शं·तिरश्चदृशा भिप्रायिकभूगर्भस्थितमनुष्यकल्पनादिरमुक्तमन्यथेतदनुपपत्तेरितिध्येयं·स्वा
दूदकसंज्ञः समुद्रः·ननुनेषांमानंवदस्यमानंकिंनोक्तमतआहअस्माद्विलवान्मितइति·पंचचत्वा

रिंशत्प्रमाणभागाइत्यर्थः॥ अयंभावः॥ अस्यसमुद्रस्यपूर्वोक्तद्वीपसमुद्राकारत्वाभावाच्छत्राकारत्वा
च्छत्रपरिधिभागात्तत्केंद्रपर्यंतंसार्द्धद्वाविंशतिभागाअवशिष्टाः॥ पूर्वोक्तानामेकस्यसार्द्धस
प्तषष्टिमितत्वात्॥ एवंछत्रकेंद्रस्थानमारभ्यापरतस्सन्मुखंपरिधिभागपर्यंतंसार्द्धद्वाविंशतिभागा
अतःपरिध्यंतरालसूत्रंछत्रसबद्धंपंचचत्वारिंशत्संपूर्णधनुःप्रमाणानव्यासमानं॥ ननुदंडवद्व्या
समानंतस्यसंपूर्णज्याकारत्वेनतदल्पत्वात्॥३०॥ ॥अथास्मिन्सप्तमसमुद्रेदेसनरकयोःस्थानवि
भागमाहवृत्तंपंचभिरंशैर्यद्दंडवास्थानकेंद्रतः॥ तन्मितस्थानकेदेसानरकाश्चवसंतितेइति॥ वड
वाग्निस्थानंतद्रूपकेंद्रात्॥ पंचभिरंशैर्यद्वृत्तं॥ लघुछत्रं॥ तत्परिमितस्थाने॥ वृत्तांतर्विभागे॥ देसाःनरकास्ता
मिस्रादयोषाविंशतिसंख्याकाः॥ ते॥ देवमनुष्यापकारिणःपापमनुष्यघातनाहेतुकाः॥ चःसमुच्चये॥ अ
तएवैकत्रावस्थानयुक्तमितिभावः॥३१॥ ॥अथवडवाग्निसंस्थानंतत्संगान्मेघवृष्टिविधत्स्वरू
पंचज्ञानराजोक्तमनुवदति॥ सुजलजलधिमध्येवाडवोग्निःस्थितोस्मात्सलिलभरनिमग्नादुत्थिताधू

ममालाःवियतिपवननीताःसर्वतस्ताइवंतिघमणिकिरणात्प्राविघतस्तत्स्फुलिंगाइति॥ सुपुजलंय
स्येतादृशाःस्वादूदकसमुद्रस्तस्यमध्यभागेकेंद्रसमसूत्रेणातंतंगभीरस्थले॥ वाडवः॥ जलाभ्यंतरेनिः
स्थितोग्निः॥ अस्मात्॥ वडवाग्नेः॥ सलिलभरनिमग्नादिति॥ पुनरुक्तंतद्रूपस्यजलाराभिश्रितत्वघातनार्थं॥ जलंप
नसंपर्केणोत्थिताधूमपरंपराआकाशोवायुविशेषगतासर्वत्रनीपमानामेघराहवाच्याः॥ लोकादृष्ट
वशादीश्वरेच्छयाइवंति॥ वर्षंति॥ विघत्स्वरूपमाहघमणीति॥ तादृशाधूमरूपांतः पातिवाडवाग्निक
णाएवसंस्थानविशेषवंतःसूर्यांशुभिरूर्ध्वचरैःसंपृक्ताविघछब्दवाच्याः॥३२॥ ॥श्लोकाभ्यांगर्जि
तस्वरूपमाह॥ ईषज्जलन्यूनमेघोवायुपूर्णःकरोतिरवे॥ गर्जितध्वनिमस्मान्नुवर्षाकालेल्पगर्जितं॥३३
॥यतस्तत्रांबुपूर्णास्तेतदन्यत्रचनोयदाः॥ स्वल्पनीरावातपूर्णाः कुर्वंतिबहुगर्जितमिति॥ अल्पज
लन्यूनतयाऽपरिपूर्णोमेघोजलरहितप्रदेशोवायुनापूर्णः॥ आकाशे॥ तदुभयाघाताद्गर्जितध्वनिंक
रोति॥ अस्मात्कारणात्॥ वायुनाशब्दोत्पत्तेः॥ वर्षाकालेस्वल्पगर्जितंस्यात्॥ पूर्वोक्तंहेतुंस्पष्टयति॥ यतइ

ति·तत्र·वर्षाकाले·जलपूर्णास्तमेघाः·अल्पवायुनाराहेतुनैकदेशेसंबद्धाइति·वर्षाकालातिरिक्तकाले
तुस्वल्पोदकावहुवायुपूर्णामेघाः बहुगर्जितंकुर्वंति·केवलजलपरिपूर्णामेघावायुसंचाराभावान्निः
राधारा॥३४॥ ॥विद्युत्पातोपपत्तिंत्रिभिःश्लोकैराह·अकस्माद्दृष्टतेजः पार्थिवांशकमिश्रितं·वा
सावेद्रुमसंघातेप्रतिकूलानुकूलयोः॥३५॥वाधास्तस्यतत्तिप्रायोघकालप्राप्तवर्षणा·यतः प्रावृषिने
वेतेपांसवःप्रसरंतिहि॥३६॥तत्रयापार्थिवंचाप्यतेजसंतत्तदुत्थितं·गर्त्तानिर्झरदाहश्चभूमिस्थैरनु
भूयतइति·विद्युत्संबंधितेजः·अनियतमववायुविशेषादुत्तपार्थिवभागापेक्षं·प्रतिकूलानुकूलयोः
वाधाः·अपतनकालेस्वाभाविकानुकूलः तत्संमुखान्यः प्रतिकूलः·अनयोरभिघातेसति·वासावद्रुमसा
णां·यत्·तत्·गुरुत्वसंस्पर्शत्वेन·अकालजातवृष्टासस्यां·हि·निश्चयेन·पतंति·प्रायइत्यौत्सर्गिकमेत
लोकादृष्टवशादितिध्येयं·वर्षास्ववश्यमपतनेहेतुमाहयतइति·प्रावृट्काले एते·प्रसक्ताः·पांसवः·
पृथिवीरजोभागाः·पंकिलतयावाधनुद्धृताः·न·उपरि·प्रसरंति·गच्छंति·हि·निश्चयेन·अतोगुरुत्वा

संस्पर्शत्वेनास्यापतनमितिभावः·तत्·विद्युत्पतनं·तेभ्यस्तेभ्यः पृथिवीजलतेजोन्यतरांशोम्यडसन्नं·
त्रिविधं·पार्थिवांशाधिक्येनपार्थिवंपतनं·एवंजलांशाधिक्येनाप्यं·तेजोंशाधिक्येनतेजसं·कथमिदं
ज्ञेयमतआहगर्त्तेति·भूस्थैर्लोकैः·यः·क्रमार्थे·गर्त्तानिर्झरदाहैः कार्यैरनुभूयते·अनुभवविषयंक्रिय
तइत्यर्थः॥३७॥ ॥श्लोकाभ्यांकरकापतनमुपपादयति·उद्धूतैःपांसुभिर्भूमेः प्रचंडपवनोद्धयात्·
मेघमंडलमानीतैर्मालिन्यपरिवर्जितैः॥३८मिश्रणाज्जलबिंदूनांपिंडीभावोभवेदिह·दृषद्वत्पतंतेते
द्रवंतेचपुनःक्षितावितिभूमेःसकाशात्·उद्धूतैः पार्थिवांशैः·प्रचंडवाधतिवेगात्·मेघकरंबप्रसानी
तैः·अतएवमेघस्थजलांशसंयोगेनमलिनतारहितैरज्वलैरित्यर्थः·मेघस्थजलबिंदूनां·संयोगात्·इ
ह·मेघे·पिंडीभावः·पृथिवीजलांशानामतिशयेनैकत्वमित्यर्थः·एते·करकात्मकाः·पाषाणखंडव
द्वृष्टिकालेपतंति·पृथिव्यांपुनरेतएवपार्थिवांशानांविस्रस्रतयाद्रवीभावंप्राप्नुवंतीत्यर्थः॥३७॥
॥ ॥इंद्रधनुःस्वरूपत्रिभिःपद्यैरुपपादयति·प्रावृषिसौराः किरणाः पयोदपटलेषुमूर्छितास्तेतु·

जनयंस्तनेकवर्णांस्तेजोधूमांबुभिर्मिश्राः।।५०।।तेजोमिश्राश्च पीतत्वं नीलत्वं जलमिश्रिताः॰ धूम
मिश्राश्च लोहित्यं एवमन्यांतिरवेः कराः।।५१।।तद्रश्मीनां सांन्निहित्यं खगोलार्द्रयतो भवेत्॰ अतस्तत्रा
पसदृशांशान्नचापं बुधैः स्मृतमिति॰ वर्षाकाले सूर्यसंबंधिनः किरणाः अनेकये वायुना परस्परं वियो
जिताः संतो मेघसमूहे मूर्छिताः॰ अभिघातात्परावृत्तास्ते किरणाः एवमप्यनेकजोमिश्राः पीतत्व॰ पी
तवर्णत्वं॰ अंभसां पीतत्वात्॰ प्राप्नुवंति॰ जलयुक्ताः॰ नीलरूपत्वं॰ सजलमेघस्य नीलत्वात्॰ निर्जल
मेघांशासंपृक्ताः॰ आरक्तवर्णतां प्राप्नुवंति॰ यतस्तादृशां किरणानां॰ सांन्निहित्यं संघातः खगोलार्द्रस्म
रियं भवेत्॰ अतोऽतो गोलांशस्य चापाकारत्वात्॰ तत्॰ किरणसंघातस्वरूपं चापाकारं बुधैरिंद्रचा
पमुक्तं।।५२।। ।।परिवेषोपपत्तिमाह संमूर्छितारवीद्रः किरणाः पवनेन मंडलीभूताः॰ नानावर्णाह
तयस्तन्वभ्रेष्वोम्नि परिवेष इति॰ वायुना मंडलाकारेण परिणताः सूर्यचंद्रयोः किरणाः॰ अल्पविरल
मेघेष्वाकाशे॰ अनेकवर्णाकाराः संमूर्छिता अभिघातात्परावृत्तास्तत्स्वरूपं परिवेष इत्यर्थः।।५३।। ।।

उल्कोपपत्तिं पक्षाभ्यामाह॰ यासां गतिर्दिविभवेद्गणितेन गम्यास्ता स्तारकाः सकलखेचरतो ति दूरे॰
तिष्ठंति याः अनियतोदयतयश्च ताराश्चंद्रादयो हि निवसंति तदाश्रिताः।।५४।।शीतांशुवज्जलमयास्तपनात्स्फुरंति ताश्चावरप्रवहमारुतसंधिसंस्थाः॰ पूर्वोनिलेस्तिमितभावमुपागतस्मि
न्नाः पतंति कुरुचिद्गुरुतावशेन॰ यासां तारकाणां स्वशक्त्या पाशक्त्या वा आकाशे पूर्वगतिरस्ति॰ ता
स्ताराः सर्वे खेटभ्यो संतदूरेऽपरिनिष्ठंति॰ तासां मध्येन काप्यल्पे साहगणितेन॰ तथा च तासां
सर्वासां साश्रयत्वेन पातासंभवो न्यायात् विषयकगणितानुपपत्तिः खेचरपातापत्तिश्चेति भावः॰ उ
ल्काविषयिण्यस्ताराश्चाह या इति॰ कर्मभूमिस्थजनानां स्वपुण्यभोगापकल्पितमूर्तयस्ताराः अतएव
नियतोदयतयः॰ अनियतोऽर्ध्वगतिर्यासां ताः॰ क्षीणपुण्यैर्मर्त्यलोकं विशंतीत्यर्थः॰ अन्यथोल्कानुप
पत्तेः॰ पतनानंतरं तदुमनासंभवाच्च॰ ताराः चंद्रादयश्चाकाशे॰ तदाश्रिताः उल्काविषयिण्यस्तिष्ठ
ति॰ चंद्रवज्जलमयाः सूर्यांशुसंपर्कात्स्फुरंति॰ बुधशुक्रवदखंडबिंबाः॰ आसां तेजसत्वांगीकारेऽप्य

MEMORIAL
P. BHAU DAJI

तिः॰ तासांभ्रमणांपतनसंभवश्चकथंद्वयोर्विरुद्धत्वात्॰ अन्यथाचंद्रपातापत्तेरित्यत आह तादृति॰ ता
दृश्यस्ताराः॰ भूवायुप्रवहवायोः संधिसंस्थाः॰ प्रवहसंबंधाद्भ्रमणमुपपन्नमितिभावः॰ पतनमु
पपादयति॰ पूर्वानिलइति॰ क्वचित्ताराविशेषस्थाने॰ क्षीणापुण्यात्॰ पूर्वानिले॰ भूवायौ॰ अस्मिन्॰
अस्मदनुभूते॰ स्तिमितभावे॰ निश्चलतांप्राप्तेसति॰ प्रवहवायोः संबंधमात्रेणाश्रयत्वाभावा
द्भूवायोस्तदाश्रयत्वेनिरस्तजलभूभागापृष्ठभागगुरुतावशेनतारा॰ पतंति॥५५॥ ॥रजःसंहतिं
संध्याकालेश्लोकत्रयेणाह वयंतेनिर्जलामेघावायुना विरलीकृताः ईषद्वाष्पावशेषास्तपतं
तिवसुधातले॥५६॥धूमावयवरूपैस्तैःछन्नतवनिसंस्थितं॰ पुनस्तैसूर्यकिरणैः शोषिता भूमिवा
युना॥५७॥विशीर्णास्तविलीयंतेरवरजःसंहतिस्त्वियं॰ अ कार्द्रास्तोदयादाभदर्शनंदिनसंध्य
केति॰ बहुदृश्यंतेजलरहितामेघाःवायुना विशीर्णाः॰ अल्पबाष्पस्वरूपशेषयेषांते॰ बाष्पस्वरूपेनधूमांशा
जलांशौ॰ भूतलेगुरुत्वात्पतंति॰ तैस्तादृशैर्मेघैःधूमावयवाकारैः भूस्थपदार्थजातंछाद्यते॰ पुनः॰ छाद्य

नानंतरं॰ तेतादृशाः मेघाः॰ सूर्यकिरणैः शोषिताः संतोनिर्जलांशाः॰ भूवायुना विशीर्णाः संत आकाशे
लीयंते॰ इयं॰ निरूपिता॰ रजःसंहतिर्यथा सूर्यस्यार्द्रोदयाभ्यांनक्षत्रदर्शनंयावत्॰ सकालादिनसंध्या॰ अर्द्धो
स्तानंतरंनक्षत्रदर्शनारंभोयस्मिन्कालेतावत्कालपर्यंतंसायंसंध्या॰ नक्षत्रदर्शनांतकालमारभ्यसूर्योदय
पर्यंतंप्रातःसंध्येत्यर्थः॰ दिनसंध्यकेसनेनसंध्याप्रकाशबलाद्दिनांतर्गतानरात्र्यंतर्गतेतिलोकव्यवहारः
समुचितःसुचितः॥५८॥ ॥त्रिभिःश्लोकैःसंध्यारागमुपपादयति॰ भूस्थितरजोधूमैर्दिगंतव्योम्निसं
स्थितैः॰ सूर्यात्पकिरणैर्भिन्नैरारुणमवभासते॥५९॥विरलावयवंवस्तुयद्दृष्टेर्व्यवधायकं॰ तेनाभ्रमरु
णीभूतंदृश्यतेशक्रचापवत्॥५०॥संध्यारागःसविज्ञेयोदिनादौचदिनात्यये॰ राकायांतुनिशावक्त्रेतथैवं
दुकराद्रमादिति॰ भूमितोवायुनोद्धूतैरजोभिर्धूमैश्च॰ दिगंतसंबंधिव्योम्नाकाशेस्थितैः सूर्यात्पकिरणैर्भिन्नैः
रजोधूमैरारुणमारक्तवर्णजनानांभासते॰ एतदर्थंस्पष्टयति॰ विरलावयवमिति॰ यत्॰ दृष्टेरावरणीभूतंतत्॰ वि
रलावयवंवस्तुसूर्यात्पकिरणारुणितादृशरजोधूमसंघातात्मकं॰ तेन॰ वस्तुना॰ अभ्रमाकाशं॰ इंद्रचाप

वदारक्तं दृश्यते लोकैः वस्तुतस्त्वाकाशस्य रूपाभावात् दिनस्यारंभांतकालयोः सः प्रकाशात्मकोज
नदृष्टः संध्यारागोज्ञेयः यथा सूर्यकिरणैः संध्यायां कदाचिद्रागो भवति तथैव सूर्यः चंद्रमंडलकि
रणाद्भवात् पौर्णमा स्यां रात्र्यारंभरागो भवतीत्यर्थः ॥५१॥ ॥इदमुक्तं प्रकृतानुपयुक्तमुपसंह
रति इति स्वादूदकांभोधिस्थितवाडवाग्निः प्रसंगादुदितं पूर्वग्रंथान्मेघनिरूपणमिति एवं पूर्वो
क्तं स्वादूदकसमुद्रांतर्गतवाडवाग्नेः संबंधात् पूर्वाचार्योक्तग्रंथात् ननु स्वबुद्धेः मेघाख्यपदार्थम
तिपादनमित्यर्थः वाडवाग्निनैतत्स्मरणादेषामुपेक्षानर्हाणां संगस्य निरूपणं कृतमिति भावः
॥५२॥ ॥अथ सिंधोरुत्कीर्णाणीत्यत्रानुपपत्तिमाशंकते ननु सिंधुतउत्तरे निरस्ता विषयस्त
र्हि कथं हि सेतुबंधः रघुनाथकृतो जनप्रसिद्धानुपपन्नो न भवेदिति चेत्सइति निरस्तादेशो लंका
यमकोटिरामकादिकः लवणसमुद्रादुत्तरभागे गीक्रियते तर्हि सेतुबंधः रामरघुपिरामकृतः लो
के प्रसिद्धः सः रावणादिवधनिमित्तकः इह जंबूद्वीपे अनुपपन्नः हि निश्चयेन कथं न भवेत् अ

३५६

पि त्वनुपपन्नो भवेदेव जंबूद्वीपे लवणसमुद्रानवस्थानात् इति चेदाशंकसे ॥५३॥ ॥समाधत्ते
अत्रोच्यते नुरगमध्यविमुक्तसप्तरत्नैषणायसगरैः खनिता वनिर्या लंकाभितो त्र लवणाब्धिजल
प्रवाहस्तारार्णवो स्ति रघुनाथनिबद्धसेतुरिति अत्राशंकायां समाधानमुच्यते तदाह नुरगेति अ
श्वमेधार्थं विमुक्तो यः सप्तिरश्वस्तस्य दंतस्य ज्ञानार्थं सगरैः लंकासमंतात् पृथिवी यो न्तरभागे
खनिता अत्र खननस्थले लंकादक्षिणस्थलवणसमुद्रस्यागतो जलप्रवाहस्तद्रूपो यः क्षारसमु
द्रस्तत्संबंधात् रघुनाथननिबद्धः सेतुर्यत्रेतादृशो स्ति अतएव समुद्रस्य सागरत्वं संगच्छते ॥५४
॥ ॥आर्यभटमतमनूद्य दूषयति केचिन्निरस्तविषयं वदंति क्षारांभोमध्यस्थमतो न दोषः एतन्न
युक्तं लवणार्णवाद्दक्षिणे जंबूद्वीपगतयतो त्रेति केचिदार्यभटादयो निरस्तदेशं दक्षिणोत्तरभूगो
लार्द्धयोः संधिरूपं क्षारसमुद्रविस्तारमध्यस्थानस्थं अस्माद्धेतोः दोषः सेतुबंधानुपपत्तिः नस्यात्
लंकागमनार्थं सेतोरावश्यकत्वात् इति वदंति तथा च तदाह लंकादिपुरचतुष्कं क्षारोदधिमध्यसे

स्थितंज्ञेयमिति·एतद्दूषयति·एतदिति·निरक्षदेशोलवणसमुद्रमध्यभागोऽतियदेतदित्यर्थः·नोपपन्नंस्या
त्·हेतुमाहलवणेति·यतोहेतोः·अत्र·भूगोले·लवणसमुद्रस्यार्द्धंनिरक्षदेशादुत्तरंजंबूद्वीपांतर्ग
तंस्यात्·भूगोलार्द्धस्यनिरक्षदेशावधिकस्यजंबूद्वीपत्वात्॥५५॥ ॥अत्रेषापत्तिमाशंक्यनिषेध
यन्स्वमतंसमर्थयति·इष्टापत्तिश्चेत्तदाभूमितंस्यादेकंद्वीपंद्वीपसिंध्वोरभेदात्·सप्तद्वीपाभूमिगोलो
नचस्यात्तस्मादार्षमन्मतंयुक्तियुक्तमिति·समुद्रद्वीपविभागद्वयानुपपत्तिर्दूषणमितिभावः·तथा
चहृद्वसिष्ठसिद्धांते·भूगोलमध्यवलयाद्याम्पस्याल्लवणार्णवः·ततोदुग्धार्णवादध्योघृतस्येक्षुरसा
स्यच·मद्यस्यस्वादुनीरस्यसप्तैवंक्रमशोऽब्धयः·यथोत्तरंचपरिधिर्न्यूनस्तेषांक्रमाद्भवेत्·लवणाब्धित
टेसौम्येनगर्योदवनिर्मिताः·भूमध्यवलयेतस्मिन्प्राकारेयक्षसंज्ञके·देवासुरविभागाख्येचतस्रश्चद्वि
जोत्तम·शोभिताःस्वर्णरत्नाद्यैः प्राकाराद्रतोरणैः·वसंतितत्रसिद्धाश्चमहात्मानोगतव्यथाः·लंकाभू मध्य
वलयेप्राच्यांवाणांगभास्करैः·ततोयोजनसंपेश्चयमकोटिःस्थिताद्विजेति॥५६॥ ॥अथजंबूद्वीपेनव

३५७

वर्षाणिविवक्षुःप्रथमंभारतवर्षपश्चाभ्यामाहनिरक्षदेशात्कनकाचलांतंखांकाश्चभागाः परितःप्रकल्पाः·लंका
त्मकेंद्रान्नवरामभागैः पंचांशयुक्तैः कृतमंडलार्द्धं॥५७सौम्यविभागलवणाब्धिरेखापर्यंतमेवंपरिधिर्हिमा
द्रिः·तन्मध्यभूमिः खलुभारताख्यंवर्षंधरागोलविदाप्रदिष्टमिति·यथानिरक्षदेशाद्दक्षिणस्यांतंपरितो
नवतिभागाःपूर्वंकृतास्तथानिरक्षदेशात्सर्वतआरभ्यमेरुपर्वतपर्यंतंभूगोलार्द्धेउत्तरेनवतिविभागाःकल्पाःत
तोलंकारूपकेंद्राद्दशकलायुक्तैकानचत्वारिंशद्भागैरुत्तरविभागेकृतंहृतस्यार्द्धेलवणसमुद्रोत्तरतीररूपरेखाप
र्यंतं·एवंपरिधिखंडरूपोहिमाचलः·परिधेरंतर्गताभूमिभरितसंज्ञंभूगोलतत्त्वज्ञेनोक्तं॥५८॥ ॥किंनरवर्षमा
हलंकाकेंद्राद्देवसार्द्धभागपंचभागैर्हृताद्रिनगोहेमकूटः·एतच्छीताद्योर्भवेदंतरालेभूमिर्वर्षंकिंनराख्यंसुरम्यमि
ति·लंकारूपपूर्वकेंद्राद्देवपूर्वरीत्यासपादषट्चांशाद्भागैर्हृताद्रिहेमकूटः पर्वतः·हेमकूटपर्वतहिमाचलयोरंतरा
लेचापाकाराभूमिः किंनरसंज्ञंवर्षं·तत्किंनरशिष्टानेनगीतनर्तनादिकौशल्येनसुंदरे॥५९॥ ॥हरिवर्षमा
हलंकाकेंद्राद्देवसार्द्धभागैर्हृताद्रिंतथानेपश्चाद्रिः·मध्याभूमिर्हेमकूटस्मृताद्योश्चापाकारंतद्धरिवर्षमुक्त

मिति·सार्द्धसप्ततिभागैः पूर्वकेंद्रादेवयथापूर्वरीत्यावृत्ताद्धैतथातत्सदृशोनैषध्यः पर्वतः·निषधदेशीयः
पर्वतस्यनिषधदेशत्वान्निषधपर्वतत्वमपिसंगच्छते·हेमकूटपर्वतोक्तनिषधपर्वतयोरंतरालस्थाभू
मिर्हरिवर्षे·हरिवर्षे·उक्तं·तदपिचापाकारं।।६०।। ।।अन्यद्वर्षत्रयंविवक्षुः प्रथमंपर्वतांतरत्रयसंनिवेशा
माह·एवंसिद्धपुरादुक्तभागैर्दत्ताद्धैकंत्रयं·शृंगवच्छुक्लनीलाख्याः पर्वताःस्युः क्रमात्त्रयइति·सिद्धपुरात्केंद्रात्
उक्तभागैः·सपंचाशैकोनचत्वारिंशद्भागैः·सपादषट्चाशद्भागैः·सार्द्धसप्ततिभागैः·क्रमात्·लंकाकेंद्रकृत्ता
द्धैत्रयरीत्यावृत्ताद्धैत्रयं·क्रमात्·त्रयः पर्वताः·शृंगवच्छुक्लनीलसंज्ञाःस्युः।।६१।। ।।वर्षत्रितयमाह·उक्त
रीत्याक्रमादेभ्योवर्षाणांत्रितयंभवेत्·कुर्वाख्यंचहिरण्याख्यंरम्यकाख्यंजनैर्युतमिति·यथाहिमाद्रिहे
मकूटपर्वतनिषधपर्वतैस्त्रिभिर्वर्षत्रयंभारताद्यमुक्तंतद्वत्तथा·एभ्यः शृंगवत्पर्वतशुक्लपर्वतनीलप
र्वतेभ्यः·वर्षाणांत्रयंस्यात्·तदाहकुर्वाख्यमिति·शृंगवत्पर्वतरूपपरिध्यंतर्गताभूमिः कुरुवर्षे·शृं
गवत्पर्वतशुक्लपर्वतयोरंतर्गताभूमिश्चापारा·हिरण्मयवर्षे·शुक्लनीलपर्वतयोरंतर्गतातादृशीभूमी

३५८

रम्यकवर्षे·प्रत्येकंलोकाकीर्णा।।६२।। ।।अन्यद्वर्षद्वयंविवक्षुः पर्वतद्वयसंनिवेशमाहमाल्यवांश्चयम
कोटिपत्तसाद्यंघ्रिभूरसलवेनगस्तथा·रामकादपिसुगंधपर्वतोनीलनैषध्यनगस्यरणविमाद्वि
ति·यमकोटिपुरात्·विपादैकषष्टिभिर्भागैर्माल्यवान्पर्वतः एवंरामकपुरादिपादैकषष्टिभिर्भा
गैः·सुगंधपर्वतः·गंधमादनपर्वतः·अनयोः पूर्ववत्संनिवेशासंभवादाहनीलेति·इमौ·मा
ल्यवद्गंधमादनपर्वतौ·प्रत्येकं·नीलनिषध्यपर्वतस्पर्शौ·यमकेटस्तद्भागांतरनीलनिषधांतर्भू
मिगतोभित्साकारः पर्वतोमाल्यवान्·एवंरामकात्तद्भागांतरनीलनिषधांतर्भूमिगतोभित्साका
रः पर्वतोगंधमादनइत्यर्थः।।६३।। ।।आभ्यांवर्षद्वयमाहयमकोटिमाल्यवद्गांतरभूमिर्गदितोयभद्रगामु
निवर्यैः·स्मृतरामकाख्यसुगंधपर्वतांतरभूमिमानमिहकेतुमालकमिति·यमकोटिमाल्यवत्पर्वतयोरं
तर्गताभूमिर्निषध्यनीलपर्वतांतर्गतापिसेव·मुनीश्वरैर्भद्राश्ववर्षमुक्तं·एवमुक्तयोः रामकसंज्ञसुगंध
मादनपर्वतयोरंतर्गतभूप्रमाणंनिषध्यनीलपर्वतयोर्मध्यस्थं·इह· जंबूद्वीपकेतुमालकंवर्षमुक्तं।।६४।। ।।

नन्वपर्वतानामेषांस्थूलविस्तारणामवधित्वेनोक्तेरुभयांतर्गतत्वेपिगणनाकस्मिन्वर्षेभवतीत्यत आ
हहिमाद्यादिनगानांस्यादेषांसंख्याः सुविस्तृतिः॰ येनयद्वर्षमुक्तंसतत्रांतर्भवतिध्रुवमिति॰ हिमाच
लादिपर्वतानामष्टानामुक्तानामंशाद्यविस्तारः स्यात्॰ येनपर्वतेनयद्वर्षमुक्तं सपर्वतस्तत्रवर्षेप्रत
र्भवति॰ निश्चयेन॰ प्रंतर्भावमेतीत्यर्थः॰ तथाहि॰ हिमाचलोभारतवर्षे॰ हेमकूटः किन्नरवर्षे॰ निषध्यप
र्वतोहरिवर्षे॰ प्रंगवान्कुरुवर्षे॰ शृङ्गीहिरण्मयवर्षे॰ नीलोरम्यकवर्षे॰ माल्यवान्भद्राश्ववर्षे॰ गंधमादनः
केतुमालकवर्षे॰ पर्वतविस्तारांतवधिरुक्तभागेरिति॰ एतेनोक्तपर्वतानामुभयांतर्गतावस्थानंनिर
स्तमितितात्पर्यं॥ ६५॥ ॥नवमंवर्षमिलावृतमाहनिषध्यनीलसुगंधसुत्पकांतरगताकुरिलावृतमा
हृतं॰ भ्रमरकेलिकुलायसमाकुलंरुचिरकांचनचित्रमहीतलमिति॰ निषध्यनीलगंधमादनमाल्यवत्पर्व
तचतुष्टयांतरालस्थिताभूमिः॰ इलावृतंवर्षभवति॰ इलावृतत्वहेतुंविशेषयति॰ आवृतमिति॰ तत्स्थानंतैः
पर्वतैश्चतुर्दिक्षुस्थितैरावृतमतइलावृतमुक्तं॰ आवृतत्वहेतुंविशेषयति॰ भ्रमरेति॰ देवानांसुरतलीलार्थं

यानिवेश्मानितैर्युक्तं॰ तथाचैतादृशस्थानस्यचतुर्दिक्ष्वावरणंयुक्तमितिभावः॰ देवैरत्रैवसुरतवेश्मानिकि
मर्थंकृतानीत्यतोविशेषयति॰ रुचिरेति॰ जांबूनदसुवर्णस्यातिसुंदरत्वात्तत्सुवर्णेनचि त्रमाश्चर्यजनकभू
तलंयस्य॰ तथाचमत्तिकादिभूमौस्वर्णगृहाणांतेषारम्यत्वासिद्धेः स्वर्णभूमौस्वर्णगृहाणामतिचित्रहरत्वाद
त्रैवस्वर्णभूमित्वाच्चसुरतगृहनिर्माणंयुक्तमितिभावः॥ ६६॥ ॥अत्रमेरुरस्तीतिभास्करोक्तमनुवदति॰ इह
हिमेरुगिरिः किलमध्यगः कनकरत्नमयस्त्रिदशालयः॰ दुहिणजन्मकुपद्मजकर्णिकेतिचपुराणविदोमुमव
र्णयन्तिति॰ इह॰ इलावृते॰ मध्यभागस्थितः॰ हि॰ निश्चयेन॰ किलेत्यागमे॰ मेरुपर्वतः॰ प्रमाणांतरघोतना
र्थेविशिनष्टि॰ कनकेति॰ सुवर्णरत्नघटितइत्यर्थः॰ तथाचसुवर्णरत्नघटितस्यास्यान्यत्रारम्यत्वेनात्रसं
स्थानंयुक्तं॰ योग्यंयोग्यायस्मैतस्मैरितिभावः॰ सुवर्णघटितत्वेप्रमाणमाहत्रिदशेति॰ तृतीयादशायुवत्वंयेषां
तेदेवास्तेषामालयं॰ देवावासस्थानं॰ मुद्राणांराज्ञांस्वर्णगृहदर्शनात्तेषांतादृशगृहसत्वेकिमाश्चर्यमिति
भावः॰ पुराणविदोव्यासादयः॰ भ्रमुंमेरुं॰ ब्रह्मणोजन्मयस्मात्तत्॰ दुहिणजन्मकमलं॰ तत्सदृशंयस्यपिवी

डाक्टर भाऊदाजी दस्तूर स्मारक संग्रह
DR. BHAU DAJI MEMORIAL

पर्वतं तस्माज्जातावर्णिका इत्येवमवर्णयन्॥६७॥ ॥मेरोः कर्णिकाकारत्वेतिदि पर्वतेनभगवांकापा
करणाथाधारानाह मंदरोगंधवानन्योविपुलोथसुपार्श्वकः॥ आधारपर्वताएतेसुमेरोः पूर्वदिक्क्रमा
दिति मेरोः पूर्वदिक्क्रमेणैतेआधाराख्याः पर्वताः तन्नामान्याह मंदरइति मंदराचलः पूर्वदिशि गं
धवान्दक्षिणदिशि अन्यइतिपश्चिमदिक्स्थगंधमादननिरासार्थं विपुलः पश्चिमदिशि सुपार्श्वउ
त्तरदिशि॥६८॥ ॥प्रवर्तचिह्नार्थंध्वजवृक्षान्वदन्दक्षिणवृक्षस्यसवोतिशायत्वमस्तीत्याहध्वजस्य
वृक्षाः क्रमतश्चतेषुकदंबजंबूवटपिप्पलाख्याः यद्वृक्षनाम्नान्तरभूमिखंडद्वीपंस्मृतंतस्यमहत्वमे
तदिति तेषाधारवृक्षेषु पूर्वादिक्क्रमात् कदंबजंबूवटपिप्पलाः ध्वजस्यवृक्षाः उत्तरदिक्कभूगोला
र्द्धस्यवृक्षस्यनाम्नाद्वीपमुक्तंतस्यवृक्षस्यजंबूसंज्ञस्य एतत् वक्ष्यमाणं महत्त्वमुत्कर्षः कदंबादिवृ
क्षनाम्नाद्वीपप्रसिद्धिवाक्यार्थमिदमुक्तमिति ध्येयं॥६९॥ ॥भास्करोक्तंमहत्त्वम नुवदति जंबूफ
लामलगलद्रसतः प्रवृत्ताजंबूनदीरसयुताभवभूसुवर्णं जांबूनदंहितदतः सुरसिद्धसंघाः शाश्व

३६०

सिबंत्यमृतपानपराङ्मुखास्तमिति जंबूवृक्षस्यमहतोयानिमहांति फलानिसुपक्वानितेभ्योमलः स्व
छोयोगलत्प्रवद्रसस्तस्मादेकीभावापन्नाजंबूनदीप्रवृत्ता इलावृतवर्षभूसंबंधिनीमृत्तिका रस
युता नदीजलयुता सुवर्णमभूत् अत्रप्रमाणमाहजांबूनदमिति हियतः तत्सुवर्णंजांबूनदमभिधा
नंतथप्रसिद्धं जंबूनदीसंबंधिजांबूनदमितिभावस्याजंबूफलानांमहाप्रमाणानांसर्वत्रैतस्तेतस्तत्रैव
पतनसंभवात्तन्नामकसंभूतनद्यास्तदभितः सत्वात्तद्रससंबंधनलावृतभूमिः स्वर्णमयीतिरुचि
रकांचनचित्रमहीतलमितिप्रागुक्तंपुक्तमृतएवास्यवृक्षस्यातरभ्योतिशायित्वादतन्नामकमतद्वी
पमितिभावः अतएवदेवास्तद्रसपानंकुर्वंतीत्याहअतइति तद्रससंयोगान्मृत्तिकापरिणामस्य
स्वर्णत्वेनतानादित्यर्थः सुरसिद्धसंघाः नित्यं तं जंबूफलामलरसं पिबंति ननुतेषाममृतमेवो
त्तमंभक्ष्यमितिकथमेनंपिबंतीत्यतआह अमृतेति एतद्रसपानेनास्माकंशरीरंस्वर्णमेवभवतीति
मत्वासंजातप्रतीतिकाअमृतवादप्यधिकमनमास्वादेनगणयंतोमृतपानेविगतस्पृहाभवंतीत्य

र्थः॰ तथाचव्यासस्सिद्धांते॰ जंबूद्वीपस्यसाजंबूनामहेतुर्महामुने॰ महागजप्रमाणानिजंबूफलानिवै॰ प
तंतिभूमौतः पक्वशीर्यमाणानिसर्वशः॰ रसेनतेषां मख्यातातत्रजंबूनदीतिवै॰ सरित्प्रवर्त्ततासापिपीयतेतत्रवा
रिभिः॰ नस्वेदानवरोगौघ्यंनजरानेंद्रियक्षयः॰ तत्पानस्वच्छमनसांभूतानांतत्रजायते॰ तीरमृत्तद्रसंप्राप्यसु
खवायुविशोषिता॰ जांबूनदाख्यंभवतिसुवर्णंसिद्धभूषणमिति॥ ००॥ ॥अथवृक्षाणांवनांतरगतत्वाद्वना
न्याह॰ चैत्ररथंनंदनकंज्ञेयंतस्माच्चसर्वतोभद्रं॰ वैभ्राजमितिसुरम्यंवनंनिरुक्तंक्रमादृषिति॰ एषु॰ आधारपर्व
तेषु॰ पूर्वक्रमात्सुरम्यं॰ वनमित्यक्तं॰ रोपंतन्नामस्पष्टं॥ ०१॥ ॥अथगंगागमनोक्तौसरोवराणामावश्यकत्वा
त्प्रसंगेनभास्करोक्तसरोवरनिबंधनमनुवदति॰ सरांस्यथैतेषरुणांचमानसंमहाह्रदंश्वेतजलंयथाक्रमं॰ स
रस्सुरामारमणाश्रमालसाः॰ सुरारमंतेजलकेलिलालसाइति॰ एतेषु॰ वनेषुयथाक्रमं॰ पूर्वक्रमात्॰ सरोवराणि॰
चैत्ररथवने॰ अरुणारव्यं॰ नंदनवनेमानसाख्यं॰ सर्वतोभद्रवनेमहाह्रदाख्यं॰ वैभ्राजवनेश्वेतजलाख्यं॰ तत्स
द्भावेपुराणप्रमाणमितिदेवजलक्रीडास्थानत्वेनाहसरांस्विति॰ उक्तसरोवरेषुदेवारमंते॰ जलक्रीडांकुर्वं

तीत्यर्थः॰ जलक्रीडायांहेतुमाहजलेति॰ परस्परजलकणसिंचनजलमज्जनादिनानाविधजलक्रीडा
सुकृतांतःकरणाः॰ तद्विशावंतइत्यर्थः॰ इष्टायांहेतुमाहरामेति॰ रामाअंगनाः॰ ताभिः सहरमणाक्रीडनं॰ सु
रतं॰ तेनसंजातोयः श्रमस्तेनालसाः॰ व्यापारांतरक्षमाइत्यर्थः॰ तदपनोदस्तजलक्रीडयेतितद्विशाजा
यते॰ यथामरपरिवृताः सहसुरललनाललामपूर्णपतयइपदेवगणैरुपगीयमानमहिमानः किलविह
रंतीतिभागवतमत्रप्रमाणमितिभावः॥ ०२॥ ॥मेरावष्टदिक्पालानामवस्थानानित्रिभिःश्लोकैराह॰
मेरोः पूर्वशक्रपुरीपूर्वस्मिन्नमरावती॰ तेजोवतीवह्निदिक्स्थावह्नेर्याम्ययमस्यतु॥ ०३॥संयमिन्यास्य
कातस्मान्नैऋतीदिशिनिर्ऋतेः॰ कृष्णांगनापुरीपश्चाद्वारुणीवरुणस्यच॥ ०५॥वायव्यांगंधवत्याख्यावायोः
सोम्यमहोदया॰ कुबेरस्यशशिदिक्स्थासारुद्धारास्यपुरावतीति॰ सुगमार्थं॰ अग्नेमहादेवस्थानस्यएषगुक्त
रत्ररुद्धारास्यस्यक्तं॥ ०५॥ ॥मेरोर्मध्यभागेदेवसिद्धानांवसतिंवदंस्तत्रदिनरात्रिव्यवस्थामाह॰ सुवर्णा
द्रिमध्येवसंतिदेवाः ससिद्धाः सदायत्रतस्मिन्नवरांशुः॰ स्थिरक्रांतिवृत्तस्थमेषादिषड्दिनंजूकषड्करो

तिसपांचेति·यस्मिन्मेरोर्मध्यभागे·दिक्पालाष्टाविरक्तादेवाः सिद्धैः सहिताः·नित्यंवसंति·तस्मिन्मेरुस्थानेसूर्यः·उत्तरगोलेदिनंदक्षिणगोलेरात्रिंचकरोति·उत्तरध्रुवस्यमेरुखमध्यस्थितत्वाद्दक्षिणध्रुवस्यवडवाग्निस्थानस्वमध्यस्थितत्वाद्भूवातमध्यभागस्थविषुवद्वृत्तस्यतद्गोलार्द्धसंधिवृत्तत्वनक्षितिजत्वाच्चोत्तरगोलेदेवानांमेरुस्थानांसूर्यदर्शनाद्दिनं·वडवास्थानादैत्यानांतद्दर्शनाद्रात्रिः दक्षिणगोलेमेरुस्थानांसूर्यादर्शनाद्रात्रिर्वडवाग्निस्थानांतुतद्दर्शनाद्दिनमितिगोलस्थितिसासुबक्तंचैतदितिध्येयं॥ ७६॥ ॥मेरोशिखरत्रयंवर्णनाद्यंतशिखरयोर्ब्रह्ममहादेवयोरावासनगरमाह·सद्रत्नकांचनमयंशिखरत्रयंचमेरावतोनिगदितः सचरत्नसानुः·तत्रैकमुद्भिपुरमस्तिचशातकुंभस्त्रष्टुः परस्यशिरसिस्त्रिपुरांतकस्येति·मेरो·रत्नसुवर्णघटितंसुंदरंशिखरत्रयं·अतएवसमेरुरत्नसानुरभिधानग्रपेउक्तः·सानोः शिखरवाचकत्वात·तत्र·तच्छिखराग्रवसतिकथनोपक्रमे·एकशिखरस्यमस्तकेस्त्रष्टुर्ब्रह्मणः शातकुंभाख्यंनगरमस्ति·स्त्रष्टुरिसनेनसृष्टिस्तत्कार्यं·परस्य·अपरभागस्थितस्यशिखरस्यमस्तके·त्रिपुरांतकस्यमहादेवस्यशिवाख्यंपुरम

३६२

स्ति·त्रिपुरांतकेतिसंहारस्तत्कार्यं॥ ७०॥ ॥मध्यभागेवसतिस्थानमाह·विश्वंभरस्यारिसरोजशंखगदाधरस्यामितविक्रमस्य·वैकुंठसंज्ञंपुरमस्तिमध्यभागेसदाश्रीकरलालितांघ्रेरिति·मध्यमशिखरेविश्वंभरस्य·विष्णोर्वैकुंठाख्यंनगरमस्ति·विश्वंभरेतिविश्वभरणांतकार्यं·अरिश्चक्रं·सरोजपद्मं·शंखः पाञ्चजन्यः·गदा·कौमोदकाख्या·एतान्धारयतीतिधरः·अनेनचतुर्भुजत्वंनियतमनुग्रहमामर्थ्यंचसूचितं·अपरिमितोविक्रमः पराक्रमोयस्य·नित्यंलक्ष्म्याहस्तेनसंवाहितौपादौयस्य॥ ७१॥ ॥अथप्रसंगाद्गंगागमनंविवक्षुः प्रथमतस्याः सरोवरेयागमनमाह·विष्णुपादकमलस्थितगंगानिःसृताकनकपर्वतपृष्ठे·प्रागतातनद्यंचचतुर्द्दिक्षुसंस्थितसरोवरगाभूदिति·विष्णोश्चरणकमलसंवाहनेनतत्स्थितगंगानिःसृताः·अनंतरंसुवर्णपर्वतपृष्ठभागेप्रागता·इयंगंगाचतुर्द्धाभूत्वा·दिक्षु·पूर्वादिषु·संस्थितानि·अरुणादीनिसरोवराणितेषुगता·अभूत्॥ ७७॥ ॥पूर्वपश्चिमगंगाप्रवाहयोर्भद्राश्वकेतुमालागतयोर्नामनीश्चा

हगंगाप्रवाहोरुणासंगतोयः सीताभिधोभद्रतुरंगमाख्यं महाह्रदाद्योपिचचक्षुराख्यः सुकेतुमालं
विमलोगमत्सइति ॥ अरुणसरोवरमिश्रितो यो गंगाप्रवाहः सीतासंज्ञः सभद्राश्वमगमत् यश्च
महाह्रदसरः संयुक्तः सचक्षुः संज्ञो विमलः पापनाशकः केतुमालमगमत् ॥ ८० ॥ ॥ उत्तरदक्षिणा
प्रवाहयोः संख्यामाह ॥ श्वेतांबुसंसक्तजलप्रवाहाभद्राभिधोभूत्कुरुवर्षमाप्तः समानसाविसुपरस्य
गंगायाभारतसालकनंदसंज्ञेति ॥ श्वेतजलसरोवरसंयुक्तगंगाजलप्रवाहोभद्राख्यः कुरुवर्षप्राप्तोभू
त् यो विसुपदांभोजमकरंदीभूतागंगा समानसा मानससरोवरसंयुक्ता सा ॥ अलकनंदाख्या भार
तंवर्षप्राप्तोभूत् ॥ ८१ ॥ ॥ स्वजिह्वाकृतार्थतासंपादकोत्कर्षवर्णयति ॥ योमानवोसंततनिषिद्धकर्मा
यदुद्भतोदेवमुखाः प्रभीताः तंकुर्वतीदर्शनतः सलीलंविसुशिवंवाजयतीहगंगेति ॥ योमनुष्यः अ
संततनिषिद्धकर्माचरणशीलः यस्याद्वारार्थं देवतीर्थसरितः प्रभीताः यस्याद्वारांगीकारंनकुर्वंति
असामर्थ्यादितिभावः तं मनुष्यं स्वदर्शनेनेसर्थः गंगा सलीलहेलया अप्रयासेनेसर्थः विसु

३६३

शिवंवा प्रकुर्वती सारूप्यमुक्तिंदत्तीअंबूद्वीपेजयति सर्वोत्कर्षेणास्ति ॥ ८२ ॥ ॥ अथभारतवर्षेन
वखंडविभागंविवक्षुः प्रथमंहिमालयदर्शनेविक्रदयमाह ॥ अस्मिन्वर्षेभारताख्येहिमाद्रिसारांभो
ध्योः संयुतिभ्यांक्रमेण प्राक्पश्चाद्भागयोः सपादसप्ताशयोः कार्यमद्वौसुविक्रमिति ॥ अस्मिन् अ
स्मदधिष्ठितवर्षे भारतसंज्ञे हिमाचललवणसमुद्रयोः प्राक्पश्चाद्भागाभ्यांक्रमेणप्रागेकत्रिंशद्भागैः
पश्चात्सपादसप्तचत्वारिंशद्भागैः हिमाचले सुविक्रदयंकार्यं ॥ ८३ ॥ ॥ तद्यथमेवसमुद्रेविक्र
दयंवदन्समदिविक्रयोरखकार्यदत्साह ॥ युतिभ्यांक्रमात्प्राक्पश्चाद्लाघत्रिंशद्भागान्नवाक्षीणिभागान्म
त्र या जीवा तदग्रे पितावदेवांतरमस्तीति तज्जीवाग्रादाकाशपर्यंतं तद्धनुरंशेषु या घटिकास्ता एव लंबन
नाड्यः । नतकपपत्तिस्तु क्षितिजस्थे त्रिभोनलग्ने परमानतिकलाश्चतुर्गुणितपरमक्रांतिज्या ५८।५६ तुल्या
भवंति । स्वमध्यस्थे नतस्य भावः । मध्ये यदि त्रिज्यातुल्यया त्रिभोनलग्ननतज्यया चतुर्गुणितपरक्रांतिज्यातु
ल्याः परमानतिकलास्तदेष्टनतज्यया का इत्यत्र चतुर्गुणकस्य एव त्रैराशिकेन नतांशापमज्या सिद्धा । सा चतु
र्गुणा नतिकलाः । अमांतार्कमध्याह्नलग्नांतरांशास्थिता घटिकाक्रांतिचिह्नेन सक्रा । तदग्रज्यकाग्रे घ

ग्रेलंबनंस्यान्नतांशाः खलग्नेनतिस्त्रज्यकार्द्धमितिसिद्धांतसुंदरोक्तंस्थूलं·दृग्वृत्तलंबनांगीकारात्·पंचदशां
गुलपरमनतसंगीकाराच्चेतिध्येयं·अथशरोपपत्तिः·त्रिज्यातुल्यपासपातचंद्रदोर्ज्यापरमाःशरकलाःख
भमितास्तदेष्टयाकाइतिसपातचंद्रभुजज्यायागुणा२००हरो३०हरापवर्त्तनेनगुणास्थानेनवातोज्यानव
गुणाशरकलाइत्यपपन्नंसर्वं॥२०॥ ॥अथषष्ठ्यंशराशिकेविधीयमानेप्रमाणस्थानेयदित्रिज्याभवति
तदायंत्रादिष्टाफलसाधनमाहत्रिज्याप्रमाणेपतितेनुपातेकेंद्रात्तदिष्टावलयंविधेयं·ज्यावसलंतद्वलयेवलंबा
लंभाग्रगालंबगतेष्टयावा॥२१॥अनुपातेराशित्रयंभवति·तत्रादौप्रमाणं·मध्येप्रमाणाफलं·अंतेइष्टाअत्रप्रमा
णाफलस्यलभ्यमितिसंज्ञाकृता·अथयत्रकुत्रचिदनुपातेत्रिज्याप्रमाणंभवति·तत्रकेंद्रात्स्वाभीष्टामितांगुलभा
सार्द्धनवृत्तंकार्यं·अनंतरंलभ्यमितांगुलान्याकाशरेखायाः क्षितिरेखायावाज्यार्द्धवद्वात दग्रस्थापितात्केंद्रा
वलंबात्कृतवृत्तेज्यार्द्धवदिष्टाफलंस्यात्·आकाशक्षितिजरेखाभ्यामवलंबवृत्तयोगपर्यंतमंगुलात्मकार्द्धज्याभयत्रे
ष्टाफलमित्यर्थः·लंबगतेष्टयेति·अथवेष्टाग्रेस्थापितोवलंबोलभ्यांगुलकृतवृत्तयत्रलगतितत्रापितद्वदेष्टाफ

३८९

लंस्यात्·अत्रोपपत्तिः· यत्रानुपाते त्रिज्याप्रमाणंभवति·तत्रप्रमाणफलमिष्टयागुणितंत्रिज्यया भक्तंसदिष्टा
फलंभवति·तत्रेष्टयालभ्यनवावृत्तंकृत्वालभ्याग्रेइष्टाग्रेवापरीसंस्थाप्यानंतरजातगुणाहरयोः समतायप्यास्या
त्तपानुपातोयदित्रिज्याभ्यासार्द्धलभ्यतुल्येष्टातुल्यावा भुजज्यालभ्यतेतदेष्टाभ्यासार्द्धलभ्यभ्यासार्द्धवाकइ
तिलब्धतस्मिन्वृत्तेभुजज्यारूपमिष्टाफलमित्यपपन्नं॥२१॥ ॥अथयत्रानुपातेलभ्यमिष्टावात्रिज्याभव
तितदेष्टाफलसाधनमाहकेंद्रात्त्रिभज्यान्यसमक्षमाज्यासत्तप्रमाणाग्रगपरिकांकात्·केंद्रावधिस्यात्फल
मंगुलानिलभ्येष्टयोर्भासदलंयदिस्यात्॥२२लभ्येइष्टायांवात्रिज्यायदितदाकेंद्रमारभ्य·त्रिज्यातिरिक्त
लभ्येनेष्टयावा·ननुप्रमाणं·तुल्यभूरेखेकदेशस्तत्रयाज्यातस्यासत्तायाआकाशरेखायाः प्रमाणमि
तांगुलानिपरिधावर्द्धज्यावद्वात दग्रस्थापितपरिकातस्याश्चिद्रंतस्मात्केंद्रपर्यंतंपरिकायामंगु
लानीष्टाफलंस्यात्·अत्रोपपत्तिः·तत्रप्रथममिष्टांकेंद्राद्भ्रमोदत्वातत्रयाजीवातस्याआकाशरेखा
याश्चसर्वत्रेष्टातुल्यमेवांतरं·ततोलभ्यंत्रिज्यातुल्यमतआकाशात्प्रमाणाग्रेपरिधौपरीसंस्थापप

दिप्रमाणतुल्ये भुजे त्रिज्याकर्णास्तदेष्टतुल्यभुजेक इति लब्धमिष्टाग्रज्यापदीयोगपर्यंतं केंद्राकर्णरूपमिष्टाफ
लं॰ अथवा केंद्राद्भूमौ लब्धं दत्वा प्रमाणाग्रे पदीं संस्थाप्य यदि प्रमाणभुजे त्रिज्याकर्णास्तदा लब्धभुजेक इति
पूर्ववदेव गुणाहराभ्यां कर्णरूपमिष्टाफलमुत्पद्यते ॥२२॥ ॥ यदि त्रैराशिके त्रिज्यानाडीतदेष्टाफलसाध
नं वदंस्तूर्ययंत्रमुपसंहरति॰ लब्धं त्रिज्यापरिणतकृतं तत्त्रिभज्याप्रमाणात्त्रिज्याभावे फलमिहभवेदिष्टमेवं च
सर्वं॰ यस्मिन्यंत्रे गणितजनितं ज्ञायते तत्तु लीलागम्यं रम्यं रचितं तुर्यमाश्चर्यकारि ॥२३॥ यत्र त्रैराशिके त्रिज्या
भावस्तस्मिन् केंद्राद्भूमौ लब्धमितांगुलानि दत्वा तदग्रे याज्यारेखासाकाशास्त्रमाणमितांगुलाग्रस्थपदिकायां यत्र
लगति ततः केंद्रपर्यंतं पदीमार्गेणायत्कर्णरूपं तल्लब्धं त्रिज्यापरिणतकृतं तत्र भवति॰ अथाकाशात्कुजा
द्वा त्रिज्यापरिणतकृतलब्धमितांगुलानि ज्याद्वेदत्वा तदग्रे पदीं संस्थाप्य केंद्रात्पदीमार्गेणाष्टमितांगुलानि द
त्वा तच्छिद्राद्याकाशरेखावधिभूम्यवधिवाक्रमेणाष्टाफलं भवति॰ अत्रोपपत्तिः॰ यत्र प्रमाणलब्धेष्टासु त्रिज्या
भावस्तत्र यंत्रेनुपातः कर्तुं न शक्यते इति लब्धं त्रिज्यापरिणतं कृतं॰ तत्रानुपातः॰ यदीष्टप्रमाणेनातावल्लब्धं तदा

३८०

त्रिज्याप्रमाणे किं यदिति॰ रावं सति लब्धं त्रिज्यया गुणं प्रमाणेन भाज्यं॰ अत्र फलसाम्यं दृष्ट्वा केंद्राद्भूमौ लब्धं दत्वा
प्रमाणाग्रे पदीं च संस्थाप्यान्यथानुपातः कृतः यदीष्टप्रमाणतुल्ये भुजे त्रिज्याकर्णास्तदा लब्धतुल्ये भुजे क इ
ति फलं लब्धाग्रस्थज्यापदीयोगपर्यंतं केंद्राकर्णरूपं त्रिज्यापरिणतं लब्धं॰ तथान्यानुपातः॰ यदि त्रिज्याप्रमा
णात्तावल्लब्धं तदेष्टायां किमित्येवं सति लब्धमिष्टया गुणं॰ त्रिज्यया भाज्यं फलमिष्टाफलं भवति॰ अत्रापि
फलसाम्यं दृष्ट्वाग्रे पदीं संस्थाप्य तस्यां त्रिज्यापरिणतं लब्धं दत्वान्यथानुपातः कृतः॰ यदि त्रिज्याकर्णे इष्टा
तुल्ये भुजस्तदा त्रिज्यापरिणतलब्धतुल्ये कर्णे क इति फलमिष्टाग्रस्थज्यापदीयोगात्स्थितिपर्यंतमाकाशरे
खापर्यंतं वा भुजरूपमिष्टाफलमित्यपपन्नं ॥२३॥ ॥ तुर्यादेशाप्रसंगेन यंत्रचिंतामणिर्मया ॥ व्याख्यातो
निखिलोराम प्रसादात्प्रकृतं त्वथ ॥१॥ ॥ तत्र फलकयंत्रसिद्ध्यर्थं शिल्पक्रियामाह॰ कर्तव्यं चतुरस्रकं सुफ
लकं षड्गंसंख्यांगुलविस्तारेस्पर्शसांगकांगुलमितायामस्य नेम्यर्द्धके॰ आधारः श्लक्ष्णखलादिघटितो रेखा
चतस्रो वोपमास्वाधारात्स्पर्शमत्रिभागविगमेस्याः सात्रदीर्घा पुनरिति॰ काष्ठादिघटितमायतचतुरस्रं सुफ

MEMORIAL DR BHAU DAJI

लकं·सुपदास्त्रिगर्भकार्यं·तद्विस्तारमानमाह षड्गेति·विस्तारे षड्विंशदंगुलांकं कार्यं·अस्य दैर्घ्यमानं चक्रं यंत्रवद्धा
रणार्थं चाह अस्येति·षड्विंशदंगुलविस्तृतस्य द्वाषष्ठ्यंगुलप्रमितदैर्घ्यस्य फलकस्य नेम्यष्टस्थाने अल्पपर्यंखलादिघा
टितं आधारः कार्यः·स्वाधारात्·स्वस्य यंत्रस्याधारात्·सुष्ठ्वाधाराद्वा·लंबाकारा विस्तारमितारेखा कार्या·अस्याआ
धारे रेखायाः·आधारनेमिस्थानमारभ्य प्रथमत्रनीयांशांतस्थाने·अत्रे·फलके·पुनः सारेखा दीर्घा·यंत्रदैर्घ्याका
रात्तज्जी कार्या॥२६॥ ॥अस्यां क्रियामाह रेखायुतावत्र विदा विधेयं छिद्रं ततो कांगुलकैः सुवृत्तं·केंद्रे शलाका सरलाक्ष
संज्ञा क्षेप्या बहिः स्याच्चयपार्कमानेति·अत्र फलके·रेखयोः·लंबरेखादैर्घ्यरेखयोः·संपाते·विदा यंत्रज्ञेन·छिद्रं का
र्यं·ततः·छिद्ररूपकेंद्राद्द्वादशांगुलकैरभितः सुवृत्तं कार्यं·केंद्रे·शलाकात्तज्जी·बहिर्यंत्राद्बहिर्यथा द्वादशांगुला भव
ति तथा क्षेप्या क्षेप्या॥२७॥ ॥अक्षपट्टीप्रोतनमाह·स्थूलसरंध्रैकाग्रा रचिता पट्टीकृता प्रोता·देवांगुलाक्षसं
ज्ञे कार्या शिंशिपलायथा भ्रमतीति·काष्ठादिघटितपट्टीकृता·अस्थूलाः स्थूलरंध्रसहितमेकमग्रं यस्याः सा·देवांगुला·
त्रयस्त्रिंशदंगुलदीर्घा कृता·अक्षसंज्ञे तथा शिंशिपला प्रोता कार्या·यथा यंत्रफलके सर्वतः इष्टयानीयमाना भ्रमति

३५९

चरज्यारविभि ३

॥२८॥ ॥वृत्तेभगणांशा षष्टिघटीरंकेन पघ्यां चयष्टांकेन मेतद्यंत्रोपयुक्तां चरज्यामिति पद्याभ्यामाह वृत्तं च भांशैः
परिधौ तदंकं षष्ट्या घटीनामपचाक्षकर्णः·त्रिज्यागुणः सूर्यदिनज्यया प्रो यष्टिर्भवेत्तां सुषिरात्प्रदत्वा॥२९ पद्यां
सुचिह्नगणकेन कार्यं तत्रो विभक्ता·त्रिजीवया लब्धमिता चरज्या बोध्या त्रयंत्रे त्रिमकर्महेतुरिति·तत्सूर्वोक्तं वृत्तं
परिधिस्थाने द्वादशारात्रयंशैः समविभागानां कं·घटीनां षष्ट्या चांकं·षड्भागैरेका घटिकेति रीत्या·अनंतरं
तु स्वदेशाक्षकर्णस्त्रिज्यया गुणितः सूर्यक्रज्यया भक्तः फलं यष्टिः स्यात्·पद्यां पूर्वोक्तायां·सुषिरात्·छिद्र
मारभ्य·तां यष्टिं प्रकर्षेण विगणनपूर्वकं दत्वा तदग्रे यष्टिज्ञापकं चिह्नगणकेन कार्यं·ग्रंथोक्ता चरज्या द्वा
दशगुणिता·त्रिज्यया भक्ता·लब्धप्रमाणा·अस्मिन्फलके यंत्रे चरज्या·अस्मिन्क्रियानिमित्तकारणीभू
ता ज्ञेया॥३०॥ ॥कालज्ञानार्थं यंत्रे सूर्यस्थानज्ञानं भास्करोक्तमनुवदति·धार्यं तथा फलकयंत्रमिदं यथै
वं तत्पार्श्वयोर्लगनितुल्यमिनस्य तेजः·छायासजास्य शनितस्परिधौ यमांशं तत्रांशकैमतिमतात्तरणिः प्र
कल्प इति·यंत्रपार्श्वयोः·यस्मिन्भागे वृत्ताधं तस्मिन्भागे चेत्यर्थः·सूर्यबिंबस्य तेजः·यथा तुल्यलगतिः यं

त्रायामविस्तारधारायांसमसूत्रेणसूर्यबिंबंयथाभवतीत्यर्थः तथा एवकाराद्विलक्षणास्थितेर्निरासः इ
दं प्रतिपादितं फलकसंज्ञंयंत्रमाधारस्थंखलायांधार्यं तादृशावस्थितयंत्रस्थवृत्तपरिधौ यं प्रदेशाम
क्षीपाछायास्पर्शाति तस्मिन्प्रदेशेधीमतासूर्यस्थानंप्रकल्पं छायाग्रस्थसूर्यबिंबादुत्तरतस्तदग्रमेवसूर्यस्था
नंयुक्तमिनस्पष्टांशास्यसंदिग्धत्वाद्वास्तवसूर्यस्थानमनुक्तमितिधीमतेतिहेतुगर्भं॥३१॥ ॥कालज्ञान
माह अक्षप्रोतांरविलवगतांपट्टिकांन्यस्ययष्टेर्यत्राप्यंकोभवतिफलकेस्माद्दृग्याम्यगोले ऊर्ध्वाधोयच्च
रगुणमितंलंबवत्सूत्रमस्याग्रस्थग्रेखापरिधियुतिलंबांतरेनम्रनाघइति अक्षप्रोतांपट्टीसूर्यस्थानां
शास्पष्टांस्थापयित्वाफलकयंत्रे यस्मिन्प्रदेशेयष्टेश्चिह्नंस्यात् अस्मात्प्रदेशादुत्तरदक्षिणगोलयोः क्र
मेणाधोभागेधोभागेचरज्यामितलंबाकारसूत्ररेखसर्पः अस्यरेखारूपसूत्रस्याग्रभागस्पर्शिनीयं
त्रदेष्याकाररेखा वृत्तपरिधिः अनयोर्युति वृत्तस्यलंबरेखासक्तपरिधिप्रदेशाः अनयोर्मध्येवृत्तप
रिधेकदेशोस्थिताघट्यानतकालघट्यः स्फः॥३२॥ ॥अस्मिन्यंत्रेकालज्ञानेक्षछायाचिह्नस्थानज्ञानमा

३९२

१९२

हलंबादेयाविनतपट्टिकास्तज्ज्यकातश्चरज्याभ्यस्तादेयाभवतिचतदग्रेपरातत्रयाज्या धार्यापट्टीस्पर्शातिहि
यथातांज्यकांपट्टिचिह्नेपट्टीवृत्तेनिपततितदाक्षस्यपत्रप्रभात्रेति परिधौलंबरेखायाः सकाशान्नतघट्यो
देयास्तदग्रेयंत्रदेर्घ्यरेखायाः सकाशाच्चरज्या पूर्वोक्तात् व्यस्ता उदग्याम्यगोले अधजुर्ध्वलंबसूत्रवदेया
तदग्रे चरज्यांतस्थाने तत्र फलके या नतांशज्यापोऽपराज्या यंत्रदीर्घरेखाकारास्यात् तांज्यांपट्टी येपिचि
ह्नयथा हि निश्चयेनस्पष्टाभवतितथापट्टीधार्या सैवपट्टी वृत्तेयस्मिन्परिधिभागेलगति तदा ज्ञातनतकाले
अत्र पट्टीस्पष्टपरिधिभागेऽक्षस्यछायावत्रंपतति॥३३॥ ॥सप्रतिज्ञमेतदुपपत्तिकथनोपक्रमेचतुर
स्रकरणोपपत्तिंत्रिज्यांशंकोरभेदंचाह अत्रोपपत्तिश्चतुरस्रकार्यंसुवृत्ततोलाघवमस्तियस्मात् तस्मात्फला
खंचतुरस्रमुक्तमर्कैर्मितोनात्रिगुणोपिकल्प्यइति अत्र फलकयंत्रोपकल्पनप्रकारे उपपत्तिरुच्यते तत्र
यस्माच्चतुरस्रीकरणंवृत्तकरणाल्लघुभूतमस्ति तस्मात् फलकाख्ययंत्रंचतुरस्रमायतमुक्तं लाघवार्थंदृ
ग्गोलेशंकुस्त्रिज्याचकल्प्या॥३५॥ ॥विस्तारदेर्घ्ययोरुपपत्तिमाह अग्रेतोक्तरीत्यात्रिगुणात्रिमज्यावि

स्तारमर्कांगुलनुः यरांस्या· यतोरसांगांशामितांक्षदेशोसुरैर्मितातोस्यरसांगदैर्घ्यमिति·वक्ष्यमाणरीत्या·त्रि
गुणितत्रिज्या·षड्विंशात्·तदंगुलमितविस्तारमेतत्कृतं·यतोहेतोः षड्ष्यक्षांशादेशांगुलितविरामावधिभूते·
द्वादशांगुलशंकोः परमोत्यात्रयस्त्रिंशान्मिता·तथाहि·शंकोरिष्टहतेः कर्णत्वाद्द्वादशांगुलशंकोः फलकर्णस्य व
हृतिः··तेनषड्ष्यक्षांशादेशचतुर्विंशांशज्याकोटित्रिज्याकर्णस्तदाद्वादशांगुलशंकुकोटिकः कर्णइतिसा·द्वै
कोनत्रिंशात्२७।३० फज्याप्रमाणेनतत्फलकर्णतुल्येषड्हृतिस्तदात्रिज्याप्रमाणनकेतिपरमक्रांतिजघज्य
यापरमेष्टांत्यासप्तदशावयवाधिकद्वात्रिंशात्·त्रयस्त्रिंशात्संबंधादधिकग्रहणदोषाभावाच्चत्रयस्त्रि
शत्परमेष्टांत्येति··अतःकारणात्पट्टिकायास्तत्तुल्यायाः भ्रमणफलकदैर्घ्यंतद्द्विगुणमपेक्षितंततोस्यफल
कस्यषड्ष्टिमितंदैर्घ्यमुपपन्नं।।३५।। ।।आधारशृंखलोपपत्तिमाह·दृग्वृत्तसंस्थावदिदंयथास्यात्तथा
मनुष्यैस्तुयतोविधेयं··अतोस्यदैर्घ्यांचितनेमिमध्येध्यत्यर्थमाधारकशृंखलादिरिति·इदं·फलकयंत्रं·
दृग्वृत्तावस्थितिकंयथाभवतितथामनुष्यैर्यस्मात्कार्यमतोहेतोः··अस्य·फलकस्यदैर्घ्येण·दीर्घतया·अं ३९३

१२

चिता·स्पष्टा·यानेमितस्यामध्यभागे·ध्यत्यर्थं·धरणानिमित्तं··आधारमस्तकेशृंखलादिरुक्तः।।३६।। ।।तं
बादिपदीयष्टिदानांतकर्मणउपपत्तिं· यष्ट्यानयनोपपत्तिप्रतिज्ञांचेतिश्लोकचतुष्टयेनाह··आधारतोयंत्र
मिदंद्विखंडंरेखाकृतास्माद्वलंबरूपा··आग्रोक्तरीत्याध्यतितोत्रदेयाचरज्यकायापरमाभवेत्सा।।३७।।
त्रिज्यामितातोध्यतितोत्रयंत्रत्रिभागकदैर्घ्यमितासुरेखा·छायार्थमक्षस्यनिवेशनार्थंरेखायुतोछिद्र
मतोत्रवृत्तं।।३८।।त्रिभज्यपामंडलगोयतोर्कःकेंद्रेक्षकोर्कांगुलनाकृतोस्मिन्·वृत्तेभभागारविनुंगभागज्ञा
नार्थमंकाःखरसाश्चधघः।।३९।।घटीप्रबोधार्थमिहाक्षमूलेपरांसकासंमितपट्टिकातु·प्रोतात्रयष्टिः
सुषिरात्प्रदत्तातद्वासनापिस्फुटमुच्यतेतइति··आधारस्थानाते·इदं·फलकयंत्रं·द्विखंडंद्वेखंडेयस्यसेनाद
शंयस्माद्दस्माद्वलंबरूपारेखातद्वापिकाकृता·वक्ष्यमाणरीत्यायापरमाचरज्याभवेत्सा··अत्र·यंत्रे· त्रि
ज्यामिता·ध्यतितआधारादेया··अतोहेतोः··आधारादस्मिन्यंत्रत्रिभागेप्रथमे·दैर्घ्यमानारेखाकृता·अर्धां
शाद्वयंभिन्नमुपर्यकोंशोभिन्नइतिज्ञापिका·यंत्रेछायोत्सर्पमक्षनिवेशनमावश्यकं·तन्निमित्तं·रेखयो

र्लंबरेखादेर्ध्वाकाररेखयोः संपातछिद्रं अतोस्माच्छिद्रात् केंद्ररूपात् अस्मिन्यंत्रे ऊर्ध्वाधोंशाद्वयसंबंधिवृत्तं
त्रिज्याभासार्द्धेन गोलेसूर्यबिंबस्यवृत्तस्थत्वेनेतद्वृत्ते दृग्वृत्ताकारगतः समसूत्रेणसंबद्धः सूर्योयतोज्ञे
यः अतः केंद्रे प्रक्षेपाद्द्वादशांगुलशंकुर्यंत्रेकृतः रविसंबंधनोन्नतभागज्ञानार्थमस्मिन्कृतवृत्तद्वाद
शांशांशिभागाभ्रंकनीयाः घटीज्ञाननिमित्तं षष्टिर्घटयश्च दृग्यंत्रे शंकुरूपाक्षमूलषट्षिपलांशादेशीयप
रमांसामितपट्टिकाप्रोता गणितावधिदेशापर्यंतमेकयंत्रसिद्ध्यर्थं अत्र पट्टां छिद्राघटिः प्रदत्ता अतस्त
द्दानोक्तेः तद्वासना यष्टेरुपपत्तिः व्यक्तानिरूप्यते ॥५०॥ ॥प्रतिज्ञातांयष्ट्यानयनोपपत्तिमाह महाशंकु
कोटीयदेष्टाहतिः स्याद्युतिः कातदार्कांगुलेक्षश्रुतिः सा क्रमोर्व्यायदात्रिज्ययाकेत्यभीष्टांत्यकायष्टिसंज्ञा
स्वपद्यैकदेशोति उन्नतांशज्यारूपमहाशंकुकोटीयदेष्टाहतिः श्रुतिस्तद्द्वादशांगुलशंकुकोटीकेत्यनुपा
तोल्लेखादवगताश्रुतिरक्षकर्णएव ततोयदिक्ज्याप्रमाणेनेयंतर्हिस्त्रिज्याप्रमाणेनकेत्यनुपातोल्लेखाद
वगतेष्टांत्यापष्टिसंज्ञाषट्क्षांशादेशीयपरमयष्टिरूपपट्टांस्वदेशापरमयष्टेरंतर्भूतत्वात्तस्यांचेष्टांत्यारू ३९४

पयष्टेरंतर्गतत्वात्स्वपद्यैकदेशात्मिकातएवप्राक्पट्टांतदानमुक्तं ननुयष्टेरिष्टांत्यात्वात्परमयष्टेश्चपरमांत्यात्वे
नपट्टीपरमात्वदेशोपरमचरज्यायुतत्रिज्या एवंषट्क्षांशादेशोपिपरमचरज्यायास्त्रिज्यामितत्वात्त्रिप्रभा
धिकारोक्तरीत्यागोलस्थितत्वाच्चद्विगुणत्रिज्येतिप्रकृतेचतुर्विंशत्यंगुलापट्टीकर्णयुक्ता यष्ट्यानयनमपितद
न्तर्गतत्वेनयुक्तं नतक्रमतस्त्रयस्त्रिंशदंगुलापट्टीयष्ट्यानयनंचायुक्तमतएवसिद्धांतशिरोमणौषष्ट्यंगुल
व्यासमतश्चरंध्रादितिवृत्तमुक्ताग्रेसरंध्रातनुपट्टिकेकापष्ट्यंगुलादीर्घतयातप्तांकेतिप्रोक्तं गोलवासन
यासंगतइतिचेन्न तात्कालिकोन्नतांशज्यारूपमहाशंकोः कर्णस्यषष्टेस्त्रिज्यानुरोधेनेष्टांत्यायागोलसि
द्धत्वात्तज्जातीयत्वेनपरमेष्टांत्यायाः परमचरज्यायुतत्रिज्याया अपिगोलसिद्धत्वाद्द्विगुणात्रिज्यायाएवतद्द
शापरमेष्टांत्यात्वादुक्तयष्टेर्गोलसिद्धत्वाभावेपिगोलसिद्धेष्टांत्यायाअस्मिन्यंत्रेज्ञानार्थमनुपातावतारार्थमि
ष्टशंकुकल्पनसंबंधनेष्टांत्यायाः प्रमाणफलत्वेनसाधितायाउक्तविलक्षणायायंत्रोपयोगित्वात् अतए
वद्वादशांगुलशंकोर्नियतस्याक्षकर्णमितहृतेर्ध्वज्यानुपातेनेष्टांत्यायाश्चज्याभक्तत्रिज्यागुणिताक्षक

र्णमितत्वसिद्ध्यात्रि ज्यायाः शंकुतुल्यत्वेनचक्रविद्विगुणात्रिज्याधिकत्वावश्यंभावेपितदनुपातेनगोलसिद्धेष्टा
सायाः सिद्धौनक्षतिः अतएवचगोलसिद्धेतरत्वज्ञानायैवतादृशेष्टांसायायष्टिसंज्ञत्वंतत्परमायाश्चपट्टीसंज्ञत्वंसमु
चितं अन्यथायष्टेर्गोलसिद्धेष्टांसात्वाभ्यपगमेनपट्टीयष्टिशंकानुरोधेनोक्तक्रियायाः वक्ष्यमाणोपपत्तेश्चानुपपत्तेः
एतन्मयामरीचावप्यग्रेसरेश्चाननुपट्टिकेकार्यीत्यंगुलेतिवास्तवपाठसमर्थनेनषष्ठमितिपाठनिरासाच्च
विस्तरेणोपपादितमित्यलं॥५१॥ ॥अत्रोपयुक्तचरज्योपपत्तियंत्रधरणोपपत्तिंचाह· स्वत्रिज्ययायंचर
सिंजिनीस्यात्तदार्कमित्यात्रिभजीवयाका· फलंचरज्याफलकारमयंत्रेयंत्रेष्टतंदृग्वलयाकृतीदमिति· स्प
ष्टार्थं॥५२॥ ॥सूर्यस्थानोपपत्तिमाहसूर्योदयेकेंद्रगताक्षभाग्रमायामरेखागतमिष्टकाले· ततोधरेस्या
क्रमशोतएवछायाग्रमर्कोपरिदिक्स्थमर्कइति· यंत्रस्यदृग्वृत्ताकारधरणोनयंत्रस्थवृत्तंदृग्वृत्तंस्यात्तत्रायाम
रेखैकदेशस्यवृत्तांतर्गतस्यवृत्तव्यासत्वात्तस्यचक्षितिजवृत्तव्यासत्वात्सूर्योदयेउपलक्षणात्तदस्तेपिसम
सूत्रेणसूर्यबिंबकेंद्रमायामरेखाग्रेभवतीतिकेंद्रगताक्षस्यछायाग्रं· दीर्घरेखापरिधिसंपातस्थं· तदनं

३९५

तरं· उपलक्षणात्सूर्यास्तकालात्पूर्वं· इष्टकाले· उन्नतकालेसूर्यस्योर्ध्वस्थत्वेनाक्षस्यछायाग्रमायामरेखास्थाना
त्परिधावधोभवतीत्यन्तरोत्तरं· अतः· सूर्यछाययोर्विरुद्धदिक्स्थत्वात्· एवकरादयोरेकदिक्स्थत्वनिरासा
र्थः· सूर्यबिंबस्यसन्मुखदिग्यवस्थितंछायाग्रं· सूर्यसंज्ञकं· सूर्यस्थानाद्यथाकालज्ञानंतथैवछायायाद
पीतिद्वयोर्गतभेदात्तदोविसात्॥५३॥ ॥उन्नतोन्नतांशांकुज्ञानेयष्ट्यंसाज्ञानंसुलभमितिचाह· आया
मरेखारविचिद्रमध्यवृत्तस्थभागाः क्षितिजोन्नतांशाः· तेषांज्यकांशांकुरभीष्टदृग्यंसकाभवेद्यष्टिमितांत्यका
याइति· तेषांभागानामर्द्धज्या· व्यासार्द्धस्यद्वादशांगुलत्वात्तदंगुलप्रमाणसिद्धो· इष्टः शंकुः· एवमिष्टांसा· य
ष्टिमितद्वादशांगुलसंबद्धाभीष्टांसायाः सकाशादनुपातेनस्यादेव॥५४॥ ॥अनुपातेनेष्टांसानिर्दिशन्नाद्यनि
विष्टपट्टिकयासासिद्धेत्याह· द्वादशांगुलनरयष्टिकार्णायष्टिकाभवतितर्हिनरेकः· एवमिष्टनरजाभिमतांसासा
पिभाग्रगतपट्टिकयैवेति· एवं· पूर्वार्द्धोक्तानुपातोल्लेखादिष्टांकस्यन्नेष्टांसागणितेनभवति· तत्र· सा· गणित
हेतुभूता· विनागणितमसिद्धेत्यपिशब्दार्थः· छायाग्रस्थापितपट्टिकया· एवकाराद्गणितक्रियानिरासः· सि

Dr. BHAU DAJI

द्वाकृतेसर्पः॥४५॥ ॥एतदेवस्फुटयति॥यद्यंकलग्नफलकांशतएवदैर्घ्यरेखावधिर्विरचितासरलासुरेखा॥
सिद्धाविनागणितमत्रहिलाघवेनपरीस्थितानुपतनाडुपपत्तियुक्तेति॥भाग्रगपद्धायष्टिचिह्नस्पष्टफलके
कप्रदेशादेवदैर्घ्यरेखापर्यंतंसरलालंबवद्ज्वीसुष्ठुरेखा॥विनागणितक्रियां॥हि॥निश्चयेन॥अत्र॥फलके॥
लाघवक्रियया॥इष्टांत्यासिद्धाकृता॥नन्वनुपातसिद्धेष्टांत्यायाःपरीनिवेशात्कथंसिद्धिरित्यत॥आह॥परीति॥
परीसंनिवेशेनपद्धांपरिदृश्यमानतयास्थितादनुपातात्॥उपपत्तिसहिता॥पद्धाप्यनुपातएवोपपन्नइ
तिभावः॥४६॥ ॥परीस्थमनुपातंदर्शयति॥परीमूलादर्कसंख्यांगुलेषुपद्धांशोयोभाग॥गोमंडलेस्यात्॥
तस्मादूर्ध्वंदैर्घ्यरेखावधिश्चेष्टंकुर्यादुत्तरदेशांत्यकेवेति॥परीमूलमारभ्यद्वादशांगुलेषुपद्धायोभागःछाया
ग्रस्थःपरिधौस्यात्॥तस्मात्॥परीप्रदेशादुपरिदैर्घ्यरेखापर्यंतंमज्वीरेखाशंकुःस्यात्तदायष्टेरूर्ध्वंदैर्घ्य
रेखापर्यंतमज्वीरेखेष्टांत्यानाम्नेतिपरीस्थद्वादशांगुलशंकूर्ध्वंशंकुस्तदायष्ट्यूर्ध्वंकर्णएवार्थसिद्धोद्वा
दशांगुलशंकोर्यष्टिःकर्णस्तदेष्टशंकोकःकर्णइत्यनुपातपरिणतः॥४७॥ ॥गोलसिद्धनतकालोक्त

३९६

मज्यांदर्शयंस्तदुपयुक्तांगोलसिद्धांमध्यांत्यामाह॥मध्यांत्यकायामियमीप्सितांत्यांशोध्यावशेषंनतजोक्तम
ज्या॥तत्रापिगोलक्रमतश्चरज्याधोनात्रिभज्यादिनेमध्यजांत्येति॥इयं॥पूर्वागता॥तत्र॥नतोक्तमज्या
र्थं॥इष्टांत्यायाज्ञानान्मध्यांत्याज्ञानमावश्यकमन्यथातद्ज्ञानासंभवादित्यपिशब्दार्थः॥गोलक्रमतः॥
उत्तरदक्षिणगोलक्रमात्॥शेषंस्पष्टं॥५८॥ ॥मध्यांत्यायंत्रेदर्शयति॥अक्षाद्ऊर्ध्वमधोग्रंस्याच्चर
ज्यायाःक्रमादतः॥लंबरेखैकदेशोधोमध्यांत्यासात्रदृश्यतेइति॥अक्षात्॥यंत्रकीलस्थानमारभ्येत्य
र्थः॥उक्तगोलक्रमात्॥चरज्यायाअग्रं॥अग्रभागचिह्नं॥उपर्यधोवालंबरेखायांयत्रभवति॥अस्मात्प्र
देशात्॥अधः॥लंबरेखैकदेशः॥मध्यांत्या॥सा॥पूर्वोक्ता॥अत्र॥फलकयंत्रे॥प्रत्यक्षाभवति॥५९॥ ॥फ
लकप्रतिपादितेष्टांत्यामध्यांत्याभ्यांफलकेनतनाडीज्ञानोपपत्तिमाह॥अस्यामिष्टांत्यामित्याद्येषरेखाया
धःस्थासास्यान्नतभस्रजीवा॥तस्यावृत्तांतःक्रमज्याभवेत्तदग्रान्नाड्योलंबकांतानताःस्फरिति॥अस्यां॥
लंबरेखोपदर्शितमध्यांत्यायां॥इष्टांत्याप्रमाणात्॥ऊर्ध्वाग्रस्थानमारभ्येष्टांत्याप्रमाणेनयच्चिह्नंतस्मादि

स्पर्शः॰ योर्वरितलंबरेखाधोभागस्थिता॰सारेखानतोऽक्रमज्यास्यात्॰तस्याः॰ उक्रमज्याग्रात्॰वृत्तमध्येक्रम
ज्या॰यंत्रायामरेखैकदेशरूपायाभवेत्॰तस्याग्रग्रात्परिधिप्रदेशस्थात्॰घघोलंबरेखांतावधिकाः॰प
रिधिस्थाःनतघघःस्फः॰तत्परिध्येकदेशास्यतत्रापत्वात्॥५०॥ ॥फलकयंत्रोक्तनतघटीज्ञानक्रिया
मुपपादयति॰अतोलाघवाद्यष्टिचिह्नात्फलाख्यचरज्याप्रदत्तोक्तगोलक्रमेण॰तदग्रस्थिताद्दैर्घ्यरेखान
यानुसृत्तेभवेत्पूर्णाजीवापुरोक्तेति॰अतः॰यतोमध्यांत्यायामिष्टांत्याचिह्नज्ञानमपेक्षितमित्यर्थः॰ला
घवात्॰इष्टांत्यादानक्रियांविनेवलंबरेखापामिष्टांत्याचिह्नज्ञानमितिरूपात्॰फलकयंत्रे॰यष्टिचिह्ना
स्थानमिष्टांत्याग्ररूपमारभ्य॰उक्तगोलयोरुत्तरदक्षिणयोःक्रमेण॰चरज्या॰ऊर्ध्वमधोवाङ्ग्वीदक्षा॰त
त्रचेदिष्टांत्याग्रंजातंतदायामरेखातऊर्ध्वमधोवाचरज्याग्रेइष्टांत्यामूलंमध्यांत्यामूलसमसूत्रणायाम
रेखांतरेभवति॰एवंदत्तचरज्यायाग्रग्रेस्थिताद्दैर्घ्यरेखापूर्वकृतरेखान्यालंबरेखापांयत्रलग्नात्तत्रेष्टां
त्याग्रचिह्नंमध्यांत्यायांदत्तमितिसिद्धं॰अनया॰एतच्चिह्नस्पष्टयादैर्घ्यांतराकाररे खया॰सुवृत्तफल ३९

कयंत्रस्थे॰पूर्णाज्या॰पुरोक्ता॰तस्यावृत्तांतःक्रमज्याभवेदितिपूर्वपद्यनिरूपितामवति॰तेनाक्षप्रोतामि
त्यादिपद्योक्तमुपपन्नं॰एवमेतद्दूपरीसेनलंबादेयाविनतघटिकाइत्यादिछायाग्रस्थानज्ञानंभवत्येवे
तितदप्युपपन्नं॥५१॥ ॥अग्रोक्तरीत्यात्रिगुणात्रिभज्येत्यादिनायंत्रविस्तारदैर्घ्यप्रतिपादितेस्फुटय
ति॰अतएवास्यविस्तारदैर्घ्यमानेपुरोदिते॰परांत्यामितनतघटीवशात्॰सम्यगेवहीति॰अतः॰यतःफल
केपटीदानंचरज्यादानंचावश्यकंततइत्यर्थः॰एवकारात्तदतिरिक्तहेतुनिरासः॰परांत्यामितायासापटी
तस्याःवशात्तत्रंमणोपयुक्तप्रदेशवशादित्यर्थः॰अस्य॰फलकयंत्रस्य॰विस्तारदैर्घ्यमाने॰पूर्वोक्तत्रिगु
णात्रिज्यादिगुणापटीमिते॰सम्यक्॰उपपन्नं॰एवकारात्तन्मूलाधिकत्वाद्यदनुपपन्नेनेत्यर्थः॥५२॥ ॥
अथास्माद्यंत्राच्चक्रयंत्रंरीत्यारात्रिगतंज्ञेयमितिवदंस्तेनदुपसंहरति॰इहचक्रसुयंत्रसंस्थतंकरणीयं
रजनीगतादिकं॰इतिविस्तरतोमयोदितंफलकाख्यंकिलभास्करोक्ततइति॰इह॰फलकयंत्रे॰चक्राख्यसुयं
त्रेप्रथममुक्तं॰तत्रप्रतिपादितंरात्रिगतग्रहज्ञानादिकंतत्कार्यं॰तत्राविशेषइतिभावः॰एवंनिरूपणेनवि

स्तरात्·मयापलकारब्धं यंत्रं भास्कराचार्योक्तादुक्तं ।।५३।। ।।अथ यष्टियंत्राणि शंकुज्यपयोर्ज्ञानं·सूर्याग्राज्ञा
नं चेति चतुर्भिः पद्यैराह·अथ त्रिज्यया मंडलं भूमिभागे समे कार्यमाशांकितं तत्र केंद्रे·त्रिभज्यासमा यष्टिका कीलु
स्वाग्रा यथा न छाया स्यात्तथा स्थापनीया ।।५४।। ।।लंबसूत्रदृग्रादृजुसूत्ररूपः शंकुर्भवेत्केंद्रनमूलमध्ये·दृग्ज्याप
केंद्रेन रवन्निधेया यष्टिस्ततोस्याः प्रभवेत्प्रभाग्रं ।।५५।। वृत्तांतस्तद्वास्यतो यत्र वातस्मात्पूर्वाशाख्यसूत्रांत
रालं·याम्यं सौम्यं भाग्रतो यष्टिमानज्ञातोन्मानं स्वाक्षभ्रोत्रिभज्या ।।५६।। रम्याप्रायल्लभ्यते तेन तत्र विश्लेष्यं सं
योजितं याम्यसौम्यं·शंकून्मानेनाहतत्रिज्यया प्तं चक्रोन्नास्याघाम्यसौम्यार्कजाग्रतेति·अनंतरं·जलवत्स
मानेभूप्रदेशे त्रिज्याव्यासार्द्धेन वृत्तं पूर्वादिदिक्चिह्नितं कार्यं·तत्र·वृत्तकेंद्रस्थाने त्रिज्यातुल्या यष्टिर्यथा न छा
याभावबती स्यात्तथा सूर्यबिंबकेंद्रसन्मुखाग्रा स्थाप्या·तादृग्यष्ट्याग्रात्·ऋजुसूत्रात्मको लंबः शंकुः·
केंद्रलंबपातस्थानं शंकुमूलं·अनयोर्मध्यभूरेखा मानं दृग्ज्या·यष्टिः कर्णः इति क्षेत्राद्यथा दृग्वृत्ताकारं चक्रय
त्रं तथैव तद्व्यासार्द्धमितत्रिज्यामानेन यत्रं यथा रम्यमुक्तं·तदनुमितं वृत्तं तस्य छायाभावतया केंद्रस्थापनं कृतं द

३९२

वृत्ताकारं भवत्येव कृतं करीत्या शंकुदृग्ज्यपयोर्ज्ञानमुक्तं·अनंतरं·अस्याः शंकुरूपाया यष्टेः·छायाग्रं वृत्तमध्ये वृत्त
बहिर्वा यस्मिन्स्थाने भवेत्तत्स्थानं·पूर्वापरदिक्सूत्रं वृत्तबहिर्भूतमपि छायाग्रसमसूत्रस्थानगतं·अनयो
रंतरं छायाग्रादक्षिणोत्तरं वा·यष्टिप्रमाणाय दंगुलादिमानं तत्प्रमाणं न ज्ञातं प्रमाणं यस्येतादृशस्था
प्यं·छायाग्रभुजाकृद्भुजस्य विपरीतत्वाद्भाग्रमाघावधिरुक्तः·अनंतरं·स्वदेशीयाक्षभयागुणिता त्रिज्या
द्वादशभक्ताय दत्रप्राप्तं फलं·तेन फलेन·तच्च·पूर्वस्थापितं दक्षिणोत्तरं क्रमेणांतरितं·फलेनानंतत्·त
दनंबा फलं·युक्तं·ततः शंकोः पूर्वज्ञातप्रमाणेनेतदुणितं त्रिज्यया भक्तं फलं सूर्यसंबंधिन्याग्रा·दिग्ज्ञानमाह
चक्रोन्नेति·पूर्वं चक्रयंत्रप्रतिपादने याग्रादिग्ज्ञानोक्तिस्तद्वात्यादक्षिणोत्तराज्ञेया·योगे उत्तरा·वियोगे·फ
लाधिक्ये उत्तराः फलेनानेतस्मिन्दक्षिणेतितात्पर्यार्थः·यष्टिमितशंकोर्भुजस्य ज्ञानात्तच्छंकुतलं द्वादशांकोयो
पलभाभुजस्तत्रत्रिज्यातुल्ययष्टिकोटौ कृतसनुपातेन·याम्यभुजे शंकुतलाग्रा योगस्याग्रा न शंकुतलस्य
वासिद्धत्वाच्छंकुतलांतरितो भुजोग्रा·तत्र शंकुतले हीने कृते दक्षिणाग्रा·भुजो ने शंकुतले कृते उत्तराग्रा·उत्त

रभुजेशांकुतलोनाग्रायाः सिद्धत्वाशंकुतलयुतोभुजउन्नताग्रा· इयंयष्टिमितशंकोरितियष्टिशंकावियमग्रातदा
वगतशंकोकेतिशेराशिकात्सूर्याग्रासमुचिता॥५७॥ ॥विनागणितमग्राज्ञानमाह· उदयास्तेतु पूर्वोक्तया
ग्रग्रेप्राक्पराख्यातः· सत्राद्दत्तेर्द्दजीवास्याग्रासाग्रासौम्ययाम्यदिगिति· उदयास्तकालेतु नष्टछायासूर्यो
न्मुखयष्टिग्रदत्तप्रदेशेपूर्वापरसंज्ञकात्सत्राद्दर्द्दज्यापास्यात्सोत्तरदक्षिणादिग्राग्रास्पष्टोपपत्तिका॥५८॥
॥ ॥त्रिभिः पद्येरुन्नतकालज्ञानमक्षभोपयुक्तोदयास्तसूत्रज्ञानंचाह· पूर्वापराग्राभिधसूत्रतोग्रास्वा
शोन्मुखामर्द्दगुणानुकारा· वृत्तेप्रदघादथकेंद्रतोम्पघ्नज्याख्यवृत्तेखरसांशकांकं॥५९॥केंद्रस्थनष्टप्रभ
यष्टिकाग्राग्रयोश्चमध्यंतरसूत्रमानं· तन्मानसंपूर्णगुणोयदंशो द्वितीयवृत्तेधनुरेतदेव॥६०॥विभाग
संख्याभिरहर्गतंस्यात्सूर्वार्द्धकेपश्चिमकेवशेषं· घघोघघप्राग्वलयेग्रकाग्राद्दर्ज्वीसुरेखास्फुटयास्तसू
त्रमिति· पूर्वापरसूत्राद्ग्रांस्वदिगुन्मुखामर्द्दज्याकारांवृत्तेप्रदघात्· अनंतरमक्षकर्णोद्दाशकोटिर
ग्राकर्णकाकोटिरितिक्रांतिज्यांकृत्वातस्याः घज्यासाध्या· तया· व्यासार्द्धरूपयाकेंद्राद्द्वितीयंवृत्तंतदंतर्ग

३९९

तंपष्टिघटिकाविभागानामंकाश्चिह्नानियस्मिन्नेतादृशंकार्यं· अभीष्टकालेकेंद्रस्थनष्टछायायष्टिः· वृत्तेद
त्ताग्रा· अनयोर्यग्रेऽर्ध्वाधरस्थतयोर्मध्ये· अंतरसूत्रमानमूर्ध्वाधरंतिर्यग्रूपं· द्वितीयवृत्ते· घज्यावृत्ते
यस्मिन्विभागे· तदंतरं· मानं· प्रमाणंयस्याएतादृशीसंपूर्णज्यास्यात्· एतत्· तद्विभागसंबंधिधनुः संपू
र्णं· एवकारादितरविभागनिरासः· घघंकनेनस्वीयविभागसंख्याभिर्दिनपूर्वार्द्धघघादिदिनगतंस्या
त्· दिनपश्चिमार्द्धदिनशेषंस्यात्· यद्यपितात्कालिकघज्यावृत्तात्सूर्याधिष्ठितघरात्रवृत्तेक्षितिजसूर्य
बिंबयोरंतरप्रदेशास्यघटीमानज्ञानमुक्तरीत्यानतन्नतकालज्ञानंप्रतिक्षणंघरात्रवृत्तभेदादेवसूर्योद
यास्तकालिकाग्रास्थानज्ञानेपितात्कालिकघज्यावृत्तस्याभीष्टकालेऽभावाद्दास्तवोन्नतसूत्रज्ञानेपितज्ज्यासं
बंधिघज्यावृत्तस्यैकस्याप्रसिद्धोक्तरीत्योन्नतकालज्ञानासंभवस्तथापितादृशसूक्ष्मांतरस्यालस्यत्वान्न
दोषः· अथेति· पूर्ववृत्तेत्रिज्याव्यासार्द्धसन्ने· पूर्वापरयोरग्राग्राभ्यांसरलारेखोदयास्तसूत्रं· यद्यपिपूर्वा
स्मिन्नौदयिकाग्रा· परत्रचास्तकालिकाग्रा· तदग्रयोः सूत्रंवास्तवोदयास्तसूत्रंवक्तुमुचितंतथाप्यकाग्रा

ग्रयोः सूत्रस्यैकाहोरात्रवृत्तसंबद्धत्वात्पारिभाषिकस्यतस्यवक्ष्यमाणोपयुक्तस्यकथनमेवसमुचितंनतुवा
स्तवस्येतिभावः॥६१॥ ॥उपजीव्यंपलभाज्ञानंवदन्नुपपत्त्यकथनेकारणमाह॰नमूलोदयास्तारम्यसू
त्रांतरालंरविघ्नंनराग्रंभवेदसभयं॰इदंयष्टियंत्रस्फुटंवासनाभिस्तत्रोपपत्तिर्निरुक्तामयानेति॰शं
कुमूलंप्राक्प्रसिद्धं॰उदयास्तसूत्रंपूर्वोक्तं॰अनयोर्याम्योत्तरमंतरंशंकुतलात्मकंशंकुकोटिविदंभुजस्तदा
दशकोटिकदसनुपातात्द्वादशगुणितंपूर्वज्ञातशंकुभक्तं॰इयमेतदशीयाक्षभास्यात॰यत्तदिदंप्रतिपादितं
यष्टाख्यंयंत्रंवासनाभिर्युक्तिभिःस्फुटंस्वतोवगम्यं॰ततोहेतोरत्र॰यष्टियंत्रनिरूपणेतदुपपत्तिर्मयानो
क्ता॰उपपत्तेःस्वतोज्ञेयत्वंव्याख्यानेप्यतिस्पष्टं॥६२॥ ॥॰अथचाबुकयंत्रप्रतिज्ञानंतत्स्वरूपमाह॰गणेशो
दितंयंत्रमेतत्प्रतोदमनायासकालावबोधंप्रवक्ष्मि॰निजेष्टवशादिष्टदेर्घ्यःसुदंडोनतिस्थूलकःशिंशिवृक्षा
दिजातइति॰एतत्॰प्रसिद्धं॰प्रतोदयंत्रंगणेशादेवज्ञैरस्मद्गुरुतमगुरुतरैःकल्पितं॰अहंनिरूपयामि॰एतन्नि
रूपणावश्यतामाह॰अनायासकालावबोधमिति॰विनाश्रमंकालज्ञानहेतुकमित्यर्थः॰शिंशिवृक्षादिजा

तः॰आदिपदाद्वाद्यादिघटितः॰सुदंडः॰स्निग्धदंडः॰नकृशोनस्थूलः॰खेष्टवशादभीप्सितमानेनदीर्घतायस्येत्यः॥६३
॥ ॥दंडस्यदैर्घ्याकारणसमस्थानकरणंधत्यर्थंशंखलायोजनंचाह॰परालाहमानात्परघप्रमाणंयायासं
ख्यातत्प्रमितस्त्रकैःसः॰समस्थानदैर्घ्योविधेयास्यशीर्षसदाशंखलाधारणार्थंनियोज्येति॰परमाल्पदि
नमानमारभ्यपरमदिनप्रमाणंयायासंख्यायास्यात्तत्संख्याप्रमाणाभिर्दैर्घ्याकारधाराभिःसः॰दंडः॰सम
स्थानंसमीकृतंदैर्घ्यंयस्यसेनादृशःकार्यः॰अस्य॰दंडस्य॰शीर्षे॰एकस्मिन्नग्रधारणनिमित्तंशंखला॰नि
संसंलग्नाकार्या॥६४॥ ॥समस्थलारंभशंकुस्थापनार्थमाह॰आधारतोधःपरितःसमस्यदैर्घ्यादिभागेनर
वेशनार्थं॰छिद्राणिकार्याणितत्पायपात्रस्थानिगर्भेनभवंतितानीति॰आधारस्थानादधोभागेसमंतात्सम
स्य॰समस्थानकृतस्यदंडस्यदैर्घ्यप्रारंभेकालज्ञानोपयुक्तशंकुस्थापनार्थंछिद्राणिप्रत्येकंतत्पाकार्याणि॰य
त्पातानिछिद्राणि॰अत्र॰दंडेगर्भमध्यभागेस्थानिनभवंति॥६५॥ ॥कालज्ञानानपेक्षायांशंकुस्थिति
स्थानंतत्मानंचाह॰शीर्षछिद्रगर्भमध्येविधेयमाधारांतेशंकुलोपार्थमस्मिन्॰पूर्वछिद्राद्घटतःशंकुमा

MEMORIAL

नेयंत्रांगांशासन्नमेवंनरः स्यादिति॰ शीर्षे॰ आधारभूतेपिंडभागे॰ आधारसमीपे॰ गर्भमध्ये॰ दैर्घ्याकारेण
छिद्रसदृशांकुस्थापनार्थमस्मिन्यंत्रेशंकुभावइतीवज्ञानार्थंकार्यं॰ पूर्वछिद्रात्॰ दैर्घ्यादिभागस्थितछिद्रात
र्गतशंकुभागाद्बहिर्भूतंशंकुमानंयंत्रेदैर्घ्यषडंशासन्नंयथाभवतेवंशंकुः कार्यः॰ इदंभास्कराचार्यैः फलकेदै
र्घ्यस्यांशीतियुक्तशतभागस्यषडंशामितत्रिशंकोः कल्पनात्तदनुरोधेनोक्तं॰ वस्तुतस्तु परमदिनमानसंब
धिसमदैर्घ्यभागादिछिद्रनिविष्टशंकोर्मध्याह्नासन्नछायाग्रंदृङ्मग्नभागासन्नंपततितथाशंकुः कार्यइतित
त्रमवधेयं॥६६॥ ॥अस्मिन्यंत्रेंगुलमानं॰ घटीकनार्थमिष्टोन्नतघटीसंबंधेनदृग्ज्याशंकुसाध्यइतिचाह॰ बा
ह्यस्थशंकुर्कलवः प्रतोदयंत्रे भवेदंगुलमानमस्मिन्॰ पूर्वोक्तरीत्येष्टघटीनतांशोन्नतांशाजीवेसुधियाप्रसाध्य
इति॰ छिद्रबाह्यस्थितशंकुशलाकायाः द्वादशांगुलशंकुत्वात्कायाः द्वादशांशोस्मिन्निरूपितेप्रतोदयंत्रेंगुल
मानंस्यात्॰ इष्टघटीनतकल्पनेनत्रिप्रश्नाधिकारोक्तप्रकारेणदृग्ज्याशंकुसाध्यो॥६७॥ ॥घटीकनमाह॰ सूर्य
स्योन्नतलवमौर्विकानतज्यासंभक्ताभिमतघटीभवांगुलानि॰ एकादिष्वभिमतनाडिकोन्नतेषुरंध्रास्वांगुलकमितिः

समस्थलेकेति॰ उन्नतांशज्याद्वादशगुणानतांशज्यया भक्ताः फलमिष्टघटीसंबद्धान्यंगुलानिस्युः॰ एवमेकादिषि
ष्टघटीनतेषुप्रसंगमुक्तरीत्यास्वांगुलसंख्याछिद्रमारभ्यांबासमस्थले॰ रंध्रादंगुलानिविगणाप्यघटीकोलेख्यए
वंपरमोन्नतकालावधिप्रतिघटिकमित्यर्थः॥६८॥ ॥एवंयंत्रेसिद्धंकृत्वाभीष्टकालेउन्नतघटीज्ञान
मार॰ स्वाहर्मानसमस्थलस्यसुषिरशंकुर्निधेयस्तत्पायंत्रशृंखलिकाध्यतेपततितद्गतसमस्थानके॰ छा
यायावधिरंध्रतश्चगणयेन्नाडीर्दिनाधार्द्धकेयाताः शेषमिताः परत्रयदिभामध्यनुपातो भवेदिति॰ स्व
स्वदिनमानसंबंधिसमस्थलस्यादिभागगतछिद्रेशंकुस्तथास्थाप्योपयास्मिन्यंत्रेशृंखलिकायांध्यतेसति
तस्यलंबायमानस्यस्वाभिमतसमस्थानेशंकोः छायापतति॰ छिद्रमारभ्यछायाग्रपर्यंतंदिनस्यप्रथमा
र्द्धगताः घटीः॰ अपरार्द्धताः घटीः शेषाभिकाः गणयेत्॰ यदिछायाग्रेघटीकेनपततिकिंत्वंतरालेतदानुपातः
स्यात्॰ तथाहि॰ छायाग्राद्यवहिताघटीकमिताघट्यः तदंकस्थलाच्छायाग्रावध्यंगुलानि॰ अग्रिमांकस्थ
लपर्यंतंचांगुलानिज्ञात्वानुपातः यदिघटीकयोरंतरालांगुलैरेकाघटिकानदेष्टांगुलैः किमितिफलयुताः

पूर्वघघउन्नताइति॥६७॥ ॥दृग्ज्यात्रिजीवेरविसंगुणोनेशंकुहृतेभाग्रवणाविसादिपूर्वोक्तेनैतद्विरुद्धमिसतोनो
पपत्तिंप्रतिज्ञानीते॰अत्रोपपत्तिरिति॰सूर्यघ्नीसादावुपपत्तिरुच्यते॰अन्यत्रस्पष्टोपपत्तिरित्यर्थः॥ ॥प्रतिज्ञा
तामुपपत्तिमाहदंडोभूमिस्तत्रसूर्योदयेस्याद्भाभावोभानंतरूपाखमध्ये॰तस्माद्दृग्ज्यारूपशंकोर्न्नरूपदृग्ज्याता॥
भायांगुलान्यक्तरीत्येति॰आधारश्चेखलायांघटेयंत्रेलंबमानोदंडोभूमिर्भवति॰तस्यां॰सूर्योदयतद्रस्तचशं
कोस्तिर्यक्तेनसन्मुखत्वेनचछायायाःप्रभावोनुत्पत्तिस्तनोयथासूर्यउपरिगच्छतितथातथाछायापचीयतेइ
तिखमध्येसूर्यछायानिरवधिकाभवति॰तस्मात्कारणात्सूर्योदयशंकोरभावाद्दृग्ज्यायाःपरमत्वात्खमध्ये
शंकोःपरमत्वाद्दृग्ज्यायाःप्रभावाच्चदृग्ज्यात्मकशंकुःशंकुरूपादृग्ज्यापर्यवसिता॰ताभ्यामुक्तरीतिवैपरीत्ये
नोक्तरीत्यैवयाछायातांगुलान्यक्तनतघटीनांछायात्मकानि॥७०॥ ॥त्रिभिःपद्यैःस्वकल्पितचक्रयंत्रस्य
सप्रतिज्ञंघटनमाहअथोक्तरीत्यानिजकल्पितंचनिरूप्यतेचक्रनिर्भंसुयंत्रं॰भात्वादिजंचक्रकमस्यकेंद्रव्या
सार्कभागेनसमोबहिःस्यात्॥७१॥यथातथोर्ध्वाग्रकरावकीलतुल्योविधेयोर्कमितांगुलोना॰परघमिस

स्तराहसैकवियोगतुल्याःपरिधौविभागाः॥७२॥अंकास्तदंकावधिशंकुमूलात्प्रत्येकरेखाःसुधियाविधे
याः॰विभागपत्रस्यविरामभागेस्वीयंदिनार्द्धक्रमशोविलेख्यमिति॰प्रतोदरीत्या॰स्वकल्पितंचक्राकारंयंत्रंम
याप्रतिपाद्यते॰चःसमुच्चये॰भात्वादिघटितंमंडलं॰अस्यमंडलस्यकेंद्रस्थानेमंडलव्यासद्वादशांशोनतुल्यःकेंद्र
छिद्राद्बहिर्भागेयथास्यात्तथोर्ध्वाग्रकावकारात्प्रतोदतिर्यक्शंकोःरीतिनिरासः॰कीलसदृशाः॰अयंतुयंत्रांगांशास
न्नमितिप्रागुक्तप्रतोदरीत्यासुमक्तः॰द्वादशविभागात्मकःशंकुःसेष्यः॰परमदिनमानपरास्पदिनमानयोरेकयुक्तांत
रमिताःपरमन्यूनदिनमानसंख्यामारभ्यपरमदिनमानपर्यंतंयत्संख्यातत्संख्याकाइत्यर्थः॰परिधौविभागा
अंकाः॰तच्चिद्रपर्यंतंशंकुमूलरूपकेंद्रमारभ्यप्रतिचिद्ररेखाःयंत्रेनकार्याः॰कमलपत्रसदृशमेकैकंवि
भागस्थानंभवतीत्यर्थः॰विभागपत्रस्यांतिमस्थानेस्वाभिमतंदिनार्द्धक्रमेणालेख्यं॥७३॥ ॥स्वस्वदिनार्द्ध
पत्रेघघंकनमाहसूर्यघ्नीनतलवमौर्विकोन्नतज्यासंभक्ताभिमतघटीभवांगुलानि॰एकादिषवनतनाडिका
सुशंकोर्मूलात्त्वांगुलकमितिःस्वपत्रकेंपेति॰अभीष्टकालिकनतांशज्याद्वादशांशगुणा॰शंकुरूपोन्नतांशा॥

ज्यया भक्ता । अभीष्टनतकालघटीसंबद्धांगुलानि स्युः । एवं एकादिषु नतघटीषु शंकोर्मूलात्केंद्रमारभ्येत्य
र्थः । स्वदिनमानपत्रे । स्वस्वांगुलसंख्या प्रतिपटिकमंकया । अंगुलानि विगणाप्यघटीचिह्नलेखमित्यर्थः
॥ ७५ ॥ ॥ अस्माद्यंत्रात्कालज्ञानमाह इदं सुयंत्रं गणकेन धार्यं भूमौ तथा शंकुजभास्वपत्रे । यथा पतत्यत्र नत
मूलभाग्रांतरालजास्तानतनाडिकाः स्फुरिति । इदं प्रतिपादनेन निष्पन्नं यंत्रं । गणकेन भूमौ तथा धार्यं यथा द्वादश
शंगुलशंकुसंपन्नाछायास्वदिनमानपत्रे पतति । अत्र पत्रे शंकुलछायाग्रयोरंतरालटिकायास्तानतघट्यः छाया
ग्रपत्रातमध्ये घट्यउन्नताइत्यर्थसिद्धं । अत्रोपपत्तिः प्राग्वीत्यातिव्यक्ता ॥ ७५ ॥ ॥ अथ स्वकल्पितं धनुर्यंत्रं
प्रतिजानन्यंत्रे भागांकनं दिगंकनं चाह । अथ प्रवक्ष्ये निजकल्पितं तद्वृत्तार्द्धरूपं धनुराख्ययंत्रं । स्वाष्टदभागाः प
रिधौ शरोऽस्य पूर्वापराज्योत्तरदक्षिणादिगिति । निजकल्पितं धनुः संज्ञयंत्रमहं वक्ष्ये । धनुः स्वरूपमाह वृत्तार्द्धरूप
मिति । पूर्वप्रतिपादितचक्रयंत्रस्यार्द्धं भास्करोक्तं निरस्यति । तदिति । अन्यैरनुक्तमित्यर्थः । धात्वादिघटितं यंत्रं चापा
कारे परिधौ । अशीतियुक्तशतभागा अंकाश्चक्रार्द्धवत् । व्यासो ज्या । अस्य यंत्रस्य । उत्तरदक्षिणादिक्स्यात् ४०३

ज्यापरिध्योर्मध्यवर्त्तिसूत्रं व्यासार्द्धमितं शरः पूर्वापरसूत्रं ॥ ७६ ॥ ॥ अत्र सूर्योदयास्तचिह्नं वदन्यंत्रं कनार्थं भु
जः प्रतिघटिकमुन्नतकाले साध्यइत्याह । अग्रोलंबरात्सदिशीषुजाग्रादस्तोदयोत्तरपरिधौ विचिंत्यो । स्वाहर्दलां
तर्गतकल्पितेकादिनुंगनाडीषु भुजो विधेय इति । शराग्रस्थानात् । अग्रादिशि । अग्रोसन्नांशोः चापपरिधिप्रदे
शे । सूर्योदयास्तोज्ञेयो । स्वदिनमानानुराधेनाग्रांशोरुदयास्तचिह्नं कार्यं । ततः स्वदिनार्द्धांतर्गततयाकल्पितायाएका
घटन्नतघट्यस्तासु भुजः कार्यः ॥ ७७ ॥ ॥ भुजसाधनमाह । अभीष्टशंकुर्गणितागतोपः पलप्रभाग्रोर्कहृ
तोपमाशं । फलं तु भिन्नैकदिशाविमुक्तयुक्तक्रमेणाग्रिकयास्वदिक्स्यइति । इष्टन्नतघटीषु गणितानीतो यो भीष्ट
शंकुः सोऽस्य भागगणितोहृदस्याभक्तः फलं यमाशं शंकुतलं भिन्नैकदिशाग्रिकयाविमुक्तयुक्तक्रमेणस्वदिक् । अं
तरेधिकदिग्भुजः स्यात् ॥ ७८ ॥ ॥ यत्रं घटंकनेन सिद्धं कृत्वात्स्मादुन्नतघटीज्ञानं षड्भिः पदैराह । एतद्व्यासार्द्धात्मरा
शित्रयज्यामानासूत्रमग्राशालाकासुधार्य । ज्येष्टकेस्याग्रमतोलंबसूत्रं यंत्रे भीष्टः शंकुरतो भुजश्च ॥ ७९ लंबा
ग्रसंसक्तसुयंत्रदेशाशरप्रदेशांतरमानतुल्यः । स्वाशोन्मुखः स्यादनयोक्तरीत्या यंत्रे शरात्स्वोक्तभुजस्य चिह्नं

॥२०॥घयंकितंकार्यमथोदयास्तस्थानाद्भुजांकानुगतासुरेखा·ज्यासंस्थयाम्योत्तरबाहुचिह्नावधीस्थमा।
त्मघदलस्यरेखाः॥२१॥यंत्रेंकिताउन्नतनाडिकाभिःकार्याइतिद्वविरचय्यधार्य·समस्थलेसाधितदिग्वि
भागेदिनस्यपूर्वापरभागयोर्हि॥२२॥क्रमात्पूर्वपश्चाच्छरायंयथास्यात्ततोज्याशारेकेशलाकानिधेया·स्प
तासूर्यबिंबोन्मुखानष्टभास्यात्तदग्राद्यथालंबसूत्रंनिजस्य॥२३॥दिनार्द्धस्यरेखागतंतत्रसूर्योदयास्तस्थ
लाल्लंबपातांतराले·भवेत्कन्नतानाडिकोद्दष्टकालेनुपातोविधेयौंतरालेघटीनामिति·एतद्यंत्रस्यव्यासा
र्द्धरूपत्रिज्याप्रमाणासूच्य[illegible]ग्राशलाका·ज्याशारयोर्योगकेंद्ररूपेधार्या·कथंधार्येत्यतआह्रअस्याइति
·अस्याःशलाकायाअग्रात्·यंत्रेलंबसूत्रमभीष्टउन्नतःशंकुःस्यात्·लंबाग्रसंस्पृष्टयंत्रप्रदेशाशारप्रदेशा
योर्दक्षिणोत्तरांतरप्रमाणसमोभुजः पूर्वोक्तःस्वदिक्तःस्वदिक्सन्मुखःचःसमुच्चये·तेनोभयंयथास्यात्त
थाशलाकाधार्येत्यर्थः·अनयोक्तरीत्यायंत्रेशारस्थानात्स्वघटीभ्योवगतभुजस्य·चिह्नं·अग्रभागस्थानंशं
कुमूलरूपंस्वघटीचिह्नांकितंकार्यं·अनंतरमुदयास्तचिह्नमारभ्यप्रतिघटिकोन्नतकालीयानेकभुजचिह्नं

स्पष्टारेखा·ज्यासंस्थदक्षिणोत्तरभुजचिह्नपर्यंतंकार्या·एवंस्वस्वदिनार्द्धस्यरेखाः·उन्नतघटीभिः चिह्निता
यंत्रेकार्याः·इत्यक्तरीत्या·हयंत्रेधातुजेएपकृत्वा·समस्थले·ज्ञातदिक्के·दिनस्यपूर्वापरार्द्धभागयोः क्रमात्·
पूर्वस्मिन्शराग्रंपश्चात्तदग्रंयथास्यात्तथाधार्यं·ततोनंतरं·ज्याशारेकेकेंद्रस्थाने·संस्थितासूच्यग्रात्रिज्याप्रमा
णा·शलाका·सूर्यबिंबकेंद्रोन्मुखानष्टशायातथास्थाप्या·यथातदग्रात्·शलाकाग्रभागात्·लंबसूत्रं·
स्वाभिमतस्यदिनार्द्धस्यरेखास्पृष्टंस्यात्·तत्र·रेखायां·सूर्योदयास्तस्थलमारभ्यलंबपातस्थलमध्येयाघटिका
स्तादृष्टकालेउन्नताघटिकाः·घटीनां·घयंकनस्थानानां·अभ्यंतराले·लंबपातसति·अनुपातोविधेयः·तथा
हि·अव्यवहितघयंकनस्थलयोरंतरलंबपातसंबद्धमंगुलादिमानेनगण्य·अनेनेकाघटीतदापूर्वघयंक
नस्थललंबपातस्थलयोरंतरांगुलमानेनकेतिफलंपूर्वघटीयुतमुन्नतंस्यात्·एतत्प्रतिपादनमुपपत्तिरूपमे
व॥२५॥अथबुद्धियंत्रंप्रतिजानीते·अथेष्टयष्ट्यामुविनीरमध्येव्योम्निस्थितंवस्तुयदेवदृश्यं·तन्मानबो
धाघपयुक्तबुद्धियंत्रंप्रवक्ष्येनिखिलैकसारमिति·भूमोजलमध्ये·आकाशे·एतदन्यतमस्थलेयदेववस्तुस्थि

तं·इष्टप्रमाणायायष्टादृष्टंस्यात्·तद्दृक्कनोमानं·ग्रौच्चप्रमाणं·तस्यज्ञानमादिपदात्तद्दृक्कस्थानस्वस्थानयो
रंतरालप्रमाणज्ञानं·तत्रोपजीव्यभूतंबुद्ध्यात्मकंयंत्रं·समग्राणांयंत्राणामेकंप्रधानभूतंसारंकार्यक्षमं·
ग्रहंकथयिष्ये॥२५॥ ॥तत्रबुद्धेःकालसाधकतयायंत्रत्वप्रतिपादनार्थंपद्याभ्यांक्षेत्रमुपपादयति·
यद्यग्रमूलस्थितदक्षिणैकदृष्ट्याभरवेदादिविलोकपासो·तद्यष्टिमूलाग्रतएवलंबोतदंतरभूप्रमितिर्भुजः
स्यात्॥२६॥लंबप्रमाणांतरमत्रकोटिर्यष्टिःश्रुतिर्वेधभवंहिजात्यं·प्रत्यक्षमस्यात्सकलस्यवेधायुक्तानु
पातात्प्रमितिःसुधीभिरिति·इष्टप्रमाणायष्टेरग्रमूलयोःस्थितादक्षिणासव्याणका·वामानपेक्षा·एता
दृशीयादृष्टिस्तया·नक्षत्रग्रहो·ग्रादित्याद्वादशस्यादितारांतरेवस्वंतरंवा·दृष्टा·दर्शनावस्थितयष्टेर्मू
लाग्राभ्यां·एषकारात्तदन्याकारयष्टेर्मूलाग्रतरभागस्यवानिरासः·लंबोभूम्यवधीपासो·तयोर्लंबसूत्र
पातस्थलयोरंतरमध्ययद्भूमानंतद्भुजः स्यात्·लंबसूत्रमानयोरंतरं·ग्रत्र·एतद्वेधविषयकोटिः·यष्टिमा
नंकर्णः·एवंवेधादुत्पन्नजात्यक्षेत्रंप्रत्यक्षं·तथाहि·यद्भूमानंतत्समवयष्ट्योर्यात्समसूत्रेणाधिकलंबसू

४०५

त्रप्रदेशापर्यंतमंतरंभुजः·यष्टिःकर्णः·लंबसूत्रांतरमधिकलंबसूत्रैकदेशरूपंयष्ट्यूर्ध्वाग्रसक्तंकोटिरि
तंतरिक्षेऽधोक्षेत्रंसर्वगम्यं·ग्रधःक्षेत्रंभुजलघुलंबाभ्यामायतप्रकृतानुपयुक्तं·ग्रस्मात्·एतज्जातीया
ज्जात्यक्षेत्रात्·सुधीभिरुपपन्नयायुक्त्या·ग्रनुपातात्·सकलस्य·वस्तुजातस्यप्रमाणांतरेयं॥२७॥ ॥तत्र
प्रकृतवेधेनुपातेननतांशोन्नतांशाज्येवदंस्ताभ्यामुन्नतकालज्ञानंस्यादेवंस्यादभुजकोटित्रिभज्याभ्यो
यष्टिभक्तेफलेक्रमात्·नतांशोन्नतभागज्येस्मृतरीत्यानुनाडिकाइति·यष्टिकर्णोपूर्वसिद्धभुजकोटी
तदात्रिज्याकर्णोकेइत्यनुपाताभ्यांग्रहनक्षत्रादेर्दृग्ज्यांशकं·पूर्वोक्तरीत्याघटयोज्ञेयाः॥२८॥ ॥ग्र
थपलभाज्ञानंवदन्नुक्तरीतिमन्यत्राप्यतिदिशति·ध्रुववेधोत्थकोघर्कघातस्तद्भुजहृत्फलं·पलभास्या
दुक्तरीत्यावस्तुदैर्घ्यंप्रसाधयेदिति·उक्तरीत्याध्रुवतारावेधोत्पन्नक्षेत्रस्यकोटिद्वादशांशोघातस्तस्यक्षे
त्रस्यभुजेनभक्तःफलंपलभास्यात्·पूर्वोक्तप्रकारेणाध्रुवोन्नतांशाज्येकोटिभुजोत्पन्नेअक्षलंबज्ये·ग्राभ्यां
द्वादशकोटीकोभुजइत्यनुपाते पूर्वप्रकारसिद्धस्वरूपग्रहणेनयष्टित्रिज्ययोःस्थानद्वयस्थयोर्नांशा

दृष्टवोन्नतांशानामज्ञात्वात्वालुघुक्षेत्रेफलभायास्तदंशात्वात्कोटित्वंदृष्टांशांगुलशंकोर्भुजत्वमभ्यपेत्सवे
धसिद्धभुजेनवेधसिद्धकोटिर्लभ्यतेतदादृष्टांशभुजेनकेतिफलभात्यत्रैः एवंकोणानुपातेनोक्तरीत्यावस्त
नंप्रोच्चंगणकःसाधयेत्॥८७॥ ॥अथात्मवस्तुस्थानयोरंतरभूमानमाहवंशादितलवेधोत्थदृष्टांश
भुजाहतिः॥कोणांशावंशमूलादिस्वांतरेभूमितिर्भवेदिति॥वंशादीनां॥अदिशादास्तंभभित्तिवृक्षादयः॥मू
लस्यवेधादुत्पन्नोयोदृष्टोच्चभुजोतयोर्घातः॥वेधीयकोणभक्तः॥फलं॥वंशमूलादिस्थानं॥स्वस्थानमन
योरंतरभूप्रमाणंस्यात्॥अत्रोपपत्तिः॥दृष्टांशयः कोटिः स्वस्थानवस्तुस्थानांतरंभुजः॥दृग्वस्तुमूलसू
त्रंकर्णइतिक्षेत्रेमूलवेधकोणमूलवेधभुजस्तदादृष्टांशयकोणाकइत्यनुपातेनभुजस्तत्स्वरूपः॥९०
॥ ॥वंशादीनामोच्चानयनमाहवंशाग्रवेधोत्थकोटिर्भूमितिर्हता॥तद्भुजेनसदृष्टोच्चं फलवंशा
दिदीर्घतेति॥वंशादीनामग्रस्यसूक्ष्मवेधादुत्पन्नकोणागणिता॥स्ववस्तुनोतरभूमिः॥तद्वेधोत्पन्नभुजेन
भक्ता॥फलंदृष्टोच्चेनयुक्तं॥वंशादीनामोच्चंस्यात्॥अत्रोपपत्तिः॥दृष्टिसमसूत्रेणपदार्थोस्थानंतदूर्ध्ववंशा

MEMORIAL

खंडंकोटिः॥समसूत्रंभूतुल्यंभुजः॥वंशाग्रहपसूत्रंकर्णइतिक्षेत्रेग्रवेधभुजेनाग्रवेधकोटिर्भूभुजेन
केतिफलंदृष्टांशयोर्ध्ववंशखंडमतःसदृष्टोच्चंवंशाग्रोच्चंस्यात्॥९१॥ ॥अथमूलादर्शनेवस्तुनिज
योरंतरभूमानज्ञानोपजीव्यप्रकारंप्रतिजानीते॥अथाग्रवेधमात्रेणास्ववंशादितलांतरे॥भूमानंस्या
द्यथावक्ष्येवंशाग्रोच्चोपजीव्यकमिति॥वंशाग्रवेधेनजातसभिप्रायेणकवचनेतनाग्रवेधाभ्यामिस
र्पः॥मात्रपदाद्वामूलवेधनिरासः॥स्वतलं॥स्वस्थानं॥वंशादितलं॥वस्तुमूलमित्यर्थः॥अनयोरंतरमध्येभू
प्रमाणंयथाज्ञातंभवेत्तथातद्भूमानज्ञानंवंशादीनामुच्चताज्ञानहेतुःकथयिष्ये॥९२॥ ॥प्रतिज्ञातंश्लो
कार्याभ्यामाह॥उपविष्टेनविज्ञेयेभुजकोटीस्थलेत्रचतुर्ध्वस्थेनापिदोःकोटीज्ञेयवंशाग्रवेधतः॥९३॥
निजभुजभक्तदोतदंतरहतोदृगोच्चविश्लेषः॥भूमिर्वंशोच्चमतःपृथक्पृथक्पूर्ववद्भूयमिति॥उपविष्टेन
धीमतास्वस्थलेवंशाग्रवेधाद्भुजकोटीज्ञेये॥अत्र॥स्थलेतुर्ध्वस्थेनतेनैववंशाग्रवेधोदोःकोटीज्ञेये॥कोटी
स्वसंबंधिभुजेनभक्ते॥फलयोरंतरेणाहतः॥दृगोच्चयोर्वियोगः॥फलंभूमिः॥अतः॥भूमेःपृथक्पृथक्॥स्वस्व

भुजकोटीभ्यां पूर्वरीत्यावंशौ ज्ञेयं उभयत्र तुल्यमेव ॥९५॥ ॥एतदुपपत्तिं प्रतिजानन्यथाभ्यामेकवर्णबीजरीतिं वदन्प्रक्षसाम्यमाह अत्रोपपत्तिस्तु ऋजुवंशामूलनिजांतरालस्थक्षेत्रप्रमाणं गुप्तप्रकल्पोदितपूर्वरीत्या वेधद्वयादंशामितिस्वरूपे ॥९५॥ ॥स्वदोर्दत्ताकोटिरिष्टाग्रलङ्गुणाद्दृष्टिभवोच्चयुक्तं वंशास्वरूपं त्वथवंशमानं तुल्यं यतो वंशामितेरभेदइति अत्र अस्मिन्भूम्यानयने उपपत्तिरेकवर्णबीजादस्तीत्यर्थः ऋजुवंशास्यमूलं निजस्थानं अनयोरंतराले स्थिताया ऋज्वीभूतस्याः प्रमाणं गुप्तमव्यक्तं प्रकल्प्य उदितोक्तायापूर्वरीतिस्तयावेधद्वयात् वेधद्वयसंबंधिजकोटीभ्यां वंशाप्रमाणस्वरूपे द्वे साध्ये तत्र साधनेन वंशस्वरूपं किं सिद्धमित्यतस्तदाह स्वदोरिति इह वंशासाधने कोटिः स्वभुजभक्ता अत्र भजने लब्धमव्यक्तगुणं दृष्टाग्रायुक्तं वंशास्वरूपमेव सिद्धं एवं द्वे वंशामाने स्वरूपात्मके समे उभयत्रैकमानमित्यर्थः हेतुमाह यतइति वंशास्यैकत्वात्तत्प्रमाणयोः स्वस्वभुजकोटीभ्यां सिद्धयोरेकाश्रयत्वादभेदः ॥९६॥ ॥द्वयोः पक्षयोः किं प्रयोजनमित्यतः पक्षौ न्यस्यति यथा तुल्यपक्षयोः समशोधनार्थं न्यासः अ प्र फ १ अ ६ १ अ दृ फ १ दृ ६ १ इति यथा श्लोकोक्तयोर्निदर्शनं

मित्यर्थः समशोधनमेव तुल्यपक्षयोः प्रयोजनमिति भावः । समशोधनं कथमित्यतो भास्करीयैकवर्णबीजोक्तसमशोधनं पद्यं स्मारयन्भूमानानयनमुपपन्नमिति वदन्नुक्तप्रकारस्योदाहरणार्थं भास्करेणोदाहृतः स्वग्रंथे उक्तइत्याह एकाव्यक्तं शोधयेदन्यपक्षादित्यनेनात्रांतरालस्थभूमिः । उक्तासिद्धा पाठबोधार्थमत्रोदाहृताः प्रोक्ता भास्करेण स्वशास्त्रइति एकाव्यक्तं शोधयेदन्यपक्षादित्यनेन इत्यनेनेत्यर्थः तथैव पंचरूपाणि पन्यस्येतरस्माच्च पक्षात् शेषाव्यक्तेनोद्धरेद्रूपशेषं व्यक्तमानं जायते व्यक्तराशेरिति अनेन प्रकारेण अत्र पक्षयोरिति सप्तमी अंतराले वस्तुस्वस्थानयोर्मध्ये स्थिताभूः उक्ता निजभुजभक्तकोटीतदंतरस्तादृगोच्चविश्लेषः भूमिरित्यनेनोक्ता सिद्धा उपपन्नेत्यर्थः अथानंतरमत्रानयनविषये अज्ञबोधार्थं मंदधियामेतद्ज्ञानार्थं भास्कराचार्येण स्वशास्त्रे सिद्धांतशिरोमणौ यंत्राध्याये उदाहृतउदाहरणानि मित्रं प्रश्नइत्यर्थः प्रोक्तः ॥९७॥ ॥तदनुवादार्थमाह यथेति ॥ ॥उदाहृतश्लोकावनुवदति इष्टयष्ट्योर्ध्वसंस्थेन वंशाग्रे विध्यतो भुजः दृष्टश्चतुष्करोपान्त्ययष्ट्यारवांकांगुलः सखे ॥९८॥ निवि

षेनतपाकोटिरंगुलंवेध्यपोरपि॰ आत्मवंशांतरंबूरिवंशोष्यायंचवेध्यविदिति॰ अन्यपष्ठेति॰ वेधद्वयेणका
यष्टिरनावश्यकेति सूचनार्थं॰ तेनैकयष्ट्योक्तवेधद्वयकृतेप्यक्षतिः॰ शेषस्यष्टमरीचौव्याख्यातंच॰ अत्र
दृष्टकाष्ठायोरनुद्दाहस्तत्कल्पनेनवंशमानमात्मवंशांतरंचानेकधेतिद्योतनार्थं॰ अंकहस्तादृगष्ठायावि
तितत्रस्थंवक्ष्यमाणंवात्रावधेयं॰ तथाचनिजभुजभक्तकोटि॥१॥१॥ अनयोः समष्टेदपूर्वकमंतरंषड
पवर्तितं॥१॥ अनेनष्टदलवंचपरिवर्त्तसादिनादृष्टकाष्ठाय ९६ ९० यो ०२।२५ रंतर २५८ भक्तंफलंभूमा
नांगुलानि १५५० ६०१२० एभ्यः एयगदृष्टकाष्ठायोर्ध्ववंशखंडं ०२०।०६८ स्वदृष्टकाष्ठाय ०२।२४ युतंवंशमानम
भिन्नं ०७२ एवमुदाहरणसिद्धं॥७०॥ ॥अथजलस्थप्रतिबिंबदर्शनादुक्तमाने॰ आह॰ जलस्थप्रतिबिं
बाग्रदर्शनादपिचोक्तवत्॰ ओच्चंपरंत्वत्रबोध्यंदृष्टोच्चोनंयुतस्थले इति॰ जलस्थितवंशादिप्रतिबिंबंत
स्याग्रवेधात्॰ अपिशब्दाद्भुजकोटिभ्यां॰ उक्तवत्॰ निजभुजभक्तेसादिनासंपूर्णप्रतिबिंबदर्शनेवंशाधस्तसा
दिप्रथमप्रकारेणापिकार्यं॰ विशेषमाह॰ ओच्चमिति॰ परंतु॰ अत्र॰ अस्मिन्नानयने॰ युतस्थले॰ दृष्टकाष्ठाययोज ४०८

नस्थानेदृष्टोच्चेनहीनं॰ ओच्चं॰ उच्चताप्रमाणंज्ञेयं॰ अत्रवंशाग्रस्याधोमुखत्वाद्दृष्टकाष्ठायाश्चोमुखंवंशाग्रसम
सूत्रपर्यंतमनुसूत्राकारंमानमागतमतोदृष्टकाष्ठायहीनंभूमितलरग्रपर्यंतंमानंस्यात्तदेववंशमानंप्रति
बिंबस्यतन्मानानुमापकत्वात्॥१००॥ ॥ननुधीयंत्रमिदंभास्कराचार्योक्तमविशेषादिहकिमर्थमुक्तमिस
तस्तत्प्रयोजनमुपसंहरन्नुक्तानियंत्राण्यपसंहरति॰ इत्यादिपूर्वैः प्रतिपादितंयत्सादृशंबुद्धाभिधंसुयं
त्रं॰ तद्वासनायुक्तमिहोक्तमेवंसंक्षेपतः सप्तसुयंत्रकाणीति॰ इति॰ पूर्वोक्तमादिर्यस्यसतादृशंबुद्धाख्यंयंत्रंयत्॰
उदाहरणसहित॰ भास्करादिभिर्निरूपितं॰ तद्यंत्रं॰ मया॰ उपपत्तिनिरूपणायुक्तं॰ इह॰ सिद्धांतसार्वभौमेनिरू
पितं॰ तथाचतद्विशेषपिवासनाप्रतिपादनार्थमुक्तमितिभावः॰ एवं॰ पूर्वप्रतिपादनेन॰ संक्षेपतः॰ अतएवि
स्तरभयात्॰ यंत्राणि॰ सप्तैव॰ चक्रफलकयष्टिप्रतादचक्रनिभधनुर्बुद्धिरूपाणि॰ अन्यानियंत्राणिसमुपे
क्षितानि॥१०१॥ ॥ननुलघुदारुजसमचक्रेसमसुषिराराः समांतरानेम्यां॰ किंविद्वाक्रायोज्याः सुषिर
स्यार्द्धएयक्तासां॥१॥ रसपूर्णतच्चक्रंद्वाधाराक्षस्थितंस्वयंभ्रमति॰ उत्कीर्यनेमिमप्यवापरितोमदनेन

संलग्नं ॥२॥ तदुपरि तालदलाघं कृत्वा सुषिरे रसं क्षिपेत्तावत् यावद्रसैकपार्श्वे क्षिप्तजलं नान्यतो याति ॥३॥ पिहि
तछिद्रतदन्तश्चक्रं भ्रमति स्वयं जलाकृष्टं ताम्रादिमयस्यांकुशारूपनलस्यांबुपूर्णस्य ॥४॥ एकं कुंडजलांत
र्द्वितीयमग्रे त्वधोमुखं च बहिः युगपन्मुक्तं चेत्कं नलेन कुंडाद्बहिः पतति ॥५॥ नेम्यां बध्वा घटिकाश्चक्रं जल
यंत्रवत्तथाध्यार्य नलकप्रच्युतसलिलं पतति यथा तद्वदीमध्ये ॥६॥ भ्रमति ततस्तत्सततं पूर्णाघटीभिः समाकु
लं चक्रं च तं स्वयमुदकं कुंडं याति प्रणालिकया ॥७॥ तिभास्कराचार्येण स्वयं वक्रयमुक्रमेतद्व्याख्यानं मरीचाववलो
कं तथा सिद्धांतसुंदरे नृपतिचित्तचमत्कृतिकारकं नवतरामलयंत्रचयं ब्रुवे जलतलानलिकांकुशाभामुखोद्गतस
मीरवशेन सदावहा ॥१॥ समतलमुखमध्यं धातुजं वर्तुलं वातपनपरिमितास्त्रं धारयेत्स्तंभयंत्रं प्रणुतरत
लरंध्रं वारिणा पूरितेस्मिन्मुखतरदुडुपाग्राबद्धलंबो बहिः स्यात् ॥२॥ स्यात्तितलमधः स्थः सूर्यबिंबोदयेयं
क्षरति मुखिरनीरे यात्कपर्यवलंबः परिधितलगनाडीचिह्नतोलंबयोगाद्दृतिसमयमानं ज्ञानराजोक्तयंत्रं
॥३॥ अपि च परिधिनाडीचिह्नकीलेषु धार्यास्तनुसमघनघोलंबयोगच्छतास्ताः तलगतशिखिचंचूभा

र्गतो गोलपातादृतिसमयमानं ज्ञानराजोक्तयंत्रं ॥५॥ अपसुसरलवंशास्वर्णनाराद्यिरूपैर्विरचितसमभा
गे गोलयंत्रं विधाय ध्रुवयुगगतपिंगोलमध्यस्थितायासमुदितजलपूर्णस्तंभसूत्रेण वेष्ट्या ॥५॥ क्षरति सु
खिरनीरे गोलयंत्रं सरवेटं भ्रमति समयसाम्ये नैव तद्वद्विधेयं समुदितमखिलं बाह्यार्कराशारदाद्यैः स्वयमिह
वहतीदं ज्ञानराजोक्तयंत्रं ॥६॥ ताम्रस्तंभे मध्यरंध्रं विधाय स्तंभे कुंभं मूलरंध्रं विधाय तोयं रंध्रे स्तंभकुंभोदराभ्यां निर्य
द्धारास्तंभतो निर्गतास्यात् ॥७॥ स्थूलगोलेयष्टिकांते निबद्धं चक्रं नेम्यां पष्टिघट्यादियुक्तं तिर्यग्धारानीरसंपूरिता
भिर्नाडीभिस्तद्भ्रामयेद्गोलयंत्रं ॥८॥ पीठे चतुश्चरणतुंगतरे सरंध्रे कुंभं निधाय तलरंध्रयुतं सतोयं तत्पार्श्वयुग्मगत
कीलकमध्यबद्धं चक्रं विधाय शिथिलं तलसंबयुक्तं ॥९॥ तच्चक्रमस्तकयुताघटिकाश्छिद्रे यं कुंभ च्छतोदककणैः प
रि पूरितासा चक्रभ्रमात्सजनितक्रगपत्समस्तनीरं तथा समयतुल्यतया विधेयं ॥१०॥ तच्चक्रनेमिघटितसू
त्रनिबद्धहस्तो वाघं प्रवारयति नाकिलरारुरूपः कुंभाग्रवासिकतया परितोपि नाडीतरेण घटिकाभ्रमयस्य वक्त्रं
॥११॥ मेषद्वयं सुलघुदारुकृतं त्रिकोणं यंत्रस्य सूत्रकलितं घटिकांतरेण सुद्वंकरोनिहतचक्रगलं वकृष्टं चैव बुधे

र्बहुनरंस्वयंवहतोपि॥१२॥उक्तंघटंघटगतंप्रविधायतोयंयावन्मितंक्षरतितावदधस्तलाग्रे·न्यासन्नतंतदप
रंत्रानकेस्तलस्थहंसोमुखेनघटिकाः स्वयमभ्युतत्र॥१३॥इतिस्वयंवहयंत्राण्यक्तानि·एतद्व्याख्यानमेतद्रूपकर्त्तृ
पुत्रचिंतामणिकृतग्रहगणितचिंतामणौद्रष्टव्यं·तथाचतद्रीत्यास्मिन्नंथेतानिकथंनोक्तानीत्यत्राप्राह· स्वयं
वहाख्यंकिलयंत्रजातंपूर्वैः स्मृतंतन्मयकात्रनोक्तं·कापघतोगालजयुक्तभावात्तत्साधनाराक्षतथानराणा
मिति·स्वयंवहसंज्ञकंयंत्रजातं·स्वयंवहयंत्रकदंबकमित्यर्थः·भास्कराचार्यैरुक्तं·तत्·तज्जातीयेना
न्यत्·अत्रसिद्धांतसार्वभौमग्रंथमयानोक्तं·हेतुमाहकापघतइति·पारदजलशर्करायोपचारिकगंत्रचल
नेगोलसंबंधियुक्तेरभावात्कपटयुक्तित्वात्·तथाचगणितस्कंधेगोलगणितयुक्तिसिद्धस्यैवप्रामाण्याप्यपगा
मादन्यस्यचकियत्कालमापाततोरमणीयस्याप्यिरत्वात्परिणतचमत्काराभावतयायुक्तिरितिभावः·तदु
क्तंभास्कराचार्यैः·एवंबहुधायंत्रंस्वयंवहंकुहकविद्यायाभवति·नेदंगोलाश्रितयापूर्वोक्तत्वान्मयाप्युक्तमिति·
ननुतथापिभास्करोक्तेवक्तव्यमित्यत्राप्राहतदिति·नराणां·फिरंगिजनातिरिक्तानांमनुष्याणांतत्साधनाश्र

वातया·तेषांस्वयंवहयंत्राणांसाधनं·पारदजलयथोक्तकालाभुरुद्धप्रयोगेणनिष्पत्तीकरणं·तस्य·अशक्य
तया·कर्त्तृत्वसामर्थ्याभावेनेत्यर्थः·तथाचतत्करणंविनातद्दानप्रतीत्यसंभवात्तदुक्तिर्व्यर्थेतिभावः॥१०२
॥ ॥यंत्राध्यायमुपसंहरति· इतिसिद्धांततत्वार्थमुनीश्वरकृतेभवत·सिद्धांतसार्वभौमेस्मिन्पूर्णोयंत्रनि
रूपणमिति·अस्मिन्·सिद्धांताभिज्ञसेव्येइत्यर्थः·रोषंस्पष्टं॥२॥ ॥श्रीः॥ ॥श्रीसार्वभौमोनिजमंदि
रेस्मिन्सिंहासनेदृप्ततयोपविष्टः॥स्वामात्यवर्गानधिकारवार्त्तासंपृष्टएवोत्तरयांचकार॥१॥ ॥तत्रप
द्याभ्यांप्रश्नोत्तरेप्रतिजानीते·स्वज्ञाननिर्जितमहागणकातिगर्वज्योतिर्विदामपिमुखंरविबिंबतुल्यं·सर्वत्र
हार्कतनुवर्णवदेवयेषामाकर्णनाद्भवतिनिर्भृतोषहेतून्॥१॥प्रश्नान्वदामिचतदुत्तरकाणिपूर्वग्रंथस्त
बालकधियोभिनवप्रकारे·वृद्धैसमस्तरविसुग्रहमुक्तसूर्यबिंबानुकारिगणकेंद्रमुखोद्गतानीति·तान्प्रश्नान
हंवदामि·तान्कानित्यतःप्रश्नोत्कर्षमाहस्वज्ञानेति·येषां·प्रश्नानां·श्रवणात्·स्वस्यज्ञानेननिर्जिताः पराजिताः
महागणकानामतिगर्वायैस्तादृशांज्योतिर्विदांमुखंसूर्यबिंबसदृशं·प्रतापाधिक्यात्·मलिनतायाःप्रसंभवसं

MEMORIAL

भावनपापिराहोतएवसूर्यबिंबोपमत्वमुक्तं·सर्वग्रहणेसूर्यबिंबवर्णवत्·दृश्यमिसर्प्यः·एवकारादेतदन्यव
र्णानिरासः·अतएवानेकान्यपिमुखान्यपमूर्द्धकश्रवणादेकीभावापन्नानिभवंतीसभिप्रायेणैकवचनं·उत्त
रास्फुरणेननिः प्रलत्तयामलिनंस्यात्·पूर्वविख्यातरूपप्रतिष्ठाहानेः·अतएवानभिज्ञसंतोषहेतवः प्रश्ना
इतिविश्रुतोषहेतूनितिप्रश्नविशेषणंहेतुगर्भं·ननुयेषांप्रश्नानामुत्तराभावस्तेव्यर्थाएवसतआहुरिति·ते
षामुक्तप्रश्नानामुत्तराणिचवदामि·तेनप्रश्नवैयर्थ्यंनेतिभावः·ननुवस्तुतउत्तरसद्भावोपक्षितानतुतन्नि
रूपणमुचितमन्यथाप्रश्नोत्कर्षानुपपत्तेरित्यतउत्तरकथनप्रयोजनमाहसर्वग्रंथेति·पूर्वग्रंथारं
भमारभ्ययंत्राध्यापपर्यंतंजानंतीतिज्ञास्तादृशांबालकानामधिककल्पनाज्ञानां·बुद्धेः·नूतनप्रकारक
ल्पने·दक्षे·दक्षत्वनिमित्तं·तथाचोत्तरानुक्तौयथाश्रुतग्रंथज्ञानांकल्पनरीत्यदर्शनान्नवीनप्रश्नोत्तर
दानसामर्थ्याभावादुत्कर्षासिद्धेरित्यत्तरोक्तौतुतेषामपितद्दानरीत्यानवीनकल्पनासामर्थ्यंभवेत्सैव·
पूर्वग्रंथज्ञानुक्तावनभिज्ञानांप्रश्नार्थज्ञानस्यैवानुपपत्तातदुत्तरकल्पनायाः सुतरामप्रसंगइतिभावः·

ननूत्तराणिसदूषणानिभविष्यंतीत्यतउत्तरविशेषणमाहसमस्तेत्यादि·संपूर्णसूर्यग्रहणानिर्मुक्तसूर्यबिं
बसदृशं·यत्·गणकवर्याणांमुखं·एतेनस्वप्रतिष्ठास्यर्द्धिविरुद्धगणकोक्तिप्रहारनिवारणक्षमत्वंदर्शितं·
तस्मान्निर्गतानि·अप्रतिहतोक्तिगणकोक्तानीत्यर्थः·तादृशानिरस्तदूषणान्येवभवंतीतिभावः॥२॥ ॥
तत्रमध्यमाधिकारविषयेप्रश्नविशेषावाह·अधिमासशेषवशातोरविचंद्रावमावशेषतइमौचबु
धोयः·स्वधिषासमानयतितंखलुमन्येदिनसंघकुट्टकविधावभियुक्तमिति·यः·बुधोगणितोक्तिदक्षः।
अधिमासशेषवशातः·अहर्गणानयनेधिमासप्राप्तोयद्राज्यशेषंतदधिमासशेषंतस्मादित्यर्थः·सूर्य
चंद्रौ·अहर्गणानीतौविनाहर्गणासाधनंस्वबुद्ध्या·स्वकल्पनप्रकारेणसम्यगानयति·एवं·अवमावशे
षतः·अहर्गणानयनेवमप्राप्तोयद्राज्यशेषंतदवमशेषंतस्मात्·इमौ·सूर्यचंद्रावहर्गणानीतावान
यति·चः समुच्चये·तमुत्तरदातारं·खलु·निश्चयेन·दिनसंघकुट्टकविधौ·अहर्गणानयनकल्पनविष
ये·कुट्टककल्पनविषयेचेत्यर्थः·अभियुक्तं·निविष्टं·दक्षमित्यर्थः·अहंनन्ये·एतेनकुट्टकात्तदानयनंस्

चितं॥३॥ ॥अधिमासशेषविशेषमाह·यदेष्टवारार्थमहर्गणाश्चेत्सैकानिरेकस्त्वधिमासशेषं· युगा
धिमासैः·क्रमशोयुतोनंतद्ज्ञेयमिष्टंनतुपूर्वसिति·यदास्वाभिमतवारसिद्धिनिमित्तमहर्गणाःसैकानि
रेकोवाकृतःस्यात्तदाहर्गणानेयनावगताधिमासशेषं·क्रमात्·युगोक्ताधिमासैः·युतोनैसद्यसिद्धतत्·
इष्टं·प्रश्नविषयंज्ञेयं·नतुपूर्वसिद्धकेवलंप्रश्नविषयंज्ञेयं·अत्रोपपत्तिः·अहर्गणास्यकांतरितत्वादधिशे
षमप्यकसंबंध्यधिशेषणाहर्गणावष्टक्तोनमन्यथाभीष्टाहर्गणीयत्वानुपपत्तेः·तत्रयुगसौरदिनेयुगाधि
मासास्तदेकेनकेदसधिशेषस्ययुगसौरदिनदरत्वासमष्टदस्यस्वतःसिद्धत्वाच्चयुगाधिमासैर्युतोनमुप
पन्नमितिसंक्षेपः॥४॥ ॥अत्रापिविशेषमाह·यदापिशेषंनभवेद्धिहीनंतदायुगोत्थार्कलवाधिमासौ·
योतद्वियोगेनयुसंयुगीपसौराहतषंसुधियात्रवाध्यमिति·यदायुगाधिमासैरधिशेषंनिरेकाहर्गणाप
क्षेहीनंनस्यात्तदायुगजातोपासौरदिनाधिमासौतयोरंतरेण·युगाधिमासौनयुगसौरांशारूपदिने
रित्यर्थः·युतमधिशेषंकार्यं·अत्रसैकाहर्गणापक्षे·यदधिशेषंषोजनासिद्धं·तद्गीयसौरभागरूपदिने

त्वंसुधियागणकेनज्ञेयं·अत्रोपपत्तिः·अधिशेषस्यसौरदिनानांहरत्वाद्यदाशोध्यमानंहीनंनस्यात्तदाप
रमाधिशेषंहरतुल्यंसंयोज्यशोध्यंहीनंकार्यमतोलाघवादधिशेषंसौरांशाधिमासयोरंतरेणापुक्तं·शेषस्य
हरात्पत्वावश्यभावाद्धरतष्टमित्यपपन्नं॥५॥ ॥एवमधिमासानांसैकनिरेकत्वपक्षेविशेषंवदन्नुत्तरो
पपुक्तमधिशेषपक्षाभ्यांसाधयति·स्यष्टोधिमासः पतितोपलब्धइत्यादिकेयत्त्वधिमासशेषं·युगाधिवारैः
क्रमशोयुतोनंनोनंयदात्रापियुगाधिवारैः॥६॥हीनायुगार्कांशमितिःसुयोज्याधिशेषमत्रापियुगार्कभागैः
तद्ज्ञिनासंत्वधिमासशेषंज्ञेयंविदात्राखिलमेतदेवेति·इत्यादिके·इत्यादिपद्योक्तविशेषकृतेसतीत्यर्थः·य
दधिमासशेषं·तत्·युगाधिवारैः·युगाधिमासदिनैः·क्रमशः सैकनिरेकाधिमासक्रमेणेत्यर्थः·युतमूनंच
कार्यं·अत्रैकमासांतरत्वेनोक्तरीत्यात्रिंशाद्गुणितयुगाधिमासाएकमासाधिशेषमतोयुगाधिवारैरिति
सम्यगुक्तं·यदा·अत्र·अधिमासनिरेकपक्षे·अहर्गणानिरेकपक्षरीत्यासमुच्चः·अधिशेष·युगाधिमासदि
नैरूनंनस्यात्तदायुगाधिमासदिनैर्हीनायुगसौरांशामितिरधिशेषयोज्या·उपपत्तिस्तद्वीतिरेव·अत्र·से

काधिमासपक्षे॰ अपि त्राह्यासैकाहर्गणरीतिः॰ तामेवाह युगार्कभागैरिति॰ योजनसिद्धमधिशेषं युगसौरांशारूप
रिनेस्तष्टशेषस्य हरात्पत्वनियमात्॰ एतत्सिद्धमधिशेषं प्रश्नकर्त्रभिमतं॰ एवकारादृतविशेषाधिशेषनिरासः॰
चतुर्विंशतिभक्तं॰ फलमधिमासशेषं॰ अत्र॰ उत्तरनिमित्तं॰ विदा॰ गणकेन॰ अदुष्टेयं॰ तथाचेष्टयाधिशेषकल्प
नेन प्रश्नकृतेतच्चेदनपवर्त्तितं प्रश्नकर्त्रभिमतं तदा चतुर्विंशतिभक्तं निःशेषस्यात्तर्हि तत्तरदानार्हफलतुल्यम।
धिशेषं॰ यदि तु निःशेषं न स्यात्तर्हि तदुद्दिष्टं विलक्षणं॰ तस्मादुक्तरीत्या सूर्यचंद्रावहर्गणोत्पन्नौ न भवतः क्रियायाः
निःशेषत्वाभावेनाप्रवृत्तायाहर्गणस्यवर्त्तितत्वात्॰ उपपत्तिरप्यग्रे उपपत्तिनिरूपणावसरे भाज्यहरयोरपवर्त्तना
वश्यकत्वाद्युगसौरांशाधिमासयोश्चतुर्विंशत्यपवर्त्तनादधिशेषमवश्यमपवर्त्तितमभिमन्यावश्यमाणाप्र
कारेपवर्त्तितहरस्यनिबंधनादनपवर्त्तितरूपभाज्यग्रहणे हरसंबंध्याभावात्विलत्वापत्तिः॰ अनपवर्त्तितशेषम
पवर्त्तांकोपचितं चापवर्त्तने पवर्त्तांकेनावश्यमपवर्त्तितं भवति॰ अपवर्त्तितशेषं रूपोपचितमेव भवतीति तन्नापवर्त्ति
तं स्यात्॰ अत एवेष्टयाकलिताधिशेषस्यानपवर्त्तेष्टोद्दिष्टत्वमुपपन्नं॥७॥ ॥अथ पद्याभ्यां प्रथमप्रश्नोत्तरं वि ४९२

वक्षुश्चांद्राहर्गणमाह॰ द्विधाधिशेषं नवनागषड्भिर्नवाभ्रतत्वाद्रिरसैः क्रमार्द्धं॰ नवाष्टराभांगरसैः खखाभ्र
व्योमाभ्रनागाब्धिरसैः सुतष्टं॥८॥ गताधिमासविगताधिमासदिनैतचांद्राहर्मितिः क्रमेण॰ स्वतक्षणास्ते
पवशादनेकं तदेवमेवं गतचांद्रवाराइति॰ उत्तरापयुक्तमधिशेषं द्विधा॰ एकत्रैकादशानां सप्तशतानां गुणि
तं॰ अपरत्र॰ नवखतत्वसप्तषड्गुणितं॰ प्रथमस्थानेगतैरंकैः ६६३८७ स्तष्टं॰ द्वितीयस्थानेगताभिरंकैः ६५८०००००
स्तष्टं॰ क्रमेण॰ प्रथमस्थानेगताधिमासाः॰ द्वितीयस्थानेगताधिमासदिनहीनगतचांद्रदिनानि॰ इदं ह्यंस्व
तक्षणांकयोजनवशादनेकं स्यात्॰ अधिमासानां पूर्वतक्षणायोजनेगताधिमासाः॰ द्वितीयस्य द्वितीयतक्षणायो
जने द्वितीयमेवं पुनः पुनर्बहुधा॰ एवं तयोर्गताधिमासदिनतदाचांद्रदिनयोरेकं गतचांद्राहर्गणाः॰ सोप्यनेकधात
दधिशेषभिन्नकालेनत्वेककाले॥७॥ ॥सूर्यचंद्रयोः सिद्ध्यर्थं पद्याभ्यां फलमाह॰ ताभ्यः पुरोक्तावमशेषमेत
त्खखाभ्रखाब्धीषुगुणं विभक्तं॰ अद्रिखांकाद्रिगुणाब्धिसप्तवेदांगदस्राद्रिनगाद्रिभिस्तत्॥१०॥ सूर्यस्य भागादि
फलं विधोस्तत्सप्तांगभूगोकुयमाद्रिनिघ्नं॰ पूर्वोक्तहारेण हृतं पुरोक्तावमाग्रमेतल्लवपूर्वकं स्यादिति॰ एभ्यः गत

चांद्रदिनेभ्यः पुरोक्ता अहर्गणानयनरीत्या अवमशेषं कार्यं एतत् चतुःपंचाशद्युतगुणितं तत्सिद्ध
मुक्तहरभक्तं सूर्यस्यांशाद्यं फलं चंद्रस्य तु पूर्वपद्योक्तमवमशेषं सप्तागभूगोद्रसाघक्तगुणागुणितं पूर्व
पद्योक्तहारेणभक्तं भागादिफलं स्यात् ।।१२।। ।।पद्याभ्यां प्रश्नमुत्तरयति गताधिमासाहविहीनयातचां
द्राहमानं खलु पूर्वसिद्धं तत्खागरामैर्विहृतं फलं स्फः स्पर्गताहाद्यवशेषमर्कः ।।१२।। सविश्वनिघ्नाहिमगुर्युगं
दुमासाप्तताग्रेरधिमासशेषात् एतौ विहीनौ स्वफलेन युक्तौ भागादिकौ पूर्वसमावशेष्यमिति गताधिमास
दिनहीनगतचांद्रदिनमानं पूर्वसिद्धं यत् तत् षष्ट्यधिकरातत्रयेणभक्तं फलं सृष्टिमारभ्यगतवर्षाणि भवंति
शेषं भागात्मकः सूर्यः सः त्रयोदशगुणाच्चंद्रः स्यात् एतौ सूर्यचंद्रौ अधिमासशेषात् युगचांद्रमासभक्ताद
ग्रांशहीनौ स्वस्वफलेन पूर्वोक्तेन युक्तौ भागाद्यौ सूर्यचंद्रौ अवश्यं नियतं पूर्वसमौ अहर्गणानीतसूर्यचंद्रतु
ल्यौ भवतः ।।१३।। ।।अथ द्वितीयप्रश्नस्योत्तरं विवक्षुः पद्यत्रयेण चांद्राहर्गणमाह अभीष्टवारार्थमहर्गणाश्चे
त्सैकोनिरेकावमशेषमस्य युगावमैः संयुतमूनितं चेन्नानेपदायोगरविक्षयाद्यं ।।१४।। भवेदभीष्टदिवसेवमा

गतमेतद्भगाब्धिकमितेरनूनं तत्तष्टमेतद्गभक्तमत्राखिलं सयाहाद्यमिदं विनिघ्नं ।।१५।। नगांगरामाभ्रयमाश्वगाक्षै
र्नखाभ्रखाक्षागखखाब्धितष्टं गतेहरोघो निजतक्षणात्मक्षेपादनेकेगतचांद्रवारा इति निरेकदृष्टं तत्स्पष्टं अस्य गु
णितागताहर्गणस्यावमशेषं सैकनिरेकक्रमेण युगावमैर्युतहीनं यदि हीनं न स्यात्तदा पुरीयपर्यसावनदिनैर्युक्तं
अभीष्टदिनेवमशेषं स्यात् एतत् अवमशेषं युतिजातं युगचांद्रदिनप्रमाणात् अनूनं ऊनं न स्यात् तदा तैर्युगचां
द्रदिनैरुक्तं एतत् प्रश्नकर्त्रभिमतमवमशेषं चतुर्भक्तं अत्र उत्तरनिमित्तं अखिलं अदुष्टं अवमशेषं स्यात्
यदि कल्पितावमशेषं चतुर्भक्तं निःशेषं न स्यात्तर्हि खिलं तादृशावमशेषात् सूर्यचंद्रावहर्गणात्सत्रौ न स्यातां अ
त्रोपपत्तिः युगचांद्रदिनैर्युगावमानि तदैकेन किमिति समहरत्वादवमशेषं युगावमैर्युतमूनं ऊनं न स्यात्तदा
परमावमशेषं युगचांद्रदिनतुल्यं संयोज्य युगावमानि हीनान्यतो युगावमोनयुगचांद्रदिनरूपयुगसौरसा
वनदिवसायुक्ताः कृताः शेषस्य युगचांद्रदिनरूपहरात्स्वल्पत्वनियमात्तत्तष्टं तत्तष्टं अग्रे वक्ष्यमाणोपपत्तौ भा
ज्यभाजकयोश्चतुर्भिरपवर्तनावश्यकत्वाद्धरस्य चतुरपवर्तितस्य वक्ष्यमाणप्रकारेणोक्तेस्तदनुरोधेन शेषमपि

चतुर्भिरपवर्त्तनीयमेवाग्रपद्याखिलत्वापत्तेः॥ अतएवकल्पितावमशेषंचतुर्भक्तंनिःशेषंनस्यात्तत्खिलमि
ति॥ इदमुत्तरोपयुक्तं॥ अवमशेषंनगांगेत्याद्यक्तांकैर्गुणितंचतुर्भक्तयुगचांद्रदिनसंख्याभिस्तष्टं॥ गत
चांद्रदिनगणाः॥ स्तत्क्षणारूपक्षपयोजनाद्गतचांद्रदिवसाअनेकेतदधिशेषकालभेदेनस्फः॥१६॥ ॥
द्वितीयप्रश्नेपद्याभ्यामुत्तरयति॥ गतेदहोघानिहतायुगाधिदिनैर्युगाद्वाहृतोदिनादि॥ यल्लब्धमेतेन
गतेडुवाराहीनारविःस्याल्लवपूर्वएषः॥१७॥ खरामतष्टेर्गतचांद्रवारैः सूर्याहतैः संयुतइंदुरंतो॥ स्वस्वा
वमाख्योक्तफलेनयुक्तावहर्गणौतौविहपुष्पवंताविति॥ गतचांद्राहर्गणाः॥ युगाधिमासदिनैर्गुणितः॥
युगचांद्रदिनभक्तः॥ यद्दिनाद्यंलब्धमेतेनदिनादिना॥ गतचांद्रदिवसाअनेनाः॥ भागाद्योर्कः स्यात्॥ एषः सूर्यः
त्रिंशत्तष्टेर्गतचांद्रदिनैर्मासादिगततिथिभिरित्यर्थः॥ द्वादशगुणितैर्युक्तश्चंद्रः॥ एतौ॥ सूर्यचंद्रौस्वस्वयदवमे
संज्ञंफलं॥ एतयोः पुरोक्तेसादिपद्याभ्यांपूर्वमुक्तेतेनेत्यर्थः॥ युक्तौ॥ इह॥ द्वितीयप्रश्नविषये॥ पुष्पवंतौसूर्यचंद्रा
वुत्तरभूतौ॥ अहर्गणात्सन्नसूर्यचंद्रसमोस्तः॥१८॥ ॥प्रश्नोत्तरयोरूपपत्तिंसूचयन्प्रथमप्रश्नोत्तरतो

पद्याभ्यांविशदयति॥ अत्रोपपत्तिः स्थिरकुट्टकाभ्यांत्रैराशिकादुद्धिमतावधेया॥ यथाहिकेनप्रहतायुगाधिमासावि
हीनाअधिशेषकेण॥१९॥ युगोत्थसौराहृतानिरग्राः स्फुटत्रयेकुट्टकतोगुणाप्ती॥ गताधिमासाहविहीनया
तचांद्राहयाताधिकमासमानइति॥ अत्र॥ प्रकारद्वये॥ त्रैराशिकोक्तेः सकाशात्परिणताभ्यां॥ स्थिरकुट्टकाभ्यां॥ क्षेपं
विशुद्धिंपरिकल्प्यरूपंपद्यक्तयोर्येगुणाकारवल्ली॥ अभीप्सितक्षेपविशुद्धिनिघ्नस्वहारतष्टेभवतस्तयोस्तेइष्टकाभ्यां॥
बुद्धिमतागणकेन॥ अवगम्या॥ एतदेवप्रथमप्रकारेविशदयति॥ युगसौरदिनैर्युगाधिमासास्तदेष्टसौरदिनैः के
इत्यनुपातेनेष्टसौरदिनगुणितयुगाधिमा सरूपभाज्याद्यगसौरदिनात्मकहरणभक्ताद्यत्फलंतेगताधिमासाः
शेषंचाधिशेषं॥ एतदूनभाज्यहरभक्तफलस्यनिःशेषतयावश्यंगताधिमासत्वेनलब्धैः कुट्टकप्रश्नोत्तरंपर्यवस
न्नं॥ युगाधिमासाः केन॥ अहर्गणानयनोक्तरीत्यावगतगणकेनगुणिताअधिशेषणहीनायुगीयसौरदिनभक्ता
निरग्राः स्फुटितिकुट्टकस्वरूपात्॥ तत्र॥ कुट्टके॥ कुट्टकतः कुट्टकप्रकारात्॥ येगुणालब्धीतत्क्रमेणगताधिमासदिनो
नगतचांद्रदिनगणाताधिमासयोः प्रमाणोभवतः॥२०॥ ॥अथकुट्टकतइष्टकंतत्रकुट्टकप्रकारानुवादार्थंकुट्ट

कोपकरणभूमिकांभास्करोक्तामनुवदति·भाज्योहारःक्षेपकश्चापवर्त्यः केनाप्यादौसंभवेकुट्टकार्थं·येनछिन्नो
भाज्यहारौनतेनक्षेपश्चेतदुपमुद्दिष्टमेवेति·योराशिर्गुणएतेतस्यभाज्यइतिसंज्ञा·भजनयोगात्·हारक्षेपाव
न्वर्थसंज्ञौ·एतेसंभवेसति·कुट्टकस्य·एतादृशास्थलेगुणाकविशेषस्यज्ञानार्थं·प्रथमंकेनाप्यभिन्नेनतुल्यां
केन·अपवर्त्याः·अन्यथाकुट्टकासिद्धिरुक्तप्रकारेणसर्वथासिद्धं·भाज्यहारौयेनांकेनापवर्त्तितौतेनैवांकेनक्षे
पोनापवर्त्तितःस्यात्तदा·एतद्दृष्टकेनपद्धतिर्दुष्टमेव·भाज्योयेनकेनापिगुणितःक्षेपयुतोनस्तेनहरेण
भक्तःसन्निःशेषोनस्यादित्यर्थः॥२१॥ ॥अपवर्त्तांकज्ञानमपवर्त्तितानांतेषांसंज्ञांतरंचतदुक्तमनुवदति·
परस्परंभाजितयोर्ययोर्यःशेषस्तयोःस्यादपवर्त्तनंसः·तेनापवर्त्तनेनचभाज्यहारक्षेपाविभक्तादृढसंज्ञ
कास्तेइति·ययोराश्योःपरस्परंभाजितयोःसतोर्यःशेषांकःसतयोरपवर्त्तनंस्यात्·तेनतौनिःशेषंभज्ये
तेएव·एतदुक्तंभवति·हरेणभाज्येभक्तेयच्छेषंतेनापिसहरोभाजनीयः·तच्छेषेणापिभाज्यशेषंतेनापिहरशे
षमितिपुनःपुनःपरस्परभजनेक्रियमाणेयद्यंतेरूपंशेषंस्यात्तदातौनापवर्त्तेतएवः यदातुशून्यंशेषंस्या

त्तदाहरीभूतंप्राक्क्षेपमधःस्थापितंतदेवभाज्यहरयोरपवर्त्तनंस्यात्·शेषोत्थपवर्त्तांकः·तस्मादंतिमशेषां
कएवापवर्त्तांकः·शून्यंशेषंतुशेषाभावः·एतेनभजनद्वयमेवपरस्परभजनमितिनिरस्तं·यावदंत्यशेषं
तावदेवपरस्परभजनसिद्धेः·भाज्यहरान्यतरस्यापिनाशाभावात्·अतएवप्रथमभजनेत्यशेषसिद्ध
वपिपरस्परभजनमस्तंतं·पारिभाषिकत्वात्·एवंज्ञातेनापवर्त्तांकेनभक्ताःभाज्यहारक्षेपाःदृढाख्यास्तेभा
ज्यहारक्षेपाःस्फुटत्वंतुवक्ष्यमाणकुट्टकगुणसाधनयोग्यत्वं॥२२॥ ॥कुट्टकप्रकारंभास्करोक्तपद्याभ्याम
नुवदति·मिथोभजेत्तौदृढभाज्यहारौयावच्छेषंभवतीहरूपं·फलान्यधोधस्तदधोनिवेश्यःक्षेपस्तथांतेख
मुपांतिमेन॥२३॥स्वार्थेहतेंत्यनयुतेतदंत्यसजन्मुहुःस्यादितिराशियुग्मं·ऊर्ध्वोविभाज्येनहतेनतेषःफलं
गुणःस्यादपरोहरेणेति·तौ·प्रागुक्तौदृढभाज्यहारौ·उक्तवन्मिथःपरस्परंतावद्भजेत्·यावत्·इह·भजनसंबं
धिनिभाज्यशेषमेकसंख्यंस्यात्·एतेनहरशेषभक्तरूपावशेषेपिनक्षतिः·फलानि·आगतानि·क्रमे
ण·अधोधोनिवेश्यानि·फलंचफलेचफलानिचफलानि·द्वंद्वैकशेषः·एकमेवफलंलब्धापदिरूपंशेषं

स्यात्तदातदेकमेवफलंस्थाप्यं·हेचेत्तर्हिहेस्थाप्ये·बहूनिचेत्तर्हिबहूनिस्थाप्यानीत्यर्थः·एतेनपारिभाषि
कंपरस्परभजनंस्पष्टीकृतं·तेषांफलानांवल्लीवदधोधःस्थापितानामधोहरसंपानिवेश्यः·अंतेसं
पाद्यइत्यर्थः·एवं·शून्यं·तथा·निवेश्य·एवंबल्लीस्यात्·ततउपांतिमनांकेन·स्वोर्ध्वस्थितेकेगुणिते
अंत्यनांकेनयुतेचतदंत्यंत्यजेदितिमुहुः·उपांतिमनस्वोर्ध्वहतेत्यनयुतेतदंत्यंत्यजेदितिपुनःपुनः
कृतेराशियुगंस्यात्·तत्रोर्ध्वराशिर्हरेनभाज्यनतष्टःसन्फलंस्वाभिमतंस्यात्·अपरोधस्तनोराशिर्ह
रेनहरेणातष्टःसन्गुणाः स्यात्·तस्त्वस्तनूकरणे·कर्मणिक्तः·तष्टस्तनूकृतःकृशीकृतः·अवशोषितइ
तियावत्·भस्कावशोषितराशिर्गोसोननुलब्धमित्यर्थः·तेनगुणेनहरभाज्यंगुणितंहरक्षेपयुतोनहर
हरणभक्तेशोषनस्यादित्यहिष्टपिभाज्यहारक्षेपयुतेरावगुणालब्धीस्तइत्यर्थसिद्धमविशोषात्॥१४॥
॥ ॥अत्रविषयव्यवस्थाविशेषमनुवदति·एवंतदैवात्रयदासमास्तुः स्फलंत्रयश्चद्विषमास्तदानीं·
यथागतोलब्धिगुणोविशोध्योस्वतक्षणाछेषमितोनुतोस्तइति·एवं·पूर्वोक्तंतदैवस्यात्· यदात्र·परस्पर

भजने·तात्प्रागतालब्धयःसमाःस्युः हेचतस्रःषडिसादयः·यदितुतालब्धयोविषमाःस्युरेकातिस्रः पंचचेसा
दयस्तदानीमुक्तप्रकारेणागतोलब्धिगुणोस्वतक्षणाछोध्योशोषनुत्योतोलब्धिगुणोस्तः·तस्यतेतनूक्रिय
तेनेतितक्षणः·तक्षणातीतितक्षणइतिवा·स्वस्यतक्षणाश्चस्वतक्षणास्तस्मात्·हरहराहुणःशोध्योलब्धि
रंशभाज्याछोध्येत्यर्थः॥२५॥ ॥इदानींविभाज्येनहरेनतष्टसाधर्द्वविशेषमणक्षेपगुणस्योःसाधनंचानुवदति·
गुणलब्धोःसमंग्राह्यंधीमतातक्षणोफलं·योगजेतक्षणाद्धुद्धेगुणाप्तीस्तोवियोगइति·गुणालब्धिसंबंधिनित
क्षणाक्रियमाणेसतिभयत्रतक्षणास्यफलंतुल्यमेवग्राह्यंबुद्धिमता·हेतुगर्भमिदं· उभयत्रतक्षणेक्रियमाणेयत्रा
ल्पंतक्षणफलंलभ्यतेतत्तुल्यमेवान्यत्रापिग्राह्यं·नत्वधिकंप्राप्तमपि·इतरत्रतत्राभावात्· योगजे·धनक्षेपजेगु
णाप्तौ·तेस्वतक्षणाद्धुद्धेवियोगजेभवतः गुणोहरहराद्धुद्धःसन्लब्धिर्हरभाज्याद्धुद्धासतीकृतक्षेपेभवतीत्य
र्थः·वस्तुतस्तुयोगजेगुणाप्तीतथाद्धुद्धेवियोगजेभवतः·तत्रभाज्यक्षेपयोर्द्धनत्वेक्षणत्वेवायेगुणाप्तीतेयो
गजे·योगेयुतिःस्याल्लयोःस्वयोर्वेतिरीसायोगतात्·यदापुनर्भाज्यक्षेपयोरन्यतरस्यर्णत्वंतदाधनर्णयो

रंतरमेवयोगइस्तक्तेर्वियोगजत्वात्स्वतक्षणाशुद्धेगुणाप्तीस्तः॰तेनधनक्षेपजे गुणाप्तीस्वतक्षणाशुद्धे
क्षणाक्षेपजेस्तः॰एवंधनभाज्योत्पन्नेगुणाप्तीस्वतक्षणाशुद्धक्षणाभाज्योलेभवतइतिसिद्धार्थः॥२६॥ ॥
स्थिरकुट्टकोपक्रममुपपाद्यन्नवशिष्टोपपत्तिंपद्यत्रयेणाह॰प्रसक्तशेषधितिगौरवंस्यादतोधिशे
षंपरिकल्परूपं॰साध्यगुणाप्तीप्रपवर्त्तितेष्टशेषाहतेतक्षणशेषितेस्वे॥२७॥स्वतक्षणाक्षेपवशा
दनंतेगुणेखषड्रामहृतावशेषे॰चैत्रादियातास्तिथयोगताधिमासाहयुक्तोगुणएवचांद्रः॥२८॥गता
हर्गणोस्माक्षपायाहाक्तरीत्याक्षयाहावशेषंभवेत्सुष्यवंतौ॰ततोभास्करोक्तप्रकारस्यरीत्याप्रसा
ध्योतुशिष्टंसुधीज्ञेयमेवेति॰इति॰उक्तकुट्टकप्रकारेण॰प्रसक्ताधिशेषेषुगुणलब्धिसाधनेगौरवं
स्यात्॰अतःकारणात्॰अधिशेषंरूपंप्रकल्प्योक्तरीत्यागुणाप्तीसाध्ये॰भाज्यहरयोर्नियतत्वात्॰
अभीष्टाधिशेषतेआह॰अपवर्त्तितेति॰ततस्तस्थिरकुट्टकोक्तापवर्त्तितेष्टाधिशेषरूपर्णाक्षेपगु
णितेअपवर्त्तितभाजकेभाज्यरूपतक्षणाभ्यांशेषितेभक्तावशिष्टे॰स्वे॰अभिमताधिशेषसंबे

डाक्टर भाऊ दाजी हरयाल्यस्मारक
MEMORIAL

द्धेगुणासीस्तः॰इष्टाहतस्वस्वहरेणयुक्तेतेवाभवेतांबहुधागुणाप्तीइतिभास्करोक्तास्वतक्षणयोः
पुनःपुनर्योजनवशादनंते॰अनेकेगुणाप्तीप्रकृतकुट्टकाख्येगुणेगताधिमासदिनोनगतचांद्रदि
नमणत्वादहर्गणाभ्यस्तरीत्याषष्ट्यधिकशतत्रयभक्तेगतसौरवर्षाणिफलतस्यप्रयोजनाभावाद
वशेषचैत्रादिमारभ्येष्टतिथ्यंतपर्यंतगतातिथयोभवंति॰लब्धेगताधिमासरूपत्वाद्गताधिमासत्रि
शद्गुणरूपदिनैर्युक्तोगुणः॰गताधिमासदिनहीनगतचांद्रदिनरूपावगतश्चांद्रोगताहर्गणः॰एवकारा
त्सावनसौरयोर्निरासाः॰अस्माच्चांद्राहर्गणादहर्गणानपनेवमाहानयनोक्तरीत्या॰अवमदिनशेषं
भवेत्॰ततः॰अधिशेषावमशेषचैत्रादिगततिथिसंख्याज्ञानादित्यर्थः॰भास्कराचार्योक्तप्रकारस्य॰
सिद्धांतशिरोमणिमध्यमाधिकारांतर्गतस्य॰कोद्याहतैर्यद्भवभैरवाप्तंन्यूनाहशेषविहृतेकलाद्यं॰त
त्स्याद्गनाख्यंतरणोर्विधोस्तत्रिभूहतंस्वेषुगुणाशयुक्तं॰चैत्रादियातास्तिथयः॰एषकस्थाविश्वेहताः
सूर्यविधूलवाद्यो॰तोचाधिशेषाछशिमासलब्धाहीनोयुतोस्वस्वधनाद्रूपाभ्यामित्यस्य॰रीत्या॰एतस्य

ग्रंथस्य सौरपक्षत्वात्तदुक्तेन कार्यनिर्वाहासंभवात्तद्रीत्या स्वपक्षजांकान्यांक्रियाकार्यत्वात्तथा याद्रीसेस्फ
क्तं पुष्पवंतौ सूर्यचंद्रौ साध्यौ पूर्वोक्तं संसूर्यचंद्रानयनं तद्रीत्योपपन्नमिति भावः तदुपपत्तिस्तु मन्म
रीचौ मक्तासुधीभिरवलोक्या अधिशेषफलोपपत्तिरुपतत्सारं तु मेषाद्यर्कसंवाररूपसौरवर्षादेर
ज्ञानाच्चैत्रादिगततिथयः सौरांशाः स्थूलत्वेनाल्पाः एषां द्वादशगुणितगततिथयांशा योज्याश्चंद्रस्तत्रमा
सादिष्टयत्तिथिकरणगौरवाच्चैत्राद्यवगततिथयएव द्वादशगुणिता युक्ताः कृताऽभयथारात्र्याद्यधिशेषाद
तोऽल्पवाच्चैत्रादिगततिथयस्त्रयोदशगुणिताश्चंद्रांशाद्यः सूर्ययोगात्स्थूलः तदास्तवज्ञानार्थं सूर्याधिशेषस्य सौर
स्य सूर्यसंबंधेनाधिकत्वात्सौरमधिशेषं दिनाद्यात्मकमुभयत्र हीनं तत्तु अहर्गणानयनावगताधिशेषं युगसौ
रदिनहरत्वाच्चांद्रयुगचांद्रदिनैर्युगसौरदिनानि तदाधिशेषसंवेधिचांद्रणकिमिसनुतासौरं युगचांद्रदिनहर
मधिशेषं पर्यवसन्नं तत्रफलस्य दिनात्मकत्वार्थं त्रिंशाहुणः गुणाहरो गुणेनापवर्त्य हरस्थाने युगचांद्रमासाद्
ति नतु तथापि पूर्वोक्तावमशेषफलानयनं भास्करोक्तावमफलानयनाद्भिन्नमिति तदुपपत्तिरवश्यं वक्तव्येत्य

तत्राह शेषमिति अवमशेष फलानयनं प्रागुक्तं सुधीभिः स्वतोवगम्यं तद्रीत्या स्वपक्षांकैरुत्पाद्यनीयं एवकारा
त्तदन्यरीतिर्निरासः तथाहि विधिग्रहणाद्दुक्तदिनाद्सूर्यचंद्रौ तिष्यांतकालिकावपक्षितावहर्गणकालिकावतस्ति
ष्यांतरात्मर्द्धकयोरिष्टादिनावगतावमशेषस्य तरंतरकालत्वात्तवमशेषणचालनं कार्यं तत्रैकसावनदि
नेयुगसौरसावनदिनभक्तभगणभागरूपागतिस्तदावमशेषणकिमित्यनुपातेन सूर्यचंद्रयोर्भो
गादिफलं साध्यं तत्राप्यवमशेषस्य युगचांद्रदिनहरत्वाद्भागार्थं भगणानां षष्ट्यधिकशतत्रयस्य गुण
त्वाद्युगचांद्रदिवसाः १५२५३३३३३ षष्ट्यधिकशतत्रयभक्ताः युगचांद्रस्थाने वमशेषस्य हरः ५५५२७७२ गो
सर्यं भगणानां युगसौरसावनदिनानि १५ ७७१७२२ हरश्च अतो भगणकुदिनयोश्चतुर्भिरपवर्त्ताद्भ
गणाच्चतुर्थांशस्य कुदिनचतुर्थांशो हरः ३७५५ ७५५० अथ भगणचतुर्थांशावमशेषहरयोरपवर्त्तनात्स्वमशेष
हरो २२२६३२७ युगचांद्रदिनानां विंशत्यधिकसप्तशतीभागः हरयोतो हरउक्तउपपन्नः गुणस्त्ववमशेषस्य भगणाष
ष्ठांशउक्तरूपउपपन्नः ॥२७॥ ॥अथैकाधिशेषउक्तोकमितफलगुणाकुट्टकप्रकारेणकथमुपपन्नो विस्तरतः प्र

यमपघोक्तंतत्क्रिययोपपादयति॰ अथ स्थिरकुट्टकेनांकोत्पादनार्थं न्यस्ताभाज्यहारक्षेपाः
भाज्यः १५७३३३६ क्षे॰ अत्रो १ । अत्र परस्परं भाजितयोरिसादिनांत्यशेषं चतुर्विंशतिरयमेवापवर्त्तांकः २५
हारः १५५५२००००० अनेन भाज्यहारावपवर्त्तितौ जातौ दृष्टभाज्य ६६३२७ हारो ६५८००००० अधिमासशेषम
पवर्त्तितं दृष्टक्षेपः॰ अथ स्थिरकुट्टकलाघवाद्रूपमितोपवर्त्तितर्णक्षेपोन्यस्तः॰ यथाः भा ६६३२७ क्षे १ । भाज्य
हाराभ्यां मिथो भजेत्ताविसादिनालब्धपंक्तिः॰ । ९ । ६ । १५ । ३ । ५ । १ । २ एतेषामधः क्षेपस्तु हा ६५८००००० दंतेभू
न्यमितिजातावल्ली॰ । ७ । ६ । १५ । ३ । ५ । १ । २ । १ । ० अत्रोपांतिमेनस्वार्धेहतेनैनयुतेन दंसंसृजेदिति मुहुः क्रियया रा
शियुग्मं ६८७ । ६ । २५ । ० इदं क्रमेणाभाज्यहाराभ्यां तष्टमेवास्ति॰ अभीष्टसिद्ध्यर्थमपवर्त्तितशेषगुणितं भाज्य
हाराभ्यां तष्टमिष्टमुपपन्नमिति॰ नवस्थानालिकावल्ली॰ शेषं स्पष्टार्थं ॥ ॥ अथ द्वितीयप्रश्नोत्तरे उप
पत्तिं चतुर्भिः पद्यैर्विवृणोति॰ युगावमानि प्रगुणानि केन स्याद्दशेषेण च वर्जितानि॰ युगं दुवारे विहृता
निशेषाभावाद्गुणाप्तीह कुट्टकाद्य ॥ ३० ॥ तेयातचांद्राहगतावमेस्तः पूर्वोक्तरीत्यात्रगतं दृढौघः स्वतोनुपा

तावगताप्यहीनः सौराहमानं सरविर्लवाद्यः ॥ ३१ ॥ खरामतष्टेंदुदिनौघमानं शुक्रादियातास्तिथयः स्फ
रंताः॰ रथ्याहताभ्रांशुमुखार्कयुक्ताश्चंद्रः परं तिष्यवसानएतौ ॥ ३२ ॥ अतः पुरोक्तावमसंज्ञकेन फलेनयु
क्तौ रजनीदलेतौ॰ शेषोपपत्तिः सुगमामयात्रनोक्तास्वतः सागणकेनबोध्यति॰ युगचांद्रदिनैर्युगावमानि
तदेष्टचांद्रदिनैः कानीत्यनुपातेन युगावमानि केन गुणान्यवमशेषहीनानि युगचांद्रदिनैर्भक्तानि॰
शेषाभावात्॰ इह॰ विषये॰ कुट्टकप्रकाराद्यगुणाप्ती॰ पूर्वोक्तरीत्या॰ एकर्णक्षेपककल्पनादिरीत्या॰ तेन क्र
मेणागतचांद्रदिनगतावमेस्तः॰ अत्र॰ द्वितीयप्रश्नोत्तरे॰ गतचांद्रदिनगणः॰ आत्मनः सकाशाद्यगचां
द्रदिनैर्युगाधिमासदिनानि तदेष्टचांद्राहर्गणेन कानीत्यनुपाताद्गताधिदिनादिनाहीनः॰ सौरांशा
रूपाहर्गणमानं॰ सांशाद्यः सूर्यः॰ त्रिंशत्तष्टयच्चांद्रदिनगणमानं॰ शुक्रादितोगतास्तिथयोभीष्टतिथ्यंते
स्फः॰ एतास्तिथयोद्वादशगुणाः॰ अंशादिसूर्ययुताश्चंद्रः स्यात्॰ परं त्वतोसूर्यचंद्रौ तिथ्यंते॰ अतोहतोः
पूर्वप्रश्नोत्तरोक्तावमसंज्ञेनफलेन स्वीपनयुक्तौ रात्र्यहे सूर्यचंद्रौ भवतः ननु द्वितीयप्रश्नोत्तरोक्तं

सर्वमुपपन्नमपि चांद्राहर्गणानयनोक्ताअंकानोत्पादिताइत्यतआह·शेषोपपत्तिरिति·अत्र·द्वितीय
प्रश्नोत्तरे·अवशिष्टा·अंकोपपत्तिः सुगमा·कुट्टकगणितकरणमसुबोधा·मयास्मिन्ग्रंथेनोक्ता·
सोपपत्तिर्गणितदक्षेण·स्वतोवधेया·गणितंकृत्वाप्रतीतिरुत्पाद्यसपर्यः॥३३॥ ॥गणितश्र
मभीरूणांबोधार्थंदर्शयति·स्थिरकुट्टकार्थंभाज्य २५०८ २२५२ हरो १६००००८० चतुर्भिरपवर्तितौ
भाज्य ६२००५६३ हरो ४००७५००२० अत्रपूर्वोक्तरीत्यावल्ली०।६३।१।१०।१२।१।२।४।१।२०।१।०रा
शियुग्म ८०५३३१।५०२२०३६० मिति·अत्रत्रयोदशस्थानात्मिकावल्ली·फलस्यगतावमत्वेनप्र
योजनाभावाच्चांद्राहर्गणस्यावश्यकतयागुणउक्तांकमितोरहीतस्तस्यतक्षणांकोपिचतुर्भा
क्तयुगचांद्रदिनमितेउक्तइत्युपपन्नमित्यर्थः॥ ॥ननुकुट्टकप्रकारणेदंसर्वमुपपन्नंतस्यानु
पपत्तौतुसर्वमिदमनुपपन्नमेवेत्यतआहपितृब्रह्मदेवज्ञचरणाब्जनवांकुर·विलोक्यासुधिया
सर्वावासनाकुट्टकस्यत्विति·सर्वेतिकुट्टकांतर्गतसूक्ष्मविचारस्यान्यैरनुक्तत्वात्तत्काहिन्यपिस्थले ४२२

स्थलेविशदीकृतावासनेत्यर्थसूचकं·तदनुपपत्तिरप्रसिद्धेतिभावः·तत्सारंत्वनपवर्त्तितयोर्भाज्यभा
जकयोर्यालब्धिःसैवापवर्त्तितयोःस्यादितिप्रसिद्धं·प्रकृतेभाज्यस्तुकल्पितभाज्योगुणागुणितःक्षेप
युतोनःसन्स्यात्·भाजकस्तुदिष्टाव·एवंचगुणागुणितकल्पितभाज्यएकक्रमपरक्षेपोऽनयोर्भाज्यखं
डयोर्योगोभाज्यसिद्धेभाज्यभाजकयोरपवर्त्तेपिफलाविशेषाद्भाजकापवर्त्तनेनतदपवर्त्तांकेनखंडद्वय
योगरूपोभाज्योप्यवश्यमपवर्त्यः·तत्रयोगापवर्त्तनेपवर्त्तितखंडयोर्योगतुल्यत्वाद्गुणागुणितकल्पितभा
ज्यःक्षेपश्चापवर्त्यः·तत्रापियद्यपिगुणस्याज्ञानाद्गुणागुणितस्याज्ञानेनतदपवर्त्तनमशक्यंतथापिकल्पि
तभाज्येपवर्त्तितेनंतरंतदंगुणागुणितेगुणागुणितकल्पितभाज्यरूपभाज्यखंडमेवापवर्त्तितंस्यात्·गुणि
तस्यापवर्त्तनेपवर्त्तितस्यवागुणानेफलाविशेषात्·तस्माद्भाज्यक्षेपहारणांफलगुणयोरविशेषलघवाश्चा
पवर्त्तनं·दृष्टोदाहरणापपत्तिस्तु·भाज्यभाजकयोरपवर्त्तेयद्यपिलब्धेरविशेषस्तथापिशेषस्यभेदादपवर्त्ति
तभाज्यशेषमपवर्त्तांकेनगुणितंसदनपवर्त्तितभाज्यशेषस्यात्·अतोनपवर्त्तिभाज्यशेषमपवर्त्तांकाप

वर्त्तितमेवापवर्त्तितभाज्यशेषं परंतु गुणकमात्रेणापवर्त्तितभाज्यशेषं रवेकादिनिरेकापवर्त्तितहरांतसं
ख्यागुणितापवर्त्तांकान्यतमं अपवर्त्तितभाज्यशेषं च रवेकादिनिरेकापवर्त्तितहरांतसंख्यान्यतममि
ति विशेषः तत्रानपवर्त्तितक्षेपस्यानपवर्त्तितभाज्यसंबंधिसकलगुणीयशोप्राप्यतमरूपत्वात्रेका
दिगुणितहरयुततद्रूपत्वाद्वा रवेकादिगुणितहरतुल्यत्वाद्वापवर्त्तांकेनापवर्त्तः स्यादेव उक्तक्षेपाति
रिक्तक्षेपेषु कथमपि निःशेषभजनासंभवात् कुट्टकासिद्धस्तत्क्षेपादिष्टमुदाहरणादृष्टमेव सिद्धं अ
पवर्त्तांकज्ञानप्रकारोपपत्तिस्तु महानपवर्त्तांकज्ञातव्यः येनापवर्त्तितयोर्भाज्यभाजकयोः पुनरप
वर्त्तात् तत्र भाज्यभाजकयोस्तुल्यत्वे तन्मितएवमहानपवर्त्तांकः तयोर्वैलक्षण्ये तु योर्लघुस्तत्तोधि
कोपवर्त्तांकोनैव तेनांकेन लघोरपवर्त्तनस्य बाधितत्वात् लघुतुल्यस्तु स्यात् यदि लघुना महति भ
क्ते शेषं न स्यात् यदि च शेषं स्यात् तदा न लघुतुल्योपवर्त्तांकः किंत्वधिकस्य बाधितत्वाल्लघोरपि लघु
र्महानपवर्त्तांकः स्यात् अत्र हि महतो राशेः खंडद्वयं यावल्लघुना भक्तं तावद्वेकं शेषतुल्यमपरं रा ८२१

वंसति लघुतोन्यूनांकेषु मध्ये यः शेषतोधिकस्तस्य नास्त्येवापवर्त्तकत्वं तेन यथाकथंचिल्लघोरपवर्त्तेल
घुराशिभक्तस्याधिकराशिखंडस्याप्यपवर्त्तः स्यान्न तु शेषतुल्यद्वितीयखंडस्य तथा च लघुतोन्यूनांके
षु यदि महानपवर्त्तकः स्यात् तर्हि शेषतुल्यः स्यात् परं शेषेण लघुराशौ भक्ते यदि शेषं न स्यात् तथा सति शेष
तुल्यांकेन लघोरपवर्त्तनस्य जातत्वाल्लघुभक्तस्याधिकराशिखंडस्य शेषतुल्यद्वितीयखंडस्याप्यपवर्त्तः
स्यात् यदि तु शेषं स्यात् तर्हि पूर्वशेषतोन्यूनएवमहानपवर्त्तांकः स्यान्नाधिकः बाधितत्वात् अत्रापि
लघुराशौ हि खंडद्वयं यावत्पूर्वशेषेण भक्ते तावद्वेकं द्वितीयशेषतुल्यं द्वितीयं एवं सति पूर्वशेषान्न्यूनांकेषु
यो द्वितीयशेषाधिकः स्यान्न स्यात्स्यमपवर्त्तांकः तेन यथाकथंचित्पूर्वशेषस्यापवर्त्ते शेषभक्तलघुखंडस्या
पवर्त्तः स्यान्न द्वितीयशेषतुल्यद्वितीयखंडस्य तथा सति लघुराशेरनपवर्त्तनाल्लघुभक्तस्याधिकराशिखंडस्या
प्यनपवर्त्तकस्याप्यपवर्त्तो न स्यात् तस्मात्पूर्वशेषतोन्यूनांकेषु यदि महानपवर्त्तांकः स्यात् तर्हि द्वितीयशेषतुल्य
एव स्यात् परं द्वितीयशेषेण पूर्वशेषभक्ते यदि शेषं न स्यात् यतस्तथा सति पूर्वशेषापवर्त्तनस्य जातत्वान्नोक्तस्य ल

घुराशिखंडस्याप्यपवर्त्तः स्यात्· तथासतिलघुराशेरपवर्त्तनस्यजातत्वाल्लघुभक्तस्याधिकराशिखंडस्याप्य
पवर्त्तः स्यात्· यदिद्वितीयशेषेणपूर्वशेषभक्तेशेषंस्यात्तर्घनयैवयुक्तात्तृतीयशेषतुल्योमहानपवर्त्तांकः
स्यात्ः एवमनयोपपत्त्यापूर्वपूर्वशेषेउत्तरेणायेनशेषेणभक्तेशेषंनस्यात्तदेषंमहानपवर्त्तांकः स्यादिति·
कुट्टकानयनोपपत्तिस्तुक्षेपाभावेशून्यनभाज्येगुणितेहरभक्तेशेषंनस्यादितिशून्यमेवगुणोलब्धिश्च· यदि
वाहारतुल्येगुणेगुणहरयोस्तुल्यत्वान्नाशोभाज्यतुल्यालब्धिः स्याच्छेषंचनस्यात्· एवंद्व्यादिगुणितहरतुल्येगुणेह
रेणगुणाहरयोरपवर्त्तेगुणाद्यानेद्व्यादयः स्फुरितिद्व्यादिगुणितभाज्यतुल्यालब्धिः स्याच्छेषंचनस्यात्· तस्मात्क्षेपा
भावशून्यमिष्टाहतहरोवागुणः लब्धिस्तुशून्यमिष्टाहतभाज्योवेति· एवमत्रहरतुल्येगुणेपचयभाज्यतुल्यालब्धि
पचयः सर्वत्र· अतएवस्वतक्षेपवशादनंतेरुक्तंसंगच्छते· अथहरतुल्यद्व्यादिगुणितहरतुल्यवाक्षेप
पूर्वोक्तएवशून्यादिकोगुणः स्यात्· सतिहिपूर्वोक्तगुणकेक्षेपवशादेवशेषंस्यात्· क्षेपोपियद्व्यादिगुणितहर
तुल्यः स्यात्तर्हिशेषंकुतः स्यात्· लब्धातुहरभक्तेक्षेपयल्लभ्यतेतावदधिकंस्याद्धनक्षेपस्तुणक्षेपेतुतावन्मूनं

MEMORIAL

स्यात्· अतएवक्षेपाभावोपवायत्रक्षेपः शुद्धोहराहतः· ज्ञेयः शून्यंगुणस्तत्रक्षेपोहारहृतः फलमितिभास्करो
क्तंसंगच्छते· अथोक्तातिरिक्तक्षेपेहरेणयावद्भाज्यंतावदेकंशेषमपरं· अत्रपूर्वखंडस्यनिःशेषभजनायघनकेना
पिगुणकेनगुणितस्यापितस्यनिःशेषभजनंस्यादेव· अथोद्दिष्टक्षेपोपरखंडेनभक्तः सन्यदिशुद्धोनतर्घत्रयालब्धिः
सएवगुणकः परमक्षेपे· यतस्तेनगुणकेनगुणितस्यभाज्यापरखंडस्यक्षेपसमत्वनियमात्क्षेपवियोगे
नाशः स्यात्· यदिनशुद्धोनतर्हिगुणकस्तानमशक्यमतोन्यथायतितं· भाजकेनभाज्येभक्तेयदिरूपंशेषंस्यात्तर्हि
द्वितीयखंडस्यरूपत्वाद्घनकेनापिक्षेपेणतस्यगुणनेक्षेपसमत्वनियमादुक्तयुक्त्याक्षेपसमएवर्णक्षेपेगुणः घ
नक्षेपतुक्षेपोनहरोगुणः· यतस्तेनगुणितंभाज्यापरखंडंक्षेपोनहरसमंस्यादस्यचक्षेपयोगोहरसमत्वात्स्यादितिह
रेणनिःशेषभजनंस्यात्· लब्धिस्तुकेवलभाज्येहरभक्तेयास्यात्सैवगुणगुणितासतीगुणितभाज्यस्यस्यात्· परम
क्षेपे· घनक्षेपतुतादृशीसैका· परखंडस्यशुद्धभावाद्धरतुल्यशेषत्वाच्च· यदिभाज्येहरेणभक्तेरूपंशेषंनस्यात्तदा
भाज्यशेषेणहरंभजेत्· अत्रहरोभाज्यः· भाज्यशेषंभाजकः· अत्रापियदिरूपंशेषंस्यात्तर्हिक्षेपतुल्योगुणोलब्ध

क्षेपे धनक्षेपेतु क्षेपोनहरोगुणः पूर्ववल्लब्धिश्च अत्रापि यदि रूपं शेषं न स्यात्तर्हि अस्यापि शेषेण हरीभूतं शेषं भजेत् तत्र यदि रूपं शेषं स्यात्तर्हि तस्मिन् भाज्ये उक्तयुक्त्या क्षेपांकतुल्यः क्षेपोनहरतुल्यश्च गुणः स्यादृणधनक्षेपभजने तत्र यदि रूपं शेषं स्यात्तर्हि तस्मिन् भाज्ये उक्तयुक्त्या क्षेपांकतुल्यः क्षेपोनहरतुल्यश्च गुणः स्यादृणधनक्षेपयोः न स्मात्परस्परभजने सति कुत्रचिद्रूपं शेषमपेक्षितं तच्च सत्यपवर्तनसंभवे भाज्यभाजकयोरनपवर्तकं स्यात् किंतु तत्रापवर्तांकतुल्यं शेषं स्यात्परस्परभजने सत्यशेषस्यैवापवर्तांकत्वात् कृते त्वपवर्तशेषमप्यपवर्तांकेनापवर्तितं स्यात् अंसशेषं त्वपवर्तांकतुल्यं तच्चेदपवर्तांकेनापवर्तितं स्याद्रूपमेवांसशेषं स्यादिति भाज्यभाजकयोरपवर्तस्यावश्यकत्वं ननु यद्यप्यपांतिमशेषतुल्ये भाज्ये पूर्वशेषेण भक्ते रूपं शेषं स्यादिति ज्ञातस्तस्मिन्गुणस्तथाप्यदृष्टे भाज्ये कथं गुणांकसिद्धिरिति चेत् व्यस्तविधिनातमवगच्छ तथाहि अत्रांसभाज्ये यावद्धरभक्तं तावदेकं शेषरूपमपरमिति खंडद्वयात्मके उक्तयुक्त्या क्षेपजातः क्षेपसमो गुणः केवलभाज्यलब्धिर्गुणगुणिता सती लब्धिः स्यादिति मिथो जजेत्तोदृष्टभाज्यहारौ यावच्छेषं भवतीहरूपं फलान्यधोध

स्तदधो निवेश्य क्षेपइति वल्लीसिद्धं एवमत्रांसोजातो गुणांसेन हतः स्वोर्ध्वो लब्धिश्च अथास्मिन्नेव क्षेपे स्यात्पूर्वभाज्ये यावद्धरभक्तं तावदेकं शेषमपरमिति खंडद्वयात्मके गुणो विचार्यते तत्र पूर्वखंडं येन केनापि गुणितं हरभक्तं निःशेषं स्यादेवातो परखंडादेव गुणो विचारो युक्तो अत्रांसभाज्यो हरांसहरो भाज्यदृश्यांसभाज्यभाजकयोर्व्यासार्धगुणलब्धोरपि व्यस्तासमात्रं तत्र युक्तिः अंसभाज्ये गुणेन क्षेपात्मके न गुणिते क्षेपेणोनिते हरेण भक्ते सति लब्धिः स्यादतो व्यस्तविधिना लब्धाहरेण गुणिते क्षेपयुते भाज्यभक्ते लब्धो गुणस्तदेवं पर्यवस्यति अंसहररूपभाज्योंसभाज्यसंबंधिलब्धागुणितः क्षेपेणायुतो सभाज्यरूपहरेण भक्तः सन्मुद्धतो सभाज्यलब्धिरेवात्र गुणांकः लब्धिश्चांसभाज्यगुणादृतिधनक्षेपे परमत्र भाज्ये पूर्वखंडलब्धिर्गुणगुणिता सती स्यात् गुणश्चात्रोक्तवल्ल्यामुपांतिमांसफलक्षेपघातरूपः पूर्वखंडलब्धिश्चतदूर्ध्वमतउपांतिमेन स्वोर्ध्वे हते जाता पूर्वखंडलब्धिः द्वितीयखंडलब्धिश्च वल्ल्यामंत्यक्षेपात्मिकाग्रतस्तथायुता पूर्वखंडलब्धिरूपांसभाज्ये सकलालब्धिः स्यात् उपांसभाज्ये गुणालब्धोः सिद्धत्वादधः स्थक्षेपस्य प्रयोजनाभावादपगमः तदिदमुक्तमुपांतिमेन स्वोर्ध्वे हते सेन युते तदंसजे दि

ति॰ अंत्यात्तृतीयेभाज्येतस्मिन्नेव क्षेपे उक्तरीत्या भाज्यखंडे कृत्वा हरभक्तभाज्यखंडं पृथक्संस्थाप्या परखंडरू
पभाज्यहरावेत्यादि द्वितीयभाज्यहराभ्यां व्यस्ता विति द्वितीयगुणलब्धीलब्धिगुणावुक्तरीत्या सणक्षेपे॰ अत्रापि
पूर्वखंडलब्धिर्गुणगुणिता स्यात्तः गुणोप्यपांतिमस्तदूर्ध्वं चवेत्यां पूर्वखंडलब्धिः पूर्वखंडसंपूर्णालब्धिर्द्वितीय
खंडलब्ध्यात्मकेनांत्येन युता जाता संपूर्णालब्धिः॰ अत्रोपपत्तिः स्पष्टलब्धेः प्रयोजनाभावादपगमः॰ अतोप्य
क्तरीत्या सात्र्यनुर्पभाज्ये धनक्षेपलब्धिगुणा विसक्तरान्तरं सिद्धराशियुगं गुणलब्धी उद्दिष्टभाज्ये॰ तदिदमुक्तं मु
रुः स्यादिति राशियुग्ममिति॰ अत्र विनांत्यभाज्यं सर्वेषु भाज्येषु पूर्वखंडलब्धिसाधने गुणस्योपांतिमत्वादुपां
तिमेन स्वोर्ध्वेहतेइति सकललब्धिसानोर्ध्वेर्थमुत्तरखंडलब्ध्यात्मकेनांत्येन युतेइति वक्तव्यं॰ अंत्यभाज्येनुगुण
स्यांतिमत्वादुत्तरखंडलब्धेरभावाच्चांत्येन हतेस्वोर्ध्वेइत्येव वक्तव्यं स्यादतोनुगमसिद्ध्यर्थं तदंते पि शून्यनिवे
शानमुक्तं॰ अत्र हरतुल्ये गुणोपचये भाज्यतुल्ये लब्धेरुपचयः स्यादिति प्रागुक्ताद्धरतुल्ये गुणोपचये भाज्य
तुल्ये लब्धेरपचयः स्यात्॰ अतो हराधिके गुणे यथासंभवमेकादिगुणोपनेयस्तेस्मात्सलघुतरो गुणः स्या

त॰ एवमेव तल्लब्धिश्चेत्फलमूर्ध्वो विभाज्येनेत्यादि हरेणोत्तं॰ उक्तयुक्तेवगुणलब्धोः समं भाज्यमित्याद्युक्तं॰
नहि गुणस्यैकगुणहरतुल्यापचये द्विगुणभाज्यतुल्ये लब्धेरपचयः संभवति॰ अंत्यभाज्यादुद्दिष्टभाज्यस्य स
मत्वे योगजो गुणो विषमत्वे वियोगजो गुणइति पूर्वोक्तव्यस्तरीत्या सिद्धस्तत्समविषमत्वे समविषमलब्धि
पंक्तयनुरूपे॰ अतो धनक्षेपे समलब्धिपंक्तौ गुणलब्धी स्वतः सिद्धे॰ विषमलब्धिपंक्तौ गुणलब्धी ऋणक्षेपे सिद्धे अ
तो धनक्षेपीयत्वे सिद्ध्यर्थं स्वतसणाक्षेप्येइत्युक्तं॰ क्षेपतुल्ये वियोगगुणस्य हराद्युद्धस्य क्षेपो न हरमित
गुणत्वेन योगे सिद्धत्वात्तल्लब्धेश्च भाज्याक्षेपितायाएवार्थसिद्धं तल्लब्धि त्वं॰ गुणे लब्धे हरभाज्यक्रमसंबंध
स्योक्तोपपत्तौ सिद्धेरिति लं पल्लवितेन॥२५॥ ॥अथ प्रश्नमाह॰ राशिभागकलिकाविकलाभिर्ज्ञातमान
खचराद्गणकोयः॰ आनयेद्दिनगणादिकमेनं कुट्टकज्ञविषयेर्कमवेहि नि॰ ज्ञातं मानं यस्यैतादृशान्मध्यम
ग्रहादज्ञातगतभगणविकलाघवशोधान्॰ योगणकोर्गणमादिशाद्भाद्भार्गणादिगतवर्षपर्यंतस्य संग्र
हः॰ एनं गणकं कुट्टकज्ञविषये॰ कुट्टकाभियुक्तप्रकारानेसूर्यं त्वं जानीहि॰ एतदुत्तरमपि कुट्टकप्रकारणेतिसू

चितं॥२५॥ ॥अस्योत्तरं विवक्षुः प्रथमं चतुर्भिः पद्यैर्भगणशेषविकलाशेषयोरानयनप्रकारमाह॥ युग
मंडलसूर्यभूदिनेऽपवर्त्ते हृतप्यायथादृष्टे॥ ग्रहभादिविलिप्तिकाहृताद्दृष्टपृथ्वीदिनसंमितिर्दृता॥२६॥ ॥
खखषष्टिनवद्विभूमिभिः फलमेतद्रहितागतं चयत्॥ खखषष्टिनवार्कहृद्दावनिवाराप्तमनग्रमेकयु
क्॥२७॥ अनयोर्भगणाद्यशेषमेकं हरभुक्तप्रथमाद्यशेषकं॥ परलब्धहृतेन भाजकेन युतमूनं दृष्टभूमिवा
सरात्॥२८॥ यदि तद्विकलाद्यशेषमेतद्भगणाद्विशेषमदुष्टमत्र हि॥ अथ चेद्विपरीतमस्ति तर्हि भगणात्स्य
ह एव नैति सन्तिभिति॥ ग्रहयुगभगणसूर्यसावनदिनेद्धि॥ नियतं॥ तथा अपवर्त्तो यथादृष्टे पुनरपवर्त्ति
तेन सदृस्पर्थः॥ ततो दृष्टसूर्यसावनदिनसंख्या॥ ज्ञातग्रहस्य राश्यादिकस्य विकलातस्य विकलाभिर्गुणिता॥
द्वादशराशिविकलाभिर्भक्ता॥ एतच्चफलं भवति तदवयवमतिरिक्तं ग्राह्यं॥ भागैकमेव फलं ग्राह्यं॥ शेषात्त
दवयवो न ग्राह्य इत्यर्थः॥ ततश्चक्रविकलाभिर्भक्तायदृष्टार्ककुदिवसास्तेभ्यो यदाप्तमिदमप्यनग्रं॥ अवय
वरहितं॥ एकयुक्तं कार्यं॥ अनयोः पूर्वनिरग्रफलद्वितीयसैकनिरग्रफलयोर्योगो भगणशेषस्य तत्॥ प्रथ

४२७

मभाज्यस्थाने एकदाफलेगृहीते यदवशेषं तत्॥ द्वितीयभाज्यादवगतनिरग्रफलेन॥ न तु सैकेन॥ गुणि
तेन हरेण चक्रविकलात्मकेन युतं तत्सिद्धं विकलावशेषं यदि दृष्टकुदिनमानादल्पं॥ तदा॥ एतत्॥ विकला
वशेषं॥ भगणशेषं प्रागुक्तं च॥ अत्र॥ प्रश्नो दिष्टे॥ हि॥ नियतं॥ अदुष्टं॥ खिलं नेत्यर्थः॥ अथ यदि विपरीतं॥ विक
लावशेषं दृष्टकुदिनमानादनल्पं भवति॥ तर्हि॥ स दृष्टो राश्यादिको ग्रहः॥ एवकाराद्दृष्टातिरिक्तराश्या
दिभागविशेषनिरासः॥ अहर्गणात्॥ सन्॥ सूक्ष्मत्वेन॥ नागच्छति॥ न सिद्धो भवतीत्यर्थः॥ दृष्टं खिलमिति भा
वः॥ अत्रोपपत्तिः॥ यथापठितभगणकुदिनाभ्यामहर्गणाद्ग्रहस्य यैवापवर्त्तितभगणकुदिनाभ्यामहर्गणा
द्ग्रह इति लाघवादग्रेकुट्टकार्थमपवर्त्तनावश्यकत्वाच्च प्रथमत एवापवर्त्तितशेषसिद्ध्यर्थं भगणकुदिनयोर्द
ष्टापवर्त्तनमुक्तमन्यथा कुट्टकप्रकाराप्रवृत्तेः॥ अथ भगणशेषं द्वादशराशिगुणं दृष्टकुदिनभक्तं फलं राश्यादिः॥ शेषं
त्रिंशद्गुणं हरभक्तं फलं भागाः॥ शेषं षष्टिगुणं हरभक्तं फलं कलाः॥ शेषं षष्टिगुणं हरभक्तं फलं विकला॥ शेषमित्य
त्र राश्यादिविकलासमूहात्मकैकफलार्थं भगणशेषद्वादशराशिविकलाभिः खाभ्रषष्ट्यंकार्के १२०६०००

र्गुणितं दृष्टकुदिनभक्तं फलं विकलात्मकोग्रहो भवति. शेषं विकलाशेषं. अत्र विलोमेन हरगुणितफलशेष
युतेभाज्यः स्यादिति विकलादृष्टकुदिनगुणा विकलाशेषयुता द्वादशराशिविकलाभगणाशेषघातरू
पोभाज्योभवति. सचक्रविकलाभक्तः फलं भगणाशेषं स्यादेव. अतो विकलाशेषज्ञाने राश्यादिग्रहादु
क्तरीत्या भगणाशेषज्ञानं. तत्र विकलाशेषज्ञानाभावाद्विकलासमूहो दृष्टकुदिनगुणश्चक्रविकलाभक्तः
फलं भगणाशेषं किंचिन्न्यूनं भवति. तत्र तच्छेषविकलाशेषयोर्योगे चक्रविकलाभक्ते फलं. विकलाशेषयो
जनेन चक्रविकलाभिर्निःशेषभजनात्. तत्र विकलाशेषस्यानियमेपि चक्रविकलानधिके विकलाशेष
ज्ञाते सति शेषस्य विकलाशेषयोगेन चक्रविकलानवेतीति चक्रविकलाभागे फलं रूपमतः प्राक्सिद्धं भ
गणाशेषं रूपोनमिति रूपयुतं संपूर्णं भगणाशेषं स्यात्. तत्रावशिष्टोनहरणे विकलाशेकपमन्यथा शे
षविकलाशेषयोर्योगे चक्रविकलाभक्ते रूपं फलं संभवेत्. अतएव शेषसागे लब्धं रूपयुतं भगणाशेषं स्या
त्. शेषोनहरो विकलाशेषमिति भास्करोक्तं. अनयैव रीत्या द्विगुणे चक्रविकलांतर्गते विकलाशेषप्राप्तिः

द्वं भगणाशेषं सांतरं द्वियुतं भगणाशेषं स्यात्. पूर्वं विकलाशेषं चक्रविकलायुक्तं विकलाशेषं स्यात्.
एवं पूर्वं सिद्धसांतरभगणाशेषमिकयुतं भगणाशेषं तत्संबंधिविकलाशेषं तु शेषोनमिष्टसंख्यागुणि
तचक्रविकलामानं. तत्र परममिष्टं तु चक्रविकलाभक्तदृष्टकुदिनान्निरग्रलब्धैकं. यथा भास्करेणारूप
मितेष्टवशादुक्तं तथा मूलकृता परमेष्टवशादिदमुक्तं. निरेकपरमेष्टगुणितचक्रविकलानल्पविकलाशे
षमेव तत्संबद्धं नान्यत्. तत्तु दृष्टकुदिनाल्पमेव युक्तं नाधिकं. दृष्टकुदिनभक्ते शेषस्य तदल्पत्वावश्यंभावा
त्. प्रकृतप्रकारेतु चक्रविकलानां हरत्वाच्छेषस्यात्यल्पत्वेन तदूनचक्रविकलानां चक्रविकलाल्पत्वेन परलब्ध
गुणितचक्रविकलायुतानां विकलाशेषत्वेन कदाचिद्दृष्टकुदिनाधिकत्वस्य संभवः. तदा तत्त्विलं. इदं तु
स्वेष्टयाग्रहो देशोक्ते संभवति. गणितेन ग्रहे उद्दिष्टे तु तस्य दृष्टकुदिनाल्पविकलाशेषसंबद्धत्वादुक्तरी
त्या तदसंभवात्. एतेन भास्करोक्तरीत्या यद्भगणाशेषं यच्च विकलाशेषं क्रमेणैकाद्यपचितमेकादिगुणि
तचक्रविकलोपचितं भगणाशेषविकलाशेषपरस्परान्वितं भवतीति प्रदर्शनार्थमेतदुक्तं न कल्पनांतर

विशेषार्थमितिध्येयं॥३७॥ ॥भगणशेषाद्दहर्गणाज्ञानंकुट्टकरीत्याभास्करोक्तमनुवदति॥ दृढभगणा
येनगुणाश्चक्राग्रोनाद्दृढकुदिनैर्भक्ताः॥ शुद्धाः स्फः सफगणोदृढकुदिनक्षेपयोजनाद्दृढधेति॥ अहर्गणोदृढ
भगणगुणोदृढकुदिनभक्तः फलंगतभगणाः शेषभगणशेषमतोदृढभगणायेनगुणाभगणशेषोना
दृढकुदिनैर्भक्ताः शुद्धाः निःशेषाः स्फः सगुणोहर्गणः फलंगतभगणाइतिकुट्टकेपर्यवसानाद्गतभग
णानांप्रयोजनाभावाच्चाहर्गणोदृढकुदिनरूपक्षेपयोजनपोनः पुनस्तेनानेकधाहर्गणः॥ गुणस्यदृढकुदि
नतक्षणावत्वात्॥ इदंचलब्धौतक्षणफलन्यूनगुणतक्षणफलमधिकंतत्रफलानुक्तौसमफलज्ञानाना
भावाद्गुणतक्षणफलोधिकेगृहीतेगुणासिद्धेशेषहतेसादिनाक्षेपयोजनंसम्यगुक्तमितिध्येयं॥५०॥
॥ ॥अथभगणशेषादस्मात्प्रतिभगणशेषकुट्टककरणेतिगौरवात्प्रयासाधिक्याच्चलाघवात्स्थिरकुट्ट
केनसूर्यभगणशेषाद्दहर्गणानयनंदर्शयन्नेतद्रीत्याग्रहभगणशेषाद्दप्यहर्गणानयनंकार्यमित्याह स
प्ताद्यष्टदिगंगपंचनृपतिघ्नंसूर्यचक्राग्रकंसप्ताक्षाब्धिनवाद्रिवेदयुगगोरामैः सुतष्टंभवेत्॥ शेषंस्याद्ध

DR BHAU DAJI MEMORIAL

गणः स्वतक्षणायुतस्तावन्मुहुर्वासरोभीष्टतयाबहथान्यत्रेचरवत्राद्रीत्यादिनोघः स्वतइति॥ फगणइसंतंस्पष्टं॥
वारासंवादेप्राहस्वेति॥ स्वतक्षणायुतस्तावन्मुहुरसकृत्॥ यावद्भीष्टोवारः स्यात्॥ अनंतरमग्रहवत्ता
दुक्तयारीत्याहर्गणः॥ स्वतः स्वकल्पनयाकार्यः॥५१॥ ॥अंकोत्पादनार्थंस्थिरकुट्टकंप्रदर्शयति॥ यथात्र
स्थिरकुट्टकार्थंन्यासः | भाज्यः १०८०००० क्षेपः | अत्रोक्तरीत्यावल्ली॥ ३६५।३।१।६।२।१।१।२।१।१।१।१।१।१।१।१।
१।१।१।१।१।२।१।० | हारः ३७५५७७५५० | अत्रराशियुग्म ५५३५७७।१६५६१०८७७ मिति॥ अत्रसूर्यभगणा
५३२०००० कुदिने १५७७७१७८२८ चतुर्भिरपवर्तितेभाज्य १०८०००० हारो ३७५५ ७७५५० वल्लीपंचविंशतिस्था
नालिका॥ राशियुग्ममित्यत्रलब्धैः प्रयोजनाभावाद्गुणस्याहर्गणात्वादधः स्थोंकोभगणशेषस्यगुणोनिव
ष्टः हारस्तक्षणात्वेननिरुक्तः॥ अत्रभगणशेषंग्रहात्कल्पितप्रकारेणानीयतेतत्रपवर्तितमेवसिद्धसतो
पवर्तितमित्यनुक्तं॥ यदिचोक्तभगणकुदिनाभ्यामहर्गणाद्गुणशेषमानीयोक्तिंतच्चतुर्भिरवश्यमपव
र्त्य॥ यदिचेष्टयानपवर्तितंकल्पितंतच्चेच्चतुर्भिर्नापवर्त्यतेतर्हि खिलमित्यादिसुधीभिरूह्यं॥ ॥प्रश्नश्लोक

आदिकमित्यफलं तदुत्तरं पद्यत्रयेणाह· अभिमतधगणादवमैर्हता तिथिदिनाप्तनिरग्रगतावमैः· दिन
गणः सहितस्तिथिसंचयः पृथगतोधिकमासमाहतात्॥५२॥ चांद्राहभक्ताप्तगताधिमासैर्निरग्रकैः
खाग्निहतैर्विहीनः ऊर्ध्वस्ततः खाग्निहृतावशेषशुक्लादियातास्तिथयः फलं तु॥५३॥ सूर्यैर्विभक्तं फलम
र्कयातवर्षाच्चयः शेषमिहैतमासाः· चैत्रादितः स्फः सुगमोपपत्तिर्ज्ञेया विलोमा सुधियात्र बुद्ध्या· इह·
अहर्गणकाले· शेषचैत्रादिमारभ्य गतमासाः स्फः अहर्गणाद्वर्षमासतिथिज्ञानात्मकमाधत्तरमिति
भावः· नन्वत्रोपपत्तिरुक्तातथात्र कथं नोक्तेत्यत आह सुगम्येति· अत्र· गताहाधानयने· विलोमा· अहर्गणा
साधनोपपत्तिविपरीता· उपपत्तिः· सुधियास्वबुद्ध्या ज्ञेयाः· अहर्गणसाधनोपपत्तेर्विपरीतोपपत्तिः सु
गमेत्यर्थः प्रायेति भावः· तथाहि· अहर्गणादनुपातेनानीतावमैर्निरग्रैर्युतोहर्गणश्चांद्राहर्गणस्तिथि
गणस्तिथ्यंते· अन्यथासावयवोर्द्धरात्रे स्यात्· एवमस्मादनुपातेन निरग्राधिमासदिनैरूनस्तिथिगणा
श्चैत्राद्यभीष्टतिथियुतसौरवर्षमितिः स्यादन्यथा स्थितोभीष्टकाले सौरांशमानं स्यात्· अतस्तिथिज्ञाना ४२

यविपरीतक्रमरक्षणाय च निरग्राधिमासदिनैर्हीनः· त्रिंशतएः शुक्लादिगततिथयः फलं द्वादशगुणितसौ
रगतवर्षचैत्रादिगतमासयुतिरूपमतो द्वादशभक्तं फलं गतसौरवर्षाणि· शेषं चैत्रादिगतमासा इत्य
क्तमुपपन्नमिति॥५४॥ ॥अथ स्पष्टाधिकारविषयं स्वकल्पितं प्रश्नमाह वक्रारंभं तत्समाप्तिं च सूक्ष्मां
योजानाति ज्ञः स्वयुक्तातमेनं· मन्ये संतं सूक्ष्मकालज्ञतायाः प्राचार्येभ्यः श्रेष्ठमन्यं मुनीशमिति· स्पष्टशीघ्र
गतिसाधनोक्तकलानां शीघ्राच्च गतिकलानुल्यत्वे वक्रारंभो मार्गारंभो वा· तस्य कालं सूक्ष्मत्वेन योगणित
ज्ञः स्वकल्पितयुक्त्या जानाति· पूर्वाचार्यैस्तु स्थूलतया तद्ज्ञानायोक्तिः कृता सा तु प्रयोजकैव इति भावः· तमेनं
प्रसिद्धं· प्राचार्येभ्यो गणितग्रंथकर्तृभ्यः मुनीश्वरं श्रेष्ठं· नन्वृषीणामाचार्येभ्योऽलौकिकतपःसामर्थ्या
तिशयाद्वैष्ठ्यमस्त्येवेति कोतिशयस्तदुक्ताविस्तत आह· अन्यमिति· ते प्रसिद्धास्तदुत्कृष्टाः संत्येवाहं तु प्रा
कृतमप्येतत्कालिकं पुरुषं तेभ्यस्तुष्टं मुनीश्वरतुल्यं मन्ये· तेभ्योऽत्कृष्टास्तु मनुष्येषु मुनीश्वरा एव नान्य इति
मुनीश्वरमित्यफलं· ननूत्कर्षसाधनमस्य किमस्तीत्यत आह· अतं तमिति· ऋषीणामपि सूक्ष्मकालज्ञत्वाद

स्याप्येतत्कालस्य सूक्ष्मस्यातीन्द्रियस्य ज्ञानादेतत्प्रकारकल्पकत्वेनतद्ज्ञानवत्त्वादितिभावः॥५५॥ ॥उत्तर
यति॰ अस्योत्तरं पूर्वदलेनिरुक्तं स्फुटाधिकारे सुधियात्रबोध्यं॰ नलिख्यतेतत्सुनरुक्तदोषाद्हीनाधिकाश्चाप
कलाइतीरेति॰ अस्य॰ प्रश्नस्योत्तरं॰ तत्कालानयनमित्यर्थः॰ पूर्वगतेषखंडेस्पष्टाधिकारेप्रोक्तंयत्तदत्र॰ प्रश्नो
त्तराध्याये॰ सुधियाज्ञेयं॰ ननुत्तरेवात्रवक्तव्यमितितत्राह॰ नेति॰ इह॰ प्रश्नोत्तराध्याये॰ तत्॰ उत्तरं॰ हीनाधिकाश्चा
पकलाइत्याद्युक्तं॰ ग्रंथे॰ पुनरुक्तरूपदोषभयात्॰ न॰ लिख्यते॰ नमयोच्यतेइत्यर्थः॥५६॥ ॥स्पष्टाधिकारविषयं
प्रश्नांतरमाह॰ स्फुटग्रहान्मध्यखगांसुसूक्ष्मंसमानयेद्योगणितक्रियाभिः॰ विलोमकर्मातिदृढंतमेनंशिरोमणि
ज्ञेषुवरंनमामीति॰ स्पष्टग्रहान्मध्यग्रहमतिसूक्ष्मं॰ योगणकः॰ गणितक्रियाभिरानयेत्॰ तमेनं॰ विलोमकर्मण्य
तिसमर्थे॰ विनाव्यस्तविधिंतद्ज्ञानासंभवात्॰ शिरोमणिज्ञेषु॰ सिद्धांतशिरोमणावभियुक्तेषुवरं॰ श्रेष्ठं॰ स्पष्टग्र
हान्मध्यग्रहानयनंस्फुटग्रहंमध्यखगंप्रकल्प्यसादिनासिद्धांतशिरोमणावुक्तं॰ विनैतद्ज्ञानंतत्करणमशक्यम
तस्तदर्थेविप्रतिपत्तित्वात्तन्निर्णायकत्वेनसाधारणाभिज्ञोत्कृष्टमितिभावः॰ अतएवैतादृशस्यहसंसारेदुर्लभ ४३९

त्वादेववदृढंतंनमस्करोमि॥५७॥ ॥अस्योत्तरवद्यनोपक्रमेसूर्यचंद्रौप्रथमंमध्यावेकदेशीयमतेनसा
धयति॰ येषांमतेमंदफलेनसूर्यचंद्रौमुहुः स्पष्टतरौनुतेषां॰ तौस्वोक्तमंदोत्थफलेनवामंसकृतौमध्यमपुष्पवं
ताविति॰ पूर्वाचार्यैर्भौमादिनामसकृत्फलसंस्काराभ्यांस्पष्टत्वमुक्तंतद्वीसासूर्यचंद्रयोरप्यसकृन्मंदफलसं
स्कारात्स्पष्टत्वंयुक्तंनसकृन्मंदफलसंस्कारेणात्रेषांभौमादीनामपिसकृन्मंदफलसंस्कारापत्तेः॰ शीघ्रफल
संबंधेनमंदफलस्यासकृत्साधनोपपादनाभावात्॰ मांदंकर्मैकमर्केंद्वोरितिसूर्यसिद्धांतसकृन्मंदफलंस्कारेण
स्पष्टत्वंभौमादिफलचतुष्टयसंस्कारोक्तिस्पष्टत्ववदसकृन्निरासार्थंस्वल्पांतरेणोक्तमितितत्वनिश्चयेनयेषा
मभिमतानांमते॰ मंदफलेनमुहुरसकृत्संस्कृतौस्पष्टतरौसूर्यचंद्रावभिमतौतेषांमते॰ तौस्पष्टौसूर्यचंद्रौस्वो
क्तमंदोत्थफलेन॰ स्वीयमुक्तंमंदोच्चंतस्माद्उत्पन्नंस्पष्टोनमंदोच्चरूपकेंद्रद्वारासाधितंमंदफलंतेन॰ सकृदेकवा
रं॰ अस्तं॰ मेषादिकेंद्रेधनंतुलादिकेंद्रेऋणमितिस्पष्टौसूर्यचंद्रौसंस्कृतौमध्यमौसूर्यचंद्रौस्तः॰ युक्तंचैतत्॰ अति
मपरिवर्त्तजातमंदफलसंस्कारात्स्पष्टत्वस्योपपन्नत्वात्स्पष्टसाधितफलस्यैवातिमफलत्वेनतद्यस्तसंस्का

रेणयथास्थितमध्यमस्यसिद्धेरितिभावः॥५८॥ ॥अथमंदफलंमध्यमादुपपन्नंशीघ्रफलंमंदस्य
स्पष्टादुपपन्नंतदसकृत्साधनंभंग्यामसिद्धमितिसूर्यचंद्रयोः सकृन्मंदफलसंस्कारेणास्पष्टत्वं·पूर्वाचा
र्यैस्त्वसकृत्साधनंदकर्णानुपातानुक्त्यामंदफलस्यसांतरत्वेनतत्संस्कृतग्रहाच्छीघ्रफलस्याप्यतत्वात्फ
लरूपस्योक्तं·अत्रतुमंदकर्णानुपातस्योक्तेर्नासकृत्साधनंयुक्तमतएवनवीनमतेतद्दूषितमितितत्वं
यन्मतेतन्मतेतन्मतेनसूर्यचंद्रौमध्यमौसाधयन्स्वमतेपिसमूलत्वेनतदेवदृढयन्पठ्यमाहयेषां
मतेसूर्यविधूस्फुटौस्तः सकृन्मंदफलेनतेषां·तौस्वोक्तमंदोत्थफलेनवामंसुसंस्कृतौमंदफ
लंचताभ्यां॥५७॥तेनस्फुटावेवसुसंस्कृतौतौवामंमुहुस्तावितिमध्यमौस्तः·इदंमतंयुक्तियुतंमतंमे
सौरादिसिद्धांतनिरुक्तितश्चेति·येषामभियुक्तानांमतेसूर्यचंद्रौ·मंदफलेनैव·सकृदेकवारंसंस्कृतौ
स्पष्टौस्तः·अतएववासूर्यसिद्धांतादावुक्तंमांदकर्मकमकेंद्रौरिति·तेषांमते·तौसूर्यचंद्रौस्पष्टौ·स्वाभ्या
मुक्तंयन्मंदोच्चाधसन्नंमंदफलंसाधितंतेनसर्थः·वामंसम्यक्प्रकारेणसंस्कृतौताभ्यां·व्यस्तमंदफल

संस्कृतस्पष्टपुष्पवंताभ्यां·उक्तरीत्यामंदफलंतेनमंदफलेनस्फुटौ·तौसूर्यचंद्रौ·एवकाराद्व्यस्तमंदफल
संस्कृतस्पष्टसूर्यचंद्रयोर्निरासः·व्यस्तसंस्कृतौ·इति·अनयोक्तरीत्या·तौसूर्यचंद्रौव्यस्तमंदफलसंस्कृ
तस्पष्टौ·मध्यमौसूर्यचंद्रौस्तः·युक्तंचैतत्·मध्यमसाधितमंदफलसंस्कृतस्यस्पष्टत्वात्स्पष्टमध्यमसा
धितमंदफलंव्यस्तसंस्कृतंमध्यमोभवति·तत्रमध्यमस्याज्ञानात्स्पष्टसाधितमंदफलस्यतत्समत्वाभा
वाद्व्यस्तमंदफलसंस्कृतःस्पष्टोमध्यासन्नइत्यस्मात्फलंकिंचित्तदासन्नमित्येतद्व्यस्तसंस्कृतःस्पष्टोमध्यम
स्तदपेक्षयासूक्ष्मइत्यसकृत्साधनेमध्यमादेवमंदफलंसाधितंभवति·उभयोर्मतयोर्विरोधेस्वमतमा
ह·इदमिति·स्पष्टान्मध्यमस्यासकृत्साधनमुक्तमेतन्मतं·ममाभिमतं·कुतइत्यतआहयुक्तियुतमिति·
पूर्वमतापेक्षयेतत्सयुक्तिकत्वमित्यर्थः·पूर्वमतंचासकृत्सूर्यचंद्रस्पष्टत्वसाधनस्यनिर्युक्तिकत्वाद
युक्तं·नन्वत्रयुक्तेरभावेपिसूर्यसिद्धांतोक्तभौमादिचतुः फलक्रमदानोक्तेरन्यसिद्धांतोक्तयाऽसकृदुप
लक्षणत्वेनतदनुरोधात्सूर्यचंद्रयोः स्पष्टत्वमसकृदित्यत्रागमएव·तेनपूर्वमतमाषाविरुद्धमिदमा

र्षविरुद्धमित्यतआह सौरादिसिद्धांतनिरुक्तितश्चेति·सूर्यसोमादिप्रणीतसिद्धांतेएतस्योक्तेरित्यर्थः च
इतियुक्तियुक्तमित्यनेनमसृच्चयार्थः·तथाचसूर्यसिद्धांते·तन्मांदमसकृद्धामंफलंमध्यादिवाकरइ
ति·एतत्प्रत्यक्षवचनंपूर्वोक्तस्यानुमितार्थमूलस्यबाधकमितिभावः॥५०॥ ॥अथभौमादिस्पष्टेभ्यो
भौमादिमध्यमानयनप्रकारमाह·भौमादिभ्यःस्फुटेभ्योगदितविधिवद्राशयस्फलंमंदसंज्ञंतत्साध्यंत्वेक
दाप्यस्फुटकुजमुखतः शीघ्रमतेनवोमं·स्पष्टात्संस्कृतेभ्यश्चलफलमसकृद्यावदायात्यभिन्नंताभ्यांव
स्तंस्फुटास्तेक्षितितनयमुखाःसंस्कृतामध्यमाःस्फुरिति·स्पष्टेभ्योभौमादिभ्यउक्तविधेर्यन्मंदसंज्ञंफलं
तन्मंदफलंतु·एकवारंसाध्यं·त्वर्थेस्फुटयति·अथेति·अनंतरं·स्पष्टभौमादिभ्यउक्तरीत्याशीघ्रफलं·ए
तेन·शीघ्रफलेन·स्वेन·भौमादिस्पष्टान्यस्तंसंस्कृत·तेभ्यः·संस्कृतेभ्यः शीघ्रफलं·असकृत्·शीघ्रफलं
अस्तंस्पष्टेसंस्कार्यंतस्याशीघ्रफलेनअस्तसंस्कृतस्पष्टाशीघ्रफलमित्यसकृत्तावत्कार्यं·यावच्छीघ्रफलं
तुल्यंसमायाति·ताभ्यां·सकृत्साधितमंदफलासकृत्साधितांतिमपरिवर्त्तजातशीघ्रफलाभ्यां·ते·स्प

ष्टक्रियाभिरसकृत्सिद्धाः भौमादयःस्पष्टाः विपरीतंसंस्कृताः मध्यमाःस्फुरिति·अत्रोपपत्तिः·असकृत्फलसाध्यनेतिमपरिवर्त्तेस्पष्टग्रहान्मंदफलं·तत्संस्कृतमध्यमग्रहान्मंदस्पष्टात्मकाशीघ्रफलं·तत्संस्कृतोमंदस्पष्टः स्पष्टः·अतस्तादृशफलाभ्यांअस्तंस्पष्टः संस्कृतोमध्यमः तत्रस्पष्टग्रहान्मंदफलमेकदासिद्धंतादृशमेवभवति·अथमंदस्पष्टाशीघ्रफलंसाध्यं·तस्याज्ञानात्स्पष्टादेवशीघ्रफलंस्थूलंकृतं·तद्यस्तंस्पष्टग्रहेसंस्कृतंमंदस्पष्टःस्थूलोस्याशीघ्रफलंपूर्वस्मात्किंचित्सूक्ष्मंतद्यस्तसंस्कृतःस्पष्टःसूक्ष्मासन्नोमंदस्पष्टोस्यादपिशीघ्रफलंस्पष्टेअस्तंपूर्वेमंदस्पष्टापेक्षयासूक्ष्मदत्यसकृत्सूक्ष्ममंदस्पष्टाशीघ्रफलंतादृशंभवति·तादृशाभ्यांफलाभ्यांअस्तंस्पष्टः संस्कृतोमध्यः स्यादिति·एतदभिप्रायिकंपद्यंसिद्धांतशिरोमणिस्थंस्फुटग्रहंमध्यखेटंप्रकल्प्यसादिमयामरीचौव्याख्यातं·तदर्थस्पष्टीकरणायात्रैतत्प्रश्नोनापूर्वत्वेनेतिध्येयं॥५१॥ ॥पद्याभ्यांमतांतरमनूद्यदूषयति·स्पष्टग्रहान्मंदफलंविलोमंस्पष्टतःशीघ्रफलंविलोमंस्पष्टतःशीघ्रफलंविलोमंस्पष्टमुरुःशीघ्रफलंततोपि॥५२॥स्फुटैर्विलोमं

मदुशीघ्रकाभ्यांसुसंस्कृतोमध्यइतिकेचित्· तन्नैवशीघ्राख्यफलंमुद्रश्चेदाद्यंमदोः संस्करणांगुरुस्या
दिति·स्पष्टग्रहान्मंदफलंसाधितंस्पष्टव्यस्तंसंस्कार्यं·तादृशीकेवलशीघ्रफलसंस्कृताछीघ्रफलंव्यस्तं
स्पष्टेसंस्कार्यं·तादृशान्मंदस्पष्टांदित्यर्थः·शीघ्रफलंव्यस्तंस्पष्टेसंस्कार्यं·ततस्तादृशान्मंदस्पष्टात्पूर्वा
पेक्षयासूक्ष्मात्· अपिः समुच्चये शीघ्रफलमसकृत्साध्यंयावदविशेषः·ततः स्पष्टोग्रहः सकृत्साधि
तमंदफलासकृत्साधितशीघ्रफलाभ्यांव्यस्तंसंस्कृतः मध्योग्रहः· इह·विलोमक्रियायांस्यात्· एवंके
चिदंगीकुर्वंति·तन्मतंनैवयुक्तं· शीघ्रफलमसकृच्चेत्कृतंतर्हिमंदफलस्यसंस्करणांप्राथमिकंयतोगौ
रवंस्यात· असकृत्साधनेनशीघ्रफलस्यसूक्ष्मत्वेसिद्धेप्रथमंमंदफलंव्यर्थं·नहिव्यस्तमंदफलसंस्कृ
तस्पष्टोमंदस्पष्टोभवति·येनतदावश्यकतास्यात्·केवलशीघ्रफलसंस्कृतग्रहाछीघ्रफलेसाधिते
स्पष्टग्रहेणैवशीघ्रफलसाधनेनकिमपराद्धमितिभावः॥५३॥ ॥अथस्फुटग्रहंमध्यखगंप्रकल्प्य
कृत्वाफलेमंदचलेयथोक्ते·ताभ्यांमुहुर्व्यस्तधनर्णकाभ्यांसुसंस्कृतोमध्यखगोभवेत्सइतिभास्करोक्तपद्य

स्यशाद्वलभ्येमर्थ्यमतांतरेणोपन्यस्यदूषयन्पद्यमाह·स्पष्टग्रहान्मंदचलेषुयुक्तेताभ्यांस्फुटोव्यस्तसुसंस्कृतः
स्यात्·मध्यस्तनोमंदचलेषुयुक्तेताभ्यांस्फुटोव्यस्तसुसंस्कृतःसः॥५५॥ अतोपितेप्रोक्तवितेप्राक्तविध्वेःस्फुटस्तोमु
हुर्भवेन्मध्यइतिकश्चित्·तन्नैवमंदाद्युफलेविरामेस्फुटान्मदृष्टखगान्नसिद्धेरिति· स्पष्टग्रहात्· एषकएषकः·ते·फ
ले·मंदशीघ्रसंज्ञे·कार्ये·ताभ्यां·फलद्वयाभ्यां·स्पष्टाग्रहोव्यस्तसंस्कृतोमध्यस्तस्मात्स्पष्टकएषकः·मंदचले·ते·फ
ले·ताभ्यां·फलाभ्यां·स्पष्टोव्यस्तसंस्कृतः·सः·मध्यः स्यात्· अतः· अस्मान्मध्यमात्· अपिः समुच्चये·ते·मंदशीघ्रफ
ले·प्रोक्तप्रकारात्· स्पष्टग्रहः असकृत्· व्यस्तसंस्कृतेकार्ये·इह·विलोमक्रियायामध्यः स्यात्· एवंकश्चिदंगीकरो
ति·शाद्वलभ्यमप्येतन्मतंनिरुपपत्तिकत्वादसिद्धमेवेतिपूर्वमतादपकृष्टमितिघातनार्थंकश्चिदित्येकवचनं·न
देवस्पष्टयति·नहिति·तन्मतंनैवयुक्तं· अंतिमपरिवर्त्तेउत्पन्नेमंदशीघ्रफले· स्पष्टग्रहात्· मंदस्पष्टग्रहात्· क्र
मेणोपपत्तिसिद्धेयतोनैवसिद्धे·मध्यमात्सिद्धफलाभ्यांव्यस्तसंस्कृतः स्पष्टग्रहः कथमद्रगणोसन्नरूपमध्यमो
वास्तवः स्यात्कारणाभावादिति॥५५॥ ॥मतांतरंपक्षद्वयेनपद्याभ्यामुपपादयति·स्पष्टग्रहान्मंदफलंविलो

मंस्पष्टेतत्तः शीघ्रफलंचतत्र मध्योभवेन्मंदफलंततोयद्व्यस्तंस्फुटेस्मादपिशीघ्रसंज्ञं॥ पूर्वतद्व्यस्तमस्मिन्वच
रोहिमध्योस्मादुक्तरीत्यामुहुरत्रमध्यः यद्वाचलंमंदफलंपुरोक्तरीत्यामुहुर्मध्यखगोभवेत्सइति स्पष्टग्रहा
न्मंदफलंसाध्यंतत्स्पष्टेव्यस्तंसंस्कार्यं तादृशाग्रहाच्छीघ्रफलंसाध्यितंतदपि तत्र तादृशाग्रहेव्यस्तंसंस्कार्यं म
ध्योग्रहः स्यात् ततस्तस्मान्मध्यमाद्यदुक्तरीत्या मंदफलंतत्स्पष्टेव्यस्तंसंस्कार्यं अस्मादेतादृशात् अपिः स
मुच्चये शीघ्रफलं यदुक्तरीत्याभवतितदस्मिन्ग्रहेव्यस्तंसंस्कार्यं मध्योग्रहोस्मान्मध्यग्रहादुक्तरीत्याअसकृ
त् अत्रविलोमक्रियायांमध्योग्रहः स्यात् ननुविलोमक्रियायांशीघ्रफलानंतरंमंदफलव्यस्तसंस्कारउचितः
ननुस्पष्टक्रियावत्फलक्रमः समुचितोनपाव्यस्तक्रियाव्याघातापत्तेरित्यस्वरसादाहयदुक्तं प्रथमंस्पष्टग्र
हाच्छीघ्रफलंतत्स्पष्टेव्यस्तंसंस्कार्यंतादृशान्मंदफलंव्यस्तंतादृशोमध्योस्मादुक्तरीत्याफलेसंस्कार्यमध्यइति
पूर्वोक्तरीत्याशीघ्रफलंमंदफलमसकृत्यकृत्स्पष्टग्रहेससिद्धोमध्यग्रहोभवेदिति॥५७॥ ॥इदंकस्यम
तमिसतत्तदुत्तरंवदन्दूषयति स्फुटग्रहंमध्यखगेतिपद्येव्याख्याकृतेवंगणकेनयेन तेनावबुद्धंनचतत्पुरो ४३५

क्तदोषान्मुहुर्मंदफलप्रसिद्धेरिति स्फुटग्रहंमध्यखगेत्यादिपद्येमास्करोक्ते यद्यपितत्पद्येमध्यखगंप्रक
ल्पेसत्तुस्वारांतपाठात्तत्प्रतीकधरणाखगमित्यचितंखगेत्यनुचितं अतएवप्रत्यक्षोपजीवकत्वादित्या
यनुमानखंडस्थप्रथमफक्किकाप्रतीकधरणचिंतामणिदीधितौप्रत्यक्षोइत्याकारांतंध्यत्वाप्रत्यक्षविती
यकंसंगच्छते तथापिछंदोनुरोधादनुस्वारस्थाने अकारग्रहणेनप्रतीकधरणंसंगच्छते पक्षधमिश्रैः
प्रत्यक्षेतिप्रतीकधरणाच्च येनगणकेन सिद्धांतशिरोमणिफराहरणगणितकरणात् लक्ष्मीदासमिश्रेणा
एवं पूर्वोक्तरीत्या व्याख्या कृता तेन उपपत्तेर्नेसर्थः तत् स्फुटग्रहमित्यादिपद्यं नेवज्ञातं हेतुमाह पु
रोक्तदोषदिति पूर्वमतेमंदशीघ्रफलयोः स्पष्टमंदस्पष्टाभ्यामसिद्धत्वरूपदोषस्मात् उक्तमतेप्रथमपक्षेति
ममंदफलस्यमध्यमात्सिद्धेरंतिमशीघ्रफलस्यचकेवलशीघ्रफलसंस्कृतात्सिद्धेरितितयोः क्रमेणास्पष्ट
मंदस्पष्टाभ्यामनुत्पत्तेः द्वितीयपक्षेपिमध्यमाच्छीघ्रफलसिद्धेर्मंदफलस्यमंदस्पष्टात्सिद्धेश्चशीघ्रमंदफ
लयोर्मंदस्पष्टस्पष्टाभ्यामनुत्पत्तेरुक्तदोषादित्यर्थः दूषणांतरमाहमुहुरिति अस्मिन्मतेअसकृन्मंदफल

प्रसिद्धैर्दोषरूपत्वात्. उपपन्नात्सकृन्मंदफलस्योत्पत्तेस्तदनुपपत्तिरित्यर्थः॥५८॥ ॥अथत्रिप्रश्नाधि
कारविषयंप्रश्नमाह. अग्राकृतिंद्विगुणितामितिभास्करोक्तंपंचाक्षभादिविषयेखगयाम्यगोले.अव्या
प्तमेतद्वगम्यबुधः स्वयुक्त्याग्रातः समाभयतिकोणानरंसवर्यइति.अग्राकृतिंद्विगुणितामित्यादिभा
स्करोक्तकोणशंकानयनं.यथाचसिद्धांतशिरोमणौत्रिप्रश्नाधिकारेतद्वाक्यं.अग्राकृतिंद्विगुणितांत्रिगु
णस्यवर्गात्सक्तापदंतदिहकोणानरोक्षभाग्नः.अर्कोद्धतः फलयुजासकृदग्रयासोसौम्येफलेनवियुजा नु
तयाप्रसाध्यइति.एतत्.आनयनं.पंचाक्षभादिदेशे.महस्यदक्षिणगोले.अव्याप्तं.अनुपपन्नं.फलयुक्ता
ग्रायावर्गस्यत्रिज्यावर्गाधिकत्वेसंभवात्.नहिविपरीतशोधनेकोटिवर्गः संभवति.इदंचयथाश्रुतानुरो
धेनः विवक्षयानुमरीचोसूर्यसिद्धांतोक्तकोणशंकानयनविषयदेशावधिमवस्थापितं. ज्ञात्वायोबुधो
गणितगोलज्ञः.अग्रायाः सकाशात्.स्वकल्पितयुक्त्याकोणशंकुमानयति.सबुधः वर्यः.गणितगो
लज्ञेषूत्कृष्टः.भास्करोक्तकोणशंकानयनेविचारोस्तीतिसूचनार्थमेतादृशोक्त्याप्रश्नः कृतः॥६२॥ ॥ ४३६
४३५

पंचभिः पथैरुत्तरयति.पलप्रभावर्गयमाभिघातोवेदेंद्रयुक्तोस्यपदंपदंस्यात्.त्रिभज्यकावर्गदलो
त्थमूलाक्षज्याक्षकर्णौगुणितेनतेन॥६३॥त्रिज्याकृत्यक्षप्रभाग्रार्कघातोभक्तः कोणापक्रमज्यात
तोस्याः.फज्यार्कघ्नीसंविभक्तापदेनजंबूद्वीपेलब्धमेतद्विसौम्यं॥६४॥पलप्रभाघ्नीत्रिभसिंजिनी
यासाद्वैकराशिज्यकयापदघ्न्या.भक्ताप्तवर्गोनिहतस्त्रिभज्याग्रार्कैःपलज्यापलकर्णकाभ्यां॥६५॥भ
क्तः फलंगोलवशात्स्वदिक्कतयोरभिन्नात्यदिशोः क्रमेण.योगांतरंकोणनरोयदानुसाद्वैकराशेफद्वसिं
जिनीतः॥६६॥अनल्पिकाग्राभवतीहयोगस्थानेवियोगेनपरोपिशंकुः.दिक्शंकुरीत्यापुतिभेदजा
तज्याभावनाभ्यांसुगमात्रयुक्तिरिति.पलभावर्गोद्विगुणश्चत्वारिंशदधिकशतयुतः.अस्यसिद्धस्य
मूलंपदसंज्ञंस्यात्.तेन.पदेन.त्रिज्यावर्गार्द्धमूलं.साद्वैकराशिज्या.अक्षज्या.अक्षकर्णाः.एतैर्गुणि
तेन.त्रिज्यावर्गपलभाग्राद्वादशानांवधोभक्तः फलंकोणक्रांतिज्या.अनंतरमस्याः.कोणक्रांतिज्या
याः पूर्वोक्तरीत्याफज्या.कोणक्रांतिज्यावर्गोनात्रिज्यावर्गान्मूलरूपेत्यर्थः.द्वादशगुणा.पदेनभक्ता.

लम्बमिदं जंबूद्वीपेऽत्तरं स्यात् अर्थाद्भूलोके दक्षिणं स्यात् पलभागुणोत्रिज्यायास्यात्सा अध्यर्द्धराशो
ज्ञेयापदगुणितया भक्ता फलस्य वर्गः त्रिज्याग्राद्द्वादशाभिर्गुणितः अक्षज्याक्षकर्णाभ्यां भक्तः फल
ग्रहगोलवशादुत्तरदक्षिणान्यतरदिक्कं स्यात् तयोः जंबूद्वीपफलगोलफलयोः एकभिन्नदिशोः
क्रमेण योगांतरकोणांशकुः स्यात् यदाध्यर्द्धकराशेरुत्पन्नज्यायाः सकाशात् अग्रा अन्यूना भव
ति तदा इह कोणांशकानयने योगरूपकोणांशकुस्थाने अंतरेण परादितीयः कोणांशकुः अ
पि त्राद्याद्योगरूपकोणांशकोरनिरासः अस्मिन्नानयनेऽपपत्तिं सूचयति दिक्कुरीसेति अत्र
अस्मिन्कोणांशकानयने अभीष्टदिक्कानयनं त्रिप्रश्नाधिकारोक्तं तद्विधिना योगांतराभ्यामुत्प
न्नज्ययोर्भावनाभ्यां ज्योत्पत्त्यवसरे निरूपिताभ्यां युक्तिः उपपत्तिः सुगमा सुधियां न दुर्विज्ञेयस
र्वः इदमानयनमेकानयनेन ज्याभावनाभ्यामुत्पद्यत इति भावः ॥६०॥ ॥कथमुत्पद्यत इत्यतो
ज्ञबोधार्थं प्रदर्शयति यथा इष्टाक्षभास्वरूपं पलभात्रिज्याघातः सार्द्धकराशिज्याभक्त इति तत्र ह

४३७

रस्य त्रिज्यावर्गार्द्धमूलत्वादिष्टाक्षभावर्गः पलभावर्गद्विघातात्मकोऽस्मादिष्टाक्षकर्णः पदस्वरूपउपपन्नः
इष्टाक्षज्यातु त्रिज्यावर्गपलभाघातो मूलपदाभ्यां भक्तः [त्रिव·प१] अग्रार्कहतिर्देशाक्षकर्णभक्ता क्रांतिज्या
[अ१२] अग्राभ्यां दृक्क्रांतिज्या कोणक्रांतिज्योपपन्ना [त्रिव· मू·प१] प· [अ१२] त्रिज्यार्कघातः पदभक्त इष्टलंब
[पक१] ज्या [त्रि१२] अनयोरंशापोर्योगांतरांशयोर्ज्या [मू·पज्या·पक·प१] [redacted] शंकुस्तत्र ज्याभावनार्थमिष्ट
लंबज्याको [प१] णक्रांतिज्यायाः कोटिज्यया तद्धज्यात्मिकया गुणया त्रिज्यया भाज्येतिलंबोत्थं फलं तदुत्तर
धिता तथाहि चित्रास्पष्टक्रांतिकोटिज्यकाघ्नीदिक्कोटिज्यात्रिज्यापासेतिस्वातीदृग्वृत्तध्रुवयोर्याम्योत्तरांतरांशज्या
पूर्वोपपत्तिसिद्धा तत्कोटिज्या दृग्वृत्तविषुववृत्तत्तद्याम्योत्तरांशज्या इयंदृग्वृत्तविषुववृत्तसंपातद्वयमध्ये
तद्वृत्तयोरंतरस्था अतोनयादृग्वृत्तस्थत्रिज्यासंपातावधिकातदाचित्रास्पष्टक्रांतिज्यातुल्यदृग्वृत्तविषुववृत्तया
म्योत्तरांतरांशज्यया केतिचित्रास्थानात्संपातावधिकदृग्वृत्तज्या इयमेवस्वातीष्टदिग्क्षज्या अनयेष्टदिग्क्षज्य
चित्रास्पष्टक्रांतिज्यातुल्याक्षज्यालभ्यते तदाक्षिप्तिअस्य स्वातीष्टदिग्क्षज्यया त्रिज्यातुल्यया केतिनदृशविषयिण्य
क्षज्येति॥२३॥उत्तरमेतत्पंचभिः पद्यैर्दूषयति इतितत्सकलैः सुगोलविद्भिर्नितरांतुच्छतरंविभावनीयं यतउक्तपदार्थवा
सनायाः सुविचारेनिलभेष्टदिक्फलज्या॥२४॥सिद्धाध्याख्यानपालाष्टुतारास्पष्टक्रांतिज्यासमाक्षज्यकाचेत् लभ्यानहिस्वातिदि
ग्क्षमौर्व्याकास्यात्रिज्यातुल्ययेत्यक्षजीवा॥२५॥सिद्धाचात्रोक्तानुपातस्त्रिमौर्वीइष्टाक्षास्याभावतोनैवयुक्तः स्वातीभूजस्तुत्वतः
प्राक्यास्थेवृत्तेनैवास्यात्यक्षांशानखांकाः॥२६॥खांकाः फलांशानविनापरमाद्दृग्वृत्तयोर्गत्यथवाधुधिस्त्र्यं पूर्वापरांशावत्रिजा

४९

२८२

स्यवृत्तयोगेप्रकल्प्याक्षलवाः स्फुटाः॥२७॥एवंतदासाविषुवस्थितास्यादेतन्नयुक्तस्फुटकापमोक्तेः
तस्मात्संबद्धमिदंत्वदुक्तंमोलस्थितोगाणितपद्धतौचेति इति पूर्वोक्तंयदनुवादात्मकंतन्मतं समग्रैः क
लायुक्तैर्गोलतलतैः नितरामसंतं तुच्छतरं निःसारेऽपिनिकृष्टविचारणीयं अत्रहेतुमुपपादमार्षम
ताभिप्रायंप्रथममाहयतइति यस्माद्धेतोः पूर्वमतोक्तपदार्थानामुपपत्तेस्तत्वविचारलब्धाख्याद्वितीया
या ननुप्रथमा स्वासाइष्टदिग्क्षज्यासिद्धा परिणता अनया स्वातीष्टदिग्क्षज्यया चित्रास्पष्टक्रांतिज्यतुल्याक्षज्यायदिलभ्यातर्हित्रिज्यातुल्यपास्वातीष्टदिग्सन्नाक्षज्यया कास्यात् इत्यक्तानुपातस्य
प्रमाणछयोः साजातारोचित्येनाक्षज्यासिद्धाः वः समुच्चये रातदिष्टदिक्फलज्यया त्रिज्यातुल्याक्षजा
तदाचित्रास्पष्टक्रांतिज्यातुल्याक्षज्यया केत्यनुपातस्तत्प्रमाणछयोरेकजात्यक्षज्यात्वाभावात्प्रमाण
फलयोः संबंधाभावाच्चायुक्तः अतएवअस्तानुयातावयुक्तौ त्रिज्याचित्राक्रांतिज्ययोः संबंधाभा
वाच्च अथमतस्यायुक्तत्वे हेतुमाहअत्रेति प्रतिपादितेमताभिप्राये उक्तः प्रतिपादितोयोक्षज्यान

यनानुपातः॥ युक्तउपपन्नोनस्यात्॥ एवकाराद्नुपातानुपपत्यनवबोधेपीत्यर्थः॥ अतएवानुपात
स्यायुक्तत्वेहेतुमाहत्रिमौर्व्याइति॥ त्रिज्यायाइष्टत्वस्याभावात्॥ इष्ट त्वाभावादित्यर्थः॥ अयंभावः॥ चित्रा
स्वातीयत्रदेशेक्षितिजस्थतत्रस्वासाइष्टदिगक्षज्यात्रिज्यातुल्यत्वेनापेक्षिता॥ अन्यथातदक्षज्यानुपपत्तेः
सानुक्थमप्यद्भावपितुमशक्या॥ नवतितुल्याभिमतदिगक्षभाग्यनांतत्राप्रसिद्धेरिति॥ एतदुपपादयति॥
स्वातीक्षितिजवृत्तस्थत्वात्पूर्वापरारव्येवृत्ते॥ सममंडले॥ नेवस्यादस्मात्कारणात्खांकाः॥ नवतिरिष्टदि
गक्षांशाः॥ नस्फः॥ ननुपूर्वापरवृत्तस्थत्वाभावेपिनवतिपलांशासंभवः॥ कुतइत्यतआहखांकाइति॥ परप्रा
गग्रवृत्तयोगं॥ सममंडलदृग्वृत्तयोरभिन्नतां॥ विना॥ वर्जयित्वा॥ हि॥ असंत्रायं॥ पलांशानवतिर्नस्फः॥ अभे
देखस्वस्तिकाद्विषुववृत्तपर्यंतंदृग्वृत्तेनवत्यक्षभागादर्शनंभेदेनुतदसंभवइतिभावः॥ क्षितिजस्थत्वेपि
नवतिपलांशासंभवोनेत्याशंक्यते॥ अथेति॥ स्वानीसममांडलक्षितिजवृत्तसंपातेप्रकल्प्य॥ क्षितिजवृत्त
स्थत्वेपिसमवृत्तस्थत्वादिष्टदिगक्षांशाउक्तानवत्यन्मिता॥ स्फः॥ वस्तुतस्तत्संपातेस्वास्यधिष्ठानाभावा

त्प्रकल्पेतफलं॥ आशंकांनिरस्यति॥ एवमिति॥ खांकपलांशोत्पादनावश्यकत्वेनस्वास्यास्तत्संपातावस्था
नकल्पनं॥ तदा॥ तर्हि॥ सा॥ स्वाती॥ विषुववृत्तस्थितास्यात्॥ क्षितिजपूर्वापरवृत्तसंपातयोर्विषुववृत्तस्थ
त्वात्॥ ननुतावतापूर्वतरोषानवकाशइत्यतआहएतदिति॥ स्वास्याविषुववृत्तस्थत्वं॥ नयुक्तमुपपन्नं॥ हे
तुमाहस्फुटेति॥ स्वास्याः॥ स्पष्टक्रांतेः॥ प्रसिद्धत्वादिष्टसर्पः॥ तथाचविषुवस्थितत्वेस्वास्याः॥ क्रांतिभाव
प्रसंगेनस्वातिस्पष्टक्रांतिसन्नक्रियाकथनवैयर्थ्यापत्तिरितिभावः॥ दूषणमुपसंहरति॥ तस्मादिति॥ तदे
शेस्वास्याइष्टदिगक्षांशानांनवतित्वासंभवादित्यर्थः॥ यदुक्तं॥ दृग्मक्षांशानयनं॥ गोलस्थितौ॥ गणितपद्धतौ॥
गणितक्रियामार्गे॥ चः॥ समुच्चये॥ असंबद्धं॥ असंस्पृष्टं॥ गोलेनदृग्वृत्तेतः॥ सोपपत्तिकंनासंवादाभावाद्गणि
तक्रियामार्गेणाप्यसिद्धमित्यर्थः॥ यद्वा॥ गणितपद्धतौयदुक्तमिदंगोलस्थितावसंलग्नमेवेत्यर्थः॥ ॥२८॥
॥ ॥ अथात्रानांक्यनिषेधति॥ अथात्मपक्षेनिलभस्यदृग्ज्यास्थानेनुदिग्ज्यालिखनेप्रमादात्॥ चेत्तर्हि
सिद्धंहरिदक्सजीवाग्राघंनिरुक्तंविफलंहिसर्वमिति॥ स्वीपपक्षेचित्रास्वासोरित्यादौ॥ स्वास्यादृग्ज्यास्थानेदि

ग्ज्योलिखनं प्रमादाज्जातं · तथा च ग्ज्योतिपाठेन सर्वमुपपन्नं · तथा हि · अनयादृग्ज्यया चित्रा क्रांतिज्या
तुल्या स्वज्यातदास्वात्स्त्रिज्यातुल्यदृग्ज्यया कैसनुपातस्तदेशोस्वास्याः स्थिति जस्थत्वेन नवति न ता
शसंभवात्समुचितः · तेनांतिमश्लोकेतल्लुप्तमपि स्वत्रदृग्ज्याभक्तेस्पर्थकरणेनैतस्याहकल्पनेन वा न किंचि
दनुपपन्नमिसाशंकसे चेत्तर्हि · इष्टदिगस्वज्यास्वास्यया · आपद्राहादृग्त्रास्वज्योपयुक्ताः पदार्थाः · एतच्च
सर्वं त्वदुक्तं · हि · विफलं · व्यर्थं स्यात् · प्रथम तृतीयपद्ययोर्द्वितीयपद्यत्रादिभिरिसस्यचवैप्यर्थापत्तिरि
तिभावः ॥२७॥ ॥ननु प्रकारस्य युक्तिसिद्धत्वादुपपन्नत्वे शेषवैप्यर्थ्यमक्षांशानयने वाधकं संमाज
नीयं वेत्यतोभिमतप्रकारमेव दूषयति · किंचानुपातः फलितोप्ययुक्तः स्वातीष्टदृग्ज्यापरदृग्ज्ययोर्हि · अ
भिन्नवृत्ताश्रितताप्रसिद्धैकजात्यभावान्नचतत्प्रवृत्तिरिति · किंचे · पूर्वोक्तदूषणानभ्युपगमे · प्रमाणेष्ट
योरेकजातित्वेन फलितउपपन्नोप्यनुपातो युक्तः · अनुपपन्नः · अत्रहेतुमाहनचेति यतस्तदनुपातस्य
प्रवृत्तिरत्रनास्ति · अनुपाताप्रवृत्तेरेतुमाहएक जात्यभावादिति · प्रमाणेष्टयोः स्वास्याइष्टदृग्ज्याप

रमदृग्ज्ययोरेकजात्यभावादित्यर्थः · ननु वदतो व्याघातइत्यतस्तयोरेकजात्यभावे हेतुमाहस्वातीति · हि ·
असंशयं · तयोः प्रमाणेष्टयोः · अभिन्नवृत्ताश्रितताप्रसिद्धा · स्वातीष्टदृग्ज्या चित्रावस्वस्तिकसंव
द्धदृग्वृत्ते · परमदृग्ज्यानुप्रश्नदेशीयस्वस्तिकप्रोतदृग्वृत्तेरेकवृत्ताश्रितत्वस्यद्वयोरभावात्साजात्या
भावइतिभावः ॥३०॥ ॥अथोपसंहारभाजेनकल्पकस्यभ्रममुत्प्रेक्षते · ब्रह्मार्कचंद्रादिमुनीश्वराणांगु
रोर्विरोधादपिबुद्धिमोहः · दृष्टांतएवायमभूत्कुगर्वहेतुर्भ्रमे भास्करपंडितोक्तेइति · ब्रह्मार्कचंद्राः देवाः ·
आदिमुनीश्वराः वसिष्ठादयः एषांविरोधात् · गुरोः स्वाध्यापकस्यविरोधादपिः समुच्चये · महतोविरोधा
द्वा · अत्रापिराहणयार्थकः · अयंपूर्वप्रतिपादितोबुद्धिभ्रमः कुगर्वहेतुर्यस्यतादृशे भ्रमे · भास्करपंडितोक्ते ·
सिद्धांतशिरोमणौ · गर्वाद्रसराभस्यात्यरविश्वासात्प्रमादतश्चापि · मुग्धस्यपिमतिर्मंतकिंमंदोमेस्तथावो
क्तमिसार्थयाभास्कराचार्यैर्निरूपिते · मंदबुद्धिनातद्गर्वसद्भावबोधार्थं · दृष्टांतः · एवकारः निमित्तांतर
वारणाय · प्रभूत · तथाचत्वद्भ्रमायंभास्करार्थाबोधनिमित्तं मंदोपकारकत्वेन पर्यवसन्नइतिभावः ॥

३१॥ ॥अथास्मिन्नानयनेन्यपदार्थविषयकत्वंप्रकल्प्याचिंतसमाधानमाशंकत्रिभिः पद्यैर्निरस्या
ति॥अथोदगाख्यंबलयंकुजंस्यात्तद्देशजंतेनसमीरभस्य॥अभीष्टदिग्जातपलज्यया चेत्कुजोत्थया वैषुव
भूजयोर्हि॥३२ चित्राक्षुटक्रांतिगुणान्मिताया दृग्ज्यकातर्हिकुजस्थयाका॥ज्यया त्रिभज्यासमयेवभ
स्मात्त्रैराशिकाल्लंबगुणाः प्रसिद्ध्येत्॥३३॥ यतोंतरंस्यात्सरमंतयोर्हिलंबांशतुल्यंचततोस्यपाठः॥ प्रमा
दतोलंबपदत्वयैवंसमुच्यतेचेदुरुतात्रदोषइति॥ चित्रारूपरवस्वस्तिकप्रोतस्वातीरूपार्कसंबद्धं॥ दृग्वृत्तं
यतस्तद्देशजंप्रश्नदेशीयांक्षितिजवृत्तंस्यात्॥ द्वयोरेकवृत्तस्थत्वात्॥ तेनकारणेन॥ स्वातीनक्षत्रस्याभिम
तदिगुत्पन्नाक्षांशानांक्षितिजस्थानांज्यया क्षितिजवृत्तसंबंधिन्या॥ विषुववृत्तक्षितिजवृत्तयोः॥ हि॥ निश्चय
येन॥ भेदज्यका॥ भेदांतरंयाम्योत्तरं॥ चित्रारूपरवस्वस्तिकसंबंधियाम्योत्तरवृत्तस्थंतस्यांशात्मकस्यज्या॥ तस्मा
नमाहचित्रेति॥ चित्रायाः स्पष्टक्रांतिज्यापरिमिता॥ तस्यास्तद्रूपत्वात्॥ लभ्यास्यात्तर्हि॥ क्षितिजस्थया॥ ज्य
या॥ विषुवक्षितिजवृत्तसंपातात्क्षितिजवृत्तचतुर्थांशभागसंबंधिन्या॥ त्रिज्यातुल्ययासर्पः कालभ्यास्या

४८५

२८५

त्॥ एवंउक्तोल्लेखरूपादनुपातात्॥ अस्मात्॥ तल्लब्धासाभत्रयज्याविनिघ्नीचित्रास्पष्टक्रांतिजीवेतिगणि
तक्रियानिबंधरूपात्॥ प्रश्नदेशीयालंबांशज्यासूक्ष्मत्वेनसिद्ध्येत्॥ कुतइत्यतोहेतुमाहय तइति॥ तयोः॥
विषुववृत्तक्षितिजवृत्तयोः॥ अंतरं॥ याम्योत्तरसूत्रं॥ संपातस्थानातिरिक्तस्थानसंबंधि॥ परमं॥ उत्कृष्टं॥ लंबा
शसयानं॥ हि॥ निश्चयेन॥ स्यात्॥ गोलस्थितिसिद्धमित्यर्थः॥ उपसंहरति॥ ततइति॥ यतउक्तलंबसाधनेनिष्पन्ने॥
ततोहेतोः॥ लंबपदे॥ पद्यलंबेसक्षरस्थानेप्रक्षेपसक्षरपाठः प्रमादात्॥ दुष्टदोषादित्यर्थः॥ तथाचलंबांशाः स्फ
रिस्फुटासर्वेसमंजसमितिभावः॥ आशंकासुपसंहरति॥ त्वयेति॥ कल्पकेन॥ एवं॥ पूर्वप्रतितं॥ सम्यक्प्रकारेणो
च्यतेचेदिति॥ इमामाशंकांनिरस्यति॥ गुरुतेति॥ अत्र॥ अस्मिन्समाधानेगुरुतागौरवंदोषः॥ अयंभावः॥ स्वातीष्ट
दिगक्षांशज्यासाधनार्थंचित्रास्पष्टक्रांतिकोटिज्यकाघ्नीदिक्त्रिज्ययाप्रेक्षणेनयाभ्रवदृग्वृत्तरूपक्षितिजयोर्या
म्योत्तरांतरांशज्यासाधितावस्याएवप्रश्नदेशीयाक्षज्यारूपत्वेनगोलदर्शनात्तज्ज्ञापकोदृलंबांशत्वेनसिद्धेरधि
कक्रिययालंबांशसाधनंगौरवंसिद्धसाधनंव्यर्थंच॥ अक्षांशाप्रश्नस्योत्तरमक्षांशज्ञानावधिकंसमंजसं॥ ना

धिकक्रियया लंबांशासाधनं वैष्यधिकरणपात्तं त्वल्पकस्याभिज्ञसभायामुपहासास्पदं समुचितमिति ॥२४॥
॥ ॥एतदभिप्रायिकमेव गौरवं हेतुं स्फुटयन्पूर्वोक्तं मोहं दूषयति· चित्रास्पष्टक्रांतिकोटिज्यकाधीसादावर्द्धस्यां
शजीवाप्रसिद्धेः तस्माल्लंबोक्तेरनौचित्यं तस्त्वां मोहपूर्वोऽप्याश्रितोयं मदुक्त इति· अर्द्धं भवदुक्तपक्षार्द्धं प्रस्तां
शज्यायाः सूक्ष्मत्वेन फलितत्वादित्यर्थः· अथ गोलसंज्ञायास्यदमिदमिति मंदानां समाजे नियंतृत्वाभावाद्गा
ढ्दसिद्धत्वं दुक्तेवगणितयुक्त्या संज्ञायो निराक्रियते· तथाहि· पूर्वलब्धिकोटिज्याभक्तस्त्रिज्याचित्रास्पष्टक्रां
तिज्ययोर्घातः स्वातीष्टदिग्लग्नज्यायाः स्वरूपं· अनेन तल्लब्धिरूपेण भक्तः पूर्वभाज्यो लंबज्यायाः स्वरूपं चेति त्व
दुक्तिसिद्धं· तत्र लंबज्यास्वरूपसिद्धहरस्य स्पष्टदिग्लग्नज्यात्वात्तस्य च सप्तदशतया छेदलवं च परिवर्त्य हरस्य सनेन पू
र्वभाज्यो हरस्तेन भक्तः पूर्वभाज्यो रूपं सिद्धं· तेन पूर्वलब्धिकोटिज्यायाः गुणानविकाराभावात्पूर्वलब्धिकोटिज्यैव
लंबज्या· तत्कोटिज्या पूर्वलब्धिरूपार्थसिद्धा लग्नज्येति मंदैरपि सुखेन ज्ञातुं शक्यमिति· अप्याचितसमाधानाप्या
त्तमोहागुरुताविलक्षणदोषेणापुनर्वज्रलेपायितदृक्पक्षसंहारेति· तस्मादिति· पूर्वलब्धेरक्षज्यात्वादग्रे लंबां

४८६

२८६

शकथनस्यैवोचितत्वाभावाद्गौरवं दोषो दूरस्थितयं प्रतिपादितो मोहो भ्रमः· अपूर्वो· नवीनः· मदुक्तः· सिद्धांत
सार्वभौमकर्त्रोक्त इत्यर्थः· त्वां· आश्रितः· अपि शब्दो विरोधाभासाय· यः पूर्वः सम्प्राश्रितोयं तु न तथा तथा आश्रि
त इति चित्रं· तथा वृतछायोलग्न इति भावः· यत्तु प्रकारकल्पकस्यैव समाधानं· त्रिज्यया प्रेतपंतं प्रश्नोत्तरीभूता
क्षज्या· अथ पस्तादिलंबज्या शरोक्तिविशेषणेछयालंबांशा इति तदभियुक्तानां मनसि सर्वं निर्णयप्रकारो क्षज्या
स्पात्तदंशाः स्फुरिति वेति पदानुक्त्या स्वेच्छयालंबज्यासाधनं लंबज्यां विनानकृतमित्यादिमलेन यथाभासते तत्र
तत्रवनिः पक्षपाताः प्रष्टव्याः· वक्तृतस्त्रिज्यया प्राप्तपस्यास्मिन्भागे चापं· अक्षांशाः स्फुरित्यादि पूर्वोक्तपाठे
नलब्धेरित्यादिपांतस्याधिकस्य त्यागेन च सर्वं समंजसमिति गर्वांधबुद्धिना कथं द्रष्टुं शक्यं समाधानमित्यलं तत्व
विचारायग्रहेण ॥२५॥ ॥अथ प्रश्नांतरमाह ज्ञातास्तांशात्पत्तनादिष्टदेशो ज्ञातास्तांशो योजनैर्यः स्थितस्तैः· आत्म
स्थानादिष्टदेशस्य काष्ठां ब्रूते योसौ गोलल्पकः स्यादिति· अवगतास्तांशादात्मदेशात्तमारभ्य इष्टदेशोप्यवगता
स्तांशो यैर्योजनैरंतरालस्थैः स्थितो वक्तृतो यैर्योजनैः· आत्मस्थानादिष्टदेशसंबंधिनीं दिशमानयनेन योग

णकोवदति॰ प्रसौगणकोगोलवित्सुकल्पकः स्यात्॥३६॥ ॥॰ अस्योत्तरंतदुपपत्तिंचतदुदाहरणप्रतिज्ञांचे
तिपद्यत्रयेणाह॰ इष्टस्थानाक्षांशाजीवाविनिघ्नीस्वस्थानीयाक्षश्रुतिः सौम्यदिक्का॰ स्वाक्षछायायोजनांशाश्छ
कोटिज्याघातोयंदक्षिणाभूमिपादात्॥३७॥ न्यूनेपसारधिकउत्तराच्चास्तयोरभिन्नान्यदिशोः क्रमेण॰ यो
गांतरंत्रिज्यकयाहतंहृत्सूर्यैर्हृतंयोजनबाहुमौर्व्या॥३८॥ तच्चापतुल्याहरिदंशकाः स्युः संस्कारदिक्काइहवा
सनापि॰ विलोमशीतांशुगमाप्यवच्मिदृष्टांतमत्राह्नसुबोधनार्थमिति॰ इष्टस्थानसंबंधिन्याक्षभागज्यथागु
णितात्मस्थानीयपलश्रुतिः॰ उत्तरदिक्कास्यात्॰ आत्मस्थानपलभायोजनभागोत्पन्नकोटिज्ययोर्वधः॰ अ
यं॰ घातः॰ भूपरिधिचतुर्थांशात्॰ अपसारयोजनेल्पेसतिदक्षिणादिक्कोभवति॰ अधिकेतूत्तरदिक्कः स्यात्॰
तयोः पूर्वोक्तघातयोरेकान्यदिशोः क्रमेणयोगांत रान्यतरमभीष्टंकार्यं॰ तत॰ त्रिज्ययागुणितंद्वादशभि
र्भक्तंफलंयोजनांशानांभुजज्ययाभक्तंतस्यफलस्यधनुरंशोः समानादिगंशाइष्टस्थानस्यात्मस्थानात्सं
स्कारदिक्संबंधिनोभवंति॰ इहास्मिन्नानयने॰ उपपत्तिः॰ अपिः समुच्चये॰ पूर्वोक्ताक्षांशानयनोपपत्ति ४८

वस्तविधिनासुगमा॰ तथाहि॰ भुजसाधनार्थमग्रांशकुतलेसाध्ये॰ तत्रेष्टस्थानाक्षांशानामिष्टस्थानक्रांत्य
प्रतिपादनादिष्टाक्षज्याक्रांतिजात्वेनपर्यवसन्ना॰ अतोद्वादशकोटयात्मस्थानीयाक्षकर्णाः कर्णस्तदेष्ट
स्थानीयाक्षज्यारूपक्रांतिज्याकोटिकः कर्णाइत्यग्रेष्टस्थानस्यजंबूद्वीपांतर्गतत्वादुत्तराद्वादशकोटयात्म
स्थानीयपलभाभुजोलभ्यतेतदायोजनभागकोटिज्यातुल्येष्टस्थानीयशंकुकोयेकइत्यनुपातेनशंकुतल
पूर्ववद्भूपरिधिचतुर्थांशात्पयोजनेषुदक्षिणमधिकेधःस्थत्वादुत्तरं॰ तयोरेकदिग्यन्यदिशोश्चोक्तक्रमेण
योगांतरंभुजः॰ तत्रलाघवादुभयत्रद्वादशभक्तयोः पूर्वघातरूपभाज्ययोर्योगांतरंद्वादशभक्तंकृतं॰ ततो
योजनांशाभुजज्ययेष्टस्थानदृग्ज्ययाभ्रक्ताभुजस्तदात्रिज्याकर्णोकेतिफलंदिग्ज्यातस्याधनुर्दिगंशाभुजदि
क्काइतिसंस्कारदिक्काः॰ भुजस्यसंस्काररूपत्वादिति॰ ननुभूगोलस्थानानामनेकत्वादेतदुदाहरणमंतरेणास
बुद्धीनांदुरवबोधमिसतत्राह॰ अथेति॰ उपपत्तानिर्णीतार्थेप्यनंतरं॰ अत्रानयनविषये॰ अज्ञानां॰ उ
क्तेनैकवारमबुद्धानांसुष्ठुद्वितीयवारमेवतद्बोधनिमित्तं॰ दृष्टांतमुदाहरणप्रश्नंवदामि॰ तदुत्तरार्थंगणि

तन्क्रियावश्यकतयाबोधः सहजएवेतिभावः॥३७॥ ॥प्रतिज्ञातंपद्याभ्यामाह पादोनांगमितास्मभाद्रर
पुरात्कश्चिन्मुनीशोबहिर्यातः सांगपल्लभभार्गलपुरीतांराजधानींश्रितः॥ भूभद्राजशिरःकिरीटगमहा
रत्नप्रभामिश्रितांघ्रिगुष्ठस्थनखेंदुरश्मिमनघंतंशाहजाहाभिधं॥५०॥ईशंप्राप्यसमागतांनिजसुखेनी
त्वाननोसोपुनःकाशींगंतुमनाःस्वसंभ्रमवशादज्ञातनद्दिक्स्वयं॥ साद्वौसाद्विसुयोजनांतरतयावाराणा
सींकांदिशंयातांसम्यगपृच्छदेवसुजनांस्वंतांसखेकीर्तयेति॥ चरणोनाः षट्॥ चतुर्थांशोनषट्माणाप
लभायत्र॥ रूपस्यैवचतुर्थांशोत्रबोध्योनतुषष्ठांशः॥ एतादृशाद्भुतस्यमहादेवस्यनगरात्काश्याः सकाशामु
नीश्वरोबहिर्देशांतरंयातोगतः॥ मुनीश्वरस्यकाशीतोबहिर्गमनमानंदकाननादतिविरुद्धमतः कश्चित्॥
मायाजालनियंत्रितस्तत्वज्ञानाभावाद्धर्मोक्षाशक्तः पुरुषइत्यर्थः॥ स्वस्यानुपस्थितिबोधार्थंवापरोक्षा
क्तिः तथाचपद्यं॥ विक्रमार्कशकयातसमायांनंदवाजिनृपतिप्रमितायां॥६७॥ माघकृष्णहरिवासररात्रौ
प्रस्थितःशिवपुरान्मुनिराजइति॥ समुनीश्वराख्यःप्रसिद्धः॥ षड्माणाप्रलभायस्यामेतादृशीभार्गलाख्यपु

४८८

२८६

री॥ यस्यांवसतोऽन्यत्रगमनेछायाअनुत्पत्तिरूपार्गलाभवत्यतोर्गलपुरीमितिहेतुगर्भं॥ कुतइत्यतआह रा
जधानीमिति॥ सार्वभौमाश्रितत्वयासर्ववस्तूनामनायासभोगसंभवादितिभावः॥ नन्वेतादृशस्यापिबद्धःसं
तीसतआहनामिति॥ अनिर्वचनीयां॥ भूमर्मध्यदेशालंकारभूतामतएवसार्वभौमेणानिरंतरमाश्रि
तांयथेंद्रेणामरावतीमित्यर्थः॥ श्रितः॥ आश्रितः॥ तं॥ वक्ष्यमाणमहिमानं॥ शाहजाहांसंज्ञंपारसीकंसार्व
भौमं॥ अनघं॥ यथोक्तराजनीत्यापृथ्वीपालयंतमित्यर्थः॥ सार्वभौमत्वहेतुमाहभूभृदित्यादि॥ भूम्यकदेशस्वा
मिनोयेराजानस्तेषांशिरस्सुस्थिताःयेकिरीटामुकुटास्तेषुगतानिस्थितानियानिहीरकमाणिक्यादी
नि॥ तेषांप्रभाभिःकांतिभिर्मिश्रिताःशबलिताःएकीभावापन्नाइत्यर्थः॥ अंघ्रिश्चरणास्तस्यांगुष्ठस्तत्रस्थि
तंनखंतदेवेंदुरर्द्धाकारश्चंद्रस्तस्यरश्मयःकिरणायस्यैतादृशंस्वामिनंप्राप्यनिजस्यात्मनःसुखैःसुखा
भासैः॥ संसारस्यदुःखमूलकत्वात्॥ समागतां॥ वर्षाणांसमूहनीत्वा॥ अतिक्रम्यचान्नानुसंधयः॥ त
तोनंतरं॥ सुखपदार्थानां॥ सर्वदास्थिरत्वाभावात्संसारसुखस्यपरिणतिविरसत्वेनज्ञानादनंतरमि

स्पर्धः॰ असौ संसारवैराग्यतांस्वनामानुकूलं किमपि सम्यङ्नयानाचरितमिति पश्चात्तापं च प्राप्तः
पुनर्द्वितीयवारं दर्शनार्थं काशीप्रति गंतुं मनो यस्यासौ गंतुमनागमनोत्सुकः॰ अहं काश्यां गमि
ष्यामि तत्रैव निवसाम्यहं इति ब्रुवाणः सन्नतं काशीवासफलं लभेदिति क्तेः॰ स्वस्य सम्यक्प्रकारेण
भ्रमोज्ज्ञानं स्वस्य गमनरूपमहोत्सवसंजातानंदाविर्भावो वातदनुरोधात्॰ अज्ञाताकाशीसंबंधिन्यर्ग
लावधिकादिग्धनासौ स्वयमद्वारकः सार्द्धः रूपार्द्धसहिताः॰ ये पंचचत्वारिंशन्मितानि यानि सुष्ठु परि
भाषयांगणितानि योजनानि तदंतरत्वेन वाराणसीशंभुपुरी॰ अर्गलपुरात्कतम्यां दिशं प्रतिगतां प्राप्तां स्थि
तां सुजनान् धर्मपरान् एवकारादुर्जनानामुपहासाधर्मकारणानि रासः॰ सम्यक् विनयपूर्वकं अ
पृच्छत् एषवान् तां वाराणसीं दिग्भेदकतमदिशिस्थितां हे सखे मित्र त्वं कीर्तय कथय तन्नामोच्चारण
देवत्वमपि कृतार्थो भवसीति भावः॥५९॥ ॥ननु विरक्तः सन्नतुमनाश्चेन्मोक्षप्राप्त्यर्थं तत्र अयोध्यामपुरा
मायाकाशीकांचीत्यवंतिका पुरीद्वारावतीचैव सप्तैता मोक्षदायकाः इत्यत्र सप्तपुरीणां साधारणतया मोक्ष

४८९

दायकत्वनिर्णये लाघवान्निकटस्थमयोध्यायामेव गमनोत्सुकत्वमुचितं यदि वासौ पूर्वपूर्वप्राशस्त्ये योध्याया
मेव गमनं युक्तं उत्तरोत्तरप्राशस्त्ये तु द्वारावत्यामेव गंतुमनाः समुचितः॰ यदि स्वजन्मभूमित्वेन स्वजनसमा
गमादिपूर्वानुभूतसुखलाभार्थं तर्हि वैराग्याभावात्संसारधर्माश्रयतया पापार्जनेन कैकटसमेव सा वारा
णसी स्यात्॰ अशनं वसनं वासो येषां काश्यां ममार्गतः॰ कैकटेन समा काशी गंगाप्यंगारवाहिनी स्फुटं रिस्त
तः सर्वपुरीभ्यस्तस्याः उत्कर्षमाह॰ यस्यां मनोजारिरयं करोति देहांतकाले वृषभाधिरूढः॰ स्वयं समागत्य जनं
हिकाणां सुतारकब्रह्मपरापदेशमिति यस्यां वाराणस्यां॰ अयं भूतानुग्राहकः॰ काशीनाथः॰ मनोजारिः॰ म
दनांतकः॰ मनोजातानां वासनाविशेषाणां तत्संपादनतपातन्त्राशकारित्वेन सुहृत्तः करणजंतूनां करोतीत्य
भिमतार्थवासनानाशकः॰ विनावासनानां मोक्षाधिकारत्वानुपपत्तेः॰ देहनाशसमये॰ वृषभाधिरूढः॰ बली
वर्दोपविष्टः॰ यद्वा॰ वृषो धर्मस्तस्य भयादिस्या॰ अधिरूढ आक्रांतः॰ धर्मस्वरूपयुक्तः सन्नित्यर्थः॰ अमपाय
पोक्तस्वरूपस्य यस्य समीपागमनेजंतूनां भयसंभवात्सावधानतया पदेशाश्रवणात्तदुपदेशस्य व्यर्थत्वा

पत्तेः जनं प्राणिनं प्रति स्वयमात्मनाऽद्वारेणोत्पर्थः सम्पक्प्रकारेणागत्य हि निश्चयेन कर्णे दक्षिणा
श्रवणेंद्रिये सुष्ठुतारकं संसारार्णवतरणकारणं यद्ध्यानं ईश्वरस्य परं मंत्रात्मकमामितितस्यापदेशं
करोति अनंतरं तत्वज्ञानान्मोक्षप्राप्तिरेव जंतोः स्यात् तथा च विनातत्वज्ञानं मोक्षासंभव इति शास्त्रे नि
र्णीतत्वात्तत्तत्वज्ञानं काश्यामेवोपदेशेन भवति अत्रैव जंतोः प्राणेषु क्रममाणेषु रुद्रतारकं ब्रह्म प्रा
वष्ट इति श्रुतेः तेन सर्वकर्मणां भोगाभावेपि नाशाग्निर्मुक्तकर्मबंधस्य जंतोर्मोक्षो भवत्येव अन्य
पुरीषु देहांतकाले तत्वज्ञानोपदेशाश्रवणात्कर्मबंधनाशासंभवान्मोक्षानधिगम इति निर्णीतत्वात्स्व
पुर्योवचनानुरोधात्काशीप्राप्तिद्वारा मोक्षकारणीभूताः परंपरया नकाशीवत्साक्षादंतरावकाशी प्रा
प्तिकराणि षडिति भिः। पूर्ववचनमध्यनायकवन्मुख्यत्वेन काश्याः संनिवेशाश्च संगच्छते इति भावः॥
५२॥ ॥अथ सार्वभौममहिमानमाह प्रतीपविषयाशापासनरवाहिनीतीरमासभूमिकरतारिस्वा
गमविशंक ईश्वपक्तिः पयोनिधिजमादिलावलिरिगीशापक्षाहतेर्बलाद्दलखमग्रहीत्प्रवरशाहजोहा

DR BHAU DAJI MEMORIAL

नृप इति पद्यनिर्माणकाले आशयस्यानिर्मितत्वाद्व्याख्याने तत्पद्यार्थस्याभिप्रायानभिज्ञतावुधाना
मपि स्याद्व्याख्याने च पूर्वकुत्रापि व्याख्यानाकरणात्परस्परविरोधापत्तिरित्यतस्तद्व्याख्यानं सहेतुकं प्र
तिजानीते इदं पद्यं दुरूहार्थत्वान्मयैव व्याख्यायते इति इदं प्रतीपेत्यादि कठिनार्थत्वात् मया पद्यक
र्त्रा एवकारादन्यनिरासः भावानबोधादित्यर्थः स्पष्टमन्यत्॥ ॥तत्र काश्यफलकर्षानंतरमस्य पद्यस्या
संगतत्वात्संगतिं निरूपयति तं शाहजाहाभिधमिति पूर्वोक्तं कमित्याशंकामुत्तरकृतिकर्तृत्वेन शाहजो
हं वर्णयन्नुत्तरयतीति यद्यपि प्रथमश्लोकानंतरमेतदवसरस्तथापि काश्यफलकर्षस्याभ्यर्हितत्वेन तन्निरूपणो
नप्रतिबद्धतदंतं निरूपयितुमुचितमिति भावः॥ ॥व्याख्यानार्थं पद्यं प्रतीकत्वेनानुरति प्रतीपेनीति प
द्यस्य पूर्वलिखितत्वादिति भावः॥ ॥पद्यार्थं विवृणोति सोनेकशत्रुपराजयकर्ता प्रसिद्धः प्रवरशा
हजाहानृपः प्रकर्षेणावरः श्रेष्ठः सार्वभौमत्वात् शाहजोहाभिधो नरपतिः बलात् स्वशौर्यात् ब
लरतं बलस्वामिधरेशं अग्रहीत् शत्रुतो गृहीतवान् सकृत्सपेक्षायां प्रसिद्धत्वं विवृणोति प्रती

पेति॰ पत्तदोर्निससंबंधाद्यः सार्वभौमः प्रतीपविषयाशाया॰ शत्रूणां देशास्यग्रहणोक्तया॰ नरवाहि
नीतीरं नरसेनास॰ प्रास॰ अमुवास॰ अत्र ज्योतिः शास्त्रकथितांकसंकेतेन प्रतीपविषयाशाया स
नेसनेन यवनमार्गप्रवर्त्तकस्यापगंबरस्य शाकः सनाख्योत्तर्गतवर्त्तमानवर्षं आविर्भवति॰ यथा॰ प्र
या॰ प्रतीपाः षट्॰ विषयाबाणेंद्रियाणि पंच॰ प्राशारिक॰ दशः एवमंकानां वामतागत्यापहंचाशादु
त्तरं सहस्रं सनोबलखग्रहणकालिकाभिव्यक्तः॰ तीरमासे सत्र स्थिरराशिरविसंक्रमणं रूपतत्संके
तितसूर्यतहवीलसंबंधेन द्वादशसौरमासाः फरवर्षाद्यस्तत्संकेतेन प्रसिद्धास्तेषु चतुर्थो मासस्तीरा
ख्यस्तात्कालिक इति॰ ननु बलखदेशग्रहणकार्यं कार्यसाधारण्यान्नाद्भुतमित्यतोन्यपाविशेषणक
थनछलेन तद्ग्रहणस्याद्भुतत्वं व्यंजयति॰ भूमिकरतारिखागमविरांक इति॰ भूमिरूपायः करादंडस्तस्य
भावस्तत्साकल्यं॰ करता॰ तया॰ अरीणां॰ शत्रूणां॰ खागमः॰ खे॰ आकाशे॰ आरामंता द्रुमः॰ गमनं॰
रिपूणामरणमित्यर्थः॰ तेन॰ विरांकः॰ विगतचिंतः॰ अन्यकार्यसंपादनेप्ययं सार्वभौमो निश्चितो न

जातएतत्कार्येणानुनिश्चिंत इति बलखग्रहणकार्यमद्भुतमेवेति भावः॰ अत्र भूमिकरतारिखेत्यनेन
तीरमासस्यैकविंशतिमितं दिनं तात्कालिकं॰ यवनमते मासादितो दिनसंख्यानां तारिखाभिधानत्वा
त्॰ अत एव ईज्यपतिः॰ ईज्यो ग्रहो कांतिर्यस्य॰ महापराक्रमाधिष्ठानत्वात्॰ ईज्यस्थितिर्बृहस्पतेर्वारस्तात्
कालिकः॰ ननु पूर्वं सार्वभौमेभ्यस्यनाधिक्यमेकं तत्कार्यस्य महाद्भुतत्वं अवणादित्यतो बलविशेष
णकथनमाजेनास्याधिक्यमाह पषानिधिजमादिलावलिदिगीशपक्षाहतेरिति॰ पषानिधेः क्षीरसमु
द्राज्जातानि यानि मादीनि॰ लक्ष्मादीनि चतुर्दश रत्नानि तानि लांसनुगच्छंति॰ गच्छंतीत्यर्थः॰ एतादृशा॰
ये देवास्तेषामावलोपंक्तयः॰ परिगीशा॰ अष्टादिक्पालाः इंद्रादयस्तेषां पक्षस्याभिमतस्याहतिर्बाधा॰ य
स्मादेतादृशाद्बलादित्यर्थः॰ तथा चैतादृशबलेन पूर्वसार्वभौमेभ्यस्याधिकत्वं सिद्धमिति भावः॰ अत्र
जमादिलावलिदिगीशपक्षाहत्यनेन पारसीकाभिमतचंद्रदर्शनावधिकद्वादशचांद्रमासामोहरमा
द्यस्तेषु पंचमो मासो जमादिलावल्याख्यस्तात्कालिकस्तस्याष्टाविंशतिमं दिनं तात्कालिकं॰ दिगीशा

संकेतेनाष्टौ दिक्पालानां तन्मितत्वात् पक्षसंकेतेन द्वौ मासस्य पक्षद्वयात्मकत्वात् पेगंबरसनोपि चांद्रद्वा
दशमासैर्माहरमाघेरकंचांद्रवर्षमित्येषां संख्ययेतीति स्पष्टमेतत् एतत्पर्यंतर्गतकालभेदस्य बोधार्थस्य
स्पष्टार्थमम पद्यं रामाभ्राद्रिधरान्मितशकनृपस्याद्गतेराज्यतः पूर्वश्रावणमास्यमागुरुदिनेषाष्टूराशास
ने। सोरान्नीरगमूर्छनोत्मितदिने श्रीराहजोहान्पेश्चांद्रासिंदुदिनेजुमादिलवलबलंबलाद्ग्रहीतः॥ १॥
५३॥ ॥प्रस्तुतदृष्टांतेर्गलपुराद्वाराणसीकियद्भागैर्दक्षिणतइतिज्ञानार्थमिष्टस्थानास्तांराजावेत्या
दिपूर्वोक्तसूत्रस्योदाहरणं प्रदर्श्यते कात्यामसभा पा५५ अक्षकर्णाः १३।१०।५० अक्षज्या २३।१७।२५
अनयोर्गलपुराक्षकर्णौ १३।२५ गुणितौ गलपुराक्षभयाद्भक्तउत्तरदिक्फलं १११७।५५।१७ भूपरिधिः ५०२६
।१०।५० योजनानि ५५।३० राशाः ३।१५।३२ योजनकोटयंशाः २६।५५।२२ एषांज्या १९०।५१। चस्वाक्षछायेत्यादिघातो
दक्षिणाः ११५५।६।५२ उत्तरदक्षिणयोरंतरं २६।११।३१ त्रिज्यया १७१ गुणितं ५००२।३७।५१। द्वादशभक्तं ५१६।५३
१२ योजन ५५।३० भुजांशाज्यया १०।५१।२२ भक्तं ३२।२३।५६ अस्य धनुर्दिगंशा दक्षिणाः ११।३५।५७ तस्माद्गलपु

४९२

पुराद्वाराणसीपूर्वतएवास्ति अष्टदिगभिप्रायेणोक्तदिक्संबंध्यंशानां पंचचत्वारिंशान्मितत्वात् एषां दिगंशा
नां सुखार्थं वक्ष्यमाणयोजनज्ञापकसूत्रेण योजनान्यानीयंते अव्यक्तः ०।२५।२ व्यक्तः १२६।१७।१३ आद्यः १६
५।४५।१५। अन्यः ७५।५६।३२ अपवर्तिताद्य १५२०।१।५ स्तथान्यश्च ६५।३०।५६ अस्य वर्गः ५१६।१।५३।५५ मूलं
७५।२२।५३ योजनभुजज्या १०।५१।५२ योजनांशाः ३।१५।३७ योजनानि ५५।३१।३५॥ ॥प्रश्नांतरमाह ज्ञाता
क्षांशात्तत्तनादिष्टदेशो ज्ञातास्तांशो ज्ञातदिग्योजनैः कैः स्यादेतद्यो वेत्ति तं ज्ञानराजं ज्योतिर्विद्यासोदरं हि म
न्ये इति ज्ञाताक्षांशायस्तत्तस्मात्तीयादेशादभिमतदेशो वगतास्तांशो वगतदिग्नेदः कैः कियन्मितैर्योज
नैरंतरितः स्यात् एतत् योजनानां संख्याप्रमाणं योगणकः स्वकल्पनया जानाति तं गणकं ज्योतिर्विद्याविचार
क्षमं ज्ञानराजं जानन्नणभायमानं सिद्धांतसुंदरकारं अहं मन्ये तथा चैतत्प्रश्नोत्तरं ज्ञानराजदैवज्ञेन सि
द्धांतसुंदरे उक्तमिति भावः॥ ५५॥ ॥अस्योत्तरं विवक्षुः प्रथमं तदुपयुक्तान्येवैकव्यक्तौ साधयन्नाह दिग्ज्या
कैर्भीस्वाक्षभात्रिज्यकाभ्यां भक्ताव्यक्तः स्यादथव्यक्तसंज्ञः इष्टस्थानाक्षज्यकास्वाक्षकर्णगुणा स्वाक्षछाय

पासंस्तास्यादिति॰ आत्मस्थानादिष्टदेशोयस्मिन्दिग्देशेस्यात्तद्दिगनुरोधेनपूर्वादिदिशामंशास्तेषांभुजज्या
दिग्ज्या॰ द्वादशाभिर्भुक्तिता॰ आत्मस्थानीयपलभात्रिज्याभ्यां॰ तयोर्घातेनभक्ता॰ फलमव्यक्तः स्यात्॰ अनं
तरं॰ इष्टस्थानीयाक्षज्याआत्मस्थानीयपलकर्णेनगुणानीया॰ आत्मस्थानीयलभयाभक्ताफलंव्यक्तसं
ज्ञः स्यात्॥४५॥ ॥अभ्यामुत्तरंपद्यत्रयेणाह॰ व्यक्तत्रिज्यावर्गयोरंतरालमाधोव्यक्ताव्यक्तघातान्यसंज्ञः
एतावव्यक्तोत्थवर्गद्वियोगभक्तावाधाद्यस्यवर्गेणयुक्तात्॥४६॥व्यक्तत्रिज्याल्पेन्यपान्यस्यवर्गादाधोनाध
न्मूलमन्याधिकंचेत्॰ हीनंयुक्तंतेनयाप्योत्तरांशान्यानंचेत्तपक्षहीनः परस्तु॥४७॥सौम्यभागेदृग्यमतद्धनु
र्यद्भागाधंस्याद्भूमिवृत्तस्थितेस्तत्॰ अक्षोत्थैर्भैर्योजनैः खांगरामभक्तंलब्धंयोजनान्यंतराल इति॰ व्यक्तत्रि
ज्ययोर्यावर्गांतयोरंतरमाधः स्यात्॰ व्यक्ताव्यक्तयोर्वधान्यसंज्ञः स्यात्॰ एतावाधान्यौ॰ अव्यक्तस्यवर्गेणो
क्तयुक्तेनभक्तौ॰ फलक्रमेणाधाभ्यावेव॰ व्यक्तत्रिज्यातोल्पेसति॰ अन्यस्यवर्गेणयुक्तादाधान्मूलं॰ अन्यथा॰
व्यक्तत्रिज्यातोधिकेसति॰ अन्यस्यवर्गात्॰ आधेनहीनात्॰ मूलंग्राह्यं॰ यत्॰ मूलं॰ यद्यन्यतोधिकंतर्हि दक्षि

४९३

णोत्तरस्थितेदिगंशोसतिक्रमेण॰ तेनान्येनहीनंयुतंमूलंकार्यमित्यर्थः॰ अन्यतोल्पंचेन्मूलंतर्हि उत्तरेदिगंशोस
तितेनमूलेनयुतोनोन्यो॰ दृग्यं॰ द्विविधंस्यात्॰ दक्षिणभागमूलस्यान्यतोल्पस्यासंभवइतिनक्षतिः॰ एतस्यसि
द्धस्यपदंग्राह्यंधनुः स्यात्तत्॰ भूमिगोलपरिधिस्थितेर्योजनैर्निरक्षदेशीयैः॰ स्पष्टभूपरिधिनिरासार्थमे
तद्धनुक्तंगुणितं॰ षष्ट्यधिकशतत्रयेणभक्तं॰ फलं॰ आत्मेष्टस्थानयोरभ्यंतरालेयोजनानिस्फुटानि॥५८॥
॥ ॥ननुप्रश्नपद्यसिद्धांतसुंदरेज्ञानराजदैवज्ञैरुत्तरमुक्तमितिसूचितं॰ तत्कथंदिग्भ्रोवीरविसंगणात्रि
भगुणस्वाक्षघ्नतिभ्यांहृद्व्यक्तोग्रार्कहृतिः फलघ्नतिहृताव्यक्तोयमध्योभवेत्॰ व्यक्ताव्यक्तयमाहतिः शशिपु
त्रस्याव्यक्तवर्गस्यपन्मूलंहारहृतीरितोहरहृतामध्याहितः स्यात्फलं॥७॥व्यक्तभासदलोत्थवर्गविवरंयोज्यं
फलेवर्गितेव्यक्तेभासदलोत्थकेधिकतरेकार्योवियोगस्तयोः॰ तन्मूलंफलयुग्वियुग्घरहृतंसौम्यंत्ययोर्दृग्ज
कातच्चापांशाहृताचतुर्दशमितिः स्पर्शोजनान्यंतरं॥२॥अज्ञातपत्तनपलज्यकयाविभिन्नोविज्ञातपत्तन
पलक्रांतिरर्कभक्ता॰ अभ्यामवेहृतपांतरयोजनज्यासूर्याग्रयेतियदिसेष्टदिशीहदृग्ज्येत्यनेनतद्धनुक्तमुक्त

रमुपेक्षितं· अत्रव्यक्तस्याग्रानउक्तेरज्ञानपत्तनेसादिनाग्रायाउक्तिरुचिता·तथा·तद्रूपयासूर्या
ग्रयायदिइष्टदिशि·इह·इष्टस्थाने·इति·अथमध्योभवदित्यादिदृग्ज्यकेसंतपूर्वंयासाधिताहृग्ज्या
सांतरयोजनस्यादितिदृग्ज्यास्वरूपमुक्तमित्यवधेय·कथंचतच्छायपान्यदेवविरुद्धमुक्तमित्यतआ
ह·सिद्धांतसुंदरेज्ञानराजेनगणकेनतु·द्विधामानंभ्रमान्नोक्तमतएवस्मान्मयोदितमिति·तन्मूलंफ
लयुग्विमुग्धरत्नंसौम्यान्ययोर्दृग्ज्यकेसत्रद्विधामानंभ्रमवशाद्भ्रांतेःपुरुषधर्मत्वात·उक्तंन·तुका
रात्मसक्तमित्यर्थः··अन्यथाधिकतरेकार्यावियोगस्तयोरित्यस्यानुक्तपत्तेः··अस्मात·द्विधामानक
थनाग्रवरूपकत्वात·एतत·तदुक्तभिन्नमिदमानयनंगणितस्योदकेनोक्तंलाघवादितिभावः·ननुव्य
क्तेव्यासदलात्मकेधिकतरेइस्कभयोरुदयोनगणितक्रियोक्तेरग्रतन्मूलमित्यत्रोभयक्रियोसन्नमूल
योरुपस्थितेरप्रतिबद्धत्वात्प्रथममूलपक्षेसौम्यान्यभागक्रमेणफलयुग्वियुगित्यस्यफलेनयुक्तमू
नंमूलमितियुक्तार्थः··द्वितीयमूलपक्षेसौम्यान्ययोरित्यत्रतन्मूलंफलयुग्वियुगित्यस्यक्रमेणानन्वयः

४९४

किंतुप्रत्येकंतेनसौम्ययाम्येवा·फलयुक्तंमूलमितिनिर्विवादमेकंमानं·द्वितीयंतुमूलोनंफलमिदम
पिफलेनवियुगंतरितमित्यर्थेनतदुक्तेवसिद्धमन्यथाव्यक्तेव्यासदलात्मेत्यारितयोरित्यतभागस्य
वैयर्थ्यापत्तेः·वियुगित्यत्रोनितार्थत्वापत्तेश्च·अग्रेउपपत्तवसरेस्फुटीभविष्यत्येतत·तथाचज्ञा
नराजगणकानामभ्रांतत्वात्तदनुक्तंद्विधामानमितिभवदुक्तमसंगतमेवेतिचेन्न·दाहार्थस्यास्प
दिग्धत्वाभावात·द्वितीयमूलपक्षेसौम्यान्ययोरित्यस्यव्यर्थत्वापत्तेश्च·दक्षिणभागेतदसंभवाच्चान्ययोरि
त्यस्यासंलग्नत्वादितिदिक्॥५७॥ ॥उक्तप्रकारंग्रहनतांशसाधनार्थमतिदिशति·इष्टस्थानाक्षज्यका
स्थानाएवंखेटक्रांतिज्याग्रहादुक्तरीत्या·तत्काष्ठांशज्याग्रहादत्रचापभागाइष्टांशास्खेटस्यनम्राइति·
इष्टस्थानीयाक्षज्यास्थानेग्रहस्यक्रांतिज्यायाग्रहणात·तस्यग्रहस्याभिमतदिगंशानांज्यायाग्रह
णाच्चोक्तानयनप्रकारेण·एवं·गणितंक्रियतेतत्रगणितेसिद्धाधनुषोभागाइष्टदिक्स्थग्रहस्यनतांशाः
स्युः·अत्रोपपत्तिः·पूर्वमिष्टदेशस्यग्रहत्वकल्पनेप्रकारस्योपपन्नत्वेनतत्प्रकारेणग्रहक्रांतिज्यादि

ज्याभ्यांनतांशाः स्फुरेबेतिकिंचित्रं॥५०॥ ॥ननुप्रकारेद्विधामानस्याप्रसक्तत्वाद्व्यर्थमेवमहतांदोषापा
दनंकृतमित्यतोधिधामानसंभावनोपपत्तिमुपस्थाप्यतांस्पष्टीकुर्वन्पद्त्रयमाह॰अत्रोपपत्तिः खलुबीजम
ध्येकवर्णमध्याहरणेनबोध्या॰दृग्ज्याप्रमाणंस्वधियाप्रकल्प्यमव्यक्तमस्मान्नतलंप्रसाध्यं॥५१॥अग्राभु
जाभ्यांविपरीतरीत्यात्रैराशिकाच्छंकुरतोस्यवर्गः॰अव्यक्तदृग्ज्याकृतिवर्जितायास्त्रिज्याकृतेस्तत्पदतस्तदुक्ता
॥५२॥समशोधनपूर्वमूलकाभ्यांसमशुद्धादिविधेर्यदाप्तमेतत्॰विबुधैरवगम्यतेत्रदृग्ज्यागणितोक्तिस्तत
वसूपपन्नेति॰अत्र॰योजनानयनप्रकारात्मकोत्तरे॰बीजमध्ये॰भास्करीयबीजग्रंथमध्येएकवर्णमध्यमाह
रणंयदुक्तं॰तेन॰खलुनिश्चयेनोपपत्तिः सुधीभिर्ज्ञेया॰कथंज्ञेयेसतस्तामुपपादयति॰दृग्ज्येति॰स्वबुद्ध्या॰दृ
ग्ज्यायाः प्रमाणमव्यक्तंकल्पनीयं॰अस्माद्व्यक्तात्मिकदृग्ज्यायाः सकाशात्॰अग्राभुजाभ्यां॰विपरीतप्रकारे
ण॰भुजसाधनप्रकारवैपरीत्येनेत्यर्थः॰शंकुतलंसाध्यं॰तथाहि॰त्रिज्याकर्णोदिग्ज्याभुजस्तदादृग्ज्याकर्णोको
भुजइत्यनुपातेनभुजः॰इष्टस्थानाक्षज्यात्मिकक्रांतिज्याकोटावात्मस्थानीयपलकर्णसंबंधानुरोधेनप्र

डाक्टर भाऊ दाजी लक्ष्मण स्मारक संस्था
DR BHAU DAJI MEMORIAL

सिद्धानुपातात्कर्णोग्रा॰अनयोरेकदिग्यंतरंभिन्नदिग्योगइतिसंस्कारात्शंकुतलंस्यादिति॰अतः शंकुत
लात्॰आत्मस्थानीयपलभाभुजेद्वादशकोटिस्तदाशंकुतलभुजेकाकोटिरितित्रैराशिकोल्लेखाच्छंकुः साध्यः॰
अस्यशंकोर्वर्गः॰अव्यक्तात्मदृग्ज्यायाः वर्गोणहीनस्यत्रिज्यावर्गस्यशंकुवर्गत्वात्समानः स्यात्॰उभौ शंकुव
र्गौतुल्यावित्यर्थः॰इतोस्मात्॰समपक्षाभ्यामित्यर्थः॰तदुक्ता॰एवकवर्णमध्यमाहरणप्रकारेण॰समशोधनं
पूर्वंययोस्तादृशाभ्यांपक्षमूलाभ्यांसकाशात्॰पक्षयोः समशोधनंकृत्वोक्तरीत्यानयोर्मूलेग्राह्येइत्यर्थः॰
पुनः समशोधनादिप्रकारात्॰आदिपदाच्छेषाव्यक्तेनोद्धरेद्रूपशोषमित्यस्यसंग्रहः॰यत्॰अव्यक्तमानंप्रा
प्तं॰एतत्॰प्रमाणंसुधीभिः॰अत्र॰प्रश्नोत्तरविषयेदृग्ज्याज्ञायते॰तस्याएवपूर्वमव्यक्तत्वेनकल्पनात्॰नन्वे
वमुत्तरदानप्रकारावगतानद्येतावतोक्तमानयनमुपपन्नंतदसिद्धेरित्यतः॰आह॰गणितोक्तिरिति॰ततः॰अ
व्यक्तमानानयनप्रकारादुपपत्तिस्वरूपादस्मात्॰एवकारः प्रकारांतरावेक्षणनिरासार्थं॰गणितोक्तिः॰उ
त्तरगणितक्रियानिबंधनात्मिकादिग्ज्यार्कभीलादिपद्यचतुष्टयरूपा॰सुष्ठूपपन्ना॥५३॥ ॥मंदबोधा

र्थमव्यक्तानयनक्रियां फक्किकाभिः प्रदर्शयति· यथा दृग्ज्याप्रमाणं यावत्तावत्· या· त्रिज्याकर्णो दिग्ज्या
भुजस्तस्या दृग्ज्याकर्णो कोभुज इति भुजः। या· दि१। अस्मादग्रा संस्कारेणांकुतलं ततोस्मादपि पलभा भुजे
दृग्ज्याकोटिस्तदांकुतलभुजेकाकोटिरि त्रि१ ति रिति शंकुः· तत्रायमनुपातो भुजाग्रयोस्तत्खंडयोः प्रत्ये
कं कृतस्तेन भुजस्थानेत्वव्यक्तसंज्ञो कोऽव्यक्तगुणितत्वादुक्तः। या· अ१। अग्रा स्थाने त्विष्टस्थानाक्षज्या रूपक्रां
तिज्यायाः स्वपलकर्णेनाग्रारूपग्रहणे पूर्वानुपातेन व्यक्तत्वाद्व्यक्त उक्तः। व१। अनयोरव्यक्तयोर
वधिस्थानस्य जंबूद्वीपांतर्गतत्वे इष्टस्थानस्य जंबूद्वीपांतर्गतत्वे च· दक्षिणोत्तरदिगंशांकुस्वरू
पं। या· अ१व१। या· अ१व१। इष्टस्थानस्य नक्षाग्राम्यदिक्स्थत्वे नुतद्रूपं। या· अ१व१। संस्कारणसिद्धं· अथावधिस्था
नस्य व्यक्षादक्षिणस्थत्वे इष्टस्थानस्य व्यक्षात्तदिक्स्थत्वे तु दक्षिणोत्तरदिगंशांकुरूपं। या· अ१व१। या· अ११व१।
इष्टस्थानस्य जंबूद्वीपांतर्गतत्वे नुतद्रूपं॥। या· अ१व१। तत्रावधिस्थानस्य व्यक्षादक्षिणस्थत्वे गणितं ननिब
द्धमावश्यकत्वाभावाज्जंबूद्वीपस्थितावधिगणितव्यक्तशरीत्या तत्सिद्धम्· तद्दिक्स्थपक्षत्रयमुपक्षिप्तं· अथास्य

शंकोर्वर्गो। याव· अव१ या· अ· व२ व१। याव· अव१ या· अ· व२ व१। दृग्ज्यावर्गोनेन त्रिज्यावर्गेण समहृतिप
क्षयोः समशोधनार्थं मासः क्रमेण इष्टस्थानस्य जंबूद्वीपांतर्गतत्वे दक्षिणभागे। याव· अव१ या· अ· व२ व१। उ
त्तरभागे। याव· अव१ या· अ· व२ व१। इष्टस्थानस्य व्यक्षयाम्यस्थत्वे यमेव प याव१ त्रि व१ सः
॥ ॥ ॥ याव१ त्रि व१ याव· अव१ या· अ· व२ व१। अत्र समशोधनार्थं व्यक्तपक्षे प्रथमस्थाने
अव्यक्तवर्गः सैको याव दुर्गगुणः· द्वितीय याव१ त्रि व१ स्थाने व्यक्ताव्यक्तादृतिरूपान्योद्विगुणो याव
दुणोधनमणमणं· व्यक्तपक्षे व्यक्तस्य त्रिज्यातोत्यत्वे धनमाद्योधिकत्वे ऋणं· ततो मूलं महार्थपक्षो यावत्तावद्दुर्गो के
नाव्यक्तवर्गेण सैकेनापवर्तितावव्यक्तपक्षे प्रथमस्थाने याव दुर्गः· द्वितीयस्थाने पर्वर्तितो न्योद्विगुणो याव दु
णः व्यक्तपक्षे पवर्तिताद्यः एतावन्यवर्गयुतौ· आभ्यां मूलं प्रथमपक्षे प्रथमस्थाने याव· द्वितीयस्थाने न्योधन
मणमणमुक्तक्रमेण· व्यक्तपक्षे न्यवर्गयुताद्यान्मूलं प्रथमपक्षे न्याधिकमेव· द्वितीयपक्षे आद्यानादन्य
वर्गान्मूलमन्यस्मादूनमेव· प्रथमपक्षे मूलयोः समशोधनादिष्टदेशस्य जंबूद्वीपांतः स्थत्वे दक्षिणोत्तर

भागयोः क्रमेणामूलमन्योनाद्यं दृग्ज्यामानं · परंतूत्तरभागे · अव्यक्तपक्षमूलस्य यावत्तावद्दृनान्यस्यैव शंकुस्वरू
पर्णत्वनिश्चयेन निश्चितत्वाद्दृन्यमूलस्यासंभवाच्चर्णामानमुक्तमानं चानुपयुक्तं · व्यस्तयाम्यस्थत्वे मूलमन्ययुक्तं ·
यावद्दृनान्यस्यमूलस्यासंभवाद्दृणामानमनुपयुक्तं · द्वितीयपक्षे प्रथमस्थाने मूलोनान्यदृणामानं दृग्ज्यानुपयुक्ता
उत्तरभागे मूलयुक्तोनान्योद्विधामानं · परंतु प्रथममनुपपन्नं · यथोक्तावव्यक्तपक्षमूलस्यातत्वात् · व्यस्तयाम्यस्थ
त्वे मूलयुक्तोनान्योद्विधामानमत्र द्वितीयमनुपपन्नं · उभयथोक्तमानयनमुपपन्नमिति · स्पष्टार्थमेतत् · ज्ञा
नराजोक्तानयनं तु समशोधनानंतरमव्यक्तवर्गस्थानस्य मूलं हारसंज्ञं यावद्दृणं हारभक्तमध्याद्दृरूपफल
स्यवर्गयोजनात्पक्षयोः परं गृहीतं · तत्राव्यक्तपक्षे रूपस्थाने परं फलमेव · अव्यक्तपरफलयोर्द्विघ्नोघातो यावद्
दृणितमध्यसमइति तन्नाशस्तेनाव्यक्तपक्षमूलं [या · हा १ फ १] वा [या · हा १ फ १] व्यक्तपक्षस्य मूलं व्यक्तव्यासदलोत्थ
वर्गविवररूपानपवर्तितायस्य धनत्वे फलवर्गयोजनाद्दृणात्वे फलवर्गाद्ययोरंतरान्मूलमनयोः समशोधना
त्फलयुग्विषुग्घरस्तत्तमिस्फपपन्नं · परंतु फलान्मूलाल्पत्वे सौम्यभागे मूलोनं फलं हरस्तत्तमिति द्वितीयमानमुपे

४८५

सितमेव · षष्ट्यधिकशतत्रयांशैर्भूपरिधियोजनानि तदा दृग्ज्याध्यनुभागैः कालीसनुपातेनाभिमतदेशयोरंतरयोज
नान्युपपन्नानि ॥ ॥ अत्रापि दृष्टांतप्रश्नं ज्ञानराजोक्तमनुवदति · गोदातीरगतात्मतीर्थविषये सत्प्रश्नवेराक्ष
मेभानोर्मांहरिसंगतस्य हरिदिग्नागाश्रितांबुहिमे · पादोनागमिताक्षभा पितृवदिक्कांशी कियद्योजनैरेकेना
नयनेन तद्दृदसखे वांछामि वाराणसीमिति · गोदावरीतीरस्थितं यदात्मसंज्ञं तीर्थं तदेव · रूपतृतीयांशास
हिताश्चत्वारोक्षभा यत्रैतादृशो हरिसंगतस्य · स्थिरसिंहराशिस्थस्य सूर्यस्य दृग्ज्यांगुलशंकुसंबंधिनी छाया
पूर्वदिक्प्रदेशास्थिता · मम · किं मानां कथय · इदमुदाहरणमिष्टस्थानाक्षज्यकास्थानयोर्वक्रांतिज्याग्रहादि
साधकस्य ज्ञेयं · प्रकृतोदाहरणप्रश्नमाह पादोनेति · रूपचतुर्थांशोनाः षट् · तत्प्रमाणाक्षभा यत्रैतादृशी · आ
त्मतीर्थादिशानरिक्षाकांशीमुक्तिपुरीषुप्रेष्ठा · कियत्प्रमाणो योजनैस्तिष्ठति · तत् · योजनसंख्याप्रमाणं · अपिः
पूर्वप्रश्नेन समुच्चयार्थः एकेनानयनेन · येन प्रकारेणछायोपजीव्यदृग्ज्यामानयसि तेनैव प्रकारेणेत्यर्थः ·
हे सखे · योजनोपजीव्यदृग्ज्यानयनद्वारा कथय · ननु भूगोलेनेकप्रदेशानां सत्वात्तेषु कांश्चिदाग्रहः किम

र्थमित्यतश्चाहवाछामीति·वाराणसीमिछामि·तथाचश्रुतिस्मृतिपुराणेषुवाराणसीमरणस्यमोक्षनिदानभूत
त्वेननिर्णीतत्वात्तत्रतवासनस्यसदातत्स्मरणेनसैवप्रश्नविषयेममोपस्थितेतिभावः·एतत्कृतिनंच·आसन्नी
र्यपलभा५।२०पलकर्णाः१२।५५।३०काश्यांपलभा५।५५दिग्ज्या१३५।३।२७अव्यक्तः१।५७।३०व्यक्तः२५५।१७
।२३त्रिज्यावर्गः३६५८१व्यक्तवर्गः६०१८३।२५।६अग्राघः२३००२।२५।६अन्यः५८०।२५।२८अपवर्त्तांकः५।५।६
लघ्वाघः५७०२।१५।१७लघ्वन्यः७७।२१।५०अन्यवर्गः९८७३।१०।५७मूलं७०।३०।१८योजनज्या२८।५१
।३२योजनांशाः८।५१।३१योजनानिभर्गवर्गः१२१।२३।५१प्रसंगात्स्वविषयकोदाहरणपद्यमपि·श्रीमछा
हजहाँवनींद्रनगरात्साद्धंगमिष्यसभाहछन्दैवबलान्मुनीश्वरइमामाग्नेयदिक्स्थापुरीं॥पादोनागमिता
सभामपिनिजप्राप्तांकियद्योजनेर्त्तानुंवांछतिमुक्तिदांगणकतांवाराणसींकीर्त्तय॥१॥काशीप्रवेशपद्यंच·
श्रीमछाहाजहाँनतःस्वसमयेलब्धाविदायंतपस्याख्येमासिमुनीश्वरो११७मनु१५गुणःपंचाश्व७५युक्तःसिते॥
उक्तांको१७१३मितयातविक्रमराकाद्काव्यगौरीदिनेस्थानंदारयवनोद्विजाश्रितइमंविप्रोतिरात्स्वालयमिति·॥

४९८

५६॥ ॥नन्वेवंप्रतिपुरुषंबुद्धेर्वैचित्र्येणप्रश्नभेदात्तेषांचनेष्यसाभावात्तदुत्तराणांचतथात्वाकल्पकोटिशतैरप्यसाध्या
यस्यासमाप्तिरित्यतःसर्वप्रश्नसाधारणमेकमुत्तरंवदन्नुत्तराण्यपसंहरति·एवंसुधीर्दुष्टतरातिसुस्पष्टाग्निसं
तप्तमनाहृदग्नीन्·निर्वापयेदुत्तरवारिसेकात्स्वकल्पनानूतनमेघजाताद्रिति·सुधीः·कल्पकोगणकः·दुष्टत
रश्चासावतिसुस्पष्टतस्यस्वज्ञानोत्कर्षेणान्यानभिज्ञांस्तिरस्कुर्वतः·एताः·प्रश्नाः·तदुपायेग्नयस्तैः संतप्तज्व
लितंमनोयस्यैतादृशाः·स्वहृदयस्याग्नीनित्यर्थः·उत्तरवारिसेकात्·उत्तररूपजलसेचनवशात्·एवं·उक्तोत्तरा
णांरीत्या·निर्वापयेछमयेत्·ननूत्तराणामभावात्तत्सेचनासंभवोन्यथाहृदयाग्नेरनुत्पत्तेरित्यतउत्तरवारि
सेकविशेषणमाहस्वकल्पनेति·स्वतएवादितायेकल्पनात्मकानवीनामेघास्तेभ्योजाताद्रित्यर्थः·साधो
र्विनयपूर्वकप्रश्नेनहृदयाग्नेरसंभवात्तत्प्रश्नानंदेनप्रकृतहृदयस्यशीतलत्वात्तत्प्रश्नकर्तुःसज्जनस्यहृद
यस्थितंतत्समाधानचिंताग्नीन्निर्वापयेदितिध्येयं·तथाचोक्तप्रश्नोत्तररीत्यायथावसरंयथाक्रान्तान्प्रश्नान्स्व
कल्पनयायथावसरमुत्तरयेदितिभावः॥२५५॥ ॥प्रश्नाध्यायमुपसंहरति·इतिसिद्धांततत्त्वार्थेमुनीश्व

रकृतेभवत्·सिद्धांतसार्वभौमेस्मिन्नग्राध्यायोतिकल्पनइति·अप्रसंतंकल्पनंयस्मिन्नित्यर्थः·शेषंपू
र्ववदेव·उत्तरार्द्धप्रश्नसापेक्षत्वात्प्रश्नप्राधान्यात्प्रश्नाध्यायइत्युक्तमितिध्येयं·॥३॥ ॥सिद्धांतसार्वभौ
मीयमुत्तरार्द्धंमुनीश्वरः॥ज्ञानंदविवृतवान्स्वबुद्ध्यानिर्मलार्थदं॥१॥ ॥श्रीः॥ ॥अथपातादि
कारमूगोलाध्याययोः पूर्वोत्तरार्द्धोक्तिमादिभागयोः संबंधप्रदर्शनपूर्वकमुत्तरार्द्धीयप्रथमभागानुपसं
हरन्पूर्वार्द्धोत्तरार्द्धैक्यात्मकैकयंथप्रचयविघ्नोपशमायनिष्पन्नग्रंथरूपवस्तुनिर्देशाशीर्वादात्मकं
मंगलंपद्याभ्यांनिबध्नाति·प्रथमार्द्धसिद्धपरपातसुलभ्यावनिगोलएषसमयावगमार्थं·उररीकृताखि
लसुयंत्रधरः सद्गुरुषष्ठकोत्तरविभुर्बुधमान्यः॥२५६॥ज्योतिःपरब्रह्मसुबोधनुषमुनीश्वरानुग्रहसं
गृहीतः·सत्काव्यवद्भ्वनुराननांतःस्थितश्चिरंजीवतुसार्वभौमइति·एषः·निर्मितःसार्वभौमः·सिद्धांत
सार्वभौमोग्रंथः·चिरं·निरवधिकं·जीवतु·तिष्ठतु·स्थितिफलसूचकंविशेषणमाहप्रथमार्द्धेति·पूर्वार्द्धग्रं
थेनिष्पन्नः परमः सूर्यग्रहणफलकः पातस्तस्मात्·तन्निरूपकाधिकारोत्तरमित्यर्थः·सुष्ठु·अनायासेन·प्रा

डाक्टर भाऊदाजीदुर्लभ्यग्रंथसंग्रहालय
DR BHAU DAJI MEMORIAL

४९६

पंपृथ्वीगोलरांस्थानंयस्माज्जनैरितिशेषः·लोकानांसमयस्थाननिमित्तं·उररीकृतोंगीकृतः समग्राणिसुष्ठु।
यंत्राणिधारयतीतिधरस्तन्निरूपकाधिकारोयेनासौ·उत्तरार्द्धद्वितीयाध्यायस्ययंत्राधिकारत्वात्·संतोबह
वोयेषष्ठकाः·नानाविधप्रश्नकर्त्तारस्तेषामुत्तरविषयेसमर्थः·अतएवबुधैरादृतः·ननुकल्पितस्यास्यबु
ध्यमान्यत्वमसंभवीत्यतःपरंपरयासमूलत्वमाहज्योतिरिति·ज्योतिःशास्त्ररूपंयत्परब्रह्मतद्दर्शयत्वत्·त
स्यसम्यग्ज्ञानंतेनसंतुष्टायोमुनीश्वरः·सिद्धांतशिरोमणिमरीचिकर्त्ता·तेनेश्वरानुग्रहात्संगृहीतः·निर्मितः·
तथाचज्योतिःशास्त्रांतर्गतानेकसिद्धांतविचारान्निर्णीतसारोयंप्रामाणिकत्वात्प्रामाणिकबुधानादृतो
नैवेतिभावः·ननुभिमतार्थप्रतिपादकहानामभावात्कथमस्यबुध्यमान्यत्वमतआहसत्काव्यद्वइति·सद्भि
र्लक्षणलक्षितैःकाव्यैःपद्यैर्निबद्धार्थइत्यर्थः·स्थित्यधिकरणमाहचतुरेति·चतुराःसुबुद्धयः·तेषांमुख
स्वांतयोःशब्दार्थक्रमेणस्थितः·अस्यसार्वभौमोपमत्वसूचनायश्लेषेणद्वितीयार्थः·एषः·प्रसिद्धःसार्व
भौमःशाहजहाँख्यः·दीर्घकालं·जीवतु·प्रथमार्द्धेन·सेने तसिद्धोयःपरस्यशत्रोःपातोनाशस्तेनसुष्ठु

डाक्टर भाऊदाजीदुर्लभ्यग्रंथसंग्रहालय
DR BHAU DAJI MEMORIAL

प्राप्तः पृथ्वीगोलो येनासौ समयज्ञानार्थमंगीकृताः समग्राः सुयंत्रधराः कालविशेषघट्यादिबोधक
मनुष्यायेन एकसमयावच्छेदेन संतः स्वाधिकारकार्यसमर्थाः येबहवः पृच्छकाः अधिकारकार्ये
संशयमापन्नाः संतः सार्वभौमं प्रति संदेहनिवेदनरूपविज्ञप्तिकारकास्तेषामेकसमयावच्छे
दोत्तरविषयाज्ञापनेतिसमर्थः बुधाः स्वस्वविद्याभिज्ञाः पंडितदैवज्ञगणकमौहूर्तिकसंगीतज्ञा
पुर्वेदज्ञाः आदृतायेनासौ ज्योतिस्तेजः स्वरूपं परब्रह्मतत्स्यसुष्ठुज्ञानेन संतुष्टो योमुनीश्वरो या
गीश्वरस्तस्यानुग्रहेणप्रसादेनसंगृहीतः युक्तोतएवसार्वभौमपदवीमधिरूढः सत्काव्यैर्बहुः क
विभिः स्वकाव्यैतस्यवर्णितत्वात् चतुराननश्चतुर्मुखोब्रह्मातस्यांतःकरणस्थितः तत्सृष्टिकालेब्र
ह्मणायंसार्वभौमोविधेयइतिमनसिस्थापितः यद्वा चतुरा काचननायिकातदनुरागवतीतस्यामु
खांतःकरणयोर्नामस्वरूपध्यानविषयत्वेनस्थितइति॥२५७॥ ॥नन्वत्रोक्तस्यपूर्वग्रंथोक्ताभिन्न
त्वात्तदधिकत्वाभावाच्चव्यर्थोयंग्रंथइत्यतः सार्वभौमग्रंथोपसंहारमाहमाद्रेमासेशुक्लपक्षेहिति

५००

ष्यामिंदोर्वारेमूलभेयोभवत्तं अष्टांगाक्षस्मामितेशाकयातवर्षेकाषीत्सार्वभौमंमुनीराइति अहिमि
तिष्यामष्टम्यांशालिवाहनराज्यारंभः शाककालस्तस्यसंबंधिनिद्वात्रिंशदूनषाडशशतमितेगतव
र्षेसतियोग्रंथोनिष्पन्नोभवत्तंग्रंथंमुनीश्वराः सिद्धांतग्रंथेषु सार्वभौमसंज्ञमकाषीत् यथामुनिप्रो
क्तराजयोगकालेजातः पुरुषः सार्वभौमोभवतितथात्तकालजातोग्रंथोमुनीश्वरोक्तः सिद्धांतसार्वभौ
मइतितात्पर्यार्थः अष्टम्यांग्रंथलिखनसमाप्तकावध्यपनाप्रसंगइतिनदोषः तथाचेतद्ग्रंथनिष्पत्तिका
लपूर्वकालिकग्रंथेभ्यः सर्वजनावगतेभ्योस्यविसदृशत्वादतिचमत्कारकारितयाप्रेक्षावदादृतत्वेन
नायंग्रंथोव्यर्थइतिभावः॥२५८॥ ॥अतएवपंडिताअतिसार्वभौमावलोकनमुपदिशति भोः पंडिताः
पश्यतसार्वभौममालोकमात्रादतिदुर्गामार्थं ददानमेनंनिखिलास्परानांनिमित्तभूतंसकलाभिपूज्य
मिति भोः पंडिताः एनं निष्पन्नमभिषिक्तंच सार्वभौमंग्रंथं पृथ्वीपतिंच पूर्वं दृस्पष्ट दर्शनप्रयोज
नसूचकविशेषणद्वयमाह आलोकमात्रादिति दर्शनादेव अतिदुर्ज्ञेयमर्थं पूर्वग्रंथविभावनाक्ल

त्रासाध्यंपदार्थविशेषज्ञानं॰अतिदुःप्रापद्रव्यार्थंचदानं॰अस्मादर्शनादेवानायासेनदुरधिगमा
र्थप्राप्तिःस्यादित्यर्थः॰समप्राणामधिकाराणांनिमित्तकारणीभूतं॰अधिकारप्राप्तिःस्यादित्यर्थः॰दू
रंकथमवगतमित्यतोविशेषणमाहसकलेति॰समग्रैःकलायुक्तैः॰स्वस्वविद्याकुशलैःसेव्यं॰सिद्धां
तशिरोमणिप्रभृतिभिर्निरन्तरमवलोकनादिनासेव्यं॰तथाचविनाप्रयोजनंसेवायाअनुचितत्वा
त्सकलसेव्यतयेतत्प्राप्तिकरोयमनुमितइतिभावः॥२५७॥ ॥अमरुतंसार्वभौमग्रंथंपरमेश्वरा
यार्पयति॰मयासार्वभौमोमुनीन्द्रोनभक्ताजगन्नाथपादाब्जयोरर्पितस्त॰अनेनप्रसन्नोभवत्वंत्वदर्हान्
भिज्ञस्यमेसर्वविद्याप्रधानेति॰भोजगन्नाथ॰परमेश्वर॰मया॰मुनीश्वरेण॰विश्वरूपापरनामकेन॰सार्वभौ
मोयंग्रंथोनिर्मितः॰ते॰तव॰चरणकमलयोर्भक्त्या॰आराध्यज्ञानरूपया॰अर्पितः॰अनेनेतदर्पणेनमम
त्वंप्रसन्नोभव॰मांसंसारबंधान्निर्मुक्तंकुर्विति॰भावः॰ननुमत्सेवयामोक्षोनत्वेतदर्पणेनसतोविशेषणा
त्स्वस्याहत्वदर्हानभिज्ञस्येति॰त्वत्पूजायाअजानतः॰तथाचत्वंकृपालुर्भूत्वेत्सेवानभिज्ञमेतदर्पणेने

५०१
भ०

वमुक्तंकुर्विति॰भावः॰ननुमुक्तभूमिपतेरयंग्रंथोदेय॰सतवगुणेनप्रसन्नोभिमतमुक्तातिरिक्तंकिंचिद्दास्य
त्येवाहंत्वहुणानभिज्ञएतद्दानेनकथंतोष्यामीत्यतःसंबोधनमाहसर्वविद्याप्रधानेति॰सर्वविद्यासुप्रधान॰
सर्वज्ञत्वादित्यर्थः॰तथाचत्वमेवजगत्प्रभुः सर्वज्ञोमां कृपयासमुद्धर॰अन्यस्यतुत्वत्समानत्वाभावा
न्मत्कार्यकरणमशक्यमेवेतिभावः॰अनेनपद्येनद्वितीयश्लिष्टार्थेनपुत्रनिमित्तंग्रंथःकृतइत्युक्तं॰तथा
हि॰हेजगन्नाथशर्मन्॰मयामुनीश्वरेण॰ते॰तुभ्य॰सार्वभौमोयंग्रंथोर्पितोदत्तः॰किमर्थंमत्पदीयतेइत्य
तः॰मे॰मम॰पादकमलयोर्भक्त्या॰मत्सेवाकरणात्तुभ्यंदत्तइतिभावः॰एतेनग्रंथदानेनत्वंजगन्नाथशर्मा
प्रसन्नःमनस्यज्ञानकलुषंदूरीकृत्यस्वज्ञानाद्रोनप्रसन्नमनाःभव॰ननुसुखकर्तृवस्तुदानंयुक्तंनास्यदा
नंसमुचितंसुखजनकत्वाभावादित्यतआहत्वदर्हानभिज्ञस्येति॰त्वद्योग्यवस्तुनःसुखजनकस्यानभि
ज्ञस्यममेसर्वः॰तथाचमयास्वेच्छयादत्तोननवेच्छयेतिभावः॰ननुत्वदत्तोयंममकिंकरिष्यतीत्यतआहस
र्वविद्याप्रधानेति॰सर्वविद्यास्वदर्शेतिसंबोधनं॰तथाचविद्यासुपरिच्छेदाभावान्नोपातिःशास्त्रपरिच्छे

राभिज्ञतामयंतवकरिष्यति·तथाचविधेवमानार्थ्यपत्रः सुखानामितिभास्कराचार्योक्तात्वदभिमतंभ
विष्यतीतिभावः॥२६॥ ॥प्रथमार्द्धसिद्धत्वादिपंचपद्यानांसिद्धांतसार्वभौमानंतर्गतत्वप्रतीतेरेषा
मपिसार्वभौमांतर्गतत्वसिद्ध्यर्थंतत्सूचितग्रंथसमाप्तिमाह·इतिश्रीसकलगणकसार्वभौमरंगना
थज्योतिर्वित्पुत्रविश्वरूपापरनामकमुनीश्वरज्योविर्विद्विरचितःसिद्धांतसार्वभौमःपरिपूर्णतामग
मदिति·प्रधानेत्यत्रपरिपूर्णतांसिद्धांतसार्वभौमोगमदित्यर्थः·ग्रंथस्यसार्वभौमत्वेहेतुगर्भंविशे
षणमाह·श्रीति·स्पष्टं॥ ॥श्रीः॥ ॥त्रिमल्लसूनुर्जयतिद्विजेंद्रोबल्लालसंज्ञःशितिकंठभक्तः॥यः
संततंरुद्रजपातिसंगाद्भास्तमहोमूर्त्तमिवावभाति॥१॥तत्पुत्रोरंगनाथोगणकगणवृतःसूर्यसि
द्धांतगूढव्याख्यानस्यप्रकर्त्तासमभवदखिलभूमिगोलेप्रसिद्धः॥यंकाश्याः·षोतकर्माचरणवशात
याशिष्यमान्यंवदान्यंभ्रस्ताप्याकृतवान्स्वभवलयवलनः–अहेतोर्निवासे॥२॥सिद्धांतसार्वभौमस्य
स्वकृतस्यतदात्मजः॥मुनीश्वरोविवृतवानाशयंप्राज्ञतुष्टये॥३॥मुनीश्वराः११०शाक्र९४गुणानवो

५०२
५०३

५०३

गर्ह्यपुताःशाकाद्विक्रमसूर्यतुल्याः॥काव्यस्यबोधिन्यहगाशायाख्यांश्रीसार्वभौमस्यवृत्तिंस्वकुर्व
न्॥४॥द्विमुनितिथिशाकेबोधिनीशुक्रवारेविवरणमभवच्चाशायाख्यंसुपूर्णं॥तदिहबुधजना
नांमानसेनिर्मलोघेस्फुरदविरतमेतन्मंगलंशांतनोतु॥५॥योनिर्मितावस्यपरःश्रमोभूदिमं
विजानातुकथंमनुष्यः॥अतोममासौकरुणामृताब्धेतोषायभूयात्कमलापतेते॥६॥ ॥ ॥ ॥
श्रीरस्तु॥ ॥प्रविघ्नमस्तु॥ ॥ग्रंथसंख्यासहस्रं ५५००॥ ॥श्रीरामःशरणममैतिपरमोमं
त्रोयमष्टाक्षरः॥ ॥श्रीः॥ ॥श्रीविश्वनाथायनमः॥ ॥शुभंभवतु॥ ॥ ॥ ॥

इदंपुस्तकंसंगमेश्वरकरोपनामकरामदैवज्ञसुतनृसिंहदैवज्ञस्यसाग्निचितसर्वपृष्ठातुयाजिनस्य[illegible]शाके १७८
मार्गशीर्षशुक्ल ७ श्रीकाशीविश्वेश्वराणसीक्षेत्रेलिखितंस्वार्थपरार्थंच

५०३

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

देवाः अनयोरुदयास्तसूत्रेप्रायुक्तेतयोरंतराले। योक्ताकुज्यासमांतरेणावस्थिता। तया। कुज्यया समसूत्ररूपया। कला। उक्तरीत्या। उदग्दक्षिणगोलगेकुज्यायुतोनाकालिकेतिप्रकारेण। हीनयुक्ता। सा। पूर्वोक्ता। हृतिः कुत इत्यत तत्स्वरूपमाह ग्रहेति। ग्रहस्थानस्योदयास्तसूत्रयोरंतरालसूत्रस्वरूपा। नन्वेवमस्याउन्नतकालसूत्ररूपत्वेनलाघवादुन्नतज्ययैवसिद्धेरेतद्गौरवेणसाधनमयुक्तमितिचेन्न। स्योदयास्तसूत्रस्याहोरात्रवृत्तमध्यसूत्रत्वाभावात्तदवधिसूत्रस्योन्नतज्यात्वासिद्धेः। शंकुपपत्तिमाह अस्याइति। कर्णरूपहृतेः सकाशा दसष्टेत्रानुपाताच्छंकुरूपकोटिः स्यादेवेत्यर्थः ३६

MEMORIAL